अथवा अन्य अर्थ कहै हैं-प्रणम्य नमस्कार करि। कं? किसहि सिद्धं कहिये सिद्ध भया वा निष्ठित संपूर्ण भया वा निष्पन्न जो होना था सो हूवा वा कृतकृत्य जो करता था सो जानै कीया वा सिद्धसाध्य सिद्ध भया है साध्य जाकैं ऐसा सिद्धपरमेष्ठी बहुत हैं तथापि जाति एक है तातैं द्वितीया विभक्तिका एकवचन कह्या तिह करि सर्वक्षेत्रविषैं सर्वकालविषैं सर्वप्रकारकरि सिद्धनिका सामान्यपनैं करि ग्रहण करना सो सर्वसिद्धसमूहकौं नमस्कार करि जीवका प्ररूपण करौं हौं ऐसा अर्थ जानना। सो कैसा है? शुद्धं कहिये ज्ञानावरणादि आठ प्रकार द्रव्यभाव स्वरूप कर्मकरि रहित है। बहुरि कैसा है? जिनेंद्रवरनेमिचंद्र-अनेक संसारवन संबंधी विषम कष्ट दैनेकौं कारण कर्म वैरी ताहि जीतैं सो जिन बहुरि इंदन कहिये परम ईश्वरताका योग ताकरि राजन कहिए शोभै सो इंद्र बहुरि यथार्थ पदार्थनिकौं नयति कहिये जानै सो नेमि कहिये ज्ञान, वर कहिए उत्कृष्ट अनंतरूप जाके पाइए सो वरनेमि बहुरि चंद्रयति कहिए आह्लादरूप होइ परम सुखका अनुभव सो चंद्र इहां सर्वत्र जाति अपेक्षा एकवचन जानना सो जो जिन सोई इंद्र सोई वरनेमि सोई चंद्र ऐसा जिनेंद्रवरनेमिचंद्र सिद्ध है। बहुरि कैसा है? अकलंकं कहिए नाही विद्यमान है कलंकं कहिए अन्यमतीनिकरि कल्पना कीया दोष जाकै ऐसा है। बहुरि कैसा है? गुणरत्नभूषणोदयं गुण कहिए परमावगाढ सम्यक्त्वादि आठ गुण तेई भए रत्न आभूषण तिनिका है उदय कहिए अनुभवन वा उत्कृष्ट प्राप्ति जाकैं ऐसा है।

अथवा अन्य अर्थ कहैं हैं-प्रणम्य नमस्कारकरि कं? किसहि? कं कहिए आत्मद्रव्य ताहि नमस्कारकरि जीवका प्ररूपण करौं है। कैसा है? अकलं कहिये नाही विद्यमान है कल कहिये शरीर जाके ऐसा है। बहुरि केसा है? सिद्धं कहिए नित्य अनादि निधन है। बहुरि कैसा है? शुद्धं कहिये शुद्धनिश्चयनयका गोचर है। बहुरि कैसा है?

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जिनेंद्रवरनेमिचंद्रं–जिन जे असंयत सम्यग्दृष्टी आदि तिनका इंद्र कहिये स्वामी है, परम आराधने योग्य है। बहुरि वर कहिये समस्तपदार्थनिविषैं सारभूत है। बहुरि नेमिचंद्र कहिये ज्ञान सुखस्वभावकौं धरै है। सो जिनेंद्र सोई वर सोई नेमिचंद्र ऐसा जिनेंद्रवरनेमिचंद्र आत्मा है। बहुरि कैसा है ? गुणरत्नभूषणोदयं गुणानां कहिये समस्त गुणनिविषैं रत्न कहिये रत्नवत् पूज्य प्रधान ऐसा जो सम्यक्त्वगुण ताकी है उदय कहिये उत्पत्ति जाकैं वा जातैं आत्मानुभवतैं सम्यक्त्व हो है तातैं आत्मा गुणरत्नभूषणोदयं है।

अथवा अन्य अर्थ कहै हैं–प्रणम्य नमस्कारकरि, कं ? किसहि ? सिद्धं कहिये सिद्ध परमेष्ठीनिके समूहकौं, सो कैसा है ? शुद्धं कहिये दग्ध किए हैं आठ कर्ममूल जिहि। बहुरि किसहि ? जिनेंद्रवरनेमिचंद्रं जिनेंद्र कहिये अर्हंत परमेष्ठीनिका समूह सो वराः कहिये उत्कृष्ट जीव गणधर चक्रवर्ती इंद्र धरणेंद्रादिक भव्यप्रधान तेई भए नेमि कहिये नक्षत्र तिनिविषैं चंद्र कहिये चंद्रमावत् प्रधान ऐसा जिनेंद्र सोई वरनेमिचंद्र ताहि अर्हत्परमेश्वरनिके समूहकौं, सो कैसा है ? अकलंकं कहिए दूरकीया है तरेसठिकर्मप्रकृतिरूपमलकलंक जानै ऐसा है। केवल तिसहीको नमस्कार करि नाही, बहुरि गुणरत्नभूषणोदयं गुणरूपी रतन सम्यग्दर्शन ज्ञान चारित्र तेई भए भूषण कहिए आभूषण आभरण तिनिका है उदय कहिए समुदाय जाके ऐसा आचार्य उपाध्याय साधुसमूह ताकौं ऐसैं सिद्ध अरहंत आचार्य उपाध्याय साधुरूप पंचपरमेष्ठीनिकौं नमस्कार करि जीवका प्ररूपण करौ हौं।

अथवा अन्य अर्थ कहै हैं—प्रणम्य कहिये नमस्कार करि कं कहिए किसहि, जीवस्य प्ररूपणं कहिए जीवनिका निरूपण वा ग्रंथ ताहि नमस्कार करि कहौं हौ। सो कैसा है ? सिद्धं कहिए सम्यक् गुरुनिका उपदेश पूर्वकपनैं करि अखंडित प्रवाहरूपकरि अनादितैं चल्या आया है। बहुरि कैसा है ? शुद्धं कहिए प्रमाणतैं अविरोधी अर्थका प्रतिपादकपनैं करि पूर्वापरतैं प्रत्यक्षतैं अनुमानतैं आगमतैं लोकतैं निजवचनादितैं विरोध तिनिकरि अखंडित है। बहुरि कैसा है 'जिनेंद्रवरनेमिचंद्रं–जिनेंद्र कहिये सर्वज्ञ सो है वर कहिए कर्ता जाका ऐसा जिनेंद्रवर कहिए सर्वज्ञप्रणीत है। इस विशेषणकरि वक्ताके प्रमाणपनातैं वचनका प्रमाणपना दिखाया।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बहुरि यथावस्थित अर्थकौं नयति कहिए प्रतिपादन करै प्रकासै सो नेमि कहिए। बहुरि चंद्रयति कहिए आह्लादित करै विकासै शब्द अर्थ अलंकारनिकरि श्रोतानिके मनरूपी गद्दू (कमल) लनिकौं सो चंद्र कहिए जिनेंद्रवर सोई नेमि सोई चंद्र ऐसा जिनेंद्रवरनेमिचंद्र प्ररूपण है। बहुरि कैसा है? अकलंकं कहिए दूरहीतैं छोड्या है शब्द अर अर्थ गोचर दोषकलंक जिहि ऐसा है। बहुरि कैसा है? गुणरत्नभूषणोदयं--गुणरत्न जे रत्नत्रयरूप भूषण कहिये आभूषण तिनकी है उदय कहिए उत्पत्ति वा प्राप्ति हम आदि जीवनिकै जातैं ऐसा गुणरत्नभूषण प्ररूपण है।

अथवा अन्य अर्थ कहै हैं—चामुंडरायकै जीवप्ररूपणशास्त्रका कर्तापनैका आश्रयकरि मंगलसूत्र व्याख्यान करिए है। भावार्थ इस गोम्मटसारका मूलगाथाबंधग्रंथकर्ता नेमिचंद्र आचार्य है ताकी टीका कर्णाटकदेशभाषाकरि चामुंडराय करी है ताकै अनुसारि केशवनामा ब्रह्मचारी संस्कृतटीका करी है सो चामुंडरायकी अपेक्षा इससूत्रका अर्थ करिए है—अहं जीवस्य प्ररूपणं वक्ष्यामि मैं जु हौं चामुंडराय सो जीवका प्ररूपण रूप ग्रंथका टिप्पण ताहि कहौंगा। किं कृत्वा? कहाकरि? प्रणम्य नमस्कार करि, कं? किसहि? जिनेंद्रवरनेमिचंद्र जिनेंद्र है वर कहिए भर्ता स्वामी जाका सो जिनेंद्रवर इहां जिन कहिये कर्मनिर्जरासंयुक्त जीव तिनि विषै इंद्र कहिए स्वामी अर्हंत सिद्ध, बहुरि जिन हैं इंद्र कहिए स्वामी जिनिका ऐसै आचार्य उपाध्याय साधु ऐसैं जिनेंद्र शब्दकरि पंच परमेष्ठी आए तिनिका आराधनतैं उपजैं जे सम्यग्दर्शनादिक गुण जिनिकरि संयुक्त अपना परमगुरु नेमिचंद्र आचार्य ताहि नमस्कारकरि जीव प्ररूपणा कहौंगा। सो कैसा है? सिद्ध कहिये प्रसिद्ध है वा वर्तमान कालविषै प्रवृत्तिरूप समस्त शास्त्रनिमैं निष्पन्न है। बहुरि कैसा है? शुद्धं कहिये पचीस मलरहित चारित्र जाकै पाइये है वा देश कुल जातिकर शुद्ध है। बहुरि कैसा है अकलंकं कहिए विशुद्ध मन वचन काय संयुक्त है। बहुरि कैसा है? गुणरत्नभूषणोदयं-गुणरत्नभूषण कहिए चामुंडराय राजा ताकै है उदय कहिये ज्ञानादिकको वृद्धि जातैं ऐसा नेमिचंद्र आचार्य है। ऐसैं इष्टविशेषरूप देवतानिकौं नमस्कार करना है लक्षण जाका ऐसा परम मंगलकौं अंगीकार करि याकै अनंतर अधिकारभूत जीवप्ररूपणके अधिकारनिकौं निर्देश करै हैं ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गुणजीवा पज्जत्ती पाणा सण्णा य मग्गणाओ य।
उवओगोवि य कमसो वीसं तु परूवणा भणिदा ॥ २ ॥

गुणजीवाः पर्याप्तयः प्राणाः संज्ञाश्च मार्गणाश्च।
उपयोगोऽपि च क्रमशः विंशतिस्तु प्ररूपणा भणिताः ॥ २ ॥

जी० प्र०—अत्र चतुर्दश गुणस्थानानि, अष्टानवतिर्जीवसमासाः, षट् पर्याप्तयः, दश प्राणाः, चतस्रः संज्ञाः, चतस्रो गतिमार्गणाः, पंचेंद्रियमार्गणाः, षट् कायमार्गणाः, पंचदश योगमार्गणाः, तिस्रः वेदमार्गणाः, चतस्रः कषायमार्गणाः, अष्टौ ज्ञानमार्गणाः, सप्त संयममार्गणाः, चतस्रः दर्शनमार्गणाः, षट् लेश्यामार्गणाः, द्वे भव्यमार्गणे, षट् सम्यक्त्वमार्गणाः, द्वे संज्ञिमार्गणे, द्वे आहारकमार्गणे, द्वे उपयोगमार्गणे इत्येताः जीवप्ररूपणा विंशतिर्भणिताः। अत्र गुण्यते-परिच्छिद्यते द्रव्याद् द्रव्यांतरमनेनेति गुणः। कर्मोपाधिसापेक्षज्ञानदर्शनोपयोगचैतन्यप्राणेन जीवंतीति जीवाः। ते जीवाः सम्यगासते एष्विति जीवसमासाः। परि-समंतात्, आप्तिः पर्याप्तिः शक्तिनिष्पत्तिरित्यर्थः। जीवंति-प्राणंति जीवितव्यव्यवहारयोग्या भवंति जीवा यैस्ते प्राणाः। आगमप्रसिद्धा वांछा संज्ञा अभिलाष इति यावत्। यकाभिः यासु वा जीवा मृग्यंते ता मार्गणाः, मार्गयिता भव्यपुंडरीकस्तत्त्वार्थश्रद्धालुरित्यर्थः, मृग्याः चतुर्दशमार्गणाविशिष्टात्मानः। मृग्यस्य कारणतां अधिकरणतां वा प्राप्ता गत्यादयः मार्गणाः। मार्गणोपायो ज्ञानदर्शनसामान्यमुपयोगः। एतासां प्ररूपणानां साधारणार्थप्रतिपादनमुक्तं ॥ २ ॥ अथ संग्रहनयापेक्षया प्ररूपणाद्वैविध्यं मनसि धृत्वा गुणस्थानमार्गणास्थानप्ररूपणयोः संज्ञांतरमाह—

मं० प्र०—गुणश्च जीवश्च गुणजीवौ इति गुणस्थानजीवसमासलक्षणे द्वे प्ररूपणे, पर्याप्तिरिति तृतीया प्ररूपणा, प्राणा इति चतुर्थी प्ररूपणा, अत्र प्राणशब्दस्य एकवचनांतप्रयोगाभावात् बहुवचनांतनिर्देशः, न प्ररूपणाबहुत्वापेक्षः। संज्ञा चेति पंचमी प्ररूपणा, चशब्दः पंचानां प्ररूपणानां समुच्चयार्थः। मार्गणाश्चेति चतुर्दशप्ररूपणाः, तथैव गतींद्रियादिचतुर्दशभेदेन मार्गणास्थानानां सविस्तरं वक्ष्यमाणत्वात्। अत्रतनचशब्दोऽपि पूर्वप्ररूपणाभिः सह एतासां चतुर्दशमार्गणास्थानाख्यप्ररूपणानां समुच्चयार्थः। एवमेकोनविंशतिप्ररूपणा उद्दिष्टा। उपयोगोऽपि चेति विंशतितमा प्ररूपणा। अत्र अपिचेत्यव्ययद्वयं मिलितमेव पूर्वप्ररूपणाभिः सह अस्याः प्ररूपणायाः समुच्चयार्थं तथा बहुलं प्रयोगदर्शनात्। एवं विंशतिसंख्यागुणस्थानादयः प्ररूपणाः क्रमशः भगवदर्हद्गणधरशिष्यप्रशिष्यादिगुरुपर्वागतया परिपाट्या अनुक्रमेण भणिताः। परमागमे पूर्वाचार्यैः प्रतिपादिताः। अनेन स्वकर्तृत्वं परिहृत्य ता एव मध्यमरुचिशिष्यापेक्षया संक्षिप्य वक्ष्यामीति भव्यजनानुग्रहो दृश्यते। तुशब्देन सामान्येन एका प्ररूपणा विशेषेण विंशतिः प्ररूपणाः इति विभागो लक्ष्यते। गुणादिशब्दानां निरुक्त्यर्थादयस्तत्तत्प्रकरणेष्वाचार्येण स्वयमेव वक्ष्यंते इति ह्यस्माभिर्नोच्यंते ॥ २ ॥ अथ संक्षेपरुचिशिष्यापेक्षया प्ररूपणाद्विप्रकारप्रदर्शनार्थमाह—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०–इहां चौदह गुणस्थान अठ्याणवै जीवसमास छह पर्याप्ति दश प्राण च्यारि संज्ञा मार्गणाविषै च्यारि गतिमार्गणा, पांच इंद्रिय मार्गणा, छह कायमार्गणा पंद्रह योगमार्गणा, तीन वेदमार्गणा, च्यारि कषायमार्गणा, आठ ज्ञानमार्गणा, सात संयममार्गणा, च्यारि दर्शनमार्गणा, छह लेश्यामार्गणा, दोय भव्यमार्गणा, छह सम्यक्त्वमार्गणा, दोय संज्ञिमार्गणा, दोय आहारमार्गणा, दोय उपयोग ऐसैं ये जीवप्ररूपणा वीस कहीं हैं। इहां निरुक्ति कहिये है- गुण्यते कहिये जाणिये द्रव्यतैं द्रव्यांतरकौं याकरि सो गुण कहिये बहुरि कर्म उपाधिकी अपेक्षासहित ज्ञानदर्शन उपयोगरूप चैतन्यप्राणकरि जीवै हैं ते जीव सम्यक् प्रकार आसते कहिये स्थितिरूप होंइ इनि विषैं ते जीवसमास है। बहुरि परि कहिये समंततातैं आप्ति कहिये प्राप्ति सो पर्याप्ति है। शक्तिकी निष्पन्नताका होना सो पर्याप्ति जानना। बहुरि प्राणंति कहिये जीवैं हैं जीवितव्यरूप व्यवहारकौं योग्य हो हैं जीव जिनिकरि ते प्राण हैं बहुरि आगमविषै प्रसिद्ध वांछा संज्ञा अभिलाषा ऐ एकार्थ हैं। बहुरि जिनकरि वा जिनविषैं जीव हैं ते मृग्यंतें कहिये अवलोकिये ते मार्गणा हैं तहां अवलोकनहारा मार्गयिता तो भव्यनिविषै उत्कृष्ट प्रधान तत्त्वार्थश्रद्धावान जीव जानना। अवलोकन योग्य मृग्य चौदह मार्गणानिके विशेषलिये आत्मा जानना। बहुरि अवलोकना मृग्यताका साधनकौं वा अधिकरणकौं जे प्राप्त ते गति आदि मार्गणा हैं बहुरि मार्गणा जो अवलोकन ताका जो उपाय सो ज्ञान दर्शनका सामान्य भावरूप उपयोग है ऐसैं इन प्ररूपणानिका साधारण अर्थका प्रतिपादन कह्या ॥२॥

आगै संग्रहनयकी अपेक्षाकरि प्ररूपणाका दोयप्रकारको मनविषैं धरि गुणस्थान मार्गणास्थानरूप दोय प्ररूपणानिके नामांतर कहैं हैं–

संखेओ ओघोत्ति य गुणसण्णा सा च मोहजोगभवा।
वित्थारादेसोत्ति य मग्गणसण्णा सकम्मभवा ॥ ३ ॥

१ पुस्तकमें मृगयिता पाठ है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संक्षेप ओघ इति च गुणसंज्ञा सा च मोहयोगभवा ।
विस्तार आदेश इति च मार्गणासंज्ञा स्वकर्मभवा ॥ ३ ॥

जी० प्र०—संक्षेप इति ओघ इति च गुणस्थानस्य संज्ञा अनादिनिधनार्षे रूढा प्रसिद्धा, सा च संज्ञा मोहयोगभवा-मोहयोगाभ्यां संजाता भवति । संज्ञावतां गुणस्थानानां मोहयोगप्रभवत्वात् तत्संज्ञाया अपि तत्प्रभवत्वमुपचारेण उक्तं । चशब्दात् सामान्यमित्यपि गुणस्थानस्य संज्ञा भवतीति ज्ञातव्यं । तथा विस्तार आदेशश्चेति मार्गणास्थानस्य संज्ञा भवति । सा च स्वाभिधानप्रत्ययव्यवहारनिमित्तकर्मोदयाद्भवति । अत्रापि प्राग्वत् तत्संज्ञाया अपि तत्प्रभवत्वोपचारो ज्ञातव्यः । चशब्दाद्विशेष इत्यपि मार्गणाया अनुक्तसंज्ञा भवति ॥ ३ ॥ अथ प्ररूपणाद्वैविध्ये शेषप्ररूपणानामंतर्भावं प्ररूपयति—

मं० प्र०—गुणस्थानप्ररूपणा मार्गणास्थानप्ररूपणा चेति द्वे एव प्ररूपणे संक्षेपतो भवतः, जीवसमासादि शेषप्ररूपणानां मार्गणास्थानप्ररूपणायामेवांतर्भावसंभवात् । तत्र संक्षेप इति ओघ इति च गुणस्थानस्य संज्ञा सा च मोहोदयात् योगाच्च भवति इति मोहयोगभवा । तथाहि दर्शनमोहस्य मिथ्यात्वकर्मण उदयान्मिथ्यादृष्टिः । अनंतानुबंधिकषायोदयात्सासादनसम्यग्दृष्टिः । सम्यङ्मिथ्यात्वोदयात्सम्यग्मिथ्यादृष्टिः । अप्रत्याख्यानकषायोदयात् असंयतसम्यग्दृष्टिः । प्रत्याख्यानकषायोदयाद्देशसंयतः, तीव्रसंज्वलनकषायोदयात्प्रमत्तसंयतः । मंदसंज्वलनकषायोदयादप्रमत्तसंयतः । मंदतरसंज्वलनकषायोदयादपूर्वकरणः । मंदतमसंज्वलनकषायोदयादनिवृत्तिकरणः । सूक्ष्मकृष्टिगतसंज्वलनलोभोदयात्सूक्ष्मसांपरायः । समस्तचारित्रमोहोपशमादुपशांतकषायः । समस्तचारित्रमोहनिरवशेषक्षयात्क्षीणकषायः । कायवाग्मनःकर्मलक्षणयोगसद्भावात्सयोगकेवली । तादृग्योगाभावादयोगकेवली । विस्तार आदेश इति च मार्गणासंज्ञा । सा च स्वस्वयोग्यनामादिकर्मोदयाद्भवतीति स्वकर्मभवा । तथाहि-गतिनामकर्मोदयाद्गतिः । इंद्रियजातिनामकर्मोदयात् स्पर्शनादिज्ञानावरणक्षयोपशमाच्च इंद्रियं । त्रसस्थावरनामकर्मोदयात्कायः । शरीरनामकर्मोदयाद्योगः । द्रव्यवेदोदयाद्वेदः । द्रव्यकषायोदयात्कषायः । ज्ञानावरणस्य क्षयोपशमात्क्षयाच्च ज्ञानं । चारित्रमोहस्य क्षयोपशमादुपशमात्क्षयाच्च संयमः । दर्शनावरणस्य क्षयोपशमात् क्षयाच्च दर्शनं । शरीरवर्णनामकर्मोदयाद् द्रव्यलेश्या । योगकषायानुरंजनाद्भावलेश्या । मोक्षहेतुपरिणामभवनाद्भव्यत्वं । दर्शनमोहस्योपशमादेः सम्यक्त्वं । नोइंद्रियज्ञानावरणक्षयोपशमादेः संज्ञित्वं । औदारिकादिशरीरनामकर्मोदयादाहारित्वमिति वक्ष्यमाणगुणस्थानमार्गणास्थानप्रकरणेषु आगमानुसारेण योजयितव्यं । प्रज्ञावतां संक्षेपरुचीनां गुणस्थानमार्गणास्थानप्ररूपणाद्वयेनैव जीवभेदस्वरूपणस्य ज्ञातुं शक्यत्वात् ॥ ३ ॥ अथ गुणस्थानमार्गणास्थानाभ्यामन्यासां प्ररूपणानामंतर्भावप्रदर्शनार्थमाह—

स० चं०—संक्षेप ऐसी ओघ ऐसी गुणस्थानकी संज्ञा अनादिनिधन ऋषिप्रणीत मार्गविषैं रूढ है प्रसिद्ध है। गुणस्थानकाही संक्षेप वा ओघ ऐसा भी नाम है। बहुरि सो संज्ञा 'मोहयोगभवा' कहिए दर्शन चारित्रमोह वा मन वचन काय योग तिनिकरि उपजी है। इहां संज्ञाके धारक गुणस्थाननिकैं मोह योगतैं उत्पन्नपना है तातैं तिनकी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संज्ञाकैं भी मोह योगकरि उपजना उपचारकरि कह्या है। बहुरि सूत्रविषैं चकार कह्या है तातैं सामान्य ऐसी भी गुणस्थानकी संज्ञा है ऐसा जानना। बहुरि तैसैंही विस्तार आदेश ऐसी मार्गणास्थानकी संज्ञा है। मार्गणाका विस्तार आदेश ऐसा नाम है। सो यह संज्ञा अपना अपना मार्गणाका नामकी प्रतीतिके व्यवहारकौं कारण जो कर्म ताके उदयतैं हो हैं। इहां भी पूर्ववत् संज्ञाके कर्मतैं उपजनेका उपचार जानना। निश्चयकरि संज्ञा तौ शब्दजनित ही है। बहुरि चकारतैं विशेष ऐसी भी मार्गणास्थानकी संज्ञा गाथाविषैं विना कही भी जाननी ॥३॥

आगै प्ररूपणाका दोयप्रकारपनाविषैं अवशेषप्ररूपणानिका अंतर्भूतपना दिखावै हैं—

आदेसे संलीणा जीवा पज्जत्तिपाणसण्णाओ।
उबओगोवि य भेदे वीसं तु परूबणा भणिदा ॥ ४ ॥

आदेशे संलीना जीवाः पर्याप्तिप्राणसंज्ञाश्च।
उपयोगोऽपि च भेदे विंशतिस्तु प्ररूपणा भणिताः ॥ ४ ॥

जी० प्र०–मार्गणास्थानप्ररूपणायां जीवसमासाः, पर्याप्तयः, प्राणाः, संज्ञा, उपयोगश्च इति पंच प्ररूपणाः संलीनाः–सम्यगंतर्भूता इत्यर्थः। तथा सति गुणस्थानप्ररूणं मार्गणास्थानप्ररूपणमिति संग्रहनयापेक्षया प्ररूपणाद्वयमेव प्ररूपितं जातं। अथ कस्यां मार्गणायां का प्ररूपणा अंतर्भूतेति चेद्गाथात्रयेणाह—

मं०प्र०–अभेदविवक्षायां जीवसमासपर्याप्तिप्राणसंज्ञाः, उपयोगोऽपि च इत्येताः पंचप्ररूपणा आदेशे मार्गणास्थानप्ररूपणायां संलीनाः सम्यगंतर्भूताः, तासां तस्याः कथंचिदभेदसंभवात्। एवं संक्षेपरुचिशिष्यापेक्षया गुणस्थानमार्गणास्थानभेदेन द्विविधा प्ररूपणा सिद्धा भवति। भेदे तु पुनर्विवक्षिते सति मध्यमरुचिशिष्यापेक्षया विंशतिः प्ररूपणाः कथिताः युक्ता एव ॥ ४ ॥ अत्र जीवसमासादिपंचप्ररूपणांतर्भावविभागं प्रदर्शयितुं गाथात्रयमाह—

स० चं०–मार्गणास्थानप्ररूपणाविषैं जीवसमास पर्याप्ति प्राण संज्ञा उपयोग ए पांच प्ररूपणा संलीना कहिए गर्भित है किसीप्रकार तिनि मार्गणाभेदनिविषैं अंतर्भूत हैं। तैसैं होतैं गुणस्थानप्ररूपण अर मार्गणास्थानप्ररूपण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain, Digitized by Sarayu Trust/eGangotri

ऐसैं संग्रहनय अपेक्षाकरि प्ररूपणा दोयही निरूपित हो हैं ॥ ४ ॥ आगै किस मार्गणाविषैं कौन प्ररूपणा गर्भित है ? सो तीन गाथानि करि कहै हैं—

इंदियकाये लीणा जीवा पज्जत्तिआणभासमणो ।
जोगे काओ णाणे अक्खा गदिमग्गणे आऊ ॥ ५ ॥

इंद्रियकाययोर्लीना जीवाः पर्याप्त्यानभाषामनांसि ।
योगे कायः ज्ञाने अक्षीणि गतिमार्गणायामायुः ॥ ५ ॥

जी० प्र०–इंद्रियमार्गणायां कायमार्गणायां च जीवसमासाः पर्याप्तयः आनपानभाषामनोबलप्राणाश्चांतर्भूताः । कथं ? इति चेत् जीवसमासानां पर्याप्तीनां च इंद्रियकायाभ्यां तादात्म्यकृतप्रत्यासत्तिसंभवात् सामान्यविशेषकृतप्रत्यासत्तिसंभवाद्वा पर्याप्तीनां धर्मधर्मिकृतप्रत्यासत्तिसंभवाच्च । उच्छ्वासनिश्वासवाग्मनोबलप्राणानां च स्वकारणतत्तत्पर्याप्त्यंतर्भावविषयेऽपि तेषामपि अंतर्भावस्यापि न्याय्यत्वात् तत्रैवांतर्भाव्यंते(?)योगमार्गणायां कायबलप्राणोंतर्भूतः । जीवप्रदेशपरिस्पंदलक्षणकाययोगरूपकार्ये तद्बलाधानलक्षणकायबलप्राणस्वरूपकारणस्य स्वरूपसामान्यविशेषकृतप्रत्यासत्तिविशेषसद्भावात् कार्यकारणकृतप्रत्यासत्तिर्भवति । ज्ञानमार्गणायां इंद्रियाणि अंतर्भूतानि इंद्रियावरणक्षयोपशमोद्भूतलब्धिरूपेंद्रियाणां ज्ञानेन सह तादात्म्यकृतप्रत्यासत्तिसद्भावात् । गतिमार्गणायां आयुःप्राणोंतर्भूतः गत्यायुषोरन्योन्याजहद्वृत्तिलक्षणप्रत्यासत्तिसद्भावात् ॥ ५ ॥

मं०प्र०–इंद्रियमार्गणायां कायमार्गणायां च जीवसमासाः, पर्याप्तयः, उच्छ्वासनिश्वासभाषामनोबलप्राणाश्च लीनाः-यथासंभवमंतर्भूताः । तत्र इंद्रियकाययोर्जीवसमासानां स्वरूपस्वरूपवद्भावप्रत्यासत्त्या सामान्यविशेषभावप्रत्यासत्त्या वा अंतर्भावः । इंद्रियकायं स्वरूपं जीवसमासाः स्वरूपवंतः । अथवा इंद्रियकायौ विशेषौ जीवसमासः सामान्यमिति तत्र सदंतर्भावस्य युक्तत्वात् । तयोरेव पर्याप्तीनां धर्मिधर्मभावप्रत्यासत्त्या अंतर्भावः । इंद्रियकायौ धर्मिणौ पर्याप्तयो धर्मा इति धर्मिणि धर्माणामंतर्भावस्य युक्तत्वात् । तयोरेव उच्छ्वासनिश्वासभाषामनोबलप्राणानां कार्यकारणभावप्रत्यासत्त्या अंतर्भावः कार्यभूतानामुच्छ्वासनिश्वासभाषामनोबलप्राणानां स्वकारणभूतपर्याप्त्यंतर्भावस्थाने अंतर्भावस्य युक्तत्वात् । योगे कायबलप्राणा अंतर्भूताः । कायबलं स्वरूपं योगः स्वरूपवानिति स्वरूपस्वरूपवद्भावप्रत्यासत्त्या अथवा योगः सामान्यं कायबलं विशेष इति सामान्यविशेषभावप्रत्यासत्त्या योगे कायबलांतर्भावस्य युक्तत्वात् तयोः शरीरनामकर्मोदयसमुद्भूतत्वेन तथाभावसंभवात् । ज्ञाने–ज्ञानमार्गणायां अक्षीणि–इंद्रियबलप्राणाः कार्यकारणभावप्रत्यासत्त्या अंतर्भूताः कार्यभूतं ज्ञानं प्रति इंद्रियज्ञानावरणक्षयोपशमरूपस्य इंद्रियबलस्य कारणत्वेन तत्र तदंतर्भावस्य युक्तत्वात् । गतिमार्गणायां–आयुःप्राणः अन्योन्याजहद्वृत्तिप्रत्यासत्त्या अंतर्भूतः गतिनामकर्मायुष्कर्मणोरुदयस्य साहचर्यनियमात् ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं०च०—इंद्रियमार्गणाविषैं बहुरि कायमार्गणाविषैं जीवसमास अर पर्याप्ति अर सासोश्वास भाषा मनबल प्राण ए अंतर्भूत हैं। कैसें हैं? सो कहै हैं—जीवसमास अर पर्याप्ति इनिकैं इंद्रिय अर कायसहित तादात्म्यकरि कीया हूवा एकत्वसंभवै है। जीवसमास अर पर्याप्ति ए इंद्रियकायरूपही हैं। बहुरि सामान्यविशेषकरि कीया हूवा एकत्व संभवै है। जीवसमास पर्याप्ति अर इंद्रिय कायविषैं कहीं सामान्यका ग्रहण है, कहीं विशेषका ग्रहण है। बहुरि पर्याप्तिनिकै धर्म धर्मीकरि कीया हुवा एकत्व संभवै है पर्याप्ति धर्म है इंद्रिय काय धर्मी हैं तातैं जीवसमास अर पर्याप्ति ए इंद्रिय काय मार्गणाविषे गर्भित जानने। बहुरि उश्वास वचनबल मनबल प्राणनिकै अपनां कारणभूत उश्वास भाषा मनःपर्याप्ति जहां अंतर्भूता भया तिसविषैं अंतर्भूतपना न्यायही है। तातैं एऊ तहां ही इंद्रिय कायमार्गणाविषै गर्भित भए। बहुरि योग मार्गणाविषैं कायबल प्राण गर्भित है। जातैं जीवके प्रदेशनिका चंचलहोनैं रूप लक्षणधरै काययोगरूप जो कार्य तीहिविषैं तिसकायबल रूप लक्षणधरैं कायबल प्राणस्वरूप जो कारण ताकैं अपने स्वरूपका सामान्य विशेषकरि कीया एकत्वविशेषका सद्भाव है। तातैं कार्यकारण करि कीया एकत्व ही है। बहुरि ज्ञानमार्गणाविषैं इंद्रिय प्राण गर्भित है। जातैं इंद्रियरूप मतिश्रुतावरणके क्षयोपशमतैं प्रकट जे लब्धिरूप इंद्रिय तिनकैं ज्ञानसहित तादात्म्यकरि कीया एकत्वका सद्भाव है बहुरि गति मार्गणाविषैं आयुः प्राण गर्भित है। जातैं गति और आयुके परस्पर अजहद्वृत्ति है। गति आयुविना नाही, आयु गति विना नाहीं सो इस लक्षणकरि एकत्व संभवै है ॥ ५ ॥

मायालोहे रदिपुव्वाहारं कोहमाणगह्मि भयं।
वेदे मेहुणसण्णा लोहह्मि परिग्गहे सण्णा ॥ ६ ॥

मायालोभयोः रतिपूर्वकमाहारं क्रोधमानकयोर्भयं।
वेदे मैथुनसंज्ञा लोभे परिग्रहे संज्ञा ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी० प्र०—मायाकषाये लोभकषाये च आहारसंज्ञांतर्भूता आहाराकांक्षाया रतिकर्मोदयपूर्वकत्वसद्भावात्, रतिकर्म मायालोभकषाययोश्च रागहेतु- कषायांतःप्रविष्टत्वात् । क्रोधकषाये मानकषाये च भयसंज्ञांतर्भूता भयहेतुषु द्वेषहेतुत्वेन द्वेषरूपक्रोधमानयोः कार्यकारणप्रत्यासत्तिसंभवात् । वेद- मार्गणायां मैथुनसंज्ञांतर्भूता कामोद्रेकवशीकृतमिथुनकृत्यं साभिलाषसंभोगरूपं तत् वेदोदयजनितपुरुषाद्यभिलाषकार्यमिति कार्यकारणभावप्र- त्यासत्तिसद्भावात् । लोभकषाये परिग्रहसंज्ञांतर्भूता लोभकषाये सत्येव मूर्छास्वभावस्य परिग्रहाभिलाषस्य संभवात् अत्र कार्यकारणप्रत्यासत्ति- रेवेति जानीहि ॥ ६ ॥

मं०प्र० - मायालोभकषाययोराहारसंज्ञा स्वरूपस्वरूपवद्भावप्रत्यासत्त्या अंतर्भूता । रतिपूर्विका आहारसंज्ञा रागस्वरूपं रागविशेषौ मायालोभौ स्वरूपवंतौ इति तत्र तदंतर्भावो युक्तः । क्रोधमानकषाययोर्भयसंज्ञा स्वरूपस्वरूपवद्भावप्रत्यासत्त्या अंतर्भूता । भयं द्वेषस्वरूपं क्रोधमानौ तु द्वेषविशेषौ स्वरूपवंतौ इति तत्र तदंतर्भावो युक्तः । वेदे-वेदमार्गणायां मैथुनसंज्ञा कार्यकारणभावप्रत्यासत्त्या अंतर्भूता । कार्यभूतां मैथुनसंज्ञां प्रति वेदस्य कारणत्वेन तत्र तदंतर्भावस्य युक्तत्वात् । लो- भकषाये परिग्रहसंज्ञा कार्यकारणभावप्रत्यासत्त्या अंतर्भूता कार्यभूतां परिग्रहसंज्ञां प्रति लोभस्य कारणत्वेन तत्र तदंतर्भावस्य युक्तत्वात् ॥ ६ ॥

स० चं०--मायाकषाय अर लोभकषायविषैं आहारसंज्ञा गर्भित है जातैं आहारकी वांछा रतिनामकर्मके उदयकौं पहिले भएं हो है । बहुरि रतिकर्म है सो माया लोभकषाय रागकौं कारण है तहां अंतर्भूत है । बहुरि क्रोधकषाय अर मानकषायविषैं भयसंज्ञा गर्भित है । जातैं भयके कारणनिविषैं दोषका कारणपना है जातैं द्वेषरूप जे क्रोध मान कषाय तिनकैं कार्यकारण अपेक्षा एकत्व संभवै है । बहुरि वेदमार्गणा विषैं मैथुनसंज्ञा अंतर्भूत है जातैं कामका तीव्रपनाका वशीभूतपनाकरि कीया स्त्री पुरुष युगलरूप जो मिथुनका कार्य अभिलाषसहित संभोगरूप सो वेदका उदयकरि निपज्या पुरुषादिकका अभिलाषरूप कार्य है । ऐसैं कार्यकारणभावकरि एकत्वका सद्भाव है । बहुरि लोभकषायविषैं परिग्रहसंज्ञा अंतर्भूत है जातैं लोभकषाय होतैं ही ममत्वभावरूप जो परिग्रहका अभिलाष ताका संभव है तातैं यहां कार्यकारण भाव अपेक्षा एकत्व है। ऐसा हे भव्य! तू जाणि ॥६॥

सागारो उवजोगो णाणे मग्गह्मि दंसणे मग्गे ।
अणगारो उवजोगो लीणोत्ति जिणेहिं णिद्दिट्ठं ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साकार उपयोगः ज्ञानमार्गणायां, दर्शनमार्गणायां।
अनाकार उपयोगः लीन इति जिनैर्निर्दिष्टं ॥ ७ ॥

जी० प्र०—ज्ञानमार्गणायां साकारोपयोगोऽन्तर्भूतः ज्ञानावरणवीर्यांतरायक्षयोपशमसमुद्भूतज्ञातृव्यापारसन्निधाने एव विशेषग्रहणलक्षणस्य ज्ञानस्य समुत्पत्तेः कार्यकारणकृतप्रत्यासत्तिसंभवात् । दर्शनमार्गणायां च अनाकारोपयोगोंतर्भूतः दर्शनावरणवीर्यांतरायक्षयोपशमविजृंभितार्थसामान्यग्रहणव्यापारे सत्येव अर्थसामान्यग्रहणलक्षणस्य दर्शनस्य समुत्पत्तेः कार्यकारणभावघटनात् अयमंतर्भावः इति प्रागुक्तरीत्या जिनैरर्हदादिभिर्निर्दिष्टः—कथितः न पुनः स्वरुचिविरचित इत्यर्थः। एवं जीवसमासादीनां मार्गणास्थानेऽन्तर्भावसमर्थनेन गुणस्थानमार्गणास्थानप्ररूपणाद्वयं प्रतिपाद्य पुनर्भेदविवक्षया विंशतिः प्ररूपणाः प्रागुक्ता एव उच्यंते । भणिता इति पदेन विंशतिप्ररूपणानां परमागमप्रसिद्धानां प्रकाशनेन तद्विशेषकथनेन स्वातंत्र्यपरिहृतं जातं इत्ययं न्यायस्तथैव योज्यते । अथ तासां विंशतिप्ररूपणानां मध्ये प्रथमोद्दिष्टगुणस्थानप्ररूपणाप्रतिपादनार्थं प्रथमं गुणस्थानशब्दस्य निरुक्तिपूर्वकमर्थं कथयति—

मं०प्र०—ज्ञानमार्गणायां साकारोपयोगः स्वरूपस्वरूपवद्भावप्रत्यासत्त्या अंतर्भूतः। साकारोपयोगत्वं सविकल्पग्रहणत्वं स्वरूपं ज्ञानं स्वरूपवत् इति तत्र तदंतर्भावो युक्तः । दर्शनमार्गणायां-अनाकारोपयोगः स्वरूपस्वरूपवद्भावप्रत्यासत्त्या अंतर्भूतः, अनाकारोपयोगत्वं निर्विकल्पग्रहणत्वं स्वरूपं, दर्शनं स्वरूपवत् इति तत्र तदंतर्भावो युक्तः । इत्येवं प्रकारेण इंद्रियकायमार्गणादिषु जीवसमासादीनां पंचप्ररूपणानामंतर्भावविधानं जिनैरर्हदादिभिर्निर्दिष्टमिति शास्त्रस्य प्रामाण्यं शास्त्रकारेण प्रदर्शितं । ७ । अथ यथोद्देशस्तथा निर्देश इति न्यायमाश्रित्य प्रागुद्दिष्टानां विंशतिप्ररूपणानां मध्ये प्रथमोद्दिष्टाया गुणस्थानप्ररूपणाया निर्देशं प्रारभमाणः प्राह—

स० चं०—ज्ञानमार्गणाविषैं साकार उपयोग गर्भित है। जातैं ज्ञानवरण वीर्यांतरायके क्षयोपशमतैं उत्पन्न ज्ञानका परिणमनका निकटपना होतैंहीं विशेषग्रहण रूप लक्षणधरैं जो ज्ञान ताकी उत्पत्ति है । तातैं कार्यकारणकरि कीया एकत्वसंभवै है। बहुरि दर्शनमार्गणाविषैं अनाकार उपयोग गर्भित है। जातैं दर्शनावरण वीर्यांतरायके क्षयोपशम करि प्रकटभया पदार्थका सामान्यग्रहणरूप व्यापार होते ही पदार्थका सामान्यग्रहणरूप लक्षण धरैं जो दर्शन ताकी उत्पत्ति है। तातैं कार्यकारण भाव बनै है। ऐसैं यह गर्भितभाव पूर्वोक्तरीति करि जिन जे अर्हंतादिक तिनिकरि निर्दिष्ट कहिए कह्या है। बहुरि अपनी रुचि करि रच्या हूवा नाहीं है ऐसैं जीवसमासादिकनिकैं मार्गणास्थानविषैं गर्भितभावका समर्थनकरि गुणस्थान अर मार्गणास्थान ए प्ररूपणा दोय प्रतिपादन-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

करि बहुरि भेदविवक्षाकरि वीसप्ररूपणा पूर्वैं कहीं तेई कहिए है। पूर्वैं गाथाविषैं 'भणिताः' ऐसा पद कह्या ताकरि वीस प्ररूपणा परमागमविषैं प्रसिद्ध हैं तिनिका प्रकाशन करि तिनिका विशेष कथनविषैं स्वाधीनपना अपनी इच्छाके अनुसारि कहना सो छोड्या है। ऐसैं यह न्याय तैसैं ही जोडिए है ॥७॥ आगैं तिनि वीसप्ररूपणानिविषैं पहलैं कही जो गुणस्थानप्ररूपणा ताका प्रतिपादनिके अर्थि प्रथम गुणस्थानशब्दकी निरुक्तिपूर्वक अर्थ कहे हैं—

जेहिं दु लक्खिज्जंते उदयादिसु संभवेहिं भावेहिं।
जीवा ते गुणसण्णा णिद्दिट्ठा सव्वदरसीहिं ॥ ८ ॥

यैस्तु लक्ष्यंते उदयादिषु संभवैर्भावैः।
जीवास्ते गुणसंज्ञा निर्दिष्टाः सर्वदर्शिभिः ॥ ८ ॥

जी० प्र०—मोहनीयादिकर्मणां उदयोपशमक्षयोपशमक्षयपरिणामरूपेषु अवस्थाविशेषेषु सत्सु संजायमानैर्यैर्भावैः-जीवस्य मिथ्यात्वादिपरिणामैः, गुण्यंते--लक्ष्यंते दृश्यंते लांछ्यंते वा जीवास्ते जीवपरिणामाः गुणस्थानसंज्ञा भवंतीति सर्वदर्शिभि-सर्वज्ञैः, निर्दिष्टाः-कथिताः। अनेन गुणशब्दनिरुक्तिप्रधानसूत्रेण मिथ्यात्वादयोऽयोगिकेवलित्वपर्यंता जीवपरिणामविशेषाः त एव गुणस्थानानीति प्रतिपादितं भवति। (अथ तेषां पंचभावानां निरुक्तिरुच्यते) स्वस्थितिक्षयवशादुदयनिषेके गलतां कार्मणस्कंधानां फलदानपरिणतिः-उदयः, तस्मिन् भव औदयिकः। प्रतिपक्षकर्मणामुदयाभावः-उपशमः तस्मिन् भव औपशमिकः। प्रतिपक्षकर्मणां पुनरुत्पत्त्यभावेन नाशः क्षयः तस्मिन् भवः क्षायिकः। प्रतिपक्षकर्मणामुदये विद्यमाने यो जीवगुणांशो दृश्यते सक्षयोपशमः तस्मिन् भवः क्षायोपशमिकः। उदयादिनिरपेक्षः परिणामः तस्मिन् भवः पारिणामिकः। एवमौदयिकादीनां पंच भावानां सामान्यार्थं प्रतिपाद्य विस्तरतः अग्रे तन्महाधिकारे प्रतिपादयिष्यति ॥८॥ अथ तानि गुणस्थानानि गाथाद्वयेन उद्दिशति—

मं० प्र०—दर्शनमोहनीयादिकर्मणामुदयादिषु—उदयोपशमक्षयक्षयोपशमपरिणामेषु अवस्थाविशेषु सत्सु संभवैः—उत्पद्यमानैः, यैर्भावैः--औदयिकादिभिःमिथ्यादर्शनादिभिः परिणामैः, जीवा गुण्यंते लक्ष्यंते लांछ्यंते ते भावा गुणसंज्ञा गुणनामान इति सर्वदर्शिभिः--अर्हदादिभिः, निर्दिष्टाः प्रकथिताः ॥ ८ ॥ अथ तद्गुणस्थाननामोद्देशार्थं गाथाद्वयमाह—

स०चं०—मोहनीय आदि कर्मनिका उदय उपशम क्षय क्षयोपशम परिणामरूप जे अवस्थाविशेष तिनकौं होते संतै उत्पन्नभए जे भाव कहिए जीवके मिथ्यात्वादिक परिणाम तिनकरि गुण्यंते कहिए लखिए वा देखिए

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वा लांछित करिए जीव ते जीवके परिणाम गुणस्थानसंज्ञाके धारक हैं ऐसा सर्वदर्शी जे सर्वज्ञदेव तिनकरि निर्दिष्टाः कहिए कहे हैं। इस गुणशब्दकी निरुक्तिकी प्रधानतालीए सूत्रकरि मिथ्यात्वादिक अयोगकेवलीपनापर्यंत भए जीवके परिणामविशेष तेई गुणस्थान हैं ऐसा प्रतिपादन कीया है। तहां अपनी स्थितिके नाशके वशतैं उदयरूप निषेकविषैं गले जे कार्माण स्कंध तिनका फलदेनेरूप जो परिणमन सो उदय है ताकौं होतैं जो भाव होइ सो औदयिक भाव है। बहुरि गुणका प्रतिपक्षी जे कर्म तिनका उदयका अभाव सो उपशम है। ताकौं होते संतैं जो होय सो औपशमिक भाव है। बहुरि प्रतिपक्षी कर्मनिका बहुरि न उपजै ऐसा नाश होना सो क्षय ताकौं होतैं जो होइ सो क्षायिक भाव है। बहुरि प्रतिपक्षी कर्मनिका उदय विद्यमान होतैं भी जो जीवके गुणका अंश देखिए सो क्षयोपशम, ताकौं होतैं जो होइ सो क्षायोपशमिक भाव है। बहुरि उदयादिक अपेक्षातैं रहित सो परिणाम है ताकौं होतैं जो होइ सो पारिणामिक भाव है। ऐसैं औदयिक आदि पंचभावनिका सामान्य अर्थ प्रतिपादनकरि विस्तारतैं आगे तिनि भावनिका महा अधिकारविषैं प्रतिपादन करिसी ॥ ८ ॥ आगैं ते गुणस्थान गाथा दोयकरि नाममात्र कहै हैं—

मिच्छो सासण मिस्सो अविरदसम्मो य देसविरदो य।
विरदा पमत्त इदरो अपुव्व अणियट्टि सुहमो य ॥ ९ ॥
उवसंत खीणमोहो सजोगकेवलिजिणो अजोगी य।
चउदस जीवसमासा कमेण सिद्धा य णादव्वा ॥ १० ॥

मिथ्यात्वं सासनः मिश्रः अविरतसम्यक्त्वं च देशविरतश्च।
विरताः प्रमत्तः इतरः अपूर्वः अनिवृत्तिः सूक्ष्मश्च ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उपशांतः क्षीणमोहः सयोगकेवलिजिनः अयोगी च।
चतुर्दश जीवसमासाः क्रमेण सिद्धाश्च ज्ञातव्याः॥ १०॥

जी०प्र०—मिथ्या—अतत्त्वविषया दृष्टिः—श्रद्धा यस्यासौ मिथ्यादृष्टिः। नाम्नि उत्तरपदश्चेति दृष्टिपदस्य लोपात् मिच्छो इत्युक्तं। अयं भेदः अग्रेऽपि ज्ञातव्यः। सह आसादनेन (सम्यक्त्व) विराधनेन वर्तत इति सासादना, सासादना सम्यग्दृष्टिर्यस्यासौ सासादनसम्यग्दृष्टिः। अथवा आसादनेन सम्यक्त्वविराधनेन सह वर्तमानः सासादनश्चासौ सम्यग्दृष्टिश्च सासादनसम्यग्दृष्टिः। इदं भूतपूर्वन्यायेन सम्यग्दृष्टित्वं ज्ञातव्यं। सम्यक्त्वमिथ्यात्वमिश्रो मिश्रः। सम्यक्-समीचीना दृष्टिः—तत्त्वार्थश्रद्धानं यस्यासौ सम्यग्दृष्टिः। स चासौ अविरतश्च अविरतसम्यग्दृष्टिः। देशतः—एकदेशतः, विरतो देशविरतः संयतासंयत इत्यर्थः। अत्र विरतपदं उपरितनसर्वगुणस्थानवर्तिनां संयमित्वमेव ज्ञापयति। प्रमाद्यतीति प्रमत्तः। इतरः—अप्रमत्तः। अपूर्वा करणाः—परिणामा यस्यासौ अपूर्वकरणः। निवृत्तिः—परिणामविशेषः, न विद्यते निवृत्तिरूपः करणो यस्यासावनिवृत्तिकरणः। सूक्ष्मः सांपरायः—कषायः, यस्यासौ सूक्ष्मसांपरायः। उपशांतो मोहो यस्यासौ उपशांतमोहः। क्षीणो मोहो यस्यासौ क्षीणमोहः। घातिकर्माणि जयति स्मेति जिनः, केवलज्ञानमस्यास्तीति केवली, स चासौ जिनश्च केवलिजिनः, योगेन सह वर्तते इति सयोगः, स चासौ केवलिजिनश्च सयोगकेवलिजिनः। योगः अस्यास्तीति योगी, न योगी अयोगी, अयोगी केवलिजिनः इत्यनुवर्तनात् अयोगी चासौ केवलिजिनश्च अयोगिकेवलिजिनः। एते मिथ्यादृष्ट्याद्ययोगिकेवलिजिनावसानाः चतुर्दशजीवसमासाः गुणस्थानानीति ज्ञातव्याः। कथमियं जीवसमास इति संज्ञा गुणस्थानस्य जाता? इति चेत् जीवाः समस्यंते—संक्षिप्यंते एष्विति जीवसमासाः। अथवा जीवाः सम्यगासते एष्विति जीवसमासाः। इत्यत्र प्रकरणसामर्थ्येन गुणस्थानान्येव जीवसमासशब्देन उच्यंते। एते सकर्माणो जीवा यथा लोके संति विनष्टकृत्स्नकर्माणः सिद्धपरमेष्ठिनोऽपि संतीति ज्ञातव्याः भवंति। क्रमेण सिद्धाश्चेति क्रमशब्देन पूर्वं घातिकर्माणि क्षपयित्वा सयोगायोगिकेवलिगुणस्थानयोर्यथायोग्यकालं स्थित्वा अयोगिकेवलिचरमसमये शेषाघातिकर्माणि निरवशेषाणि क्षपयित्वा सिद्धा भवंतीत्ययं क्रमो ज्ञाप्यते। अनेन ज्ञापकेन युगपत्सकलकर्मक्षयत्वं सर्वदाकर्माभावात् सदामुक्तत्वं च परमात्मनो निराकृतं जातं॥ ९-१०॥ अथ गुणस्थानेषु औदयिकादिभावानां संभवं दर्शयति—

मं० प्र०—नामैकदेशेन नाम गृह्यते इति न्यायेन मिथ्या इति मिथ्यादृष्टिर्गृह्यते। सासादन इति सासादनसम्यग्दृष्टिः। अत्र प्राकृते विभक्तिलोपः। मिश्रः सम्यग्मिथ्यादृष्टिः, अविरतसम्यग्दृष्टिश्च, अत्र अविरतशब्दः अंतदीपकत्वेन अधस्तनमिथ्यादृष्ट्यादिगुणस्थानानामविरतत्वं सूचयति। चशब्दः परस्परसमुच्चयार्थः। देशविरतश्च संयतासंयतश्च। अत्र चशब्दोऽपि समुच्चयार्थः। विरताः, अयं विरतशब्द आदिदीपकः, वक्ष्यमाणाः प्रमत्तादयः सर्वेऽपि विरता एवेऽति सूचयति। विरता इति न गुणस्थानांतरं तादृगागमाभावात्। प्रमत्तः—प्रमत्तविरतः, इतरः—अप्रमत्तविरतः, अपूर्वः—अपूर्वकरणः, अनिवृत्तिः—अनिवृत्तिकरणः। सूक्ष्मश्च सूक्ष्मसांपरायश्च अत्रापि गुणस्थानत्रये 'नामैकदेशो नाम्नि प्रवर्तते' इति न्यायः आश्रयणीयः। चशब्दः प्रमत्तादिसमुच्चयार्थः। अपूर्वकरणादयस्त्रयोऽपि उपशमकक्षपकश्रेण्योः साधारणाः संभवंति-अपूर्वकरणः, उपशमकः क्षपकश्चेत्यादि॥ ९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० प्र०–उपशांतः–उपशांतमोहः, अयं उपशमकश्रेण्यामेव । क्षीणमोहः- क्षीणकषायः, अयं क्षपकश्रेण्यामेव । सयोगकेवलिजिनः अत्र सयोगत्वमंत्यदीपकत्वेन मिथ्यादृष्ट्यादीनां सर्वेषामपि सयोगत्वं सूचयति । केवलित्वमादिदीपकत्वेन उत्तरेषामयोगानां सिद्धानां च केवलित्वं सूचयति । जिनत्वं मध्यदीपकत्वेन असंयतसम्यग्दृष्ट्यादीनामयोगानां च कर्मारिजयसंभवाज्जिनत्वं सूचयति । अयं सयोगकेवलिजिनः सर्वज्ञवीतरागः परमात्मा, अयोगी च–अयोगिकेवलिजिनश्च अयमपि सर्वज्ञवीतरागः परमात्मा, क्षीणकषायांतानामधस्तनगुणानां केवलज्ञानाभावात् छद्मस्थता-असर्वज्ञता ज्ञातव्या । एते मिथ्यादृष्ट्यादयः अयोगिकेवलिपर्यंताश्चतुर्दश जीवसामासाः । गुणस्थानानि क्रमेण मिथ्यादृष्टिः प्रथमं गुणस्थानं, सासादनसम्यग्दृष्टिर्द्वितीयं गुणस्थानमित्याद्यनुक्रमेण ज्ञातव्यं । जीवाः सम्यगासते एष्विति जीवसमासाः गुणस्थानानीत्यर्थः । ननु कर्मोदयादिजनितजीवपरिणामानामसंख्येयलोकप्रमितत्वसंभवात्कथं चतुर्दशत्वमिति चेत् ! न, जातिद्वारेण मिथ्यादृष्ट्याद्यभिधानप्रत्ययव्यवहारयोग्यतया चतुर्दशत्वाविरोधात् । न ह्यसंख्येयलोकमात्रेषु परिणामेषु तद्व्यवहारो घटेत तथा वक्तुं ज्ञातुं चाशक्यत्वात् । एवं संसारिजीवानां गुणस्थानभेदं प्रदर्श्य मुक्तजीवानामभेदेन नामोद्देशं करोति । सिद्धाश्चेति–सिद्धाः–निष्पन्नस्वरूपाः कृतकृत्याः संतीति क्रियाध्याहारः सर्वत्र ज्ञातव्यः । तेन चतुर्दशगुणस्थानवर्तिनः संसारिणो जीवाः संति । अतीतसंसाराः सिद्धाश्च संतीति सत्प्ररूपणा ॥ १० ॥ अथास्मिन् गुणस्थाने अयं भावो वर्तते इति औदयिकादिपंचभावानां गुणस्थानेषु प्रतिनियतां वृत्तिं गाथाचतुष्टयेनाह—

स.चं.–मिथ्या कहिए अतत्त्वगोचर है दृष्टि कहिए श्रद्धा जाकी सो मिथ्यादृष्टि है 'नाम्न्युत्तरपदस्य' ऐसा व्याकरण सूत्रकरि दृष्टिपदका लोपकरतैं 'मिच्छो' ऐसा कह्या है । यहु भेद आगैं भी जानना । बहुरि आसादन जो विराधना तिहिं सहित वर्तै सो सासादना, सासादना है सम्यग्दृष्टि जाकै सो सासादनसम्यग्दृष्टि है । अथवा आसादन कहिए सम्यक्त्वका विराधन तींहि सहित जो वर्तमान सो सासादन बहुरि सासादन अर[1] सो सम्यग्दृष्टि सो सासादन सम्यग्दृष्टि है । यहु पूर्वै भया था सम्यक्त्व तिस न्यायकरि इहां सम्यग्दृष्टिपना जानना । बहुरि सम्यक्त्व अर मिथ्यात्वका जो मिश्रभाव सो मिश्र है । बहुरि सम्यक् कहिए समीचीन है दृष्टि कहिए तत्त्वार्थश्रद्धान जाकैं सो सम्यग्दृष्टि अर सोई अविरत कहिए असंयमी सो अविरतसम्यग्दृष्टि है । बहुरि देशतः कहिए एकदेशतैं विरत कहिए संयमी सो देशविरत है संयतासंयत है ऐसा अर्थ जानना । इहां जो विरत पद है सो ऊपरिके सर्वगुणस्थानवर्तीनिकैं संयमीपनाकौं जनावै है । बहुरि प्रमाद्यति कहिये प्रमाद करै सो प्रमत्त है बहुरि इतर कहिए प्र-

1 'सासादन जो सम्यग्दृष्टि' यह पाठ ख पुस्तकमें है ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

माद न करै सो अप्रमत्त है। बहुरि अपूर्व है करण कहिए परिणाम जाकैं सो अपूर्वकरण है। बहुरि निवृत्ति कहिए परिणामनिविषैं विशेष, न पाइए है निवृत्तिरूप करण कहिए परिणाम जाकैं सो अनिवृत्तिकरण है। बहुरि सूक्ष्म है सांपराय कहिये कषाय जाकैं सो सूक्ष्मसांपराय है बहुरि उपशांत भया है मोह जाका सो उपशांतमोह है। बहुरि क्षीण भया है मोह जाका सो क्षीणमोह है। बहुरि घातिकर्मनिकौं जीतता भया सो जिन, बहुरि केवलज्ञान याकैं हैं यातैं केवली, केवली सोई जिन सो केवलिजिन, बहुरि योगकरि सहित सो सयोग सोई केवलिजिन सो सयोगकेवली जिन है। बहुरि योग जाकैं है सो योगी, योगी नाहीं सो अयोगी, केवलिजिन ऐसी अनुवृत्तितैं अयोगी सोई केवलिजिन ऐसैं अयोगिकेवलिजिन है। ऐसैं ए मिथ्यादृष्टि आदि अयोगिकेवलिजिनपर्यंत चौदह जीवसमास कहिए गुणस्थान ते जानने। कैसैं यहु जीवसमास ऐसी संज्ञा गुणस्थानकी भई। तहां कहिए है–जीव हैं, समस्यंते कहिए संक्षेपरूपकरि इनिविषैं ते जीवसमास अथवा जीव हैं ते सम्यक् आसते एषु कहिए भलेप्रकार तिष्ठै हैं इनिविषैं ते जीवसमास ऐसैं इहां प्रकरण जो प्रस्ताव ताकी सामर्थ्यकरि गुणस्थान ही जीवसमासशब्दकरि कहिए है जातैं ऐसा वचन है–'यादृशं प्रकरणं तादृशोर्थः' जैसा प्रकरण तैसो अर्थ सो इहां गुणस्थानका प्रकरण है तातैं गुणस्थान अर्थका ग्रहण कीया है। बहुरि ये कर्मसहित जीव जैसैं लोकविषैं हैं तैसैं नष्ट भए सर्वकर्म जिनके ऐसे सिद्ध परमेष्ठी भी हैं ऐसा जानना। क्रमेण कहिए क्रमकरि सिद्ध हैं सो यहां क्रमशब्दकरि पहिलैं घातिकर्मनिकौं क्षपाइ इन सयोगकेवली अयोगकेवली गुणस्थाननिविषैं[1] यथायोग्य काल तिष्ठि अयोगकेवलीका अंत समयविषैं अवशेष अघातिकर्म समस्त खिपाइ सिद्ध हो है ऐसा अनुक्रम जनाइए है। सो इस अनुक्रमकौं जतावनहारा क्रमशब्दकरि युगपत् सर्वकर्मका नाशपना बहुरि सर्वदा कर्मका अभावतैं सदा ही मुक्तपना परमात्माकैं निराकरण कीया है ॥९–१०॥ आगै गुणस्थाननिविषैं औदयिक आदि भावनिका संभव दिखावै हैं–

१ क पुस्तकमें 'क्षपाय अयोगकेवल अयोगकेवलगुणस्थाननिविषै' यह पाठ है।

९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिच्छे खलु ओदइओ विदिये पुण पारणामिओ भावो।
मिस्से खओबसमिओ अविरदसम्ममह्मि तिण्णेव ॥ ११ ॥

मिथ्यात्वे खलु औदयिको द्वितीये पुनः पारिणामिको भावः।
मिश्रे क्षायोपशमिकः अविरतसम्यक्त्वे त्रय एव ॥ ११ ॥

जी० प्र०—मिथ्यादृष्टिगुणस्थाने दर्शनमोहोदयजनितौदयिकभावः अतत्त्वार्थश्रद्धानलक्षणो भवति खलु--स्फुटं, द्वितीये--सासादनगुणस्थाने पुनः पारिणामिकभावो भवति, अत्र दर्शनमोहोदयादिनिरपेक्षासद्भावात्। मिश्रगुणस्थाने क्षायोपशमिकभावो भवति कुतः? मिथ्यात्वप्रकृतेः सर्वघातिस्पर्धकानामुदयाभावलक्षणे क्षये सम्यग्मिथ्यात्वप्रकृत्युदये विद्यमाने सत्यनुदयप्राप्तनिषेकाणां उपशमे च समुद्भूतत्वादेव कारणात्। अविरतसम्यग्दृष्टिगुणस्थाने औपशमिकसम्यक्त्व— क्षायोपशमिकरूपवेदकसम्यक्त्व-क्षायिकसम्यक्त्वनामानस्त्रयो भावा भवंति। तत्र दर्शनमोहोपशमस्य क्षयोपशमस्य क्षयस्य च संभवात् ॥ ११ ॥ एषामुक्तभावानां संभवनियमस्य निमित्तमाह—

मं० प्र०—मिच्छे मिथ्यादृष्टिगुणस्थाने, खलु--नियमेन औदयिको भावः--मिथ्यादर्शनलक्षणो वर्तते। तत्र यद्यपि अज्ञानजीवत्वादिरूपौ क्षायोपशमिकपारिणामिकौ भावौ विद्येते तथापि मोहनीयविवक्षया तदभावात्तौ नोक्तौ सर्वत्रान्यकर्मणामविवक्षितत्वात् औपशमिकक्षायोपशमिकयोस्तत्रासंभव एव। पुनर्द्वितीये सासादनगुणस्थाने पारिणामिक एव भावो जीवत्वादिरूपो वर्तते तत्र मोहनीयस्योपशमक्षयक्षयोपशमोदयाभावात्। मिश्रे सम्यग्मिथ्यादृष्टिगुणस्थाने क्षायोपशमिक एव सम्यग्मिथ्यात्वपरिणामरूपो भावो वर्तते। ननु--सर्वघातिनः सम्यग्मिथ्यात्वकर्मण उदयादुत्पन्नसम्यग्मिथ्यात्वपरिणामः कथं क्षायोपशमिकः? इति चेत् न, तत्कर्मणः सर्वघातित्वेऽपि तदनुभागानां सर्वघातिस्पर्धकानामुदयाभावलक्षणे क्षये हीनानुभागरूपतया परिणतस्य सदवस्थालक्षणे उपशमे च देशघातिस्पर्धकोदयसहिते सति सम्यग्मिथ्यात्वपरिणामस्योत्पन्नत्वात् क्षायोपशमिकत्वमेव नौदयिकत्वं, अतएव तत्कर्मणः सर्वघातित्वेऽपि सम्यक्त्वगुणस्य सर्वात्मना घाताभावः सिद्धः। अविरतसम्यग्दृष्टौ गुणस्थाने त्रयः औपशमिकक्षायिकक्षायोपशमिकरूपा एव भावा वर्तंते। तत्र दर्शनमोहप्रकृतित्रयस्य उपशमादिसंभवात् ॥ ११ ॥

स० चं०—मिथ्यादृष्टिगुणस्थानविषैं दर्शनमोहका उदयकरि निपज्या ऐसा औदयिक भाव अतत्त्वश्रद्धान है लक्षण जाका सो पाइए है खलु कहिए प्रकटपनैं बहुरि दूसरा सासादनगुणस्थानविषैं पारिणामिक भाव है जातैं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इहां दर्शनमोहका उदय आदिकी अपेक्षाका जु अभाव ताका सद्भाव है। बहुरि मिश्रगुणस्थानविषैं क्षायोपशमिक भाव है काहे तैं? मिथ्यात्वप्रकृतिका सर्वघातिया स्पर्धकनिका उदयका अभाव सोई है लक्षण जाका ऐसा तौ क्षय होते संतै बहुरि सम्यग्मिथ्यात्व नाम प्रकृतिका उदय विद्यमान होते संते बहुरि उदयकौं न प्राप्त भए ऐसे निषेकनिका उपशम होते संते मिश्रगुणस्थान हो है। तातैं ऐसा कारणतैं मिश्रविषैं क्षायोपशमिकभाव है। बहुरि अविरतसम्यग्दृष्टि गुणस्थानविषैं औपशमिक सम्यक्त्व बहुरि क्षायोपशमिकरूप वेदकसम्यक्त्व बहुरि क्षायिक सम्यक्त्व ऐसे नाम धारक तीन भाव हैं जातैं इहां दर्शनमोहका उपशम वा क्षयोपशम वा क्षय संभवै है ॥ ११ ॥

आगैं कहे हैं जु ए भाव तिनके संभवनेके नियमका कारण कहे हैं—

एदे भावा णियमा दंसणमोहं पडुच्च भणिदा हु।
चारित्तं णत्थि जदो अविरदअंतेसु ठाणेसु ॥ १२ ॥

एते भावा नियमाद् दर्शनमोहं प्रतीत्य भणिताः खलु।
चारित्रं नास्ति यतोऽविरतांतेषु स्थानेषु ॥ १२ ॥

जी० प्र०—एते प्रागुक्तौदयिकादयो भावाः नियमाद् दर्शनमोहं प्रतीत्य—आश्रित्यैव, भणिताः—कथिताः भवंति खलु स्फुटं, यतः कारणादविरतांतेषु चतुर्षु गुणस्थानेषु चारित्रं नास्तीति कारणात् ते चारित्रमोहं प्रतीत्य न भणिताः। तेन सासादनगुणस्थाने अनंतानुबंध्यन्यतमोदये विद्यमानेऽपि तदविवक्षया पारिणामिकभावः आर्षे प्रतिपादित इति जानीहि। अनंतानुबंध्यन्यतमोदयविवक्षया तु औदयिकभावोऽपि भवेत् ॥ १२ ॥ देशसंयतादिषु गुणस्थानेषु भावनियमं गाथाद्वयेन दर्शयति—

मं० प्र०—ऐते मिथ्यादृष्ट्यादिषु—अविरतसम्यग्दृष्टिपर्यंतेषु, पूर्वमुक्ता भावाः—औदयिकादयः, नियमाद्दर्शनमोहं प्रतीत्यैव—उद्दिश्यैव, भणिताः—कथिताः खलु न चारित्रमोहं प्रतीत्य। कुतः? इति चेत् यतः कारणात् अविरतांतेषु गुणस्थानेषु चारित्रं नास्ति ततः कारणात् चारित्रमोहविवक्षा नास्तीत्यर्थः ॥१२॥

सं० चं०—ऐसैं पूर्वोक्त औदयिक आदि भाव कहे ते नियमतैं दर्शनमोहकौं प्रतीत्य कहिए आश्रयकरि भणिता कहिए कहे हैं। प्रगटपनैं जातैं अविरतपर्यंत च्यारि गुणस्थानविषैं चारित्र नाहीं है। इस कारणतैं ते भाव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चारित्र मोहका आश्रयकरि नाहीं कहे हैं । तीहिं करि सासादनगुणस्थानविषैं अनंतानुबंधी कोई क्रोधादिक एक कषायका उदय विद्यमान होतैं भी ताकी विवक्षा न करनेकरि पारिणामिकभाव सिद्धांतविषैं प्रतिपादन कीया है ऐसा तू जानि । बहुरि अनंतानुबंधी किसी कषायका उदयकी विवक्षा करि औदयिक भाव भी है । आगैं देशसंयतादिगुणस्थाननिविषैं भावनिका नियम गाथा दोय करि दिखावैं हैं--

देसविरदे पमत्ते इदरे य खओवसमियभावो दु ।
सो खलु चरित्तमोहं पडुच्च भणियं तहा उवरिं ॥ १३ ॥

देशविरते प्रमत्ते इतरे च क्षायोपशमिकभावस्तु ।
स खलु चारित्रमोहं प्रतीत्य भणितस्तथा उपरि ॥ १३ ॥

जी० प्र०--देशविरते प्रमत्तसंयते तु पुनः इतरस्मिन् अप्रमत्तसंयते च क्षायोपशमिकसंयमलक्षणो भावो भवति । देशसंयतापेक्षया प्रत्याख्यानावरणकषायाणां उदयागतदेशघातिस्पर्धकानंतबहुभागानुभागोदयेन सहानुदयागतक्षीयमाणविवक्षितोदयनिषेकसर्वघातिस्पर्धकानंतबहुभागानामुदयाभावलक्षणक्षये तेषामुपरितननिषेकाणां अनुदयप्राप्तानां सदवस्थालक्षणोपशमे च सति समुद्भूतत्वात् चारित्रमोहं प्रतीत्य देशसंयमः क्षायोपशमिकभाव इत्युक्तं । तथा प्रमत्ताप्रमत्तयोरपि संज्वलनकषायाणामुदयागतदेशघातिस्पर्धकानंतैकभागानुभागेन सह अनुदयागतक्षीयमाणविवक्षितोदयनिषेकसर्वघातिस्पर्धकानंतबहुभागानां उदयाभावलक्षणक्षये तेषां उपरितननिषेकाणां अनुदयप्राप्तानां सदवस्थालक्षणोपशमे च सति समुत्पन्नत्वात् चारित्रमोहं प्रतीत्यात्रापि सकलसंयमोऽपि क्षायोपशमिको भाव इति भणितं इति श्रीमदभयचंद्रसूरिसिद्धांतचक्रवर्त्यभिप्रायः । तथा उपर्यपि अपूर्वकरणादिगुणस्थानेषु चारित्रमोहनीयं प्रतीत्य तत्तद्गुणस्थानेषु भावा ज्ञातव्याः ॥ १३ ॥

मं० प्र०---देशविरते प्रमत्तविरते इतरस्मिन्नप्रमत्तविरते च क्षायोपशमिकचारित्रलक्षण एव भावो वर्तते । देशविरते प्रत्याख्यानावरणकषायाणां सर्वघातिस्पर्धकोदयाभावलक्षणे क्षये, तेषामेव हीनानुभागरूपतया परिणतानां सदवस्थालक्षणे उपशमे च, देशघातिस्पर्धकोदयसहिते उत्पन्नं देशसंयमरूपचारित्रं क्षायोपशमिकं । प्रमत्तविरते तीव्रानुभागसंज्वलनकषायाणां प्रागुक्तलक्षणक्षयोपशमसमुत्पन्नसंयमरूपं प्रमादमलिनं सकलचारित्रं क्षायोपशमिकं । अत्र संज्वलनानुभागानां प्रमादजनकत्वमेव तीव्रत्वं । अप्रमत्तविरते मंदानुभागसंज्वलनकषायाणां प्रागुक्तक्षयोपशमोत्पन्नसंयमरूपं निर्मलं सकलचारित्रं क्षायोपशमिकं । तुशब्दः असंयतादिव्यवच्छेदार्थः । स खलु देशविरतादिषु प्रोक्तक्षायोपशमिको भावः । चारित्रमोहं प्रतीत्य भणितः तथा उपरि उपशमकादिषु चारित्रमोहं प्रतीत्य भणिष्यते ॥ १३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स.चं.--देशविरतविषैं बहुरि प्रमत्तसंयतविषैं बहुरि इतर अप्रमत्तसंयतविषैं क्षायोपशमिक भाव है । तहां देशसंयत अपेक्षा करि प्रत्याख्यानकषायनिके उदय अवस्थाकौं प्राप्त भए जे देशघाती स्पर्धकनिका अनंतवां भागमात्र तिनका जो उदय तीहिं सहित जे उदयकौं न प्राप्त भए ही निर्जरा रूप क्षय होते जे विवक्षित उदयरूप निषेक तिनि स्वरूप जे सर्वघातिया स्पर्धकनिका अनंतभागनिविषैं एकभागविना बहुभाग तिनका उदयका अभाव सो ही है लक्षण जाका ऐसा क्षय होते संते बहुरि वर्तमान समयसंबंधी निषेकतैं ऊपरिके निषेक जे उदय अवस्थाकौं न प्राप्त भए तिनकी सत्तारूप जो अवस्था सोई है लक्षण जाका ऐसा उपशम होते संते देशसंयम प्रकटै है तातैं चारित्र मोहकौं आश्रय करि देशसंयत क्षायोपशमिक भाव है ऐसा कह्या है। बहुरि तैसैं ही प्रमत्त अप्रमत्तविषैं भी संज्वलन कषायनिका उदय आए जे देशघातिया स्पर्धक अंनतवां भागरूप तिनिका उदयकरि सहित उदयकौं न प्राप्त होतैं ही क्षयरूप होते जे विवक्षित उदय निषेक तिनिरूप सर्वघातिया स्पर्धक अनंत भागनिविषैं एकभागविना बहुभागरूप तिनिका उदयका अभाव सोही है लक्षण जाका ऐसा क्षय होते बहुरि ऊपरिके निषेक जे उदयकौं प्राप्त न भए तिनिका सत्ता अवस्थारूप है लक्षण जाका ऐसा उपशम ताकौं होते संतै प्रमत्त अप्रमत्त हो है तातैं चारित्र मोह अपेक्षा इहां सकलसंयम है तथापि क्षायोपशमिक भाव है ऐसा कह्या है ऐसा श्रीमान् अभयचंद्रनामा आचार्य सिद्धांतचक्रवर्ती ताका अभिप्राय है । भावार्थ--सर्वत्र क्षयोपशमका स्वरूप ऐसा ही जानना जहां प्रतिपक्षी कर्मके देशघातिया स्पर्धकनिका उदय पाइए तीह सहित सर्वघातिया स्पर्धक उदयनिषेकसंबंधी तिनिका उदय न पाइए विना ही उदय दीए निर्जरै सोई क्षय अर जे उदय न प्राप्त भए आगामी निषेक तिनिका सत्तास्वरूप उपशम तिनि दोऊनिकौं होतै क्षयोपशम हो है सो स्पर्धकनिका वा निषेकनिका वा सर्वघाति देशघातिस्पर्धकनिके विभागका आगैं वर्णन होगा तातैं इहां विशेष नाहीं लिख्या है। सो इहां भी पूर्वोक्तप्रकार चारित्रमोहका क्षयोपशम ही है तातैं क्षायोपशमिक भाव देशसंयत प्रमत्त अप्रमत्तविषैं जानना। तैसैं ही ऊपरि भी अपूर्वकरणादिगुणस्थाननिविषैं चारित्रमोहकौं आश्रयकरि भाव जानने ॥ १३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्तो उवरिं उवसमभावो उवसामगेसु खवगेसु ।
खइओ भावो णियमा अजोगिचरिमोत्ति सिद्धे य ॥ १४ ॥

तत उपरि उपशमभाव उपशामकेषु क्षपकेषु ।
क्षायिको भावो नियमात् अयोगिचरम इति सिद्धे च ॥ १४ ॥

जी० प्र०—तत उपरि अपूर्वकरणादिचतुर्गुणस्थानोपशमकेषु औपशमिक भावो भवति तत्संयमस्य चारित्रमोहोपशमादेव संभवात् । तथा अपूर्वकरणादिचतुर्गुणस्थानक्षपकेषु सयोगायोगिकेवलिनोश्च क्षायिकभावो भवति नियमेन तच्चारित्रस्य चारित्रमोहक्षयोत्पन्नत्वात् । (अयोगिचरमं यावदिति गुणस्थानपर्यंतसूचनार्थं इतिशब्दस्य यावदर्थत्वात्) सिद्धे च तथा सिद्धपरमेष्ठिषु च (अपि) क्षायिकभावः स्यात् तस्य सकलकर्मक्षयोद्भूतत्वात् ॥ १४ ॥ अथ प्रागुद्दिष्टचतुर्दशगुणस्थानेषु प्रथमोद्दिष्टस्य मिथ्यादृष्टिगुणस्थानस्य स्वरूपं प्रकाशयति—

मं० प्र०—तत उपरि—अप्रमत्तगुणस्थानस्योपरि, उपशमश्रेण्यां त्रिषूपशमकेषु उपशांतकषाये च एकविंशतिचारित्रमोहप्रकृतीनामुपशमादुत्पन्नसंयमरूपं निर्मलतरं सकलचारित्रमौपशमिको भावः । क्षपकश्रेण्यां त्रिषु क्षपकेषु क्षीणकषाये सयोगकेवलिनि अयोगिकेवलिनि च चारित्रमोहक्षयोत्पन्नसंयमरूपं निर्मलतमं सकलचारित्रं क्षायिको भावः । अयोगिचरमं यावदिति गुणस्थानपर्यंतसूचनार्थं, इतिशब्दस्य यावदर्थत्वात् । सिद्धे सिद्धपरमेष्ठिनि च क्षायिको भावः केवलसम्यक्त्वज्ञानदर्शनादिरूपः यथासंभवमागमाविरोधेन ज्ञातव्यः तत्र चारित्रमोहं प्रति नियमाभावात् सिद्धजीवत्वलक्षणपारिणामिकभावस्यापि विद्यमानत्वात् ॥ १४ ॥ अथ प्रथमोद्दिष्टमिथ्यादृष्टिगुणस्थानं कारणस्वरूपप्रकारकथनपूर्वकं प्ररूपयति—

स० चं०—तातैं ऊपरि अपूर्वकरणादि च्यारि गुणस्थान उपशमश्रेणी संबंधी तिनिविषैं औपशमिक भाव है जातैं तिस संयमका चारित्रमोहके उपशमहीतैं संभव है । बहुरि तैसैं अपूर्वकरणादि च्यारिगुणस्थान क्षपकश्रेणी संबंधी अर सयोग अयोगीकेवली तिनिविषैं क्षायिक भाव है नियमकरि, जातैं तिस चारित्रका चारित्रमोहके क्षयहीतैं उपजना है । बहुरि तैसैं ही सिद्धपरमेष्ठीनिविषैं भी क्षायिक भाव हो है । जातैं तिस सिद्धपदका सकलकर्मके क्षय होतैं प्रकटपना होहै ॥ १४ ॥ आगैं पूर्वैं नाममात्र कहे जे चौदहगुणस्थान तिनिविषैं पहिले कह्या जो मिथ्यादृष्टि गुणस्थान ताका स्वरूपकौं प्ररूपै हैं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिच्छोदयेण मिच्छत्तमसद्दहणं तु तच्चअत्थाणं।
एयंतं विवरीयं विणयं संसयिदमण्णाणं ॥ १५ ॥

मिथ्यात्वोदयेन मिथ्यात्वमश्रद्धानं तु तत्त्वार्थानां।
एकांतं विपरीतं विनयं संशयितमज्ञानं ॥ १५ ॥

जी० प्र०—दर्शनमोहनीयभेदमिथ्यात्वप्रकृत्युदयेन जीवस्य अतत्त्वश्रद्धानलक्षणं मिथ्यात्वं स्यात्। तच्च मिथ्यात्वं-एकांतं विपरीतं विनयं संशयितं अज्ञानं चेति पंचविधं। तत्र जीवादिवस्तु सर्वथा सदेव सर्वथाऽसदेव सर्वथा एकमेव सर्वथा अनेकमेवेत्यादिप्रतिपक्षनिरपेक्षैकांताभिप्रायः एकांतमिथ्यात्वं। अहिंसादिलक्षणसद्धर्मफलस्य स्वर्गादिसुखस्य हिंसादिरूपयागादिफलत्वेन, जीवस्य प्रमाणसिद्धस्य मोक्षस्य निराकरणत्वेन, प्रमाणबाधितस्त्रीमोक्षास्तित्ववचनेन इत्याद्येकांतावलंबनेन विपरीताभिनिवेशो विपरीतमिथ्यात्वं। सम्यग्दर्शनज्ञानचारित्रनिरपेक्षतया गुरुपादपूजादिरूपविनयेनैव मुक्तिरेतच्छ्रद्धानं वैनयिकमिथ्यात्वं। प्रत्यक्षादिप्रमाणगृहीतार्थस्य देशांतरे कालांतरे च व्यभिचारसंभवात् परस्परविरोधिन आप्तवचनस्यापि प्रामाण्यानुपपत्तेरिदमेव तत्त्वमिति निर्णयितुमशक्तेः सर्वत्र संशय एव इत्यभिप्रायः संशयमिथ्यात्वं। ज्ञानदर्शनावरणतीव्रोदयाक्रांतानामेकेंद्रियजीवानां अनेकांतात्मकं वस्त्विति वस्तुसामान्ये, उपयोगलक्षणो जीव इति वस्तुविशेषेपि अज्ञानजनितं श्रद्धानं अज्ञानमिथ्यात्वं भवति। एवं स्थूलांशाश्रयेण मिथ्यात्वस्य पंचविधत्वं कथितं सूक्ष्मांशाश्रयेणासंख्यातलोकमात्रविकल्पसंभवात् तत्र व्यवहारानुपपत्तेः ॥ १५ ॥ अथैषां भावानामुदाहरणान्युद्दिशति—

मं० प्र०—दर्शनमोहनीयप्रकृतिभेदस्य मिथ्यात्वकर्मणः उदयेन फलदानशक्तिविपाकेन जायमानं तत्त्वार्थानां--जीवाजीवास्रवबंधसंवरनिर्जरामोक्षाणां, अश्रद्धानं-अनभ्युपगमः, मिथ्यात्वं--जीवस्य मिथ्यादर्शनपरिणामः, तच्च--मिथ्यात्वं, एकांतविपरीतविनयसंशयिताज्ञानभेदात्पंचप्रकारं। तत्र सर्वथा अस्त्येव नास्त्येव एकमेव अनेकमेव नित्यमेव अनित्यमेव वक्तव्यमेव अवक्तव्यमेव जीवादि वस्तु इत्यादि प्रतिपक्षनिरपेक्षसर्वथानियम एकांतः, तच्छ्रद्धानं एकांतमिथ्यात्वं। अहिंसादिलक्षणधर्मफलस्य स्वर्गापवर्गसौख्यस्य हिंसादिरूपयागादिकर्मफलत्वश्रद्धानं विपरीतमिथ्यात्वं। सम्यग्दर्शनज्ञानचारित्रनिरपेक्षगुरुपादपूजादिलक्षणविनयेनैव भवत्येव स्वर्गापवर्गप्राप्तिरिति श्रद्धानं विनयमिथ्यात्वं। प्रत्यक्षादिप्रमाणैः परिज्ञातस्यापि वस्तुनः देशांतरे कालांतरे च इदमेव ईदृशमेव इत्यवधारयितुमशक्यत्वेन तत्स्वरूपप्ररूपकाणामाप्ताभिमानिनामपि परस्परविरुद्धशास्त्रोपदेशकत्वात् वंचकत्वशंकया च तत्त्वमित्थं भवति वा नवेत्युभयांशावलंबनरूपसंशयपूर्वकश्रद्धानं संशयितमिथ्यात्वं। विचार्यमाणानां जीवाद्यर्थानामिदमेव ईदृशमेव तत्त्वमिति ज्ञानाभावादज्ञानमेवेति श्रद्धानमज्ञानमिथ्यात्वं। एवं स्थूलांशाश्रयेण मिथ्यात्वस्य पंचविधत्वं कथितं। सूक्ष्मांशाश्रयेणासंख्यातलोकमात्रविकल्पसंभवात् तत्र व्यवहारानुपपत्तेः ॥ १५ ॥ अथ मिथ्यात्वस्य पंचप्रकारोदाहरणान्युद्दिशति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०—दर्शनमोहनीका भेदरूप मिथ्यात्व प्रकृतिका उदयकरि जीवकैं अतत्त्व श्रद्धान है लक्षण जाका ऐसा मिथ्यात्व हो है। बहुरि सो मिथ्यात्व एकांत १ विपरीत २ विनय ३ संशयित ४ अज्ञान ५ ऐसैं पांच प्रकार है। तहां जीवादि वस्तु सर्वथा सत्त्वरूप ही है सर्वथा असत्त्वरूप ही है, सर्वथा एक ही है, सर्वथा अनेक ही है इत्यादि प्रतिपक्षी दूसरा भावकी अपेक्षारहित एकांतरूप अभिप्राय सो एकांत मिथ्यात्व है। बहुरि अहिंसादिक समीचीनधर्मका फल जो स्वर्गादिक सुख ताकौं हिंसादिरूप यज्ञादिकका फल कल्पनाकरि मानैं वा जीवकैं प्रमाणकरि सिद्ध है जो मोक्ष ताका निराकरणकरि मोक्षका अभाव मानै वा प्रमाणकरि खंडित जो स्त्रीकैं मोक्षप्राप्ति ताका अस्तित्व वचनकरि स्त्रीकौं मोक्ष है ऐसा मानैं इत्यादि एकांत अवलंबनकरि विपरीतरूप जो अभिनिवेश-अभिप्राय सो विपरीत मिथ्यात्व है। बहुरि सम्यग्दर्शन ज्ञान चारित्रकी सापेक्षारहितपनैंकरि गुरुचरणपूजनादिरूप विनय ही करि मुक्ति है यहु श्रद्धान वैनयिक मिथ्यात्व है। बहुरि प्रत्यक्षादि प्रमाणकरि ग्रह्या जो अर्थ ताका देशांतरविषैं अर कालांतरविषैं व्यभिचार जो अन्यथाभाव सो संभवै है तातैं अनेकमत अपेक्षा परस्पर विरोधी जो आप्तवचन ताका भी प्रमाण ताकी प्राप्ति नाहीं तातैं ऐसैं ही तत्त्व है ऐसा निर्णय करनेकी शक्तिके अभावतैं सर्वत्र संशय ही है ऐसा जो अभिप्राय सो संशयमिथ्यात्व है। बहुरि ज्ञानावरण दर्शनावरणका तीव्र उदयकरि संयुक्त जे एकेंद्रियादिक जीव तिनके अनेकांत स्वरूप वस्तु है ऐसा वस्तुका सामान्य भावविषैं अर उपयोग लक्षण जीव है ऐसा वस्तुका विशेषभावविषैं जो अज्ञान ताकरि निपज्या जो श्रद्धान सो अज्ञानमिथ्यात्व है। ऐसैं स्थूल भेदनिका आश्रयकरि मिथ्यात्वका पंचप्रकारपना कह्या जातैं सूक्ष्म भेदनिका आश्रयकरि असंख्यात लोकमात्र भेद संभवै हैं तातैं तहां व्याख्यानादिक व्यवहारकी अप्राप्ति है ॥ १५ ॥ आगै इन पंचनिका उदाहरणकौं कहै हैं—

एयंत बुद्धदरसी विवरीओ बह्म तावसो विणओ।
इंदो विय संसइयो मक्कडिओ चेव अण्णाणी ॥ १६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकांतो बुद्धदर्शी विपरीतो ब्रह्म तापसो विनयः ।
इंद्रोऽपि च संशयितो मस्करी चैवाज्ञानी ॥ १६ ॥

जी० प्र०—एतानि उपलक्षणत्वेन उक्तत्वात् एवं व्याख्येयानि- बुद्धदर्श्यादयः एकांतमिथ्यादृष्टयः । याज्ञिकब्राह्मणादयः विपरीतमिथ्यादृष्टयः । तापसादयः विनयमिथ्यादृष्टयः । इंद्रो नाम श्वेतांबरगुरुः, तदादयः संशयमिथ्यादृष्टयः । मस्कर्यादयः अज्ञानमिथ्यादृष्टयो भवंति । कालापेक्षया एतद्भरतक्षेत्रसंभविनः बुद्धदर्श्यादय उदाहृताः ॥ १६ ॥ अथातत्त्वश्रद्धानलक्षणं मिथ्यात्वं निरूपयति—

मं० प्र०—उपलक्षणमेतत् अन्येषामपि तत्तन्मिथ्यात्वोदाहरणानां संभवात्, तत एवं व्याख्यायते-बुद्धदर्श्यादयः एकांतमिथ्यादृष्टयः । ब्राह्मणादयः विपरीतमिथ्यादृष्टयः । तापसादयः विनयमिथ्यादृष्टयः । इंद्रः श्वेतांबरगुरुः तदादयः संशयितमिथ्यादृष्टयः । मस्कर्यादयः अज्ञानमिथ्यादृष्टयः । कालापेक्षया एतद्भरतक्षेत्रसंभाविनः बुद्धदर्श्यादय उदाहृताः ॥ १६ ॥ अथ प्रकारांतरेण मिथ्यादृष्टिस्वरूपमाह—

स० चं०—ए उपलक्षणपनाकरि कहे हैं एकका नाम लेनैतैं अन्य भी ग्रहण करने तातैं ऐसैं कहने-बुद्धदर्शी जो बौद्धमती ताकौं आदि देकरि एकांत मिथ्यादृष्टि हैं । बहुरि यज्ञकर्ता ब्राह्मण आदि विपरीत मिथ्यादृष्टि हैं । बहुरि तापसी आदि विनयमिथ्यादृष्टि हैं । बहुरि इंद्रनामा श्वेतांबरनिका गुरु ताकौं आदिदेकरि संशयमिथ्यादृष्टि हैं । बहुरि मस्करी संन्यासीकौं आदि देकरि अज्ञानमिथ्यादृष्टि हैं । वर्तमान काल अपेक्षाकरि ए भरतक्षेत्रविषैं संभवते बौद्धमती आदि उदाहरण कहे हैं॥१६॥आगैं अतत्त्वश्रद्धान है लक्षण जाका ऐसैं मिथ्यात्वकौं प्ररूपै हैं—

मिच्छंतं वेदंतो जीवो विवरीयदंसणो होदि ।
ण य धम्मं रोचेदि हु महुरं खु रसं जहा जरिदो ॥ १७ ॥

मिथ्यात्वं विदन् जीवो विपरीतदर्शनो भवति ।
न च धर्मं रोचते हि मधुरं खलु रसं यथा ज्वरितः ॥ १७ ॥

जी० प्र०—मिथ्यात्वं उदयागतं वेदयन्-अनुभवन् जीवः विपरीतदर्शनः अतत्त्व (अनाप्तागमपदार्थेषु आप्तागमपदार्थ) श्रद्धायुक्तो भवति न केवलं अतत्त्वमेव श्रद्धत्ते अनेकांतात्मकं धर्मं वस्तुस्वभावं रत्नत्रयात्मकमोक्षकारणभूतधर्मं वा न च नैव रोचते नाभ्युपगच्छति । अत्र दृष्टांत-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

माह-यथा ज्वरितः-पित्तज्वराक्रांतो, मधुरं-क्षीरादिरसं, न रोचते तथा मिथ्यादृष्टिर्धर्मं न रोचते इत्यर्थः १७ इदमेव वस्तुस्वभावाश्रद्धानं स्पष्टयति—

मं० प्र०—मिथ्यात्वं-उदयागतं दर्शनमोहप्रकृतिविशेषं, वेदयन्-अनुभवन् जीवः, विपरीतदर्शनः, अनाप्तागमपदार्थेषु आप्तागमपदार्थश्रद्धानो भवति। एतदेव समर्थयते-खलु-यतः कारणात् धर्मं परमार्थाप्तागमपदार्थस्वभावं न रोचते च न श्रद्धत्ते च। अत्र चशब्दः अनाप्तागमपदार्थस्वभावरूपधर्मं रोचते इति समुच्चयार्थः। ततः कारणात् लौकिकव्यवहारे सम्यग्दृष्टिवत् मिथ्यादृष्टेर्विपरीतश्रद्धानाभावेऽपि परमार्थेषु-आप्तागमपदार्थेषु विपरीतश्रद्धानसंभवात् मिथ्यादृष्टिरेवेति निश्चेतव्यं। आस्मिन्नर्थे दृष्टांतमाह-यथा ज्वरितः- पित्तज्वराक्रांतः, मधुरं-क्षीरादिरसं मधुरं न रोचते तथा मिथ्यादृष्टिरपि धर्मं न रोचते इत्यर्थः॥ १७॥ अमुमेवार्थं परिस्फुटं कुर्वन् मिथ्यादृष्टेश्चिह्नमाह—

स० चं०—उदय आया मिथ्यात्वकौं वेदन् कहिए अनुभवता जो जीव सो विपरीतदर्शन कहिए अतत्त्वश्रद्धानसंयुक्त हो है अयथार्थ प्रतीत करै है। बहुरि केवल अतत्त्वहीकौं नाहीं श्रद्धै है अनेकांतस्वरूप जो वस्तुका स्वभाव अथवा रत्नत्रयस्वरूप मोक्षका कारणभूत धर्म ताहि न रोचते कहिए नाहीं रुचिरूप प्राप्त हो है। इहां दृष्टांत कहै हैं-जैसैं ज्वरित कहिए पित्तज्वरसहित पुरुष सो मधुर मीठा दुग्धादिक रस ताहि न रोचै है तैसैं मिथ्यादृष्टि धर्मकौं न रोचै है ऐसा अर्थ जानना॥ १७॥ इस ही वस्तुस्वभावके अश्रद्धानकौं स्पष्ट करै हैं—

मिच्छाइट्ठी जीवो उवइट्ठं पवयणं ण सद्दहदि।
सद्दहदि असब्भावं उवइट्ठं वा अणुवइट्ठं॥ १८॥

मिथ्यादृष्टिर्जीवः उपदिष्टं प्रवचनं न श्रद्दधाति।
श्रद्दधाति असद्भावं उपदिष्टं वा अनुपदिष्टं॥ १८॥

जी० प्र०—मिथ्यादृष्टिर्जीवः उपदिष्टं-अर्हदादिभिर्व्याख्यातं, प्रवचनं-आप्तागमपदार्थत्रयं न श्रद्दधाति-नाभ्युपगच्छति। प्रकृष्टं वचनं यस्यासौ प्रवचनः-आप्तः, प्रकृष्टस्य वचनं प्रवचनं-परमागमः, प्रकृष्टमुच्यते-प्रमाणेन अभिधीयते इति प्रवचनं पदार्थः, इति निरुक्त्या प्रवचनशब्देन तत्त्रयस्याभिधानात्। पुनः स मिथ्यादृष्टिः असद्भावं-मिथ्यारूपं प्रवचनं आप्तागमपदार्थं, उपदिष्टं-आप्ताभासैः प्रकथितं अथवा अनुपदिष्टं-अकथितमपि श्रद्दधाति। ननु-'घडपडत्थंभादिपयत्थेसु मिच्छाइट्ठी जहावगमं। सद्दहतोवि अण्णाणी उच्चदे जिणवयणे सद्दहणाभावादो॥' इति सिद्धां-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तवाक्योद्दिष्टमिथ्यादृष्टिलक्षणं ज्ञात्वा स मिथ्याभावः परिहर्तव्यः। पुनः स मिथ्यादर्शनपरिणामभेदोप्यनेनैव ज्ञातव्यः। कश्चिन्मिथ्यादर्शनपरिणामः आत्मन्यवस्थितः रूपाद्युपलब्धौ सत्यामपि कारणविपर्यासं भेदाभेदविपर्यासं स्वरूपविपर्यासं च जनयति। तत्र कारणविपर्यासस्तावत् रूपादीनामेकं कारणममूर्तं नित्यमिति कल्पयति। अपरः पृथिव्यादिजातिभिन्नाः परिमाणवश्चतुस्त्रिद्व्येकगुणास्तुल्यजातीयानां कार्याणामारंभका इति वर्णयति। भेदाभेदविपर्यासः-कार्यात् कारणं भिन्नमेवाभिन्नमेवेति परिकल्पना स्यात्। स्वरूपविपर्यासः-रूपादयो निर्विकल्पाः संति न संत्येव वा तदाकारपरिणतं विज्ञानमेव न तदालंबनं बाह्यं वस्त्विति। एवं कुमतिज्ञानबलाधानेन कुश्रुतविकल्पा भवंति। एतेषां सर्वं मूलकारणं मिथ्यात्वकर्मोदय एवेति निश्चेतव्यं ॥ १८ ॥ अथ सासादनगुणस्थानस्वरूपं सूत्रद्वयेन आह-

मं० प्र०---यो जीवः उपदिष्टं-परमगुरुभिर्दर्शितं प्रवचनं--पूर्वापरविरोधादिदोषरहितमाप्तवचनं न श्रद्दधाति, उपदिष्टं अनुपदिष्टं वा आचार्याभासैर्व्याख्यातं स्वेच्छाचर्चितं वा असद्भावं कुश्रुतं श्रद्दधाति सः मिथ्यादृष्टिर्भवतीति लक्षयितव्यः। प्रकृष्टस्य--ज्ञानवैराग्यादिगुणैरुत्कृष्टस्य पुरुषस्य वचनं प्रवचनं। प्रकृष्टं निर्दोषं--सर्वहितं सयुक्तिकं वा वचनं प्रवचनं परमागम इत्यर्थः। असंतः--अपरमार्थाः भावाः--पदार्थाः, यस्मिन् तत् असद्भावं कुश्रुतमित्यर्थः। परमागमाश्रद्धानं मिथ्यागमश्रद्धानं च मिथ्यादृष्टेश्चिह्नमित्ययमस्य गाथासूत्रस्य भावार्थः ॥ १८ ॥ अथ सासादनगुणस्थानप्ररूपणार्थं गाथाद्वयमाह-

स० चं०--मिथ्यादृष्टि जीव है सो उपदिष्ट कहिए अर्हंत आदिकनिकरि उपदेस्या हूआ प्रवचन कहिए आप्त आगम पदार्थ इनि तीनोंकौं नाहीं श्रद्धै है जातैं प्र कहिए उत्कृष्ट है वचन जाका ऐसा प्रवचन कहिए आप्त बहुरि प्रकृष्ट जो परमात्मा ताका वचन सो प्रवचन कहिए परमागम बहुरि प्रकृष्टं उच्यते कहिए प्रमाणकरि निरूपिए ऐसा प्रवचन कहिए पदार्थ, याप्रकार निरुक्तिकरि प्रवचन शब्दकरि आप्त आगम पदार्थ तीनोंका अर्थ हो है। बहुरि सो मिथ्यादृष्टि असद्भाव कहिए मिथ्यारूप, प्रवचन कहिए आप्त आगम पदार्थ, उपदिष्ट कहिए आप्तकीसी आभासा लिए कुदेव कुगुरु जे हैं तिनकरि उपदेस्या हूआ अथवा अनुपदिष्ट कहिए विना उपदेस्या हूआ ताकौं श्रद्धान करै है। बहुरि वादीका अभिप्राय लेइ उक्तं च गाथा कहै हैं—

"घडपडथंभादिपयत्थेसु मिच्छाइट्ठी जहावगमं।
सद्दहतोवि अण्णाणी उच्चदे जिणवयणे सद्दहणाभावादो ॥"

याका अर्थ--घट पट स्तंभ आदि पदार्थनिविषैं मिथ्यादृष्टी जीव यथार्थ ज्ञानलीएं श्रद्धान करता भी अज्ञानी कहिए

१ "तद्भेदोऽप्यनेनैव वाक्येन ज्ञातव्यः" इति ख पुस्तके पाठः। २ क, पुस्तकमें श्रद्धहै है यह पाठ है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जातैं जिनवचनविषैं श्रद्धानका अभाव है। ऐसा सिद्धांतका वाक्यकरि कह्या मिथ्यादृष्टिका लक्षण जानैं। सो मिथ्यात्वभाव त्यजना योग्य है। ताका भेद भी इस ही वाक्यकरि जानना। सो कहिए हैं-कोऊ मिथ्यादर्शनरूप परिणाम आत्माविषैं प्रकट हूआ थका वर्णरसादिकी उपलब्धि जो ज्ञानकरि जाननेकी प्राप्ति ताहि होते संतैं कारणविपर्यास बहुरि भेदाभेदविपर्यास बहुरि स्वरूपविपर्यासकौं उपजावै है। तहां कारणविपर्यास प्रथम कहिए है रूप रसादिकनिका एक कारण है सो अमूर्तीक है नित्य है ऐसैं कल्पना करै है। अन्य कोई 'पृथ्वी आदि जातिभेद लीए भिन्न २ परमाणु हैं ते पृथ्वीके च्यारि गुणयुक्त, अप्के गंधविना तीन गुणयुक्त, अग्निके रसविना दोय गुणयुक्त, पवनके एक स्पर्शगुणयुक्त परमाणु हैं ते अपनी समान जातिके कार्यनिकौं निपजावन हारे हैं' ऐसा वर्णन करै है। या प्रकार कारणविषैं विपरीतभाव जानना। बहुरि भेदाभेदविपर्यास कहै हैं—कार्यतैं कारण भिन्न ही है अथवा अभिन्न ही है ऐसा कल्पना भेदाभेदविषै अन्यथापना जानना। बहुरि स्वरूपविपर्यास कहै हैं-रूपादिक गुण निर्विकल्प हैं। कोऊ कहै-हैं ही नाहीं। कोऊ कहै-रूपादिकनिके जाननेकरि तिनके आकार परिणया ज्ञान ही है, तिनका अवलंबन बाह्य वस्तु है ही नाहीं। ऐसा विचार स्वरूपविषैं मिथ्यारूप जानना। याप्रकार कुमतिज्ञानका बलका आधारकरि कुश्रुतज्ञानके विकल्प हो हैं। इनका सर्व मूलकारण मिथ्यात्व कर्मका उदय ही है ऐसा निश्चय करना ॥ १८ ॥ आगै सासादनगुणस्थानका स्वरूप दोय सूत्रनिकरि कहै हैं--

आदिमसम्मत्तद्धा समयादो छावलित्ति वा सेसे।
अणअण्णदरुदयादो णासियसम्मोत्ति सासणक्खो सो ॥१९॥

आदिमसम्यक्त्वाद्धा आसमयतः षडावलिरिति वा शेषे।
अनान्यतरोदयात् नाशितसम्यक्त्व इति सासानाख्यः सः ॥ १९ ॥

जी० प्र०--प्रथमोपशमसम्यक्त्वकाले जघन्येन एकसमये उत्कृष्टेन आवलिषट्के च अवशिष्टे सति अनंतानुबंधिकषायचतुष्के अन्यतमक-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षायस्योदये जाते यो विनाशितसम्यक्त्वो जायते स सासादन इत्युच्यते। वाशब्देन द्वितीयोपशमसम्यक्त्वकालेऽपि सासादनगुणस्थानप्राप्तिर्भवति इति कषायप्राभृताभिप्रायो भवति ॥ १९ ॥

मं० प्र०-----आदिमसम्यक्त्वस्य-प्रथमोपशमसम्यक्त्वस्य, वाशब्दात् द्वितीयोपशमसम्यक्त्वस्य वा अद्धाकालः-अंतर्मुहूर्तप्रमितः, तत्र एकसमयात्प्रभृतिषडावलिपर्यंते यथासंभवावशेषे सति अनंतानुबंधिक्रोधमानमायालोभानां मध्ये अन्यतमकषायस्योदयात् यो जीवः नाशितसम्यक्त्वः स सासनाख्य इति ज्ञातव्यः। असनं--क्षेपणं सम्यक्त्वविराधनं, तेन सह वर्तते यः स सासन इति निरुक्त्या सासन इत्याख्या यस्यासौ सासनाख्यः--सासादनसम्यग्दृष्टिरित्यर्थः। अनंतानुबंधिकषायाणां चारित्रमोहत्वेऽपि सम्यक्त्वचारित्रघातकत्वस्वभावात्। न खलु स्वभावः आक्षेपमर्हति अग्निर्दहति वायुर्वातीत्यादिवत्। ननु सासादनस्य अनंतानुबंध्यन्यतमोदयजनितत्वेन कथं पारिणामिकत्वं ? इति चेत् न, विवक्षितदर्शनमोहोदयाद्यभावात्। अनंतानुबंधिनश्च दर्शनमोहत्वाभावात् तस्य चारित्रमोहे पठितत्वात्। ननु सम्यग्दर्शनघातकस्यानंतानुबंधिनः कथं दर्शनमोहत्वाभावः ? इति चेत्, न-तस्य चारित्रघातकतीव्रतमानुभागमहिम्ना चारित्रमोहत्वस्यैव युक्तत्वात्। तर्हि कथं तस्मात् सम्यग्दर्शनविनाशः ? इति चेत्, अनंतानुबंध्युदये सति षडावलिरूपस्तोककालव्यवधानेऽपि मिथ्यात्वकर्मोदयाभिमुख्ये सत्येव सम्यग्दर्शनविनाशसंभवात्। अत एव मिथ्यात्वोदयनिरपेक्षतया सासादनत्वं भवतीति पारिणामिकभावत्वमुक्तं। परिणामः स्वभावः, तस्माद्भव पारिणामिक इति व्युत्पत्तेः। नन्वेवं कथमनंतानुबंध्यन्यतमोदयान्नाशितसम्यक्त्व इत्युच्यते ? इति चेत्, न-मिथ्यात्वोदयाभिमुख्यसन्निहितस्य अनंतानुबंध्युदयस्य सम्यग्दर्शनविनाशसंभवेन तदुदयाच्चद्विनाश इति वचनाविरोधात्। किं बहुना अनंतानुबंधिनः सम्यक्त्वविनाशसामर्थ्यशक्तिसंभवेऽपि मिथ्यात्वोदयाभिमुख्ये सत्येव तत्सामर्थ्यव्यक्तिरिति सिद्धो नः सिद्धांतः। ननु सासादनसम्यग्दृष्टौ किं तत्त्वरुचिः, किमतत्त्वरुचिः, किमुभयरुचिः, किमनुभयं वा ? यदि तत्त्वरुचिस्तदा सम्यग्दृष्टिरेवासौ, यद्यतत्त्वरुचिस्तदा मिथ्यादृष्टिरेवासौ, यद्युभयरुचिस्तदा सम्यग्मिथ्यादृष्टिरेवासौ यद्यनुभयरुचिस्तदा आत्माभावः स्यात्। श्रद्धानमात्मनो गुणस्तदभावे गुणिनः-आत्मनोऽप्यभावप्रसंगात् सासादनगुणस्थानस्याभावः प्राप्नोति, इति चेत्, न-अतत्त्वरुचिपक्षस्य स्वीकारात् तत्त्वश्रद्धानविनाशे अतत्त्वश्रद्धानस्यावश्यंभावात्। सासादने हि अव्यक्तमतत्त्वश्रद्धानं मिथ्यादृष्टौ व्यक्तमिति विभागः स्वीकर्तव्यः ततोऽस्ति सासादनगुणस्थानं ॥ १९ ॥

स० चं०-प्रथमोपशम सम्यक्त्वका कालविषै जघन्य एकसमय, उत्कृष्ट छह आवली अवशेष रहैं अनंतानुबंधी च्यारि कषायनिविषै अन्यतम कोई एकका उदय होते संतै नष्ट कीया है सम्यक्त्व जानै ऐसा होइ सो सासादन ऐसा कहिए। बहुरि वा शब्दकरि द्वितीयोपशम सम्यक्त्वका कालविषै भी सासादन गुणस्थानकी प्राप्ति हो है ऐसा कषायप्राभृतनामा यतिवृषभाचार्यकृत महाधवल ग्रंथका अभिप्राय है। जो मिथ्यात्वतैं चतुर्थादि गुणस्थाननिविषै उपशम सम्यक्त्व होइ सो प्रथमोपशम सम्यक्त्व है। बहुरि उपशमश्रेणी चढते क्षायोपशमिक सम्यक्त्वतैं जो उपशम सम्यक्त्व होय सो द्वितीयोपशम सम्यक्त्व जानना ॥ १९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्मत्तरयणपव्वयसिहरादो मिच्छभूमिसमभिमुहो।
णासियसम्मत्तो सो सासणणामो मुणेयव्वो ॥ २० ॥

सम्यक्त्वरत्नपर्वतशिखरात् मिथ्यात्वभूमिसमभिमुखः।
नाशितसम्यक्त्वः सः सासननामा मंतव्यः ॥ २० ॥

जी० प्र०——यो जीवः सम्यक्त्वपरिणामरूपरत्नशिखरात् मिथ्यात्वपरिणामरूपभूम्यभिमुखः सन् यावदंतरालकाले एकसमयात् षडावलिकालपर्यंते वर्तते स जीवो विनाशितसम्यक्त्वः सासादननामा ज्ञातव्यः ॥ २० ॥ अथ सम्यग्मिथ्यादृष्टिगुणस्थानस्वरूपं गाथाचतुष्टयेनाह—

म.प्र.–सम्यक्त्वमेव रत्नपर्वतः सम्यक्त्वरत्नपर्वतः सम्यग्ज्ञानादिगुणरत्नानामुत्पत्तिस्थानत्वात् सर्वोन्नतमुक्तिस्थानप्रापकत्वेनोन्नतत्वाच्च तस्य शिखरं सम्यक्त्वस्थितिचरमसमयः तस्मात्पतितः, मिथ्यात्वभूमिसमभिमुखः। यथा त्यक्तपर्वताशिखरः भूमिमप्राप्य पतन्नंतराले कियंतमपि कालं वर्तते कश्चित् तथा यः नाशितसम्यक्त्वः सन् मिथ्यात्वभूमिमप्राप्य षडावलिमात्रांतरालकाले वर्तते स सासननामा,सासादनसम्यग्दृष्टिरिति ज्ञातव्यः। सह आसादनेन–विराधनया वर्तते या सा सासादना, सासादना सम्यग्दृष्टिः–सम्यग्दर्शनं यस्यासौ सासादनसम्यग्दृष्टिः–विनाशितसम्यक्त्व इत्येकोऽर्थः ॥ २० ॥ अथ सम्यग्मिथ्यादृष्टिगुणस्थानस्वरूपं गाथाचतुष्टयेन प्ररूपयति——

स० चं०——जो जीव सम्यक्त्वपरिणामरूपी रत्नपर्वतके शिखरतैं मिथ्यात्वपरिणामरूपी भूमिकाके सन्मुख होता संता पडिकरि जितना अंतरालका काल एकसमय आदि छह आवली पर्यंत है तिहिंविषै वर्तै सो जीव नष्ट कीया है सम्यक्त्व जानै ऐसा सासादन नाम धारक जानना ॥ २० ॥ आगै सम्यग्मिथ्यादृष्टिगुणस्थानका स्वरूप गाथा च्यारि करि कहै हैं—

सम्मामिच्छुदयेण य जत्तंतरसव्वघादिकज्जेण।
ण य सम्मं मिच्छं पि य सम्मिस्सो होदि परिणामो ॥ २१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्यग्मिथ्यात्वोदयेन च जात्यंतरसर्वघातिकार्येण ।
न च सम्यक्त्वं मिथ्यात्वमपि च, सम्मिश्रो भवति परिणामः ॥ २१ ॥

जी० प्र०—जात्यंतरसर्वघातिकार्यरूपसम्यग्मिथ्यात्वप्रकृत्युदयेन जीवस्य युगपत्सम्यक्त्वमिथ्यात्वशबलितरूपपरिणामो भवति तेन सम्यग्मिथ्यात्वप्रकृत्युदयेन मिथ्यात्वकर्मोदयवन्न केवलं मिथ्यात्वं परिणामो भवति नापि सम्यक्त्वप्रकृत्युदयवत् सम्यक्त्वपरिणामो भवति ततः कारणात् तत्कार्यं जात्यंतररूपसम्यक्त्वमिथ्यात्वपरिणामशबलितं भवतीति ज्ञातव्यं ॥ २१ ॥

मं.प्र.–जात्यंतरसर्वघातिकार्येण सम्यग्मिथ्यात्वोदयेन कस्यचिज्जीवस्य केवलं सम्यक्त्वमेव केवलं मिथ्यात्वमेव वा न च-नैव भवति। अपिचेत्येतत् पक्षद्वयसमुच्चयार्थं। किंतु संमिश्रः-सम्यग्मिथ्यात्वव्यामिश्रः-आप्तागमपदार्थश्रद्धानसंकीर्णानाप्तागमपदार्थश्रद्धानरूपपरिणामो भवति । सर्वघातिनः कार्यं सर्वघातिकार्यं-अतत्त्वश्रद्धानं जात्यंतरं तत्त्वश्रद्धानसंमिश्रं सर्वघातिकार्यं यस्यासौ जात्यंतरसर्वघातिकार्यः--सम्यग्मिथ्यात्वकर्मोदयः, तेन,अतएवायं परिणामः क्षायोपशमिक इति पूर्वमेवोक्तः॥२१॥

स० चं०—जात्यंतर कहिए जुदीही एकजाति भेद लीएं जो सर्वघातिया कार्यरूप सम्यग्मिथ्यात्व नामा दर्शनमोहकी प्रकृति ताका उदयकरि मिथ्यात्व प्रकृतिका उदयवत् केवल मिथ्यात्व परिणाम भी न होइ है अर सम्यक्त्व प्रकृतिका उदयवत् केवल सम्यक्त्व परिणाम भी न होइ है तिहिं कारणतैं तिस सम्यग्मिथ्यात्व प्रकृतिका कार्यभूत जुदी ही जातिरूप सम्यग्मिथ्यात्वपरिणाम मिलाया हूआ मिश्ररूप हो है ऐसा जानना ॥ २१ ॥

दहिगुडमिव वामिस्सं पुहभावं णेव कारिदुं सक्कं ।
एवं मिस्सयभावो सम्मामिच्छोत्ति णादव्वो ॥ २२ ॥

दधिगुडमिव व्यामिश्रं पृथग्भावं नैव कर्तुं शक्यं ।
एवं मिश्रकभावः सम्यग्मिथ्यात्वमिति ज्ञातव्यं ॥ २२ ॥

जी० प्र०—इव-यथा, व्यामिश्रं-संमिश्रं, दधिगुडं पृथग्भावं कर्तुं नैव शक्यं भवति एवं तथा सम्यग्मिथ्यात्वं-संमिश्रपरिणामोऽपि केवलसम्यक्त्वभावेन वा केवलमिथ्यात्वभावेन वा पृथग्भावेन व्यवस्थापयितुं नैव शक्यो भवति अतः कारणात् स सम्यग्मिथ्यादृष्टिरिति ज्ञातव्यो भवति । समीचीना चासौ मिथ्या च सम्यग्मिथ्या, सा दृष्टिः-श्रद्धानं यस्यासौ सम्यग्मिथ्यादृष्टिरिति व्युत्पत्तेरपि पूर्वपरिगृहीतातत्त्वश्रद्धानापरित्यागेन सह तत्त्वश्रद्धानं भवति तथासंभवकारणसद्भावात् ॥ २२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं.प्र.–व्यामिश्रं दधिगुडमिव यथा पृथग्भावं कर्तुं नैव शक्यं, एवं सम्यग्मिथ्यात्वमिति मिश्रभावोऽपि पृथक्कर्तुं न शक्यत इति ज्ञातव्यः। ननु सम्यग्मिथ्या-स्वपरिणामः क्रमेण युगपद्वा ? क्रमेण चेत् यदा सम्यक्त्वं तदा सम्यग्दृष्टिरेवासौ, यदा मिथ्यादृष्टिस्तदा मिथ्यादृष्टिरेवासौ न सम्यग्मिथ्यदृष्टिर्नाम कश्चित् संभवति। युगपच्चेत् शीतोष्णादिवत्सहानवस्थालक्षणविरोधात्तस्यासंभव एव ? इति चेत्, न–मित्रामित्रादिव्यवहारवदेकस्यापि युगपद्भिन्नविषयापेक्षया ताद्द-शोभयात्मकत्वस्य विरोधाभावात्। यथा कस्यचित् मित्रं प्रति मित्रत्वं, चैत्रं प्रत्यमित्रत्वमित्युभयात्मकत्वविरुद्धं लोके दृश्यते तथा कस्यचित्पुरुषस्य अर्हदादि-श्रद्धानापेक्षया सम्यक्त्वं, अनाप्तादिश्रद्धानापेक्षया मिथ्यात्वं च युगपदेव विषयभेदेन संभवतीति सम्यग्मिथ्यादृष्टित्वमविरुद्धमेव दृश्यत इति सिद्धं तृतीय-गुणस्थानं वस्तुव्यवस्थायाः प्रतीत्यनुसारित्वात् ॥ २२ ॥

स॰ चं॰–इव कहिए जैसैं, व्यामिश्रं कहिए मिल्या हूआ दही गुड सो पृथग्भावं कर्तुं कहिए जुदा जुदा भाव करनेकौं नैव शक्यं कहिए नाहीं समर्थपना है एवं कहिए तैसैं सम्यग्मिथ्यात्वरूप मिल्या हूआ परिणाम सो केवल सम्यक्त्वभावकरि अथवा केवल मिथ्यात्वभावकरि जुदा जुदा भावकरि स्थापनेकौं नाहीं समर्थपना है। इस कारणतैं सम्यग्मिथ्यादृष्टि ऐसा जानना योग्य है। समीचीन अर सोइ मिथ्या सो सम्यग्मिथ्या ऐसा है दृष्टि कहिए श्रद्धान जाकैं सो सम्यग्मिथ्यादृष्टि है इस युक्तितैं भी पूर्वैं ग्रह्या जो अतत्त्वश्रद्धान ताका सर्वथा त्याग विना तीहिं सहित ही श्रद्धान हो है। जातैं तैसैं ही संभवता प्रकृतिका उदयरूप कारणका सद्भाव है ॥ २२ ॥

सो संजमं ण गिण्हदि देसजमं वा ण बंधदे आउं।
सम्मं वा मिच्छं वा पडिवज्जिय मरदि णियमेण ॥ २३ ॥

स संयमं न गृह्णाति देशयमं वा, न बध्नाति आयुः।
सम्यक्त्वं वा मिथ्यात्वं वा प्रतिपद्य म्रियते नियमेन ॥ २३ ॥

जी॰ प्र॰—सः-सम्यग्मिथ्यादृष्टिर्जीवः सकलसंयमं देशसंयमं वा न गृह्णाति तद्ग्रहणयोग्यकरणपरिणामानां तस्मिन्नसंभवात्। तथा स चतुर्गतिनिबंधनानि आयूंष्यपि न बध्नाति मरणकाले नियमेन सम्यग्मिथ्यात्वपरिणामं त्यक्त्वा, असंयतसम्यग्दृष्टित्वं वा मिथ्यादृष्टित्वं वा नियमेन प्राप्यैव पश्चान्म्रियते ॥ २३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं० प्र०—सः-सम्यग्मिथ्यादृष्टिर्जीवः, संयमं-महाव्रतं, देशसंयमं-अणुव्रतं च, न गृह्णाति किमप्यायुर्न बध्नाति च। वाशब्दः समुच्चयार्थः। यदा म्रियते तदा नियमेन सम्यक्त्वं वा मिथ्यात्वं वा प्रतिपद्य म्रियते सम्यग्मिथ्यादृष्टिगुणस्थाने वर्तमानस्य मरणं नास्ति इत्यर्थः॥ २३॥

स० चं०—सम्यग्मिथ्यादृष्टि जीव है सो सकलसंयम वा देशसंयमकौं ग्रहण करै नाहीं जातैं तिनके ग्रहण योग्य जे करणरूप परिणाम तिनिका तहां मिश्रगुणस्थानविषै असंभव है। बहुरि तैसैं ही सो मिथ्यादृष्टि जीव च्यारि गतिसंबंधी आयुकौं नाहीं बांधै है। बहुरि मरणकालविषै नियमकरि सम्यग्मिथ्यात्वरूप परिणामकौं छोडि असंयत सम्यग्दृष्टीपनाकौं वा मिथ्यादृष्टीपनाकौं नियमकरि प्राप्त होइ पीछै मरै है। भावार्थ--मिश्रगुणस्थानतैं पंचमादि गुणस्थानविषै चढना नाहीं है। बहुरि तहां आयुबंध मरण नाहीं है॥ २३॥

सम्मत्तमिच्छपरिणामेसु जहिं आउगं पुरा बद्धं।
तहिं मरणं मरणंतसमुग्घादो वि य ण मिस्सम्मि॥ २४॥

सम्यक्त्वमिथ्यात्वपरिणामेषु यत्रायुष्कं पुरा बद्धं।
तत्र मरणं मरणांतसमुद्धातोऽपि च न मिश्रे॥ २४॥

जी० प्र०—सम्यक्त्वपरिणाममिथ्यात्वपरिणामयोर्मध्ये यस्मिन् परिणामे, पुरा-सम्यग्मिथ्यादृष्टित्वप्राप्तेः पूर्वं परभवायुष्कर्म बद्धं तस्मिन्नेव परिणामे सम्यक्त्वरूपे वा मिथ्यात्वरूपे वा गतस्यैव जीवस्य मरणं भवतीति नियमः कथितः, अन्येषामाचार्याणामभिप्रायेण नियमो नास्ति। तद्यथा-सम्यक्त्वपरिणामे वर्तमानः कश्चिज्जीवः तद्योग्यं परभवायुर्बद्ध्वा पुनः सम्यग्मिथ्यादृष्टिर्भूत्वा पश्चात् सम्यक्त्वं वा मिथ्यात्वं वा प्रतिपद्य म्रियते। कश्चिज्जीवः मिथ्यात्वे वर्तमानः तद्योग्यमुत्तरभवायुर्बद्ध्वा पुनः सम्यग्मिथ्यादृष्टिर्भूत्वा पश्चात् सम्यक्त्वं वा मिथ्यात्वं प्रतिपद्य म्रियते। इदं बद्धायुष्कं प्रत्युक्तं तथा मारणांतिकसमुद्घातोऽपि मिश्रगुणस्थाने नास्ति॥ २४॥ अथासंयतगुणस्थानस्वरूपं निरूपयति--

मं० प्र०—सम्यक्त्वमिथ्यात्वपरिणामयोर्मध्ये यस्मिन् परिणामे पुरा-सम्यग्मिथ्यादृष्टिगुणस्थानप्राप्तेः पूर्वं, परभवायुष्कर्म बद्धं तस्मिन्नेव परिणामे सम्यक्त्वे मिथ्यात्वे वा वर्तमानस्य जीवस्य मरणं भवतीति नियम उक्तः। अन्येषामाचार्याणामभिप्रायेण नियमो नास्ति। तद्यथा-सम्यक्त्वपरिणामे वर्तमानः कश्चिज्जीवः तद्योग्यं परभवायुर्बद्ध्वा पुनः सम्यग्मिथ्यादृष्टिर्भूत्वा पश्चात् सम्यक्त्वं वा मिथ्यात्वं वा प्रतिपद्य म्रियते, कश्चित् जीवः मिथ्यात्वे वर्तमानः तद्यो-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ग्यमुत्तरभवायुर्बद्ध्वा पुनः सम्यग्मिथ्यादृष्टिर्भूत्वा पश्चात् सम्यक्त्वं वा मिथ्यात्वं वा प्रतिपद्य म्रियते, इदं बद्धायुष्कं प्रत्युक्तं। तथा मिश्रे मारणांतिकसमुद्घातोऽपि नास्ति ॥२४॥ अथासंयतसम्यग्दृष्टिगुणस्थानं सम्यक्त्वभेदकथनपूर्वकं गाथापंचकेन प्ररूपयति—

स० चं०—सम्यक्त्वपरिणाम अर मिथ्यात्वपरिणाम इनि दोऊनिविषै जिह परिणामविषै पुरा कहिए मिथ्यादृष्टीपनांकौ प्राप्ती भएं पहिलै परभवका आयु बंध्या होइ तीहिं सम्यक्त्वरूप वा मिथ्यात्वरूपपरिणामविषै प्राप्त भया ही जीवका मरण हो है ऐसा नियम कहिए है बहुरि अन्य केई आचार्यनिके अभिप्रायकरि नियम नाहीं है सोई कहिए है-सम्यक्त्वपरिणामविषै वर्तमान कोई जीव यथायोग्य परभवके आयुकौं बांधि बहुरि सम्यग्मिथ्यादृष्टि होइ पीछै सम्यक्त्वकौं वा मिथ्यात्वकौं प्राप्त होइ मरै है। मिथ्यात्वपरिणामविषैं वर्तमान सो यथायोग्य परभवका आयु बांधि बहुरि सम्यग्मिथ्यादृष्टि होइ पीछै सम्यक्त्वकौं वा मिथ्यात्वकौं प्राप्त होइ मरै है। बहुरि तैसैं ही मारणांतिक समुद्घात भी मिश्रगुणस्थानविषैं नाहीं है ॥ २४ ॥ आगैं असंयत गुणस्थानके स्वरूपकौं निरूपै हैं—

सम्मत्तदेसघादिस्सुदयादो वेदगं हवे सम्मं।
चलमलिनमगाढं तं णिच्चं कम्मक्खवणहेदु ॥ २५ ॥

सम्यक्त्वदेशघातेरुदयाद्वेदकं भवेत्सम्यक्त्वं।
चलं मलिनमगाढं तन्नित्यं कर्मक्षपणहेतु ॥ २५ ॥

जी० प्र०—अनंतानुबंधिकषायाणां प्रशस्तोपशमो नास्ति इति तेषामप्रशस्तोपशमे विसंयोजने वा जाते दर्शनमोहनीयमिथ्यात्वकर्मसम्यग्मिथ्यात्वकर्मणोः प्रशस्तोपशांतयोः क्षपणीययोर्वा जातयोः सम्यक्त्वप्रकृतिदेशघातिस्पर्धकानामुदये सत्येव यत्तत्त्वार्थश्रद्धानलक्षणं सम्यक्त्वं भवेत् तद्वेदकनाम भवति। तत् सम्यक्त्वप्रकृत्युदये देशघातिस्पर्धकोदयस्य तत्त्वार्थश्रद्धानविनाशनसामर्थ्यशून्यत्वात् तत्सम्यक्त्वं चलं मलिनं अगाढं भवति सम्यक्त्वप्रकृत्युदयस्य तत्त्वार्थश्रद्धानस्य मलजननमात्र एव व्यापरात् ततः कारणात् तस्य देशघातित्वं भवति। एवं सम्यक्त्वप्रकृत्युदयमनुभवतो जीवस्य जायमानं तत्त्वार्थश्रद्धानं वेदकसम्यक्त्वमित्युच्यते। इदमेव क्षायोपशमिकसम्यक्त्वं नाम, दर्शनमोहसर्वघातिस्पर्धकानामुदयाभावलक्षणक्षये देशघातिस्पर्धकरूपसम्यक्त्वप्रकृत्युदये तस्यैवोपरितनानुदयप्राप्तस्पर्धकानां सदवस्थालक्षणोपशमे च सति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समुत्पन्नत्वात् । नित्यमिति विशेषणेन जघन्येनांतर्मुहूर्तत्वेऽपि उत्कर्षेण षट्षष्टिसागरोपमस्थितिमात्रदीर्घकालावस्थायीत्युत्कृष्टविवक्षयोक्तं न तु सार्वकालिकं । कर्मक्षपणहेतु इत्यनेन मोक्षकारणसम्यग्दर्शनज्ञानचारित्रपरिणामेषु सम्यक्त्वमेव मुख्यकारणमिति सूचितं । वेदकसम्यक्त्वस्य शंकादिमला अपि यथासंभवं सम्यक्त्वनिर्मूलनोच्छेदनाकारणसम्यक्त्वप्रकृत्युदयादुत्पद्यंते । औपशमिकक्षायिकसम्यक्त्वयोर्मलजननकारणतदुदयाभावान्निर्मलत्वं सिद्धमिति जानीहि । चलादीनि लक्षयति । तत्र चलत्वं यथा—

नानात्मीयविशेषेषु चलतीति चलं स्मृतं ।
लसत्कल्लोलमालासु जलमेकमवस्थितं ॥

नानात्मीयविशेषेषु आप्तागमपदार्थश्रद्धानविकल्पेषु चलतीति चलं स्मृतं । तद्यथा—

स्वकारितेऽर्हच्चैत्यादौ देवोऽयं मेऽन्यकारिते ।
अन्यस्यायमिति भ्राम्यन् मोहाच्छ्राद्धोऽपि चेष्टते ॥

स्वकारितेऽर्हच्चैत्यादौ ममायं देव इति मदीयत्वेन, अन्यकारितेऽर्हच्चैत्यादौ परकीयत्वेन च भजनाच्चलमित्युक्तं । अत्र दृष्टांतमाह—नानाकल्लोलमालासु जलमेकमवस्थितं तथापि नानारूपेण चलति तथा मोहात् सम्यक्त्वप्रकृत्युदयात् श्रद्धानं भ्रमणं चेष्टते । अथ मलिनत्वं यथा—

तदप्यलब्धमाहात्म्यं यकात् सम्यक्त्वकर्मणः ।
मलिनं मलसंगेन शुद्धं स्वर्णमिवोद्भवेत् ॥

तदपि सम्यक्त्वं सम्यक्त्वप्रकृत्युदयादलब्धमाहात्म्यं भवति । तच्च मलसंगेन मलिनं जायते यथा शुद्धं स्वर्णं तथा । अथागाढत्वं यथा—

स्थान एव स्थितं कंप्रमगाढमिति कीर्त्यते ।
वृद्धयष्टिरिवात्यक्तस्थाना करतले स्थिता ॥

स्थाने एव—आप्तागमपदार्थश्रद्धानावस्थायामेव स्थितं कंप्रमेव अगाढमिति कीर्त्यते । तद्यथा—

समेप्यनंतशक्तित्वे सर्वेषामर्हतामयं ।
देवोऽस्मै प्रभुरेषोऽस्मा इत्यास्था सुदृशामपि ॥

इति तीव्ररुचिरहितं भवति । तद्यथा—सर्वेषां अर्हत्परमेष्ठिनां अनंतशक्तित्वे समाने स्थितेऽपि अस्मै शांतिकर्मणे शांतिक्रियायै शांतिनाथदेवः प्रभुर्भवति, अस्मै विघ्नविनाशनादिकर्मणे विघ्नविनाशनादिक्रियायै पार्श्वनाथदेवः प्रभुरित्यादिप्रकारेण रुचिशैथिल्यसंभवात् । यथा वृद्धकरतलगतयष्टिः शिथिलसंबंधतया अगाढा तथा वेदकसम्यक्त्वमपि ज्ञातव्यं ॥ अथ औपशमिकक्षायिकसम्यक्त्वयोरुत्पत्तिकारणं स्वरूपं च प्रतिपादयति

मं० प्र०—दर्शनमोहनीयभेदस्य सम्यक्त्वप्रकृतेः सर्वघातिस्पर्धकानामुदयाभावलक्षणे क्षये तेषामेव सदवस्थालक्षणे उपशमे च उदयनिषेकदेशघातिस्प-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धकस्योदयात् क्षायोपशमिकं सम्यक्त्वं तत्त्वार्थश्रद्धानं भवेत् तदेव वेदकमित्युच्यते । सम्यक्त्वप्रकृत्युदयमनुभवतः आत्मनः परिणामत्वात् वेदकमित्यागमप्रसिद्धत्वाद्वा । तद्वेदकसम्यक्त्वं कथंभूतं ? चलं--नानात्मीयविशेषेषु चलतीति चलं, तद्यथा–सर्वेषामर्हतामनंतशक्तित्वे समानेऽपि अयं देवः शांतिनाथः अस्मै शांतिकर्मणे समर्थः । एष पार्श्वनाथः अस्मै विघ्नविनाशकर्मणे समर्थः इत्याद्यास्तश्रद्धानभेदश्चलत्वं । पुनरपि कथंभूतं ? मलिनं--शंकादिमलानां मध्ये यथासंभवमलसद्भावत् मलिनं । पुनरपि कथंभूतं ? अगाढं -अदृढं, तद्यथा--स्वेन कारिते अर्हत्प्रतिमादौ अयं देवो ममेति, अन्यस्येति भ्रांत्या अर्हद्देवश्रद्धानस्य स्वपरसंकल्पभेदेन शिथिलत्वं अगाढ़त्वं । एवं चलमलिनागाढ़त्वं वेदकसम्यक्त्वस्य सम्यक्त्वप्रकृतिदेशघातिस्पर्धकोदयकार्यं न तु सम्यक्त्वमूलविनाशः तत्कार्यं । पुनरपि कथंभूतं ? नित्यं जघन्येनांतर्मुहूर्तस्थितित्वेऽपि, उत्कर्षेण षट्षष्टिसागरोपमस्थितिमात्रदीर्घकालस्थायि' न तु सार्वकालिकं । पुनरपि कथंभूतं ? कर्मक्षपणहेतु- कर्मक्षपणस्य संवरनिर्जरालक्षणस्य हेतुः--कारणं, सम्यग्दर्शनस्य ज्ञानचारित्रसम्यग्भावकरणत्वेन असंयतसम्यग्दृष्ट्यादिषु गुणस्थानेषु विशिष्टसंवरनिर्जराहेतुत्वप्रसिद्धेः ॥ २५ ॥

स० चं०—अनंतानुबंधी कषायनिका प्रशस्त उपशम नाहीं है इस हेतुतैं तिन अनंतानुबंधी कषायनिका अप्रशस्त उपशमकौं होते अथवा विसंयोजन होते बहुरि दर्शनमोहका भेदरूप मिथ्यात्वकर्म अर सम्यग्मिथ्यात्वकर्म इनि दोऊनिकौं प्रशस्त उपशम रूप होतैं वा अप्रशस्त उपशम होतैं वा क्षय होनेके सन्मुख होतैं बहुरि सम्यक्त्व प्रकृतिरूप देशघातियास्पर्धकोंका उदय होतैं ही जो तत्त्वार्थ श्रद्धान है लक्षण जाका ऐसा सम्यक्त्व होइ सो वेदक ऐसा नाम धारक है। जहां विवक्षित प्रकृति उदय आवनेयोग्य न होइ अर स्थिति अनुभाग घटनैं वा बधनैं वा संक्रमणादि होनैं योग्य होइ तहां अप्रशस्तोपशम जानना। बहुरि जहां उदय आवने योग्य न होइ अर स्थिति अनुभाग घटने बंधने वा संक्रमण होने योग्य भी न होइ तहां प्रशस्तोपशम जानना । बहुरि तिहिं सम्यक्त्व प्रकृतिका उदय होतैं देशघातिया स्पर्धकनिकैं तत्त्वार्थश्रद्धान नष्ट करनेकी सामर्थ्यका अभाव है तातैं सो सम्यक्त्व चल मलिन अगाढ है। जातैं सम्यक्त्व प्रकृतिके उदयका तत्त्वार्थ श्रद्धानकौं मल उपजावने मात्रहीविषैं व्यापार है तीहिं कारणतैं तिस सम्यक्त्वप्रकृतिकैं देशघातिपना है ऐसैं सम्यक्त्वप्रकृतिके उदयकौं अनुभवता जीवके उत्पन्न भया जो तत्त्वार्थश्रद्धान सो वेदक सम्यक्त्व है ऐसा कहिए है। यह ही वेदक सम्यक्त्व है सो क्षायोपशमिक सम्यक्त्व ऐसा नामधारक है जातैं दर्शनमोहके सर्वघाती स्पर्धकनिका उदयका अभावरूप

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

है लक्षण जाका ऐसा क्षय होतैं बहुरि देशघातिस्पर्धकरूप सम्यक्त्व प्रकृतिका उदय होतैं बहुरि तिसहीका वर्तमान समयसबंधीतैं ऊपरिके निषेक उदयकौं न प्राप्त भए तिनिसंबंधी स्पर्धकनिका सत्ता अवस्थारूप है लक्षण जाका ऐसा उपशम होतैं वेदक सम्यक्त्व होहै तातैं याहीका दूसरा नाम क्षायोपशमिक सम्यक्त्व है। भिन्न नाही है। सो वेदक सम्यक्त्व कैसा है ? नित्यं कहिए नित्य है इस विशेषणकरि याकी जघन्यस्थिति अंतर्मुहूर्त है तथापि उत्कृष्टपनाकरि छ्यासठि सागरप्रमाण काल रहै है तातैं उत्कृष्ट स्थिति अपेक्षा दीर्घकालताईं रहै है तातैं नित्य कह्या है। बहुरि सर्वकाल अविनश्वर अपेक्षा नित्य इहां न जानना। बहुरि कैसा है ? कर्मक्षपणहेतु कहिए कर्मक्षपावनेका कारण है। इस विशेषणकरि मोक्षके कारण सम्यग्दर्शनज्ञानचारित्र परिणाम हैं तिनिविषैं सम्यक्त्व ही मुख्यकारण है ऐसा सूचै है। बहुरि वेदकसम्यक्त्वविषैं शंकादिक मल हैं ते भी यथासंभव सम्यक्त्वका मूलतैं नाश करनेकौं कारण नाहीं ऐसे सम्यक्त्वप्रकृतिके उदयतैं उपजै हैं। बहुरि औपशमिक अर क्षायिक सम्यक्त्वविषैं मल उपजावनेकौं कारण तिस सम्यक्त्व प्रकृतिका उदयका अभावतैं निर्मलपना सिद्ध है ऐसा है शिष्य ! तू जान। बहुरि चलादिकनिका लक्षण कहै हैं तहां चलपना कहिए है—

नानात्मीयविशेषेषु चलतीति चलं स्मृतं। लसत्कल्लोलमालासु जलमेकमवस्थितं ॥
स्वकारितेऽर्हच्चैत्यादौ देवोऽयं मेऽन्यकारिते। अन्यस्यायमिति भ्राम्यन् मोहाच्छ्राद्धोऽपि चेष्टते ॥

याका अर्थ—नानाप्रकार अपने ही विशेष कहिए आप्त आगम पदार्थरूप श्रद्धानके भेद तिनिविषैं जो चलै चंचल होइ सो चल कह्या है सोई कहिए है-अपना कराया अर्हंतप्रतिबिंबादिकविषैं यहु मेरा देव है ऐसे ममत्वकरि, बहुरि अन्यकरि कराया अर्हंतप्रतिबिंबादिकविषैं यहु अन्यका है ऐसैं परका मानिकरि भेदरूप करै है तातैं चल कह्या है। इहां दृष्टांत कहै हैं-जैसैं नानाप्रकार कल्लोल तरंगनिकी पंक्तिविषैं जल एक ही अवस्थित है तथापि नानारूप होइ चल है तैसैं मोह जो सम्यक्त्वप्रकृतिका उदय तातैं श्रद्धान है सो भ्रमणरूप चेष्टा करै है भावार्थ—जैसैं जल तरंगनिविषैं चंचल होइ परंतु अन्यभावकौं न भजै, तैसैं वेदकसम्यग्दृष्टि अपना वा अन्यका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कराया जिनबिंबादिविषैं यहु मेरा यहु अन्यका इत्यादि विकल्प करै है परंतु अन्य देवादिककौं नाहीं भजै है। अब मलिनपना कहिए है–

तदप्यलब्धमाहात्म्यं पाकात्सम्यक्त्वकर्मणः।
मलिनं मलसंगेन शुद्धं स्वर्णमिवोद्भवेत्॥

याका अर्थ–सो भी वेदकसम्यक्त्व है सो सम्यक्त्व प्रकृतिके उदयतैं न पाया है माहात्म्य जिहि ऐसा हो है बहुरि सो शंकादिक मलका संगकरि मलिन हो है जैसैं शुद्ध सौना वाह्य मलका संयोगतैं मैला होइ तेसैं वेदकसम्यक्त्व शंकादिक मलका संयोगतैं मलिन हो है। अब अगाढ कहिए है–

स्थान एव स्थितं कंप्रमगाढमिति कीर्त्यते। वृद्धयष्टिरिवात्यक्तस्थाना करतले स्थिता॥
समेप्यनंतशक्तित्वे सर्वेषामर्हतामयं। देवोऽस्मै प्रभुरेषोस्मा इत्यास्था सुदृशामपि॥

याका अर्थ––स्थान कहिए आप्त आगम पदार्थनिका श्रद्धानरूप अवस्था तिहिंविषैं तिष्ठता हूआ ही कांपै गाढा न रहै सो अगाढ ऐसा कहिए है ताका उदाहरण कहैं हैं-ऐसैं तीव्रुरुचिरहित होय सर्व अर्हंत परमेष्ठीनिकैं अनंतशक्तिपना समान होतैं[1] भी इस शांतिकर्म जो शांति क्रिया ताकै अर्थि शांतिनाथ देव है सो प्रभु कहिए समर्थ है। बहुरि इस विघ्ननाशन आदि क्रियाकै अर्थि पार्श्वनाथ देव समर्थ है इत्यादि प्रकारकरि रुचि[2] जो प्रतीति ताकी शिथिलता संभवै है। तातैं बूढेका हाथविषैं लाठी शिथिल संबंधपनाकरि अगाढ है तैसैं सम्यक्त्व अगाढ है। भावार्थ–जैसैं बूढेके हाथतैं लाठी छूटै नाहीं परंतु शिथिल रहै तेसैं वेदक सम्यक्त्वका श्रद्धान छूटै नाहीं। शांति आदिके अर्थि कुदेवादिकनिकौं[3] न सेवै तथापि शिथिल रहै जैन देवादिकविषैं कल्पना उपजावै ऐसैं इहां चल मलिन अगाढका वर्णन उपदेशरूप उदाहरण मात्र कह्या है। सर्व तारतम्यभाव ज्ञानगम्य है। ॥ २५ ॥ आगैं औपशमिक क्षायिक सम्यक्त्वनिका उपजनेका कारण अर स्वरूप प्रतिपादन करैं हैं–

१ होतैं संतैं भी यह पाठ क. पुस्तकमें है। २ क पुस्तकमें रुचिप्रतीतिकी शिथिलता संभवै है यह पाठ है। ३ अन्य देवादिकनिकौं यह पाठ क पुस्तकमें है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

सत्तण्हं उवसमदो उवसमसम्मो खयादु खइयो य।
बिदियकसायुदयादो असंजदो होदि सम्मो य॥ २६॥

सप्तानामुपशमतः उपशमसम्यक्त्वं क्षयात्तु क्षायिकं च॥
द्वितीयकषायोदयादसंयतं भवति सम्यक्त्वं च॥ २६॥

जी०प्र०—न विद्यते अंतः-अवसानं यस्य तदनंतं मिथ्यात्वं, तदनुबध्नंतीत्येवं शीला अनंतानुबंधिनः क्रोधमानमायालोभाः, मिथ्यात्वसम्यग्मिथ्यात्वसम्यक्त्वप्रकृतिनामदर्शनमोहत्रयं चेति सप्तप्रकृतीनां सर्वोपशमेनौपशमिकसम्यक्त्वमुत्पद्यते। तथा तासामेव सप्तप्रकृतीनां क्षयात् क्षायिकं सम्यक्त्वं भवति। इदमुभयसम्यक्त्वमपि निर्मलं भवति। शंकादिमललेशस्याप्यनुत्पत्तिसंभवात्। तथा निश्चलं भवति आप्तागमपदार्थविषयश्रद्धानविकल्पेषु क्वचिदपि स्खलनाभावात्। तथा गाढं भवति आप्तादिषु तीव्ररुचिसंभवात्। इदं मलासंभवादित्रयं तु सम्यक्त्वप्रकृत्युदयस्यात्रात्यंताभावादिति ज्ञातव्यं। एवमुक्तत्रिविधसम्यक्त्वैः परिणतसम्यग्दृष्टिः द्वितीयकषायाणां अप्रत्याख्यानावरणक्रोधमानमायालोभानामन्यतमोदयेन असंयतो भवति॥ २६॥ अथ तत्त्वार्थश्रद्धानस्य ग्रहणत्यागावसरं गाथाद्वयेन प्ररूपयति—

मं० प्र०—तिसृणां—मिथ्यात्वसम्यग्मिथ्यात्वसम्यक्त्वप्रकृतीनां, चतुर्णां—अनंतानुबंधिक्रोधमानमायालोभानां, एवं सप्तप्रकृतीनामुपशमात्—उदयायोग्यपरिणामादौपशमिकं सम्यक्त्वं भवति। एतासामेव सप्तप्रकृतीनां क्षयात्—प्रकृतिस्थित्यनुभागप्रदेशैः कर्मत्वपरिणतपुद्गलस्कंधस्य कर्मरूपत्वपरित्यागात् क्षायिकं सम्यक्त्वं भवति। एतद् द्विविधमपि सम्यक्त्वं निश्चलं निर्मलं गाढं च भवति चलत्वादिकारणसम्यक्त्वप्रकृत्युदयाभावात्। एवं चेत् औपशमिकसम्यक्त्वस्य क्षायिकवन्नित्यत्वं प्रसज्यते इति नाशंकितव्यं औपशमिकसम्यक्त्वस्यांतर्मुहूर्तमात्रस्वस्थितिक्षयान्नियमेन मिथ्यात्वादिकर्मण उदयसंभवादनित्यत्वप्रसिद्धेः। एवंविधसम्यक्त्वत्रये अन्यतमसम्यक्त्वेपरिणतः कश्चिज्जीवः द्वितीयकषायाणां—अप्रत्याख्यानावरणक्रोधमानमायालोभकषायाणामुदयादसंयतो भवति। एवं खलु—स्फुटं, असंयतश्चासौ सम्यग्दृष्टिश्चासौ असंयतसम्यग्दृष्टिरित्याख्यायते॥ २६॥

याका अर्थ—नाहीं पाइए है अंत जाका ऐसा अनंत कहिए मिथ्यात्व ताहि अनुबध्नंति कहिए आश्रय करि प्रवर्तै ऐसैं अनंतानुबंधी क्रोध १ मान २ माया ३ लोभ ४ बहुरि मिथ्यात्व ५ सम्यग्मिथ्यात्व ६ सम्यक्त्व प्रकृति नाम धारक दर्शनमोहप्रकृति तीन ऐसैं सात प्रकृतिनिका सर्व उपशम होनैकरि औपशमिकसम्यक्त्व होहै बहुरि तैसैं तिनि प्रकृतिनिका क्षयतैं क्षायिक सम्यक्त्व हो है। बहुरि दोऊ सम्यक्त्व ही निर्मल हैं जातैं शंकादि ५५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मलनिकी अंशकाकी भी उत्पत्ति नाहीं संभवै हैं। बहुरि तैसें दोऊ सम्यक्त्व निश्चल हैं जातैं आप्त आगम पदार्थगोचर श्रद्धान भेदनिविषैं कहीं भी स्खलित न हो हैं। बहुरि तैसें ही दोऊ सम्यक्त्व गाढ हैं जातैं आप्तादिकविषैं तीव्ररुचि संभवै है। यहु मलका न संभवना स्खलित न होना तीव्ररुचिका संभवनां ए तीन सम्यक्त्व प्रकृतिका उदयका इहां अत्यंत अभाव है तातैं पाइए है ऐसा जानना। बहुरि याप्रकार कहे तीन प्रकार सम्यक्त्वनिकरि परिणया जो सम्यग्दृष्टि जीव सो द्वितीय कषाय जे अप्रत्याख्यान क्रोध मान माया लोभ इनविषैं एक किसीका उदयकरि असंयत कहिए असंयमी हो है याका नाम असंयतसम्यग्दृष्टी है॥ २६ ॥ आगें तत्त्वार्थश्रद्धानका सम्यक्प्रकार ग्रहण अर त्यागका अवसर ताहि गाथा दोयकरि कहै हैं–

सम्माइट्ठी जीवो उवइट्ठं पवयणं तु सद्दहदि।
सद्दहदि असब्भावं अजाणमाणो गुरुणियोगा॥ २७॥

सम्यग्दृष्टिर्जीवः उपदिष्टं प्रवचनं तु श्रद्दधाति।
श्रद्दधाति असद्भावं अज्ञायमानो गुरुनियोगात्॥ २७॥

जी॰ प्र॰---यः अर्हदाद्युपदिष्टं प्रवचनं आप्तागमपदार्थत्रयं श्रद्धधाति-रोचते, तेषु असद्भावं-अतत्त्वमपि स्वस्य विशेषज्ञानशून्यत्वेन केवलगुरुनियोगात् अर्हदाद्याज्ञातः श्रद्दधाति सोऽपि सम्यग्दृष्टिरेव भवति तदाज्ञाया अनतिक्रमात्॥ २७॥

मं॰--प्र॰--तु-पुनः, उक्तलक्षणः सम्यग्दृष्टिर्जीवः, उपदिष्टं-अर्हदादिभिः प्रोक्तं, प्रवचनं-परमागममेव श्रद्दधाति-रोचते अभ्युपगच्छत्येव, तस्य नियमेन मिथ्यागमश्रद्धानाभावात् परगमाश्रद्धानाभावाच्च अन्यथा सम्यग्दृष्टित्वविरोधात्। स एव सम्यग्दृष्टिः कदाचिद्वचनाकौशलदुष्टाभिप्रायगृहीतविस्मरणादिदोषवतो गुरोः-आचार्यस्य, नियोगात्-उपदेशात्, असद्भावमपि-अविद्यमानार्थमपि, स्वयमजानानः-अनवबुध्यमानः सन् श्रद्दधाति, तथाप्यसौ सम्यग्दृष्टिरेव। स्वगुरुदोषाणामागमार्थासत्त्वस्य चापरिज्ञानात् गुरूपदेशस्य जिनोपदेशत्वाभिमानाच्च॥ २७॥

स॰ चं॰—जो जीव अर्हंतादिकनिकरि उपदेस्या हूवा ऐसा जु प्रवचन कहिए आप्त आगम पदार्थ ए तीन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ताहि श्रद्दधाति कहिए श्रद्धै है रांचै है। बहुरि तिनि आप्तादिकनिविषैं असद्भावं कहिए अतत्त्व अन्यथा रूप ताकौं भी अपने विशेष ज्ञानका अभावकरि केवल गुरुहीका नियोगतैं जो इस गुरुनें कह्या सो ही अर्हंतकी आज्ञा है ऐसा प्रतीतितैं श्रद्धान करै है सो भी सम्यग्दृष्टि ही है जातैं तिसकी आज्ञाका उलंघन नाहीं करै है। भावार्थ— जो अपनैं विशेष ज्ञान न होइ बहुरि जैन गुरु मंदमतितैं आप्तादिकका स्वरूप अन्यथा कहैं अर यहु अर्हंतकी ऐसी ही आज्ञा है ऐसैं मानि जो असत्य श्रद्धान करै तौ भी सम्यग्दृष्टिका अभाव न होइ जातैं इसनैं तो अर्हंतकी आज्ञा जानि प्रतीति करी है ॥ २७ ॥

सुत्तादो तं सम्मं दरसिज्जंतं जदा ण सद्दहदि।
सो चेव हवइ मिच्छाइट्ठी जीवो तदो पहुदी ॥ २८ ॥

सूत्रात्तं सम्यग्दर्शयंतं यदा न श्रद्दधाति।
स चैव भवति मिथ्यादृष्टिर्जीवः तदा प्रभृति ॥ २८ ॥

जी० प्र०—तथा असदर्थश्रद्धानः आज्ञासम्यग्दृष्टिर्जीवः यदा कुशलाचार्यांतरैः प्राक्तनतद्गृहीतासदर्थरूपविपरीततत्त्वं गणधरादिकथितं सूत्रं दर्शयित्वा सम्यक्प्ररूप्यमाणं तत् दुराग्रहादेशेन न श्रद्दधाति तदा प्रभृति स जीवो मिथ्यादृष्टिर्भवति। गणधरादिकथितसूत्राश्रद्धानेन आज्ञातिक्रमस्य सुप्रसिद्धत्वादेव कारणात् ॥ २८ ॥ अथासंयतत्वसम्यग्दृष्टित्वयोः सामानाधिकरण्यं प्रदर्शयति—

मं० प्र०—एवं गृहीतासत्यार्थः सः-सम्यग्दृष्टिः, युक्त्यागमकुशलेन-पापभीरुणा अधीततात्कालिकबहुश्रुतेन अपरेणाचार्येण, सूत्रात् गणधरादिकथितं सूत्रमाश्रित्य दर्श्यमानं तं प्राग्गृहीतासत्यार्थविपरीतं सम्यंचं-निर्दोषमर्थं, यदा न श्रद्दधाति तदा प्रभृति स एव जीवो मिथ्यादृष्टिर्भवति गणधरादिकथितसूत्रार्थाश्रद्धानात् ॥ २८ ॥

स० चं०—तैसैं असत्य अर्थ श्रद्धान करता आज्ञा सम्यग्दृष्टी जीव सो जिसकाल प्रवीण अन्य आचार्यनिकरि पूर्वैं ग्रह्या हूवा असत्यार्थरूप श्रद्धानतैं विपरीत भावसत्यार्थ सो गणधरादिकनिके सूत्र दिखाइ सम्यक्प्रकार निरूपण कह्या हूआ होइ ताकौं खोटा हटकरि न श्रद्धान करै तौ तीहिं कालसौं लगाय सो जीव मिथ्यादृष्टी ५७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हो है। जातैं सूत्रका अश्रद्धानकरि जिन आज्ञाका उलंघनका सुप्रसिद्धपना है तींहि कारणतैं मिथ्यादृष्टी हो है ॥ २८ ॥ आगैं असंयतपना अर सम्यग्दृष्टीपनाकैं सामानाधिकरण्यकौं दिखावैं हैं----

णो इंदियेसु विरदो णो जीवे थावरे तसे वापि।
जो सद्दहदि जिणुत्तं सम्माइट्ठी अविरदो सो ॥ २९ ॥

नो इंद्रियेषु विरतो नो जीवे स्थावरे त्रसे वापि।
यः श्रद्दधाति जिनोक्तं सम्यग्दृष्टिरविरतः सः ॥ २९ ॥

जी० प्र०---यः इंद्रियविषयेषु नो विरतः-विरतिरहितः, तथा स्थावरत्रसजीववधेऽपि नो विरतः, जिनोक्तं प्रवचनं श्रद्दधाति स जीवः अविरतसम्यग्दृष्टिर्भवति। अनेन असंयतश्चासौ सम्यग्दृष्टिश्चेति समानाधिकरणत्वं समर्थितं जातं। अपिशब्देन संवेगादिसम्यक्त्वगुणाः सूच्यंते। अत्रत्यं अविरतत्वविशेषणं अंत्यदीपकत्वादधस्तनगुणस्थानेष्वपि संबंधनीयं। अपिशब्देन अनुकंपापि स्यात् ॥ २९ ॥ अथ देशसंयतगुणस्थानं गाथाद्वयेन निर्दिशति-

मं० प्र०--यो जीवः, इंद्रियेषु-इंद्रियविषयेषु, नो विरतः-न निवृत्तः, त्रसे स्थावरे वा जीवे नो विरतः-त्रसस्थावरजीववधान्न निवृत्तः, जिनोक्तं-अर्हदाद्युपदिष्टं परमागमं श्रद्दधात्येव स अविरतसम्यग्दृष्टिरुच्यते। अपिशब्देनानुकंपादिगुणसद्भावान्निरपराधहिंसां न करोतीति सूच्यते। अनेन गाथात्रयेण असंयतत्वं निवृत्तं ॥ २९ ॥ अथ देशसंयतगुणस्थानं गाथाद्वयेन प्ररूपयति--

स० चं०---जो जीव इंद्रियविषयनिविषैं नोविरतः--विरतिरहित है बहुरि तैसैं ही स्थावर त्रस जीवकी हिंसाविषैं भी नाहीं विरत है-त्यागरहित है बहुरि जिनकरि उपदेश्या प्रवचनकौं श्रद्धान करै है सो जीव अविरत सम्यग्दृष्टी हो है। याकरि असंयत सोई सम्यग्दृष्टी सो असंयतसम्यग्दृष्टी है। ऐसैं समानाधिकरणपना दृढ कीया। बहुत विशेषणनिका एक वस्तु आधार होइ तहां कर्मधारय समासविषैं समानाधिरणपना जानना। बहुरि अपिशब्दकरि ताकैं संवेगादिक सम्यक्त्वके गुण भी याकैं पाइए है ऐसा सूचै है। बहुरि इहां जो अविरत विशेषण है सो अंत्यदीपक समान जानना। जैसैं छेहडैं धरया हुवा दीपक पिछले सर्वपदार्थनिकौं प्रकाशै तैसैं इहां अविरत

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विशेषण नीचेके मिथ्यादृष्टि आदि गुणस्थाननिविषैं अविरतपनाकौं प्रकाशै है ऐसा संबंध जानना। बहुरि अपि-शब्दकरि अनुकंपा भी है। भावार्थ—कोऊ जानैगा कि विषयनिविषैं अविरती है तातैं विषयानुरागी बहुत होगा सो नाहीं है संवेगादि गुणसंयुक्त है बहुरि हिंसादिविषैं अविरती है तातैं निर्दयी होगा सो नाहीं है दया भाव संयुक्त है ऐसा अविरतसम्यग्दृष्टि है ॥ २९ ॥ आगैं देशसंयत गुणस्थानकौं गाथा दोयकरि निर्देश करै हैं—

पच्चक्खाणुदयादो संजमभावो ण होदि णवरिं तु।
थोववदो होदि तदो देसवदो होदि पंचमओ ॥ ३० ॥

प्रत्याख्यानोदयात् संयमभावो न भवति नवरिं तु।
स्तोकवृतं भवति ततो देशवृतो भवति पंचमः ॥ ३० ॥

जी० प्र०—अनंतानुबंध्यप्रत्याख्यानावरणकषायाष्टकोपशमात् प्रत्याख्यानावरणकषायाणां देशघातिस्पर्धकोदये जाते सर्वघातिस्पर्धकोदयाभावलक्षणक्षयेन सकलसंयमभावो न भवति। णवरिं विशेषोऽस्ति पुनः स एव विशेषो दर्श्यते—स्तोकव्रतं-देशसंयमो भवति। तद्वान् देशसंयतनामा पंचमगुणस्थानवर्ती जीवो ज्ञातव्यः ॥ ३० ॥

मं० प्र०—प्रत्याख्यानस्य—प्रत्याख्यानावरणस्य कषायस्य, उदयात् संयमभावः—सकलचारित्रपरिणामो न भवति। प्रत्याख्यानं-सकलसंयमं, आवृणोतीति प्रत्याख्यानावरणः तृतीयः क्रोधादिकषायः, नामैकदेशो नाम्नि प्रवर्तत इति न्यायात् प्रत्याख्यानावरणे प्रत्याख्यानशब्दः प्रयुक्तः। तु-पुनः, णवरिं-विशेषोऽस्ति स एव विशेषो दर्श्यते-स्तोकव्रतं देशसंयमो भवति ततः कारणात् पंचमः-पंचमे देशसंयमगुणस्थाने वर्तमानो जीवो देशसंयतो भवति। प्रत्याख्यानावरणकषायाणां सर्वघातिस्पर्धकोदयाभावलक्षणे क्षये तेषामेव सदवस्थालक्षणे उपशमे च देशघातिस्पर्धकोदयादुत्पन्नत्वाद्देशसंयमः क्षायोपशमिक इति प्रतिपादितः ॥ ३० ॥

स० चं०—अनंतानुबंधी अप्रत्याख्यानावरण रूप आठ कषायनिका उपशमतैं प्रत्याख्यानावरण कषायनिका देशघाती स्पर्धकनिका उदय होतैं संतैं सर्वघाती स्पर्धकनिका उदयाभावरूप लक्षण जाका ऐसा क्षयकरि जाकैं सकल संयमरूप भाव न हो है। विशेष यहु देश संयम कहिए किंचित् विरति हो है ताकौं धरै देशसंयतनामा पंचमगुणस्थानवर्ती जीव जानना ॥ ३० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जो तसबहाउ विरदो अविरदओ तह य थावरबहादो ।
एक्कसमयम्हि जीवो विरदाविरदो जिणेक्कमई ॥ ३१ ॥

यस्त्रसवधाद्विरतः अविरतस्तथा च स्थावरवधात् ।
एकसमये जीवो विरताविरतो जिनैकमतिः ॥ ३१ ॥

जी० प्र०——स एव विरताविरत इति व्यपदिश्यते एककाले एव यस्त्रसवधाद्विरतः स्थावरवधादविरतः स जीवः । विरताश्चासावविरतश्चेति विषयभेदापेक्षया अविरोधेन विरताविरत इति व्यपदेशार्हो भवति । तथा चशब्देन प्रयोजनं विना स्थावरवधमपि न करोतीति व्याख्येयो भवति । जिनेषु-आप्तादिषु एका-केवला, मतिः-इच्छा, रुचिः, यस्यासौ जिनैकमतिः । इत्यनेन देशसंयतस्य सम्यग्दृष्टित्वविशेषणं निरूपितं जातं । इदमेव आदिदीपकत्वेन उत्तरत्रापि गुणस्थानेषु विशेषणत्वेन संबंधनीयं भवति ॥ ३१ ॥ प्रमत्तगुणस्थानं गाथाद्वयेनाह—

मं० प्र०-यो जीवः त्रसवधाद्विरतः स्थावरवधादविरतः जिनैकमतिः-जिनेषु-आप्तागमपदार्थेषु, एका-असहाया, मतिः श्रद्धा, यस्यासौ जिनैकमतिः, सम्यग्दृष्टिरित्यर्थः स एकस्मिन्नेव समये-काले युगपदेव, विरताविरतः-विरतश्चासौ अविरतश्चासौ विरताविरतः-संयतासंयतो भवति त्रसवधस्थावरवधविषयभेदात् मित्रत्वामित्रत्वादिवन्न विरोधः । तथा चेत्यनेन प्रयोजनं विना स्थावरवधमपि न करोतीत्ययमर्थः सूच्यते । स एव देशसंयत इत्युच्यते । देशेन-एकदेशेन त्रसवधनिवृत्त्याश्रयेण संयतो विरतो देशसंयतो भवति ॥ ३१ ॥ अथ प्रमत्तसंयतगुणस्थानकथनार्थं गाथाद्वयमाह—

स० चं०——सोई देशसंयत विरताविरत ऐसा भी कहिए है एक काल ही विषै जो जीव त्रसहिंसातैं विरत है अर स्थावरहिंसातैं अविरत है सो जीव विरत अर सोई अविरत ऐसैं विरत अविरतविषै विरोध है तथापि अपने अपने गोचर भाव त्रस स्थावरके भेद अपेक्षाकरि विरोध नाहीं तीहिंकरि विरत अविरत ऐसा उपदेश योग्य है। बहुरि तैसैं चकार शब्दकरि प्रयोजन विना स्थावर हिंसाकौं भी नाही करै है। ऐसा व्याख्यान करना योग्य है। सो कैसा है ? जिनैकमति कहिए जिन जे आप्तादिक तिनहीविषैं है एक केवल माति कहिए इच्छा रुचि जाकैं ऐसा है। इसकरि देशसंयतकैं सम्यग्दृष्टीपना ऐसा विशेषण निरूपण कीया है। यहु विशेपण आदि दीपक समान है सो आदिविषैं धरया हूवा दीपक जैसैं अगिले सर्व पदार्थनिकौं प्रकाशै तैसैं इहांतैं आगे भी स-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वैंगुणस्थानकनिविषैं इस विशेषणकरि संबंध करना योग्य है । सर्वसम्यग्दृष्टी जानने ॥ ३१ ॥ आगैं प्रमत्तगुणस्थानकौं गाथा दोयकरि कहैं हैं—

संजलणणोकसायाणुदयादो संजमो हवे जम्हा ।
मलजणणपमादो वि य तम्हा हु पमत्तविरदो सो ॥ ३२ ॥

संज्वलननोकषायाणामुदयात्संयमो भवेद्यस्मात् ।
मलजननप्रमादोऽपि च तस्मात्खलु प्रमत्तविरतः सः ॥ ३२ ॥

जी० प्र०—यस्मात्कारणात् (संज्वलनदेशघातिस्पर्धकानां क्रोधमानमायालोभानां, नोकषायाणां च हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुंनपुंसकवेदानां तीव्रोदयात् यस्य संयमः-सकलचारित्रं मलजननप्रमादोऽपि च भवेत् तस्मात्कारणात् प्रमादसंयमवान् स जीवः खलु-स्फुटं प्रमत्तविरतो भवति) संज्वलनकषायनोकषायाणां सर्वघातिस्पर्धकोदयभावलक्षणक्षये द्वादशकषायाणामनुदयप्राप्तसंज्वलननोकषायनिषेकाणां च सदवस्थालक्षणोपशमे च संज्वलननोकषायदेशघातिस्पर्धकतीव्रोदयात् संयमो मलजननप्रमादश्च उत्पद्यते तस्मात्कारणात् प्रमत्तश्चासौ विरतश्चेति स षष्ठगुणस्थानवर्ती जीवः प्रमत्तसंयत इत्युच्यते । विवक्खिदस्स संजमस्स खओवसमित्तपडुप्पायणमेत्तफलत्तादो कथं संजलणणोकसायाणं चारित्तविरोहीणं चारित्तकारयत्तं ? देशघादित्तेण सपडिवक्खगुणविणिम्मूलणसत्तिविरहियाणमुदयो विज्जमाणोवि ण स कज्जकार ओत्ति संजमहेदुत्तेण विवक्खियत्तादो, वत्थुदो दु कज्जं पडुप्पायेदि मलजणणपमादोवि य, अवि य इत्यवधारणे मलजणणपमादो चेव जह्मा एवं तह्मा हु पमत्तविरदो सो । तमुवलक्खदि—

मं० प्र०—यस्मात् कारणात्, संज्वलनानां-क्रोधमानमायालोभानां, नोकषायाणां च हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुन्नपुंसकवेदानां तीव्रोदयात् यस्य संयमः-सकलचारित्रं, मलजननप्रमादोऽपि च भवेत् तस्मात्कारणात् प्रमादसंयमवान् स जीवः, खलु--स्फुटं, प्रमत्तविरतो भवति । संज्वलनकषायनोकषायाणां सर्वघातिस्पर्धकोदयाभावलक्षणे क्षये, तेषामेव सदवस्थालक्षणे उपशमे च सति सकलसंयमो भवति । तेषां देशघातिस्पर्धकतीव्रोदयात्संयममलजननप्रमादोऽपि भवतीति प्रमत्तसंयते वर्तमानं सामायिकछेदोपस्थापनापरिहारविशुद्धिरूपं चारित्रत्रयं क्षायोपशमिको भाव इति तात्पर्यार्थः ॥ ३२ ॥

स०चं०—जाकारणतैं संज्वलनकषायके सर्वघाती स्पर्धकनिका उदयाभाव लक्षण धरैं क्षय होतैं बहुरि बारह

१ इसकी भाषा तीनों प्रतियोंमें नहीं है ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कषाय उदयकौं न प्राप्त तिनका अर संज्वलन कषाय अर नोकषाय इनके निषेकनिका सत्ता अवस्था रूप लक्षण धरैं उपशम होतैं बहुरि संज्वलनकषाय नोकषायनिका देशघाती स्पर्धकनिका तीव्र उदयहोतैं सकलसंयम अर मलका उपजावनहारा प्रमाद दोऊ हो हैं तींहि कारणतैं प्रमत्त सोई विरत सो षष्ठम गुणस्थानवर्ती जीव प्रमत्तसंयत ऐसा कहिए है। "विवक्खिदस्स संजमस्स खओवसमित्तपडुप्पायणमेत्तफलत्तादो कथं संजलणणोकसायाणं चरित्तविरोहीणं चरित्तकारयत्तं? देशघादित्तेण सपडिवक्खगुणविणिम्मूलणसत्तिविरहियाणमुदओ विज्जमाणो वि ण स कज्जकार ओत्ति संजमहेदुत्तेण विविक्खियत्तादो, वत्थुदो दु कज्जं पडुप्पायेदि मलजणणपमादोविय 'अविय इत्यवधारणे' मलजणणपमादो चेव जम्हा एवं तम्हा हु पमत्ताविरदो सो तमुवलक्खदि।" याका अर्थ-विवक्षित जो संयम ताकैं क्षायोपशमिकपनाका उत्पादनमात्र फलपना है कैसैं संज्वलन अर नोकषाय जे चारित्रके विरोधी तिनकैं चारित्रका करना उपजावना संभव है? तहां कहैं हैं एक देशघाती है तींहि भावकरि अपना प्रतिपक्षी संयमगुण ताहि निर्मूल नाशकरनेकी शक्तिरहित है सो इनका उदय विद्यमान भी है तथापि अपना कार्यकारी नाहीं, संयम नाश न करि सकै है। ऐसैं संयमका कारणपनाकरि विवक्षातैं संज्वलन अर नोकषायनिकैं चारित्र उपजावना उपचारकरि जानना। वस्तुतैं यथार्थ निश्चय विचार करिए तब ए संज्वलन अर नोकषाय अपने कार्यहीकौं उपजावैं हैं इनितैं-मलका उपजावनहारा प्रमाद हो है अपि च ऐसा शब्द है सो प्रमाद भी है ऐसा अवधारण अर्थविषैं जानना। मलका उपजावनहारा प्रमाद है जातैं ऐसैं तातैं प्रकट प्रमत्तविरत सो षष्ठम गुणस्थानवर्ती जीव[1] जानना। ताहि लक्षण-करि कहैं हैं—

वत्तावत्तपमादे जो वसइ पमत्तसंजदो होदि।
सयलगुणशीलकलिओ महव्वई चित्तलायरणो॥ ३३॥

१ ख पुस्तकमें 'जीव है यह' पाठ है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्यक्ताव्यक्तप्रमादे यो वसति प्रमत्तसंयतो भवति।
सकलगुणशीलकलितो महाव्रती चि(त्र)त्तलाचरणः ॥ ३३ ॥

जी० प्र०—व्यक्ते स्वसंवेद्ये, अव्यक्ते-प्रत्यक्षज्ञानिनामेव संवेद्ये च प्रमादे यः संयतो वर्तते स चारित्रमोहनीयक्षयोपशममाहात्म्येन सकलगुणशीलकलितो महाव्रती (अपि) भवति। अत्र साकल्यं महत्त्वं च देशसंयतापेक्षया ज्ञातव्यं ततः कारणादेव प्रमत्तसंयतः चित्रलाचरण इत्युक्तं। चित्रं प्रमादमिश्रं लातीति चित्रलं, चित्रलं आचरणं यस्यासौ चित्रलाचरणः। अथ वा चित्रलः-सारंगः, तद्वद् शवलितं आचरणं यस्यासौ चित्रलाचरणः। अथवा चित्तं लातीति चित्तलं, चित्तलं आचरणं यस्यासौ चित्तलाचरणः इति विशेषव्युत्पत्तिरपि ज्ञातव्या ॥ ३३ ॥ अथ तेषां प्रमादानां नामसंख्याप्रदर्शनार्थमाह—

मं० प्र०—स्वसंवेद्यः परानुमेयश्च व्यक्तः स्थूल इत्यर्थः। प्रत्यक्षज्ञानिनामेव विषयः अव्यक्तः—सूक्ष्म इत्यर्थः। व्यक्तश्चाव्यक्तश्च व्यक्ताव्यक्तं, तच्च तत्प्रमादश्चासौ व्यक्ताव्यक्तप्रमादः, तस्मिन् यः संयतो वसति—वर्तते स प्रमत्तसंयतो भवति। कथंभूतः ? सकलगुणशीलकलितः-सकलैः—समस्तैः, गुणैः—सम्यक्त्वज्ञानादिभिः, शीलैश्च-व्रतरक्षणधर्मैः, कलितः—संयुक्तः, पुनरपि कथंभूतः ? महाव्रती- सकलगुणशीलकलितत्वादेव महाव्रती जातः। पुनरपि कथंभूतः ? चित्रलाचरणः—चित्रलः—सारंगः, चित्रल इव प्रमादमलचित्रितं आचरणं—चारित्रं यस्यासौ चित्रलाचरणः अविशुद्धचारित्र इत्यर्थः ॥ ३३ ॥ अथ प्रमादानां नामसंख्याप्ररूपणार्थमाह—

स० चं०—व्यक्त कहिए आपके जाननेमें आवै बहुरि अव्यक्त कहिए प्रत्यक्ष ज्ञानीनिके ही जानने योग्य ऐसा जो प्रमाद तींहिविषैं जो संयत प्रवर्तै सो चारित्रमोहनीयका क्षयोपशमका माहात्म्यकरि समस्त गुण अर शीलकरि संयुक्त महाव्रती हो है। अपिशब्दकरि प्रमादी भी हो है अर महाव्रती भी हो है। इहां सकलसंयमपनों अर महाव्रतीपनों देशसंयत अपेक्षाकरि जानना ऊपरिके गुणस्थाननिकी अपेक्षा नाहीं है। तिस कारणतैं ही प्रमत्तसंयत चित्रलाचरण है ऐसा कह्या है। चित्रं कहिए प्रमादकरि मिश्ररूपकौं 'लाति' कहिए ग्रहै करै सो चित्रल कहिए, चित्रल आचरण जाकैं होइ सो चित्रलाचरण जानना। अथवा चित्रल कहिए सारंग चीता तिहिं समान मिल्या हूवा काबरा आचरण जाका होइ सो चित्रलाचरण जानना। अथवा चित्तं लाति कहिए मनकौं प्रमादरूपकरि करै सो चित्तल कहिए, चित्तल है आचरण जाका सो चित्तलाचरण जानना। ऐसी विशेष निरुक्ति भी पाठांतर अपेक्षा जाननी ॥ ३३ ॥ आगैं तिनि प्रमादनिका नाम संख्या दिखावनेके अर्थि सूत्र कहैं हैं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विकहा तहा कसाया इंदियणिद्दा तहेव पणयोय ।
चदु चदु पणमेगेगं होंति पमादा हु पण्णरस ॥ ३४ ॥

विकथा तथा कषाया इंद्रियनिद्राः तथैव प्रणयश्च ।
चतुश्चतुःपंचैकैकं भवंति प्रमादाः खलु पंचदश ॥ ३४ ॥

जी० प्र०——संयमविरुद्धाः कथाः विकथाः, कषंति-हिंसंति संयमगुणमिति कषायाः, संयमविरोधींद्रियव्यापाराः इंद्रियाणि, स्त्यानगृद्ध्यादिकर्मत्रितयोदयेन निद्रा, प्रचलातीव्रोदयेन वा समुद्भूता जीवस्य स्वार्थसामान्यग्रहणप्रतिबंधिका जाड्यावस्था निद्रा । बाह्यार्थेषु ममत्वरूपः प्रणयः, एते यथासंख्यं चतस्रः, चत्वारः, पंच,एका, एकः सर्वे मिलित्वा प्रमादाः पंचदश भवंति । अथ प्रथमोद्दिष्टस्तथाशब्दः सर्वप्रमादसाधारण्यज्ञापनार्थः, द्वितीयस्तथाशब्दः समुच्चयार्थः ॥३४॥ अथैषां प्रमादानां प्रकारांतरेण संख्यादिपंचप्रत्ययान् गाथानवकेन प्ररूपयति—

मं० प्र०——विलक्षणाः—संयमविरुद्धाः कथावाक्यप्रबंधाः विकथाः—स्त्री-भक्त-राष्ट्र-राजकथाः, तथा कषायाः संयमविरुद्धा तीव्रपरिणामाः कषायाः-भावक्रोधादयः, इंद्रियाणि—स्पर्शनादींद्रियद्वारेभ्यो जाताः स्पर्शादिस्वस्वविषयरागाः, निद्राः—स्त्यानगृद्ध्यादित्रयरूपा, तीव्रनिद्रा प्रचलारूपा च, तथैव प्रणयश्च - तीव्रपरिणतमोहश्च—तीव्रहास्यादिनोकषायोदयजनितात्मसंक्लेशपरिणाम इत्यर्थः । एवं यथाक्रमं चतुश्चतुःपंचैकैकभेदा विकथादयः प्रमादा मिलिताः पंचदश भवंति खलु सम्यग्दर्शनादिषु गुणशीलेषु कुशलानुष्ठानेषु अनवधानमनादरः प्रमाद इति लक्षणस्य विकथादिषु पंचदशष्वपि विद्यमानत्वात् । प्रमाद्यति जीवः कुशलानुष्ठानेभ्यः प्रच्यवते अनेनेति प्रमाद इति निरुक्तिसद्भावाच्च ॥ ३४ ॥ अथ प्रमादानां पंचप्रत्ययकथनार्थं गाथासप्तकमाह—

स० चं०—संयमविरुद्ध जे कथा ते विकथा कहिए। बहुरि कषंति कहिए संयमगुणकौं घातैं ते कषाय कहिए। बहुरि संयमविरोधी इंद्रियनिका विषय प्रवृत्तिरूप व्यापार ते इंद्रिय कहिए। बहुरि स्त्यानगृद्धि आदि तीन कर्मप्रकृतिनिका उदयकरि निद्रा वा प्रचलाका तीव्र उदयकरि प्रकट भई जो जीवकैं अपने दृश्य पदार्थनिका सामान्यमात्र ग्रहणकौं रोकनहारी जडरूप अवस्था सो निद्रा है। बहुरि बाह्यपदार्थनिविषैं ममत्वरूप भाव सो प्रणय कहिए स्नेह है। ए क्रमतैं विकथा च्यारि,कषाय च्यारि,इंद्रिय पांच,निद्रा एक, स्नेह एक ऐसैं सर्व मिलि प्रमाद पंद्रह हो हैं। इहां सूत्रविषैं पहिलैं चकार कह्या सो सवही ए प्रमाद हैं ऐसा साधारण भाव जाननेके अर्थि कह्या

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

है। बहुरि दूसरा तथा शब्द कह्या सो परस्पर समुदाय करनेके अर्थि कह्या है ॥ ३४ ॥ आगैं इनि प्रमादनिके अन्य प्रकारकरि पांच प्रकार हैं तिनकौं नवगाथानिकरि कहैं हैं–

संखा तह पत्थारो परियट्टण णट्ठ तह समुद्दिट्ठं।
एदे पंच पयारा पमदसमुक्कित्तणे णेया ॥ ३५ ॥

संख्या तथा प्रस्तारः परिवर्तनं नष्टं तथा समुद्दिष्टं।
एते पंच प्रकाराः प्रमादसमुत्कीर्तने ज्ञेयाः ॥ ३५ ॥

जी० प्र०—प्रमादालापोत्पत्तिनिमित्ताक्षसंचारहेतुविशेषः संख्या, एषां न्यासः प्रस्तारः, अक्षसंचारः परिवर्तनं, संख्यां धृत्वा अक्षानयनं नष्टं, अक्षं धृत्वा संख्यानयनं समुद्दिष्टं। एते पंचप्रकाराः प्रमादसमुत्कीर्तने ज्ञेया भवंति ॥ ३५ ॥ अथ विशेषसंख्योत्पत्तिक्रममाह–

मं० प्र०—संख्या-भेदगणना, प्रस्तारः-न्यासः, परिवर्तनं-अक्षसंचारः, नष्टं-संख्यां धृत्वा अक्षाख्यानयनं, उद्दिष्टं-अक्षं धृत्वा संख्यानयनं। पूर्वस्तथाशब्दः परस्परसमुच्चयार्थः। उत्तरस्तथाशब्दः यथाशब्दार्थपरामर्शी। प्रमादसमुत्कीर्तने-प्रमादव्याख्याने एते पंचप्रकाराः यथा पूर्वाचार्यैरुक्तास्तथा अस्माभिर्व्याख्यायमाना ज्ञेयाः ॥ ३५ ॥

स० चं०—संख्या प्रस्तार परिवर्तन नष्ट समुद्दिष्ट ए पांचप्रकार प्रमादनिका व्याख्यानविषैं जानना। तहां प्रमादनिका आलापकौं कारणभूत जो अक्षसंचारके निमित्तका विशेष सो संख्या है बहुरि इनका स्थापन करना सो प्रस्तार है, बहुरि अक्षसंचार परिवर्तन है, संख्या धरि अक्षका ल्यावना नष्ट है, अक्ष धरि संख्याका ल्यावना समुद्दिष्ट है। इहां भंगकौं कहनेका विधान सो आलाप जानना। बहुरि भेद वा भंगका नाम अक्ष जानना। बहुरि एक भेद अनेक भंगनिविषैं क्रमतैं पलटै ताका नाम अक्षसंचार जानना बहुरि जेथवां भंग होइ तींहि प्रमाणका नाम संख्या जानना ॥ ३५ ॥ आगैं विशेष संख्याकी उत्पत्तिका क्रम कहैं हैं–

सव्वेपि पुव्वभंगा उवरिमभंगेसु एक्कमेक्केसु।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मेलंतित्ति य कमसो गुणिदे उप्पज्जदे संखा ॥ ३६ ॥

सर्वेऽपि पूर्वभंगा उपरिमभंगेषु एकैकेषु ।
मिलंति इति च क्रमशो गुणिते उत्पद्यते संख्या ॥ ३६ ॥

जी० प्र०—सर्वेऽपि पूर्वभंगाः उपरिमोपरिमभंगेषु एकैकस्मिन्मिलंति संभवंतीति क्रमेण गुणिते सति विशेषसंख्या समुत्पद्यते तद्यथा–पूर्वभंगाः विकथाप्रमादाश्चत्वारोऽपि उपरितनकषायेष्वेकैकस्मिन् संभवंतीति चतुःकषायाणां षोडश प्रमादा भवंति पुनः एतेऽधस्तनभंगाः षोडशापि उपरितनेंद्रियेष्वेकैकस्मिन् संभवंतीति पंचेंद्रियाणामशीतिप्रमादा भवंति तथा निद्रायां प्रणये च एकैकत्वाद् अशीतिरशीतिरेव एवं विशेषसंख्योत्पत्तिः कथिता जाता ॥ ३६ ॥ अथ प्रस्तारक्रमं प्रदर्शयति—

मं० प्र०—सर्वेपि पूर्वभंगाः–पूर्वपूर्वप्रमादविकल्पाः उपरितनभंगेषु एकैकस्मिन् मिलंति–संभवंतीति क्रमशः–क्रमेण पूर्वसंख्यया उत्तरसंख्या गुण्यते तया च तदुत्तरसंख्या गुण्यते एवं गुणिते सति प्रमादानां सर्वसंख्या अशीति प्रमिता उत्पद्यते ॥ ३६ ॥

स० चं०—सर्व ही पहिलेभंग ऊपरि ऊपरिके भंगनिविषैं एक एकविषैं मिलैं है संभवैं हैं। यातैं क्रमकरि परस्पर गुणैं विशेष संख्या उपजै है। सोई कहिए है--पूर्व भंग विकथाप्रमाद च्यारि ते ऊपरिके कषायप्रमादनिविषैं एक एकविषैं संभवैं हैं ऐसैं च्यारि विकथानिकरि गुणैं च्यारि कषायनिके सोलह प्रमाद हो हैं। बहुरि ए नीचले भंग सोलह भए ते ऊपरिके इंद्रियप्रमादनिविषैं संभवैं हैं। ऐसैं सोलहकरि गुणैं पंच इंद्रियनिके असी प्रमाद हो हैं तैसैं ही निद्राविषैं बहुरि स्नेहविषैं एक ही एक भेद है तातैं एक एककरि गुणैं भी असी असी ही प्रमाद हो हैं। ऐसैं विशेष संख्याकी उत्पत्ति कही ॥ ३६ ॥ आगै प्रस्तारका अनुक्रम दिखावै हैं–

पढमं पमदपमाणं कमेण णिक्खिविय उवरिमाणं च ।
पिंडं पडि एक्केकं णिक्खित्ते होदि पत्थारो ॥ ३७ ॥

प्रथमं प्रमादप्रमाणं क्रमेण निक्षिप्य उपरिमाणं च ।
पिंडं प्रति एकैकं निक्षिप्ते भवति प्रस्तारः ॥ ३७ ॥

प्रयोजन एक है। सो इहां तिस गुणश्रेणी आयामका प्रथम समयविषैं जेता द्रव्य दीया तींहि प्रमाण एक शलाका है। बहुरि तातैं दूसरे समय तैसैं ही असंख्यात गुणी शलाका हैं। तातैं तीसरे समय असंख्यातगुणी शलाका है। ऐसैं असंख्यातगुणा अनुक्रमकरि अंत समयविषैं यथायोग्य असंख्यातगुणी शलाका हो है। इनि सर्व प्रथमादि समयसंबंधी शलाकानिका जोड दीएं जो प्रमाण होइ सो प्रक्षेपयोग जानना। ताका भाग गुणश्रेणीविषैं दीया हूवा द्रव्यकौं दीएं जो प्रमाण आवै ताकौं प्रक्षेपक जो अपना अपना समयसंबंधी शलाकाका प्रमाण ताकरि गुणैं अपने अपने द्रव्यका प्रमाण हो है। ऐसैं जिस जिस समयविषैं जेता जेता प्रमाण द्रव्यका आवै है तितना तितना द्रव्य तिस तिस समयविषैं निर्जरै है याप्रकार गुणश्रेणी आयामविषैं सर्वगुणश्रेणीविषैं दीया हूवा जो द्रव्य सो निर्जरै है॥ अब इस कथनकौं अंकसंदृष्टिकरि व्यक्त करिए है--

जैसैं गुणश्रेणीविषै दीया हूवा द्रव्यका प्रमाण छसै अस्सी, गुण श्रेणी आयामका प्रमाण च्यारि, असंख्यातका प्रमाण च्यारि। तहां प्रथमसंमयसंबंधी जेता द्रव्य तींहि प्रमाण शलाका एक दूसरा संमयसंबंधी तातैं असंख्यात गुणी शलाका च्यारि ४ तीसरा समयसंबंधी तातैं असंख्यातगुणी शलाका सोलह १६ चौथा समयसंबंधी तातैं असंख्यातगुणी शलका चौसठि ६४ सो इनि शलाकानिका नाम प्रक्षेप है इनिका जो योग कहिये जोड सो पिच्यासी हो है ताकरि मिश्रपिंड जो सवनिका मिल्या हूआ द्रव्य छसै असी ताकौं भाग दीजिये तब आठ पाये। बहुरि यहु पाया हूआ राशि ताका प्रक्षेप कहिए अपनी २ शलाकाका प्रमाण ताकरि गुणिये है। तहां आठकौं एककरि गुणैं प्रथम समय संबंधी निषेकका प्रमाण आठ ८ हो है। बहुरि च्यारिकौं गुणें द्वितीय निषेकका प्रमाण बत्तीस हो है बहुरि सोलहकरि गुणैं तृतीय निषेकका प्रमाण एकसौ अट्ठाईस १२८ हो है। बहुरि चौसठिकरि गुणैं अंत निषेकका प्रमाण पांचसै बारह ५१२ हो है। ऐसैं सर्व समयनिविषैं ८, ३२, १२८, ५१२ मिलिकरि छसै असी ६८० द्रव्य निर्जरै हैं। भावार्थ--लोकविषै जाकौं विसवा कहिए ताका नाम इहां शलाका है। बहुरि जाकौं लोकविषैं सीरका द्रव्य कहिए ताका नाम इहां मिश्रपिंड कह्या है सो सब विसवा मिलाइ इनिका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भाग देइ अपना २ विसवनिकरि गुणैं जैसैं अपना २ द्रव्यका प्रमाण आवै तैसैं इहां समय समयविषै जेता जेता द्रव्य निर्जरै ताका प्रमाण वर्णन किया है। ऐसैं इहां सम्यक्त्वकी उत्पत्तिरूप करणका गुणश्रेणी आयामविषैं वर्णन उदाहरण मात्र किया ऐसैं ही अन्यत्र भी जानना तहां कालका वा द्रव्यका विशेष है सो यथासंभव जानना।

बहुरि यातैं आगैं जो उपरितन स्थितिविषैं दीया द्रव्य सो विवक्षित मतिज्ञानावरणकी स्थितिके निषेक पूर्वैं थे तिस विषै इस गुणश्रेणी आयामके कालके पीछै अनंतर समय संबंधी जो निषेक तातैं लगाइ अंतविषै अतिस्थापनावलीके निषेकनिकौं छोडि जे निषेक थे तिनिविषै क्रमतैं दीजिये है पूर्वैं तिनि निषेकनिकौं द्रव्यविषै याकौं भी क्रमकरि मिलाइए है तहां नाना गुणहानिविषैं पहला पहला निषेकनिविषैं आधा आधा दीजिये द्वितीयादिनिषेकनिविषैं चयहीनका अनुक्रमकरि दीजिए सो इस वर्णनविषैं त्रिकोण रचना संभवै है ताका विशेष आगैं करैंगे इहां प्रयोजनका अभाव है तातैं विशेष न किया है। ऐसैं जो एक भागमात्र जुदा द्रव्य ग्रह्या था ताकौं वर्तमान समयतैं लगाइ उदयावलीका काल ताके पीछैं गुणश्रेणी आयामका काल ताके पीछैं अवशेष सर्वस्थितिका काल अंतविषैं अतिस्थापनावलीविना सो उपरितनस्थितिका काल तिनिके निषेक पूर्वैं थे तिनिविषैं मिलाइए है सो यह मिलाया हूवा द्रव्य पूर्वनिषेकनिका साथि उदय होइ निर्जरै है ऐसा भाव जानना। बहुरि पूर्वैं कह्या जो जो गुणश्रेणी निर्जरा द्रव्य सो सो श्रावकादि दशस्थानकनिविषैं असंख्यात असंख्यात गुणा है सो कैसैं ? ताका समाधान--तिस गुणश्रेणी द्रव्यकौं कारणभूत जो अपकर्षण भागहार तिनिके अधिक अधिक विशुद्धताका निमित्तकरि असंख्यातगुणा घाटिपना है तातैं तिस गुणश्रेणीद्रव्यकैं असंख्यातगुणा अनुक्रमकी प्रसिद्धता है। भावार्थ--श्रावकादि दशस्थानकनिविषैं विशुद्धता अधिक अधिक है तातैं जो पूर्वस्थानविषैं अपकर्षण भागहारका प्रमाण था ताके असंख्यातवें भाग उत्तर स्थानविषैं अपकर्षण भागहारका प्रमाण जानना। सो जेता भागहार घटता होइ तेता लब्धराशिका प्रमाण अधिक होइ। तातैं इहां लब्धराशि जो गुणश्रेणीका द्रव्य सो भी क्रमतैं असंख्यात गुणा हो है। बहुरि गुणश्रेणी आयामका काल तातैं विपरीत उल्टा अनुक्रम धरै है

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सोई कहिए है--'समुद्घात जिनकौं आदि देकरि विशुद्ध मिथ्यादृष्टि पर्यंत गुणश्रेणी--आयामका काल क्रमकरि संख्यातगुणा संख्यातगुणा है' समुद्घात जिनका गुणश्रेणी आयामकाल अंतर्मुहूर्तमात्र है तातैं स्वस्थानजिनका गुणश्रेणी आयामकाल संख्यातगुणा है तातैं क्षीणमोहका संख्यातगुणा है। ऐसैं ही क्रमतैं पीछेतैं क्षपकश्रेणीवाले आदिविषैं संख्यात संख्यात गुणा जानना। तहां अंतविषैं बहुतवार संख्यातगुणा भया तौ भी करण परिणाम संयुक्त विशुद्ध मिथ्यादृष्टिकैं गुणश्रेणी आयामका काल अंतर्मुहूर्तमात्र ही है अधिक नाहीं। काहेतैं? जातैं अंतर्मुहूर्तके भेद बहुत हैं। तहां जघन्य अंतर्मुहूर्त एक आवली प्रमाण है सो सर्वतैं स्तोक है। बहुरि यातैं एक समय अधिक आवलीतैं लगाइ एक एक समय बधता मध्यम अंतर्मुहूर्त होइ। अंतका उत्कृष्ट अंतर्मुहूर्त एक समय घाटि दोय घटिकारूप मुहूर्त प्रमाण है। तहां ताके उच्छ्वास तीन हजार सातसै तेहत्तरि अर एक उच्छ्वासकी आवली संख्यात यातैं दोयवार संख्यातगुणी आवली प्रमाण उत्कृष्ट मुहूर्त है। बहुरि--'आदी अंते सुद्धे वड्ढिहदे रूवसंजुदे ठाणे' इस सूत्रकरि आवलीमात्र जघन्य अंतर्मुहूर्तकौं दोयवार संख्यात गुणित आवली प्रमाण उत्कृष्ट अंतर्मुहूर्तविषैं घटाइ वृद्धिका प्रमाण एक समयका भाग दीएं जो प्रमाण होइ तामैं एक और जोडै जो प्रमाण होइ तितने अंतर्मुहूर्तके भेद संख्यात आवली प्रमाण हो हैं॥ ६७॥ आगैं ऐसैं कर्मसहित जीवनिका गुणस्थानकनिका आश्रय लीएं स्वरूप अर तिस तिस कर्मकी निर्जराका द्रव्य वा काल आयामका प्रमाण ताकौं निरूपणकरि अब निर्जरे हैं सर्व कर्म जिनकरि ऐसे जे सिद्धपरमेष्ठी तिनिका स्वरूपकौं अन्यमतके विवादका निराकरण लीएं गाथा दोयकरि कहैं हैं---

अट्ठवियकम्मवियला सीदीभूदा णिरंजणा णिच्चा।
अट्ठगुणा किदकिच्चा लोयग्गणिवासिणो सिद्धा॥ ६८॥ १७७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अष्टविधकर्मविकलाः शीतीभूता निरंजना नित्याः ।
अष्टगुणाः कृतकृत्याः लोकाग्रनिवासिनः सिद्धाः ॥ ६८ ॥

जी० प्र०—न केवलं उक्तगुणस्थानवर्तिन एव जीवाः संति सिद्धा अपि-स्वात्मोपलब्धिलक्षणसिद्धिसंपन्नमुक्तजीवा अपि संति । ते कथंभूताः ? अष्टविधकर्मविकला अनेकप्रकारोत्तरप्रकृतिगर्भाणां ज्ञानावरणाद्यष्टविधमूलप्रकृतिकर्मणां–

मोहो खाइयसम्मं केवलणाणं च केवलालोयं ।
हणदि हु आवरणदुगं अणंतविरियं हणेदि विग्घंतु ॥
सुहुमं च णामकम्मं हणेदि आऊ हणेदि अवगहणं ।
अगुरूलहुगं गोदं अव्वावाहं हणेइ वेयणियं ॥

इत्यष्टगुणप्रतिपक्षाणां प्रक्षयेण विकलाः निष्प्रतिपक्षा मुक्ता इत्यर्थः । अनेन संसारिजीवस्य मुक्तिर्नास्तीति याज्ञिकमतं, सर्वदा कर्ममलैरस्पृष्टत्वेन सदा मुक्त एव सदैवेश्वर इति सदाशिवमतं च अपास्तं । पुनः कथंभूताः ? शीतीभूताः सहजशरीरागंतुकमानसादिविविधसांसारिकदुःखवेदनापरितापपरिक्षयेण सुनिर्वृत्ता इत्यर्थः । अनेन मुक्तौ आत्मनः सुखाभावं वदन् सांख्यमतमपाकृतं । पुनः कथंभूताः ? निरंजनाः–अभिनवास्रवरूपकर्ममलरूपांजनान्निष्क्रांताः इत्यर्थः । अनेन मुक्तात्मनः पुनः कर्मांजनसंसर्गेण संसारोऽस्तीति वदन् मस्करीदर्शनं प्रत्याख्यातं । पुनः कथंभूताः ? नित्याः यद्यपि प्रतिसमयवर्त्यर्थपर्यायैः परिणतसिद्धा उत्पादव्ययौ स्वस्मिन् कुर्वंतोऽपि विशुद्धचैतन्यसामान्यरूपद्रव्याकारान्वयमाहात्म्यात् सर्वकालाश्रिताव्ययत्वात् ते नित्यतां न जहतीत्यर्थः । अनेन प्रतिक्षणं विनश्वरचित्पर्याया एव एकसंतानवर्तिनः परमार्थतो नित्यद्रव्यं नेति वदंतीति बौद्धप्रत्यवस्था प्रतिव्यूढा । पुनः कथंभूताः ? अष्टगुणाः क्षायिकसम्यक्त्वज्ञानदर्शनवीर्यसौक्ष्म्यावगाहागुरुलघुकाव्याबाधत्वनामाष्टगुणयुता इत्युपलक्षणं तेन तदनुसार्यनंतानंतगुणानां तेष्वेवांतर्भाव इत्यर्थः, अनेन ज्ञानादिगुणानामत्यंतोच्छित्तिरात्मनो मुक्तिरिति वदन्नैयायिकवैशेषिकाभिप्रायः प्रत्युक्तः । पुनः कथंभूताः ? कृतकृत्याः कृतं–निष्ठापितं, कृत्यं सकलकर्मक्षयतत्कारणानुष्ठानादिकं यैस्ते कृतकृत्याः । इत्यनेन ईश्वरः सदा मुक्तोऽपि जगन्निर्मापणे कृतादरत्वेनाकृतकृत्य इति वददीश्वरसृष्टिवादाकूतं निराकृतं । पुनः कथंभूताः ? लोकाग्रनिवासिनः–लोक्यंते जीवादयः पदार्था अस्मिन्निति लोकः, एवंविधलोकत्रयसन्निवेशाग्रे तनुवातप्रांते निवासिनः स्थास्नवः । यद्यपि कर्मक्षयक्षेत्रादुपर्येव कर्मक्षयानंतरं तथागमनस्वाभाव्यात् ते गच्छंति तथापि लोकाग्रत ऊर्ध्वगमनसहकारिधर्मास्तिकायाभावान्न तदुपरि इतीदं लोकाग्रनिवासित्वमेव युक्तं तेषां, अन्यथा लोकालोकविभागाभावः प्रसज्यते । अनेन आत्मनः ऊर्ध्वगमनस्वाभाव्यात् मुक्ताव-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थायां क्वचिदपि विश्रामाभावात् उपर्युपरि गमनमिति वदन्मांडलिकमतं प्रत्यस्तं ॥ ६८ ॥ अथ श्रीमाधवचंद्रत्रैविद्यदेवा अष्टविधकर्मविकलत्वादीनां सप्तविशेषणानां प्रयोजनं प्रदर्शयंति—

मं० प्र०——सिद्धिः—अनंतज्ञानादिस्वरूपोपलब्धिः, सिद्धिरस्ति एषामिति सिद्धाः मुक्तजीवाः ईदृशा भवंति । कथंभूताः ? अष्टविधकर्मविकलाः—अष्टविधानि मूलप्रकृतिभेदेन अष्टप्रकाराणि कर्माणि—ज्ञानावरणादीनि, विकलानि-विगतप्रकृतिस्थित्यनुभागप्रदेशांशानि प्रच्युतस्वरूपाणि येषां ते अष्टविधकर्मविकलाः मयूरव्यंसकादित्वात् पूर्वनिगतविपर्ययः । पुनरपि कथंभूताः ? शीतिभूताः पूर्वं संसारावस्थायां अशीताः—भवदुःखतापतप्ताः पश्चान्मोक्षावस्थायां शीताः—भवदुःखतापविगमादनंतसुखामृतानुभवजातशैत्याः भूताः शीतीभूताः । पुनरपि कीदृशाः ? निरंजनाः-मिथ्यादर्शनादिबंधहेतुविनाशात् अभिनवास्रवत्कर्मांजनरहिताः, अंजनं कज्जलमिव अनंतज्ञानादिविशुद्धात्मस्वभावमालिन्यहेतुत्वात्, अंजनं-ज्ञानावरणादि कर्म ततो निष्क्रांता निरंजनाः, पुनरपि किंविशिष्टाः ? नित्याः--यद्यपि पर्यायार्थिकनयात् प्रतिसमयं विशुद्धकेवलज्ञानादिपरिणामरूपार्थपर्यायोत्पादविनाशसंभवस्तथापि द्रव्यार्थिकनयप्राधान्यात् स्वपरावभासकाखंडगुणमंडलीमंडितचिद्द्रव्यध्रौव्यपरिणतत्वात् नित्याः—अविचालितस्वभावाः, पुनरपि कीदृग्भूताः ? अष्टगुणाः- अष्टौ क्षायिकसम्यक्त्वकेवलज्ञानदर्शनानंतवीर्यपरमसौक्ष्म्यावगाहागुरुलघुत्वाव्याबाधत्वनामानो गुणाः आत्मद्रव्यसहभाविनो धर्माः येषां संति ते अष्टगुणाः । पुनरपि कीदृग्विधाः ? कृतकृत्याः—कृतानि निष्पादितानि, कृत्यनि—प्रथमसम्यक्त्वोत्पत्तिगुणश्रेणिनिर्जरादीनि अयोगकेवलिचरमसमयवर्तिशुक्लध्याननिवर्तितचरमनिषेकविपाकपर्यंतानि कार्याणि यैस्ते कृतकृत्याः । कृत्स्नकर्मविप्रमोक्षात्परं सिद्धपरमेष्ठिनां किंचिदपि कार्यांतरं नास्ति केवलसम्यक्त्वज्ञानदर्शनरूपः परिणामः सिद्धानां स्वभाव एव न तु कृत्यं । पुनरपि कथंभूताः ? लोकाग्रनिवासिनः—लोकस्य षट्द्रव्यसंघातसंस्थानविशेषस्य, अग्रे-उपरितनतनुवातभागे निवसंति—तिष्ठंति लोकात् परं गतिहेतुधर्मास्तिकायाभावात् ऊर्ध्वं न गच्छंतीत्येवं शीलाः लोकाग्रनिवासिनः । यद्यप्यात्मनः ऊर्ध्वगमनस्वभावोऽस्ति तथापि तत्सहकारिसन्निधिमपेक्ष्यैव तद्गतिपरिणामो युक्तः । यथा मत्स्यानां जलसन्निधानेनैव गतिपरिणामः । तेषां जलादुत्प्लवनमपि जलावष्टंभजलसंस्कारवशेनैव भवति तत्संस्कारक्षये पुनरुपर्युत्प्लवनाभाव एव ॥ ६८ ॥ अथ श्रीमाधवचंद्रत्रैविद्यदेवाः अष्टविधकर्मविकलत्वादीनां सप्तविशेषणानां प्रयोजनं प्रदर्शयंति—

स०चं०—केवल कहे जे गुणस्थानवर्ती जीव तेई नाहीं है सिद्ध कहिये अपने आत्मस्वरूपकी प्राप्ति रूप लक्षण धरैं जो सिद्धि ताकरि संयुक्त मुक्त जीव भी लोकविषैं हैं। ते कैसे हैं? अष्टविधकर्मविकलाः कहिये अनेक प्रकार उत्तर प्रकृतिरूप भेद जिनविषैं गर्भित ऐसे जो ज्ञानावरणादिक आठ प्रकार कर्म आठ गुणनिके प्रतिपक्षी तिनिका सर्वथा क्षयकरि प्रतिपक्षीरहित भए हैं ऐसे आठ कर्म आठ गुणनिके प्रतिपक्षी हैं सो कहै हैं। उक्तं च—

मोहो खाइय सम्मं केवलणाणं च केवलालोयं ।
हणदि उ आवरणदुगं अणंतविरयं हणेदि विग्घं तु ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुहमं च णामकम्मं हणेदि आऊ हणेदि अवगहणं।
अगुरूलहुगं गोदं अव्वावाहं हणेइ वेयणियं ॥

इनिका अर्थ—मोहकर्म क्षायिक सम्यक्त्वकौं घातै है। केवलज्ञान अर केवलदर्शनकौं आवरणद्विक जो ज्ञानावरण दर्शनावरण सो घातै है। अनंतवीर्यकौं विघन जो अंतराय कर्म सो घातै है। सूक्ष्मगुणकौं नाम कर्म घातै है। आयुकर्म अवगाहनाकौं घातै है। अगुरुलघुकौं गोत्र कर्म घातै है। अव्याबाधकौं वेदनीयकर्म घातै है। ऐसैं आठ गुणनिके प्रतिपक्षी आठ कर्म जानने। इस विशेषणकरि जीवके मुक्ति नाहीं है ऐसा मीमांसक मत बहुरि सर्वदा कर्ममलनिकरि स्पर्शा नाही तातैं सदाकाल मुक्त ही है सदा ईश्वर है ऐसा सदाशिव मत सो निराकरण कीया है। बहुरि कैसे हैं सिद्ध? शीतीभूता कहिये जन्ममरणादिरूप सहज दुःख अर रागादिकतैं निपज्या शरीर दुःख अर सर्पादिकतैं उपज्या आगंतुक दुःख अर आकुलतादिरूप मानसदुःख इत्यादि नानाप्रकार संसारसंबंधी दुख तिनकी जो वेदना सोई भया आतप ताका सर्वथा नाशकरि शीतल भए हैं सुखी भये हैं। इस विशेषणकरि मुक्तिविषैं आत्माके सुखका अभाव है ऐसैं कहता जो सांख्यमत सो निराकरण कीया है। बहुरि कैसे हैं सिद्ध? निरंजनाःकहिये नवीन आस्रवरूप जो कर्ममल सो ही भया अंजन ताकरि रहित हैं। इस विशेषणकरि मुक्ति भए पीछें बहुरि कर्म अंजनका संयोगकरि संसार हो है ऐसैं कहता जो सन्यासी मत सो निराकरण कीया है। बहुरि कैसे है सिद्ध? नित्याः कहिये यद्यपि समय समयवर्ती अर्थपर्यायनिकरि परिणमए सिद्ध अपने विषैं उत्पाद व्ययकौं करै हैं तथापि विशुद्ध चैतन्य स्वभावका सामान्य भाव रूप जो द्रव्यका आकार सो अन्वयरूप है भिन्न न होइ है ताके माहात्म्यतैं सर्वलोक विषैं अविनाशिपणाका आश्रित हैं तातैं ते सिद्ध नित्यपनांकौ नाही छोडे हैं इसविशेषणकरि क्षण क्षण विनाशीक चैतन्यपर्याय ते एक संतानवर्ती हैं। परमार्थतैं कोई नित्य द्रव्य नांही है। ऐसैं कहता जो बौद्धमतीकी प्रतिज्ञा सो निराकरण करी है। बहुरि कैसे हैं सिद्ध? अष्टगुणाः कहिए क्षायिक सम्यक्त्व ज्ञान दर्शन वीर्य सूक्ष्मत्व अवगाहन अगुरुलघु अव्याबाध नाम धारक जे आठ गुण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिनिकरि संयुक्त हैं। सो यहु विशेषण उपलक्षणरूप है तातैं तिनि गुणनिके अनुसारी अनंतानंत गुणनिका तिन ही विषै अंतर्भूतपना जानना। इस विशेषणकरि ज्ञानादि गुणनिका अत्यत अभाव होना सोई आत्माकैं मुक्ति है ऐसैं कहता जो नैयायिक अर वैशेषिक मतका अभिप्राय सो निराकरण कीया है।

बहुरि कैसे हैं सिद्ध ? कृतकृत्याः कहिए संपूर्ण कीया है कृत्य कहिए सकल कर्मका नाश अर ताका कारण चारित्रादिक जिनकरि ऐसे हैं। इस विशेषणकरि ईश्वर सदा मुक्त है तथापि जगतका निर्मापणविषैं आदर कीया है तीहिकरि कृतकृत्य नाहीं वाकैं भी किछू करना है ऐसैं कहता जो ईश्वर सृष्टिवादका अभिप्राय सो निराकरण कीया है। बहुरि कैसे हैं सिद्ध ? लोकाग्रनिवासिनः कहिए विलोकिए हैं जीवादि पदार्थ जाविषैं ऐसा जो तीन लोक ताका अग्रभाग जो तनुवातका भी अंत तींहिविषैं निवासी हैं तिष्ठै हैं। यद्यपि कर्म क्षय जहां कीया तिस क्षेत्रतैं ऊपरि ही कर्मक्षयके अनंतरि ऊर्ध्वगमन स्वभावतैं ते गमन करैं हैं तथापि लोकका अग्रभाग पर्यंत ऊर्ध्वगमन हो है। गमनका सहकारी धर्मास्तिकायके अभावतैं तहांतैं ऊपरि गमन न करैं हैं ऐसैं लोकका अग्रभागविषैं ही निवासीपणा तिन सिद्धनिकै युक्त है अन्यथा कहिए तौ लोक अलोकके विभागका अभाव होइ इस विशेषणकरि आत्माके ऊर्ध्वगमन स्वभावतैं मुक्त अवस्थाविषैं कहीं भी विश्रामके अभावतैं ऊपरि ऊपरि गमन हूवा ही करै है ऐसैं कहता जो मांडलिक मत सो निराकरण कीया है ॥ ६८ ॥ आगैं श्रीमाधवचंद्र त्रैविद्यदेव ते 'अष्टविधकर्मविकलाः' इत्यादि सात विशेषणनिका प्रयोजन दिखावै हैं—

सदसिवसंखो मक्कडि बुद्धो णैयाइयो य वेसेसी।
ईसरमंडलिदंसणविदूसणट्ठं कयं एदं ॥ ६९ ॥

सदाशिवः सांख्यः मस्करी बुद्धो नैयायिकश्च वैशेषिकः।
ईश्वरमंडलिदर्शनविदूषणार्थं कृतमेतत् ॥ ६९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी० प्र०—सदाशिवसांख्यमस्करिबुद्धनैयायिकवैशेषिकेश्वरमंडलिदर्शनविदूषणार्थं कृतमेतद्विशेषणं—

सदाशिवः सदाकर्म सांख्यो मुक्तं सुखोज्झितं।
मस्करी किल मुक्तानां मन्यते पुनरागतिं॥
क्षणिकं निर्गुणं चैव बुद्धो यौगश्च मन्यते।
कृतकृत्यं तमीशानो मंडली चोर्द्ध्वगामिनं॥

इत्याचार्यश्रीनेमिचंद्रविरचितायां गोम्मटसारापरनामपंचसंग्रहवृत्तौ जीवतत्त्वप्रदीपिकाख्यायां जीवकांडे विंशतिप्ररूपणासु गुणस्थानप्ररूपणा नाम प्रथमोधिकारः।

मं० प्र०—सदाशिवसांख्यमस्करिबुद्धनैयायिकवैशेषिकेश्वरमंडलिदर्शनाविदूषणार्थं एतदष्टविधकर्मविकलाः, इत्यादि गाथासूत्रमाचार्यैः कृतं तथाहि सदाशिवः सदामुक्तः शश्वत्कर्ममलैरस्पृष्ट इति सदाशिवदर्शनं तन्निराकरणार्थं अष्टविधकर्मविकलाः सिद्धा इत्युक्तं। पूर्वं बद्धस्यैव मुक्तत्वव्यवहारात् शृंखलादिबद्धचौरादिमुक्तत्वव्यवहारवत्। अबद्धस्य आकाशादेर्मुक्तत्वव्यवहाराभावाच्च युक्तिसिद्धो बंधपूर्वको मोक्षः। अस्त्यात्मा अनादिबद्धस्तत्र ुयान्मोक्षमार्गेत्यागमप्रसिद्धेश्च। मिथ्यादर्शनादिभ्यो बंधः सम्यग्दर्शनादिभ्यो मोक्ष इति तर्कशास्त्रेषु समर्थितत्वाच्च। 'प्रकृतेरेव बंधमोक्षौ तत्फलदुःखसुखे च नात्मनः' इति सांख्यदर्शनं तद्विदूषणार्थं शीतीभूता इति विशेषणं। आत्मन एव मिथ्यादर्शनादिपरिणतस्य कर्मबंधस्तत्फलदुःखरूपभवतापः सम्यग्दर्शनादिपरिणतस्य मोक्षस्तत्फलसुखरूपशीतीभावश्च युक्त्यागमाभ्यां प्रसिद्ध इति सकलास्तिकवादिसंमतत्वात्। मुक्तस्य पुनः कर्मांजनसंश्लेषात्संसारसमागमोऽस्तीति मस्करिदर्शनं तन्निराकरणार्थं निरंजना इति विशेषणं, सकलद्रव्यभावकर्मविप्रमुक्तस्य विशुद्धस्वभावस्य सिद्धपरमेष्ठिनः कर्मबंधहेतुमिथ्यादर्शनादिभावकर्माभावात्तत्कार्यस्य बंधस्यात्यंतमसंभवात् अन्यथा मोक्षोऽपि निर्हेतुकः स्यादिति संसाराभावप्रसंगात्। 'ज्ञानक्षणसंतानाभावो मोक्षः' इति बुद्धदर्शनं तन्निराकरणार्थं नित्या इति विशेषणं उपादेयस्य मोक्षस्य ज्ञानसंतानक्षयरूपत्वेन तत्कारणतपोयोगादियत्नस्य अनिष्टफलस्य कर्तुमशक्यत्वात्, अपूर्वलाभमुद्दिश्य जनः सर्वोऽपि प्रवर्तते नहि मूलविनाशाय प्रेक्षावान् कश्चिदीहते इति लोकेऽपि प्रसिद्धत्वात्। तर्कशास्त्रेषु जीवादिद्रव्यस्यानादिनिधनत्वसमर्थनाच्च। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराणां नवानामात्मविशेषगुणानामत्यंतमुच्छित्तिर्मुक्तिरिति नैयायिकवैशेषिकदर्शनं तन्निराकरणार्थं अष्टगुणा इति विशेषणं स्वाभाविककेवलज्ञानादिगुणात्मकत्वात् परमात्मनो गुणनाशे तदभिन्नस्य द्रव्यस्यापि नाशप्रसंगात् मुक्तौ ज्ञानादिगुणाभावे परमात्मन आकाशादिवदचेतनत्वप्रसंगाच्च। चेतनायाः स्वपरसंवेदनस्वभावत्वात् स्वगुणनाशरूपमोक्षाय तपोयोगादियत्नस्यानिष्टफलस्य तत्वविदामयुक्तत्वाच्च। ईश्वरः परमात्मा सदा मुक्तः सन्नपि तनुकरणभवनादिलक्षणं कृत्यं कुर्वन्नास्ते इतीश्वरसृष्टिवाददर्शननिराकरणार्थं 'कृतकृत्याः' इति विशेषणं। त्रिकालगोचरानंतद्रव्यगुणपर्यायरूपं लोकालोकतत्त्वं सर्वं जानन् पश्यन्नभ्युपगच्छन्ननंतसुखामृतमनुभवन्ननंतवीर्योऽपि सिद्धपरमेष्ठी परमात्मा निर्धूतसकलकल्मषतया विशुद्धस्वभावो निर्मलरत्नदर्पण इव लोकमूर्ध्नि प्रकाशमानो वहिःकृत्यं किंचिदपि न करोत्येव प्रयोजनाभावात् आत्मकृत्यस्य कर्मनिर्जरादेस्तत्कारणानुष्ठानस्य च कृतत्वाच्च। जगत्परिणामस्तु उत्पादव्ययध्रौव्यरूपः कालं वहिर्निमित्तमाश्रित्य स्वतएव भवतीति परमात्मनः तत्कर्तृत्वकथनं विचारचतुरचेतसां चेतस्ययुक्तमेव प्रतिभाति तर्कशास्त्रेषु जगत्सृष्टिवादनिराकरणस्य बहुधा समर्थितत्वाच्च। सकलकर्मविप्रमुक्तः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परमात्मा ऊर्ध्वगमनस्वभावत्वात् क्वचिदप्यव्यास्थितः सन्नूर्ध्वं गच्छत्येवेति मंडलिदर्शननिराकरणार्थं लोकाग्रनिवासिन इति विशेषणं जीवपुद्गलानां गमनसहकारिकारणं धर्मास्तिकायो यावत्क्षेत्रमभिव्याप्य तिष्ठति तावदेव गमनं ततोवहिर्गमनाभावः, लोकश्च तावानेव। गमननिवृत्तिरूपस्थितिहेतुरधर्मास्तिकायोऽपि तावानेव ततः कारणात् सकलकर्मविप्रमुक्तः परमात्मा सिद्धपरमेष्ठी ऊर्ध्वगमनस्वभावत्वाल्लोकाग्रपर्यंतमूर्ध्वं गत्वा तत्रैव तिष्ठति ततो वहिर्गमनसहकारिधर्मास्तिकायाभावात् न गच्छति अन्यथा सहकारिकारणाभावेऽपि सर्वाकाशसर्वगतसहकारिकारणेऽपि सर्वेषां जीवपुद्गलानां सर्वाकाशमभिव्याप्य गमनागमनप्रसंगात् लोकालोकविभागाभावो दुर्निवारः स्यात्, न चैवं, लोकालोकविभागस्य सर्वसम्मतत्वात्। 'ऊर्ध्वं व्रज्यास्वभावात्समयमुपगतो धाम्नि संतिष्ठतेऽग्रे' इतिपरमागमप्रसिद्धत्वाच्च लोकाग्रनिवासित्वं सिद्धानां सिद्धं ॥ ६९ ॥

इति श्रीमदभयचंद्रसूरिसिद्धांतचक्रवर्तिविरचितायां गोम्मटसारपंचसंग्रहवृत्तौ गुणस्थानप्ररूपणा नाम प्रथमोधिकारः।

स० चं०–सदाशिवमत सांख्यमत मस्करी सन्यासीमत बौद्धमत नैयायिकमत वैशेषिकमत ईश्वरमत मंडलिमत ए जो दर्शन कहिए मत तिनिके दूषनेके अर्थि ए पूर्वोक्त विशेषण कीए हैं उक्तं च–

सदाशिवः सदाकर्म सांख्यो मुक्तं सुखोज्झितं।
मस्करी किल मुक्तानां मन्यते पुनरागतिं ॥ १ ॥
क्षणिकं निर्गुणं चैव बुद्धो यौगश्च मन्यते।
कृतकृत्यं तमीशानो मंडली चोर्ध्वगामिनं ॥ २ ॥

इनिके अर्थ–सदाशिव मतवाला सदा कर्मरहित मानै है। सांख्यमतवाला मुक्त जीवकौं सुखरहित मानै है। मस्करी सन्यासी सो मुक्त जीवकैं संसारविषैं बहुरि आवना मानै है। बहुरि बौद्ध अर योग मतवाले क्षणिक अर निर्गुण आत्माकौं मानै हैं। बहुरि ईशान जो सृष्टिवादी सो ईश्वरकौं अकृतकृत्य मानै है। बहुरि मंडलिक आत्माकौं ऊर्ध्वगमन रूप ही मानै हैं। ऐसैं माननेवाले मतनिका पूर्वोक्त विशेषणतैं निराकरणकरि यथार्थ सिद्धपरमेष्ठीका स्वरूप निरूपण कीया ते सिद्ध भगवान आनंदकर्ता होहु।

इति श्रीआचार्य नेमिचंद्रविरचित गोम्मटसार द्वितीय नाम पंचसंग्रह ग्रंथकी जीवतत्त्वप्रदीपिका नाम संस्कृत टीकाके अनुसारि सम्यग्ज्ञानचंद्रिका नाम भाषा टीकाकेविषैं जीवकांडविषैं कहीं जे वीसप्ररूपणा तिनिविषैं गुणस्थान प्ररूपणा है नाम जाका ऐसा प्रथम अधिकार संपूर्ण भया ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ जीवसमासप्ररूपणा ॥ २ ॥

जी० प्र०--

जित्वा घातीनि कर्माणि लब्ध्वानंतचतुष्टयं ।
विश्वं येन समुद्दिष्टमजितं तं नमाम्यहं ॥ १ ॥

एवं गुणस्थानलक्षणसंख्यादिप्ररूपणानंतरं जीवसमासप्ररूपणामारचयन् निरुक्तिपूर्वकं सामान्येन तल्लक्षणमाह—

मं० प्र०--

प्रक्षीणघातिकर्माणं लब्धानंतचतुष्टयं ।
अजितं जितकामादिदोषं वंदे परं गुरुं ॥ १ ॥

अथ श्रीनेमिचंद्रसिद्धांतचक्रवर्ती जीवसमासप्ररूपणायां तावत्सामान्यप्ररूपणार्थं गाथात्रयमाह—

स० चं०--

कर्मघातिया जीति जिन पाय चतुष्टय सार ।
विश्वस्वरूप प्रकाशियो नमौं अजित सुखकार ॥ १ ॥

ऐसैं गुणस्थान संबंधी संख्यादिक प्ररूपणाके अनंतरि जीवसमास प्ररूपणाकौं रचता संता निरुक्तिपूर्वक तिस जीव समासका लक्षण कहैं है—

जेहिं अणेया जीवा णज्जंते बहुविहा वि तज्जादी ।
ते पुण संगहिदत्था जीवसमासात्ति विण्णेया ॥ ७० ॥

यैरनेके जीवा ज्ञायंते बहुविधा अपि तज्जातयः ।
ते पुनः संगृहीतार्था जीवसमासा इति विज्ञेयाः ॥ ७० ॥

जी० प्र०---यैः सदृशपरिणामधर्म्मैः जीवाः, अनेके--बहवोऽपि, बहुविधाः--बहुप्रकारा अपि तज्जातयः विवक्षितसामान्यक्रोडीकरणादेकत्रानीताः, ज्ञायंते ते धर्माः संगृहीतार्थाः अंतर्भावितव्यक्तयः जीवसमासा इति विज्ञेयाः । जीवाः समस्यंते--संगृह्यंते यैः, येषु वा ते जीवसमासा इति निर्वचनात् । अनेन समस्तसंसारिजीवसंग्रहप्रयोजनं जीवसमासप्ररूपणं प्रारब्धमिति ज्ञातव्यं । अथवा यैर्धर्मैः जीवा अणेया अज्ञेया अपि कुतः ? बहुविधत्वात् न च नानात्मव्यक्तयःसामस्त्येन केवलज्ञानव्यतिरेकेण गम्यंते अतस्तथा ज्ञातुमशक्या अपि तज्जातयः सैव जाति-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यैर्षां ते तज्जातयः संगृहीतार्थाः--सम्यक्--सामस्त्येन, गृहीताः--गर्भीकृताः कोडीकृता अर्था व्यक्तयो यैस्ते संगृहीतार्थास्ते जीवसमासा इति ज्ञातव्याः। अथवा तज्जातयः--ताश्च जातयश्च तज्जातयः संगृहीतार्थाः-सं सामस्त्येन गृहीताः--गर्भीकृताः कोडीकृता अर्था व्यक्तयो यकाभिस्ताः संगृहीतार्था निर्विशेषा न भवंतीत्यर्थः 'निर्विशेषं हि सामान्यं भवेच्छशविषाणवत्' इति संगृहीतार्थाभिस्तज्जातिभिः करणभूताभिः जीवाः-प्राणिनः, अनेकेऽपि बहुविधा अपि ज्ञायंते ता जीवसमासा इति ज्ञातव्याः ॥ ७० ॥ अथ जीवसमासोत्पत्तिनिबंधनतल्लक्षणमाह—

मं० प्र०--यैः-एकेंद्रियत्वबादरत्वादिभिर्धर्मैः, अनकेऽपि-बहवोऽपि अज्ञेया अपि वा बहुविधा अपि बहुप्रकारा अपि जीवाः, तज्जातयः विवक्षितसामान्यलक्षिता ज्ञायंते-निश्चीयंते ते धर्माः संगृहीतार्थाः-संक्षिप्तजीवविशेषाः जीवसमासा इति पुनः-गुणस्थानप्ररूपणायाः पश्चात् आगमज्ञैर्विज्ञेयाः-अवबोद्धव्याः॥७०॥

स० चं०—यैः कहिए जिनि समान पर्यायरूप धर्मनिकरि जीवा कहिए जीव हैं ते अनेके अपि कहिए यद्यपि बहुत हैं बहुविधा कहिए बहुतप्रकार हैं तथापि तज्जातयः कहिए विवक्षित सामान्यभावकरि एकठा करनेतें एक जातिविषै प्राप्त कीए हुए ज्ञायंते कहिए जानिए ते कहिए ते वे जीव समानपर्यायरूप धर्मसंगृहीतार्थाः कहिए अंतर्भूत करी है अनेक व्यक्ति जिनिकरि ऐसे जीवसमासाः कहिए जीवसमास हैं ऐसैं जानना। भावार्थ—जैसैं एक गऊ जातिविषै अनेक खांडी मुंडी शांवली गऊरूप व्यक्ति सास्नादिमत्त्व समान धर्मकरि अंतर्गर्भित हो हैं तैसैं एक एकेंद्रियत्वादिजातिविषै अनेक पृथ्वी कायादिक व्यक्ति जिनि एकेंद्रियत्वादियुक्त लक्षणनिकरि अंतर्गर्भित करिए तिनिका नाम जीवसमास है। काहेतें ? जातैं 'जीवाः समस्यंते यैर्येषु वा ते जीवसमासाः' जीव हैं ते संग्रहरूप करिए जिनि समानधर्मनिकरि वा जिनि समान लक्षणनिविषै ते वे समानरूप लक्षण जीवसमास हैं ऐसी निरुक्ति हो है इस विशेषणकरि समस्त संसारी जीवनिका संग्रहणरूप ग्रहण करना है प्रयोजन जाका ऐसा जीवसमासका प्ररूपण है सो प्रारंभ कीया है ऐसा जानना अथवा अन्य अर्थ कहै हैं 'जीवा अज्ञेया अपि' कहिए यद्यपि जीव अज्ञात हैं काहेतें ? बहुविधत्वात् कहिए जातैं जीव बहुत प्रकार हैं नानाप्रकार आत्माकी पर्यायरूप व्यक्तितैं समस्तपणांकरि केवलज्ञान विना न जानिये है यातैं सर्वपर्यायरूप जीव जाननेकौं असमर्थपना है तथापि तज्जातयः कहिए सोई एकेंद्रियत्वादिरूप है जाति जिनिकी बहुरि संगृहीतार्थाः कहिए समस्तपणांकरि गर्भित कीए हैं एकठे कीये हैं व्यक्ति जिनिकरि ऐसे जीव हैं तेई जीवसमास हैं ऐसा जानना। अथवा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अन्य अर्थ कहै हैं-संगृहीतार्थाः कहिए समस्तपणाकरि गर्भितकरी है एकठी करी है व्यक्ति जिनकरि ऐसी तज्जातयः कहिए ते जाति हैं। जातैं विशेषविना सामान्य न होइ। काहेतैं? जातैं ऐसा वचन है-'निर्विशेषं हि सामान्यं भवेच्छशविषाणवत्' याका अर्थ-विशेषरहित जो सामान्य सो ससाके सींग समान अभावरूप है तातैं संगृहीतार्थ जे वे जाति तिनिका कारणभूत जातिनिकरि जीव प्राणी हैं ते 'अनेकेऽपि' कहिए यद्यपि अनेक हैं बहुविधाअपि कहिए बहुतप्रकार हैं तथापि ज्ञायंते कहिए जानिएं हैं ते वे जाति जीवसमास हैं ऐसा जानना। भावार्थ–जीवसमास शब्दके तीन अर्थ कहे तहां एक अर्थविषैं एकेंद्रिययुक्तत्वादि समानधर्मनिकौं जीवसमास कहे। एक अर्थविषैं एकेंद्रियादि जीवनिकौं जीवसमास कहे। एक अर्थविषैं एकेंद्रियत्वादि जातिनिकौं जीवसमास कहे ऐसैं विवक्षा भेदकरि तीन अर्थ जानने।७०।आगैं जीवसमासकी उत्पत्तिका कारण बहुरि जीवसमासका लक्षण कहैं हैं–

तसचदुजुगाणमज्झे अविरुद्धेहिं जुदजादिकम्मुदये।
जीवसमासा होंति हु तब्भवसारिच्छसामण्णा ॥ ७१ ॥

त्रसचतुर्युगलानां मध्ये अविरुद्धैर्युतजातिकर्म्मोदये।
जीवसमासा भवंति हि तद्भवसादृश्यसामान्याः ॥ ७१ ॥

जी० प्र०---त्रसस्थावरौ वादरसूक्ष्मौ पर्याप्तापर्याप्तौ प्रत्येकसाधारणाविति चत्वारि युगलानि। एतासां नामप्रकृतीनां मध्ये यथासंभवमविरुद्धप्रकृतिभिः सह मिलितस्य एकेंद्रियादिजातिनामकर्मणः उदये सति प्रादुर्भूताः तद्भवसादृश्यसामान्यरूपजीवधर्मा जीवसमासा भवंति। तद्भवसामान्यं नाम ते विवक्षितद्रव्यगतपर्यायास्त्रिकालगोचरा भवंति--विद्यंते अस्मिन्निति तद्भवसामान्यं-ऊर्द्ध्वतासामान्यमित्यर्थः। तच्च नानाकाले एकव्यक्तिगतान्वयरूपं भवति। द्रव्याश्रितपर्यायोन्वयः। स्थासकोशकुशूलघटकपालिकादिषु मृदिव अन्विताकारद्रव्यं तेनोपलक्ष्यते। सादृश्यसामान्यानि तिर्यक्सामान्यानीत्यर्थः। एककाले नानाव्यक्तिगतोऽन्वयस्तिर्यक्सामान्यं सदृशपरिणामाः खंडमुंडशवलशावलेयादिविविधव्यक्तिषु गोत्वादिवत्। तथा पृथिवीकायिकादिविविधजीवेषु एकेंद्रियत्वादिधर्माः सदृशपरिणामरूपा जीवसमासा भवंतीति खलु तात्पर्यं। पुनः तेषु चतुर्षु युगलेषु एकेंद्रियजातिनामकर्मणा सह त्रसनामकर्मोदयोविरुद्धः। द्वींद्रियादिजातिनामकर्मचतुष्टयेन सह स्थावरसूक्ष्मसाधा- १८६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रणनामकर्मोदयो विरुद्धः इतरकर्मोदयः अविरुद्धः । तथा त्रसनामकर्मणा सह स्थावरसूक्ष्मसाधारणनामकर्मोदयो विरुद्धः शेषकर्मोदयः अविरुद्धः । स्थावरनामकर्मणा सह त्रसनामकर्मोदय एक एव विरुद्धः शेषकर्मोदयः अविरुद्धः । वादरनामकर्मणा सह सूक्ष्मनामकर्मोदयो विरुद्धः, शेषप्रकृत्युदयः अविरुद्धः । सूक्ष्मनामकर्मणासह त्रसवादरप्रत्येकनामकर्मोदयोविरुद्धः शेषकर्मोदयः अविरुद्धः । पर्याप्तनामकर्मणा सह अपर्याप्तनामकर्मोदयो विरुद्धः शेषसर्वकर्मोदयः अविरुद्धः । अपर्याप्तनामकर्मोदयेन सह पर्याप्तनामकर्मोदयोविरुद्धः शेषसर्वकर्मोदयः अविरुद्धः । प्रत्येकशरीरनामकर्मोदयेन सह साधारणशरीरनामकर्मोदयोविरुद्धः शेषकर्मोदयः अविरुद्धः । साधारणशरीरनामकर्मणा प्रत्येकशरीरनामकर्मोदयः, त्रसनामकर्मोदयश्च विरुद्धः एवमविरुद्धप्रकृत्युदयजनितसदृशपरिणामधर्माः जीवसमासा इति ज्ञातव्या भवंति ॥ ७१ ॥ अथ संक्षेपेण जीवसमासस्थानानि प्ररूपयति----

मं० प्र०---त्रसादीनां चतुर्णां युगानां--युगलानां त्रसस्थावरौ वादरसूक्ष्मौ पर्याप्तापर्याप्तौ प्रत्येकसाधारणौ, इति चत्वारि युगलानि, एतेषां मध्ये अविरुद्धैः यथासंभवं सहावस्थितपर्यायकारिभिः त्रसनामादिकर्मभिः, युतस्य- संयुक्तस्य एकेंद्रियादिजातनामकर्मणः उदये सति तद्भवसादृश्यसामान्याः जीवसमासाः खलु-स्फुटं भवंति । तेषु भवं विद्यमानं तद्भवं, तद्भवं सादृश्यसामान्यं येषां ते तद्भवसादृश्यसामान्याः विवक्षितैकजीवस्थितपर्याप्तवादरैकेंद्रियत्वादिसदृशधर्मयुक्ता इत्यर्थः । अथवा तद्भवानि च तानि सादृश्यसामान्यानि च तानि तद्भवसादृश्यसामान्यानि तान्येव जीवसमासा इत्युच्यंते तद्विवक्षितं जीवादिवस्तु भवति--अस्ति, येन तत्तद्भवं द्रव्यरूपं ऊर्ध्वतासामान्यमित्यर्थः । तद्भवसहचरितानि तद्भवानि इत्युपचारशब्दोऽयं । परापरविवर्तव्यापिद्रव्यमूर्ध्वतासामान्यं । अर्थांतरगतः सदृशपरिणामस्तिर्यक्सामान्यमिति सामान्यद्वयस्य लक्षणं ज्ञातव्यं ॥ ७१ ॥

स० चं०--त्रस स्थावर बहुरि बादर सूक्ष्म बहुरि पर्याप्त अपर्याप्त बहुरि प्रत्येक साधारण ऐसैं नामकर्मकी प्रकृतिनिके च्यारि युगल हैं तिनिकेविषैं यथासंभव परस्पर विरोधरहित जे प्रकृति तिनिकरि सहित मिल्या ऐसा जो एकेंद्रियादि जातिरूप नाम कर्मका उदय ताकौं होते संतैं प्रकट भए ऐसे तद्भवसादृश्य सामान्यरूप जीवकैं धर्म ते जीवसमास हैं तहां तद्भव सामान्यका अर्थ कहैं हैं--विवक्षित एकद्रव्यविषैं प्राप्त जो त्रिकालसंबंधी पर्याय ते भवंति कहिए विद्यमान जाविषैं होंइ सो तद्भवसामान्य है । ऊर्ध्वता सामान्यका नाम तद्भव सामान्य है । तहां अनेक काल संबंधी पर्यायका ग्रहण होइ तहां ऊर्ध्वतासामान्य कहिए तातैं कालके समय हैं ते ऊपरि ऊपरि क्रमतैं प्रवर्तैं हैं युगपत् चौडाई रूप नाहीं प्रवर्तैं हैं जातैं इहां नानाकालविषैं एकविवक्षित व्यक्तिविषैं प्राप्त जे पर्याय तिनिका अन्वयरूप ऊर्ध्वता समान्य है सो एक द्रव्यके आश्रय जो पर्याय सो अन्वयरूप है जैसैं स्थास कोश

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुशूल घट कपालक आदिविषैं माटी अन्वयरूप आकार धरैं द्रव्य है। भावार्थ–माटी क्रमतैं इतने पर्यायरूप परिणया। प्रथम स्थास कहिए पिंडरूप भया बहुरि कोश कहिए वाके ऊपरि ऊभा कीया पिंडरूप भया बहुरि कुशूल कहिए हाथ अगूंठनिकरि कीया आकाररूप भया। बहुरि घट कहिए घडारूप भया बहुरि कपाल कहिए फूट्या घडारूप भया ऐसैं एक माटीरूप व्यक्तिविषैं अनेककालवर्ती पर्याय हो हैं। तिनि सवनिविषैं माटीपना पाइए है। ताकरि सर्वत्र माटी द्रव्य अवलोकिए है। ऐसैं इहां भी अनेक कालवर्ती अनेक अवस्थानिविषैं एकेंद्रिय आदि जीव द्रव्यरूप व्यक्ति सो अन्वयरूप द्रव्य जानना सो याका नाम तद्भवसामान्य वा ऊर्ध्वतासमान्य है। तींहि तद्भवसामान्यकरि उपलक्षणरूप संयुक्त ऐसैं जो सादृश्यसामान्य कहिए तिर्यक्सामान्य ते जीवसमास हैं। सो एककालविषैं नाना व्यक्तिनिकौं प्राप्तभया ऐसा एक जातिरूप अन्वय सो तिर्यक् सामान्य है। याका अर्थ यहु-जो समान धर्मका नाम सादृश्य सामान्य है जैसैं खांडी मूडी सांवरी इत्यादि नानाप्रकारकी व्यक्तिनिविषैं गऊपणा समान धर्म है। भावार्थ–एककालवर्ती खांडी मूडी सांवली इत्यादि अनेक बैल तिनिविषैं बैलपना समान धर्म है सो यहु सादृश्य सामान्य है। तैसैं एककालवर्ती पृथ्वीकायिक आदि नानाप्रकार जीवनिविषैं एकेंद्रिय युक्तपना आदि धर्म हैं ते समान परिणामरूप हैं तातैं इनिकौं सादृश्यसामान्य कहिए ऐसैं जे सादृश्यसामान्य तेई जीवसमास हैं ऐसा तात्पर्य जानना। बहुरि तिनि च्यारि युगलनिकी आठ प्रकृतिनिविषैं एकेंद्रिय जातिनाम कर्मसहित त्रसनामकर्मका उदय विरोधी है। बहुरि द्वींद्रियादिक जातिरूप नामकर्मकी च्यारि प्रकृतिनिका उदयसहित स्थावर सूक्ष्म साधारण नाम प्रकृतिनिका उदय विरोधी है अन्यकर्मका उदय अविरोधी है। बहुरि तैसैं ही त्रसनाम कर्मसहित स्थावर सूक्ष्म साधारण नामकर्मका उदय विरोधी है अन्य कर्मका उदय अविरोधी है। बहुरि स्थावर नाम कर्मसहित त्रसनामकर्मका उदय एकही विरोधी है अवशेष कर्मका उदय अविरोधी है। बहुरि बादरनाम कर्मसहित सूक्ष्म नामकर्मका उदय विरोधी है अवशेष प्रकृतिनिका उदय अविरोधी है। बहुरि सूक्ष्मनामकर्मसहित त्रसबादरनामकर्मका उदय विरोधी है अवशेष कर्मका उदय अविरोधी है। बहुरि प-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्यास नाम कर्मसहित अपर्यास नाम कर्मका उदय विरोधी है अवशेष सर्वकर्मका उदय अविरोधी है। बहुरि अपर्यास नामकर्मका उदय सहित पर्यास नामकर्मका उदय विरोधी है अवशेष सर्वकर्मका उदय अविरोधी है। बहुरि प्रत्येकशरीरनामकर्मका उदयसहित साधारण शरीरनामकर्मका उदय विरोधी है अवशेष कर्मका उदय अविरोधी है। बहुरि साधारण शरीरनामकर्मका उदयसहित प्रत्येकशरीरनामकर्मका उदय अर त्रसनामकर्मका उदय विरोधी है अवशेष कर्मका उदय अविरोधी है। ऐसैं अविरोधी प्रकृतिनिका उदयकरि निपजे जे सदृश परिणामरूप धर्म ते जीवसमास हैं ऐसा जानना ॥ ७१ ॥ आगैं संक्षेपकरि जीवसमासके स्थानकनिकौं प्ररूपैं हैं—

बादरसुहमेइंदियवितिचउरिंदियअसण्णिसण्णी य।
पज्जत्तापज्जत्ता एवं ते चोद्दसा होंति ॥ ७२ ॥

वादरसूक्ष्मैकेंद्रियद्वित्रिचतुरिंद्रियासंज्ञिसंज्ञिनश्च।
पर्याप्तापर्याप्ता एवं ते चतुर्दश भवंति ॥ ७२ ॥

जी० प्र०—एकेंद्रियस्य वादरसूक्ष्माविति द्वौ, विकलत्रयस्य द्वींद्रियत्रींद्रियचतुरिंद्रिया इति त्रयः, पंचेंद्रियस्य असंज्ञिसंज्ञिनाविति द्वौ एवं सप्तजीवभेदाः प्रत्येकं पर्याप्तापर्याप्ताभ्यां गुणिताः संक्षेपेण चतुर्दशजीवसमासा भवंति ॥ ७२ ॥ अथ विस्तरजीवसमासान् प्ररूपयति—

मं० प्र०—एकेंद्रिया जीवाः वादराः–स्थूलाः, सूक्ष्माश्च। द्वींद्रियास्त्रींद्रियाश्चतुरिंद्रियाः असंज्ञिसंज्ञिपंचेंद्रियाश्च वादरा एव पुनरेते सप्तविधा अपि प्रत्येकं पर्याप्ताः अपर्याप्ताश्च भवंति इत्येवं द्वाभ्यां गुणितत्वप्रकारेण चतुर्दशजीवसमासा भवंति। तदालापक्रमोयं–पर्याप्तवादरैकेंद्रियत्वरूपसदृशधर्मयुक्ताः अनंतजीवाः पर्याप्तवादरैकेंद्रियाः एको जीवसमासः। अपर्याप्तवादरैकेंद्रियत्वरूपसदृशधर्मयुक्ताः अनंता जीवाः अपर्याप्तवादरैकेंद्रियाः इति द्वितीयो जीवसमासः पर्याप्तसूक्ष्मैकेंद्रियत्वरूपसदृशधर्मयुक्ता अनंता जीवा पर्याप्तसूक्ष्मैकेंद्रियाः, इति तृतीयो जीवसमासः। अपर्याप्तसूक्ष्मैकेंद्रियाः अनंता जीवाः इति चतुर्थो जीवसमासः। एवं पर्याप्तवादरद्वींद्रिया असंख्येया जीवाः पंचमो जीवसमासः इत्याद्युत्तरेऽपि जीवसमासा नेतव्याः ॥७२॥ अथ विशेषजीवसमासप्ररूपणार्थमाह—

सं० चं०—एकेंद्रियके वादर सूक्ष्म ए दोय भेद वहुरि विकलत्रयके द्वींद्रिय १ त्रींद्रिय १ चतुरिंद्रिय १ ए

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तीन भेद बहुरि पंचेंद्रियके संज्ञी असंज्ञी ए दोय भेद ऐसैं सात जीव भेद भए ये एक एक भेद पर्याप्त अपर्याप्त रूप हैं। ऐसैं संक्षेपकरि चौदह जीवसमास हो हैं ॥ ७२ ॥ आगैं विस्तारतैं जीवसमासकौं प्ररूपैं हैं–

भूआउतेउवाऊणिच्चचदुग्गदिणिगोदथूलिदरा ।
पत्तेयपदिट्ठिदरा तसपण पुण्णा अपुण्णदुगा ॥ ७३ ॥

भ्वप्तेजोवायुनित्यचतुर्गतिनिगोदस्थूलेतराः ।
प्रत्येकप्रतिष्ठेतराः त्रसपंच पूर्णा अपूर्णद्विकाः ॥ ७३ ॥

जी० प्र०---भूकायिकाप्कायिकतेजस्कायिकवायुकायिकाः वनस्पतिकायिकेषु नित्यनिगोदसाधारणचतुर्गतिनिगोदसाधारणाविति षड्भेदाः । प्रत्येकं वादरसूक्ष्माविति द्वादश । प्रत्येकशरीरवनस्पतिकायिकस्य प्रतिष्ठिताप्रतिष्ठिताविति द्वौ । द्वींद्रियत्रींद्रियचतुरिंद्रिया इति त्रयः । पंचेंद्रियस्य असंज्ञिसंज्ञिपंचेंद्रियाविति द्वौ एवं सर्वे मिलित्वा एकोनविंशतिजीवसमासा भवंति । एते सर्वेऽपि प्रत्येकं पर्याप्तकाः निर्वृत्यपर्याप्तका लब्ध्यपर्याप्तकाश्च भवंतीति विस्तरतो जीवसमासा सप्तपंचाशद्भेदा भवंति ॥ ७३ ॥ अथैषां सप्तपंचाशज्जीवभेदानां अवांतरविशेषप्रदर्शनार्थं स्थानाद्यधिकारचतुष्टयमाह----

मं० प्र०---भूकायिकाः अप्कायिकाः तेजस्कायिकाः वायुकायिकाः, वनस्पतिकायिकाः द्विधा--साधारणशरीराः प्रत्येकशरीराश्चेति । तत्र साधारणशरीराः निगोदाः ते च द्विविधाः–नित्यनिगोदाश्चतुर्गतिनिगोदाश्चेति एवं भूकायिकादयः षडपि प्रत्येकं द्विधा स्थूलेतरे–वादराः सूक्ष्माश्च एवं द्वादश । प्रत्येकशरीराः प्रतिष्ठितप्रत्येका अप्रतिष्ठितप्रत्येकाश्चेति द्विधा ऐते चतुर्दश स्थावराः । त्रसाः पंच द्वींद्रियाः, त्रींद्रियाः, चतुरिंद्रियाः, असंज्ञिपंचेंद्रियाः, संज्ञिपंचेंद्रियाश्चेति । प्रत्येकशरीरादयः सप्तापि वादरा एव एवं एकान्नविंशतिर्विशेषजीवसमासाः । ते च पूर्णाः पर्याप्ताः, अपूर्णद्विकाः द्विधा-अपर्याप्ताः–निर्वृत्यपर्याप्ताः लब्ध्यपर्याप्ताश्चेति ॥ ७३ ॥ अथोत्तरोत्तरविशेषजीवसमासप्ररूपणोपायमाह---

सं० चं०—पृथ्वीकायिक, अप्कायिक, तेजः कायिक, वायुकायिक, अर वनस्पतिकायिकनिविषैं दोय भेद नित्यनिगोद साधारण, चतुर्गतिनिगोद साधारण ए छह भेद भए ते एक एक भेद वादर सूक्ष्मकरि दोय दोय भेदरूप हैं ऐसैं वारह भए। बहुरि प्रत्येकशरीररूप वनस्पती कायिकके सप्रतिष्ठित अप्रतिष्ठित ए दोय भेद हैं। १९०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बहुरि विकलेंद्रियके बेइंद्री, तेइंद्री, चौइंद्री, ए तीन भेद बहुरि पंचेंद्रियके संज्ञी पंचेंद्रिय असंज्ञी पंचेंद्रिय ए दोय भेद ए सर्व मिलि सामान्य अपेक्षा उगणीस जीव समास हो हैं। बहुरि ए सर्व ही प्रत्येक पर्याप्तक निर्वृत्ति अपर्याप्तक लब्धि अपर्याप्तक ऐसैं तीन तीन भेद लीएं हैं तातैं विस्तारतैं जीवसमास सत्तावन भेद संयुक्त हो हैं ॥ ७३ ॥ आगैं इनि सत्तावन जीवभेदनिके गर्भित विशेष दिखावनेके अर्थि स्थानादिक च्यारि अधिकार कहैं हैं—

ठाणेहिं वि जोणीहिं वि देहोग्गाहणकुलाण भेदेहिं ।
जीवसमासा सव्वे परूविदव्वा जहाकमसो ॥ ७४ ॥

स्थानैरपि योनिभिरपि देहावगाहनकुलानां भेदैः ।
जीवसमासाः सर्वे प्ररूपितव्या यथाक्रमशः ॥ ७४ ॥

जी० प्र०—स्थानैरपि योनिभिरपि देहावगाहनैरपि कुलानां भेदैरपि सर्वे ते जीवसमासाः, यथाक्रमं—प्रवचनपरिपाट्यनतिक्रमेण प्ररूपयितव्या भवंति ॥ ७४ ॥ अथ यथोद्देशस्तथा निर्देश इति न्यायेन प्रथमोद्दिष्टजीवसमासस्थानाधिकारं गाथाचतुष्टयेनाह—

मं० प्र०—स्थानैरपि—एकद्वित्र्यादिविकल्पैः, योनिभिरपि—उत्पत्त्याधारैः, देहावगाहनैः- सूक्ष्मनिगोदलब्ध्यपर्याप्तकशरीरजघन्यावगाहनं घनांगुलासंख्येयभागप्रमितमादिं कृत्वा महामत्स्यशरीरसंख्यातघनांगुलमात्रोत्कृष्टावगाहनपर्यंतैः, कुलानां भेदैः—शरीरभेदोत्पत्तिकारणनोकर्मवर्गणानां प्रकारैः, सर्वे उत्तरोत्तरविशेषविशिष्टा जीवसमासाः यथाक्रमं प्ररूपितव्याः । अस्माभिर्वक्ष्यमाणाः स्थानयोन्यवगाहनकुलकोटीराश्रित्य तत्र तत्र तदनुसारेण विशेषजीवसमासाः प्रवचनपटुभिर्व्याख्यातृभिः शिष्येभ्यः प्रतिपादयितव्या इत्यर्थः । अपिशब्दद्वयं स्थानैरपि योनिभिरपि देहावगाहनैरपि कुलानां भेदैरपीति प्रत्येकसमुच्चयसूचनार्थं । न केवलं पूर्वोक्तप्रकारैरेव जीवसमासाः प्ररूप्यंते अपि तु स्थानैरपीति समुच्चयार्थः प्रथमोऽपिशब्दः । इतरः पुनः पूर्वपूर्वसमुच्चयार्थः ॥ ७४ ॥ अथ स्थानान्याश्रित्य जीवसमासप्ररूपणार्थं गाथात्रयमाह—

सं० चं०—स्थानकनिकरि बहुरि योनि भेदनिकरि बहुरि देहकी अवगाहनाके भेदनिकरि बहुरि कुलभेदनिकरि सर्व ही ते जीवसमास यथाक्रम सिद्धांतपरिपाटीका उलंघन जैसैं न होइ तैसैं प्ररूपण करने योग्य हैं ॥७४॥ आगैं जैसैं उद्देश कहिए नामका क्रम होइ तैसैं ही निर्देश कहिए स्वरूपनिर्णय क्रमकरि करना इस न्यायकरि प्रथम कह्या जो जीवसमासविषैं स्थानाधिकार ताकौं गाथा च्यारिकरि कहैं हैं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सामण्णजीव तसथावरेसु इगिविगलसयलचरिमदुगे।
इंदियकाये चरिमस्स य दुतिचदुपणगभेदजुदे ॥ ७५ ॥

सामान्यजीवः त्रसस्थावरयोः एकविकलसकलचरमद्विके।
इंद्रियकाययोः चरमस्य च द्वित्रिचतुःपंचभेदयुते ॥ ७५ ॥

जी० प्र–तत्रोपयोगलक्षणसामान्यजीवे द्रव्यार्थिकनयेन विषयीकृते जीवसमासस्थानमेकं, संग्रहनयगृहीतार्थभेदकव्यवहारनयविवक्षायां संसारिजीवस्य प्रथमभेदौ त्रसस्थावरावधिकृतौ इति जीवसमासस्थाने द्वे, पुनरन्यप्रकारेण व्यवहारनयविवक्षायां एकेंद्रियविकलेंद्रियसकलेंद्रियजीवानधिकृत्य जीवसमासस्थानानि त्रीणि एवमग्रेऽपि सर्वत्र प्रकारांतरैर्व्यवहारनयविवक्षा ज्ञातव्या। तद्यथा–एकेंद्रियविकलेंद्रियौ तथा अंत्यस्य सकलेंद्रियस्य असंज्ञिसंज्ञिभेदौ च मिलित्वा जीवसमासस्थानानि चत्वारि तथा एकद्वित्रिचतुःपंचेंद्रियभेदजीवसमासस्थानानि पंच। तथा पृथिव्यप्तेजोवायुवनस्पतित्रसकायिकभेदात् जीवसमासस्थानानि षट्। तथा पृथिव्यप्तेजोवायुवनस्पतिकायिकाः पंच अंत्यस्य च त्रसकायस्य विकलेंद्रियसकलेंद्रियौ द्वाविति मिलित्वा जीवसमासस्थानानि सप्त। तथा स्थावरकायाः पंच विकलेंद्रियासंज्ञिसंज्ञिपंचेंद्रियाश्च त्रयः मिलित्वा जीवसमासस्थानान्यष्टौ। तथा स्थावरकायाः पंच द्वित्रिचतुःपंचेंद्रियाश्च चत्वारः मिलित्वा जीवसमासस्थानानि नव। तथा स्थावरकायाः पंच द्वित्रिचतुरिंद्रियासंज्ञिसंज्ञिपंचेंद्रियाश्च पंच मिलित्वा जीवसमासस्थानानि दश ॥ ७५ ॥

मं० प्रं०–सामान्येन संग्रहात्मकद्रव्यार्थिकनयप्राधान्यात् सर्वसंसारिजीवानां संसारित्वलक्षणसदृशपरिणामेनैकत्वमुपचर्य कथंचिदेकः संसारिजीवसमासः इति प्रथमं स्थानं, मुक्तजीवानामपि मुक्तत्वलक्षणसदृशपरिणामेनैकत्वमुपचर्य कथंचिदेको मुक्तजीवः, संसारिमुक्तजीवानां जीवत्वलक्षणसदृशपरिणामेनैकत्वमुपचर्य कथंचिदेको जीव इति स्याद्वादिभिरभिधीयते। पुनर्व्यवहारनयप्राधान्यात् यः प्रागुक्त एको जीव इति स संसारी मुक्तश्चेति भेदलक्षणयोगाद् द्विधा भिद्यते तथा संसारिजीवश्च य एक इति प्रागुक्तः स त्रसः स्थावरश्चेति तयोर्भिन्नयोः सतोर्द्वितीयं जीवसमासस्थानं। इंद्रियमाश्रित्य स्थावरः एकेंद्रियः, त्रसभेदौ विकलेंद्रियः सकलेंद्रियश्चेति द्वौ इति तृतीयं जीवस्थानं। तेषु चरमस्य सकलेंद्रियस्य भेदौ असंज्ञिपंचेंद्रियः संज्ञिपंचेंद्रियश्चेति द्वौ इति चतुर्थं स्थानं। इंद्रियेषु विवक्षितेषु एकेंद्रियो द्वींद्रियस्त्रींद्रियश्चतुरिंद्रियः पंचेंद्रियः इति पंचमं स्थानं। कायमाश्रित्य भूकायिकः अप्कायिकः तेजस्कायिकः वायुकायिकः वनस्पतिकायिकः त्रसकायिकश्चेति षष्ठं स्थानं। तेषु चरमस्य त्रसकायिकस्य भेदौ विकलेंद्रियः सकलेंद्रियश्चेति द्वौ इति सप्तमं स्थानं। तस्यैव चरमस्य भेदाः विकलेंद्रियः असंज्ञिपंचेंद्रियः संज्ञिपंचेंद्रियश्चेति त्रयः इत्यष्टमं स्थानं। तस्यैव चरमस्य भेदाः–द्वींद्रियाः त्रींद्रियाः चतुरिंद्रियाः पंचेंद्रियाश्चेति चत्वार इति नवमं स्थानं। तस्यैव चरमस्य भेदाः द्वींद्रियादयस्त्रयः असंज्ञिपंचेंद्रियः संज्ञिपंचेंद्रियश्चेति पंच इति दशमं स्थानं ॥ ७५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० चं०—तहां उपयोग लक्षण धरैं सामान्यमात्र जीवद्रव्य सो द्रव्यार्थिक नयकरि ग्रहण कीएं जीवसमासका स्थान एक है। बहुरि संग्रहनयकरि ग्रह्या जो अर्थ ताका भेदकरणहारा जो व्यवहारनय ताकी विवक्षाविषैं संसारी जीवके मुख्यभेद त्रस स्थावर ते अधिकाररूप हैं। ऐसैं जीवसमासके स्थान दोय हैं। बहुरि अन्यप्रकार व्यवहारनयकी विवक्षा होतें एकेंद्रिय, विकलेंद्रिय, सकलेंद्रिय जीवनिकौं अधिकार रूपकरि जीवसमासके स्थान तीन हैं। बहुरि ऐसैंही आगे भी सर्वत्र अन्य अन्य प्रकारनिकरि व्यवहार नयकी विवक्षा जाननी सो कहे हैं—एकेंद्रिय, विकलेंद्रिय दोय तौ ए, अर सकलेंद्रिय जो पंचेंद्रिय ताके असंज्ञी संज्ञी ए दोय भेद ऐसैं मिलि जीवसमासके स्थान च्यारि हो हैं। बहुरि तैसैंही एकेंद्रिय १ वेइंद्री २ तेइंद्री ३ चौइंद्री ४ पंचेंद्री ५ भेदतैं जीवसमासके स्थान पांच हैं। बहुरि तैसैं ही पृथ्वी १ अप् २ तेज ३ वायु ४ वनस्पति ५ त्रस ६ कायिकभेदते जीवसमासके स्थान छह हैं। बहुरि तैसैंही पृथ्वी १ अप् २ तेज ३ वायु ४ वनस्पति ५ ए पांच स्थावर अर अन्य त्रसकायके विकलेंद्रिय ६ सकलेंद्रिय ७ ए दोयभेद ऐसैं मिलि जीवसमासके स्थानक सप्त हो हैं। बहुरि तैसैं ही पृथ्वी आदि स्थावरकाय पांच, विकलेंद्रिय ६ असंज्ञी पंचेंद्रिय ७ संज्ञी पंचेंद्रिय ८ ए तीन मिलिकरि जीवसमासके स्थान आठ हो हैं। बहुरि स्थावरकाय पांच अर वेंद्री ६ तेइंद्री ७ चौंद्री ८ पंचेंद्री ९ ए च्यारि मिलिकरि जीवसमासके स्थान नव हो हैं। बहुरि तैसैं ही स्थावरकाय पांच ५ अर वेंद्री ६ तेंद्री ७ चौंद्री ८ असंज्ञी पंचेंद्री ९ संज्ञी पंचेंद्री १० ए पांच मिलिकरि जीवसमासके स्थान दश हो हैं॥ ७५॥

पणजुगले तससहिये तसस्स दुतिचदुरपणगभेदजुदे।
छद्दुगपत्तेयह्मि य तसस्स तियचदुरपणगभेदजुदे॥ ७६॥

पंचयुगले त्रससहिते त्रसस्य द्वित्रिचतुःपंचकभेदयुते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्रिय असंज्ञी पंचेंद्रिय संज्ञी पंचेंद्रिय ए तीनि मिलि जीवसमासके स्थान सोलह हो हैं। बहुरि तैसें ही स्थावरकायके तेरह अर त्रसकायके वे इंद्री ते इंद्री चौ इंद्री पंचेंद्री ए च्यारि मिलि जीवसमासके स्थान सतरह हो हैं। बहुरि स्थावरकायके तेरह अर त्रसकायके वेंद्री तेंद्री चौंद्री असंज्ञी पंचेंद्री संज्ञी पंचेंद्री ए पांच मिलि जीवसमासके स्थान अठारह हो हैं ॥ ७६ ॥

सगजुगलह्मि तसस्स य पणभंगजुदेसु होंति उणवीसा ।
एयादुणवीसोत्ति य इगिवितिगुणिदे हवे ठाणा ॥ ७७ ॥

सप्तयुगले त्रसस्य च पंचभंगयुतेषु भवंति एकोनविंशतिः ।
एकादेकोनविंशतिरिति च एकद्वित्रिगुणिते भवेयुः स्थानानि ॥ ७७ ॥

जी॰ प्र॰–तथा पृथिव्यप्तेजोवायुनित्यचतुर्गतिनिगोदाः षडपि वादराः सूक्ष्माश्च प्रत्येकवनस्पतेः प्रतिष्ठिताप्रतिष्ठितौ द्वित्रिचतुरिंद्रियासंज्ञिसंज्ञिपंचेंद्रियाश्चेति जीवसमासस्थानान्येकान्नविंशतिः । एवमुक्तानि सामान्यजीवरूपैकस्थानादीनि एकोनविंशतिभेदस्थानपर्यंतानि एकेन द्वाभ्यां त्रिभिर्गुणितानि यथाक्रमं एकोनविंशतिभेदस्थानानि अष्टात्रिंशद्भेदस्थानानि सप्तपंचाशद्भेदस्थानानि च भवंति ॥ ७७ ॥ अथ एक-द्वित्रिगुणकारकारणं प्ररूपयति––

मं॰ प्र॰––सप्तानां भूवप्तेजोवायुकायिकनित्यचतुर्गतिनिगोदानां वादरसूक्ष्मयुग्मेषु प्रत्येकस्य च प्रतिष्ठिताप्रतिष्ठितयुग्मे त्रसस्य भंगेषु भेदेषु द्वित्रिचतुरसंज्ञिसंज्ञिपंचेंद्रियेषु पंचसु युतेषु एकान्नाविंशं स्थानं । एवं सर्वाण्यपि स्थानानि एकान्नविंशतिर्भवंति । जीवसमासा अपि तावंत एव एकाद्येकान्नविंशतिस्थानपर्यंतानि सर्वाणि स्थानानि एकेन द्वाभ्यां त्रिभिश्च गुणितानि यथाक्रमं एकान्नविंशतिः अष्टात्रिंशत् सप्तपंचाशज्जीवस्थानानि भवंति ॥७७॥ अथ एक-द्वित्रिगुणकारकारणं प्ररूपयति–

सं॰ च॰—तैसें ही पृथ्वी अप् तेज वायु नित्यनिगोद इतरनिगोद ए छह वादर सूक्ष्म ताके वारह अर प्रत्येक वनस्पतिके सप्रतिष्ठित अप्रतिष्ठित ए दोय अर त्रसके वे इंद्रिय तें इंद्रिय चतुरिंद्रिय असंज्ञि पंचेंद्रिय संज्ञिपंचेंद्रिय ए पांच मिलि जीवसमासके स्थान उगणीस हो हैं। ऐसें कहे जे ऐ सामान्य जीवरूप एक स्थानकौं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आदि देकरि उगणीस भेदरूप स्थानपर्यंत स्थान तिनिकौं एक दोय तीनिकरि गुणैं अनुक्रमतैं अंतविषैं उगणीस भेदस्थान अड़तीस भेदस्थान सत्तावनभेदस्थान हो हैं ॥ ७७ ॥

सामण्णेण तिपंती पढमा विदिया अपुण्णगे इदरे ।
पज्जत्ते लद्धिअपज्जत्तेऽपढमा हवे पंती ॥ ७८ ॥

सामान्येन त्रिपंक्तयः प्रथमा द्वितीया अपूर्णके इतरस्मिन् ।
पर्याप्ते लब्ध्यपर्याप्तेऽप्रथमा भवेत् पंक्तिः ॥ ७८ ॥

जी० प्र०—प्रागुक्तैकाद्येकोत्तरैकान्नविंशतिविकल्पस्थानानां तिस्रः पंक्तयोऽधोधः कर्तव्याः। तासु प्रथमा पंक्तिः पर्याप्तापर्याप्तादिविवक्षामकृत्वा सामान्यालापेन गुणयितव्या। द्वितीयापंक्तिर्द्वाभ्यां पर्याप्तापर्याप्तभेदाभ्यां गुणयितव्या। अप्रथमा–तृतीया पंक्तिः त्रिभिःपर्याप्तनिर्वृत्यपर्याप्तलब्ध्यपर्याप्तभेदैर्गुणयितव्या। द्वितीयतृतीयपंक्त्योरप्रथमत्वेऽपि द्वितीयायाः कंठोक्तत्वेन अप्रथमा इत्यनेन पारिशेष्यात्तृतीयैव गृहीता। तत्र सामान्यप्रथमपंक्तेः मुह १ भूमि १९ जोग २० दले १० पदगुणिदे १०। १९। लब्धयुतिः १९० द्वितीयपंक्तेः मुह २ भूमी ३८ जोग ४० दले २० पदगुणिदे २०। १९ युतिः ३८०। तृतीयपंक्तेः मुह ३ भूमी ५७ जोग ६० दले ३० पदगुणिदे ३०×१९ युतिः ५७० ॥ ७८। अथैकेंद्रियविकलत्रयजीवसमासाश्रितपंचेंद्रियगतजीवसमासस्थान् विशेषान् गाथाद्वयेनाह—

मं० प्र०—एतेषां प्रागुक्तानां एकान्नविंशतिजीवसमासानां तिस्रः पंक्तयः कर्तव्याः। तासां तिसृणां पंक्तीनां मध्ये प्रथमा पंक्तिः सामान्येन पर्याप्तापर्याप्तभेदमकृत्वा जीवसमाससामान्यमाश्रित्य एकेन आत्मप्रमाणेन गुणिता एकान्नविंशतिप्रमितैव। द्वितीया पंक्तिः पूर्णके पर्याप्तके, इतरस्मिन् अपर्याप्तके च वर्तते इति द्वाभ्यां गुणिता अष्टात्रिंशत्प्रमिता भवति। पुनरप्रथमा–तृतीया पंक्तिः पर्याप्ते लब्ध्यपर्याप्ते निर्वृत्यपर्याप्ते च वर्तते इति त्रिभिर्गुणिता चत्वारिंशत्प्रमिता भवति। लब्धिशब्देनैव 'नामैकदेशो नाम्नि प्रवर्तते' इति न्यायात् लब्ध्यपर्याप्तको गृह्यते। अपर्याप्तशब्देन अवशिष्टो निर्वृत्यपर्याप्तको गृह्यते। द्वितीयतृतीययोरप्रथमत्वेऽपि द्वितीयाया उक्तत्वात् अवशिष्टा तृतीया पंक्तिरेवाप्रथमाशब्देन गृह्यते ॥७८॥ अथ उत्तरोत्तरजीवसमासविशेषप्ररूपणार्थं गाथाद्वयमाह–

सं० च०—पूर्वै कहे जे एककौं आदि देकरि एक एक बधते उगणीस भेदरूप स्थान तिनिकी तीनिपंक्ति नीचैं नीचैं करनीं। तिनिविषैं प्रथमपंक्ति तौ पर्याप्तादिककी विवक्षाकौं न करि सामान्य आलापकरि गुणनी। बहुरि दूसरी पंक्ति जे पर्याप्त अपर्याप्त भेद तिनिकरि गुणनी। बहुरि अप्रथमा कहिए तीसरी पंक्ति सो तीन जे १९६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पर्याप्त निर्वृत्ति अपर्याप्त लब्धि अपर्याप्त भेद तिनिकरि गुणनी। इहां दूसरी तीसरी दोय पंक्ति अप्रथमा हैं तथापि दूसरी पंक्ति कांठैही कही तींहिकरि अप्रथमा ऐसैं शब्दकरि अवशेष रही पंक्ति तीसरी सोई ग्रहण करी है। भावार्थ--एककौं आदिदेकरि उगणीस पर्यंत जीवसमासके स्थान कहे तिनिका सामान्यरूप ग्रहणकीएं एक आदि एक एक बधते उगणीस पर्यंत स्थान हो हैं। इहां सामान्यविषैं पर्याप्तादि भेद गर्भित जानने। बहुरि तिनही एक एकके पर्याप्त अपर्याप्त भेद कीएं दोयकौं आदि देकरि दोय दोय बधते अडतीस पर्यंत स्थान हो हैं। इहां अपर्याप्तविषैं निर्वृति अपर्याप्त लब्धि अपर्याप्त दोऊ गर्भित जानने। बहुरि तिनही एक एकके पर्याप्त निर्वृत्ति अपर्याप्त लब्धि अपर्याप्त भेद कीयें तिनिकौं आदि देकरि तीन तीन बधते सत्तावन पर्यंत स्थान हो हैं इहां जुदे जुदे भेद जानने। अब कहे भेदनिकी यंत्रमें रचना अंकनिकरि लिखिये है---

जीवसमासके स्थानकनिका यंत्र।

सामान्य अपेक्षा स्थान	पर्याप्त अपर्याप्त अपेक्षा स्थान	पर्याप्त निर्वृत्तिअपर्याप्त लब्धिअपर्याप्त अपेक्षा स्थान
१	२	३
२	४	६
३	६	९
४	८	१२
५	१०	१५
६	१२	१८
७	१४	२१
८	१६	२४
९	१८	२७
१०	२०	३०
११	२२	३३
१२	२४	३६
१३	२६	३९
१४	२८	४२
१५	३०	४५
१६	३२	४८
१७	३४	५१
१८	३६	५४
१९	३८	५७
१९०	३८०	५७०

५०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अब इनि पंक्तिनिका जोड देनेके अर्थि करण सूत्र कहिए है-'मुहभूमीजोगदले पदगुणिदे पदधणं होदि' मुख आदि अर भूमि अंत इनिकौं जोडैं आधाकरि पद जो स्थान प्रमाण तींहिकरि गुणैं सर्वपदधन हो है। सो प्रथम पंक्तिविषैं मुख येक अर भूमी उगणीस जोडैं वीस ताका आधा दश पद उगणीसकरि गुणैं येकसौ निवै सर्वजोड हो है। बहुरि द्वितीय पंक्तिविषैं मुखदोय, भूमी अड़तीस जोडे चालीस आधा कीएं वीस पद उगणीसकरि गुणै तीनसै असी सर्व जोड हो है। बहुरि तीसरी पंक्तिविषैं मुख तीन, भूमी सत्तावन जोडे साठि आधा कीएं तीस पद उगणीसकरि गुणै पांचसै सत्तरि सर्व जोड हो है ॥ ७८ ॥ आगैं एकेंद्रिय विकलत्रय जीव समासनिकरि मिले हूए ऐसे पंचेंद्रियसंबंधी जीवसमास स्थानके विशेषनिकौं गाथा दोयकरि कहै हैं–

इगिवण्णं इगिविगले असण्णिसण्णिगयजलथलखगाणं।
गब्भभवे समुच्छे दुतिगं भोगथलखेचरे दो दो ॥ ७९ ॥
अज्जवमलेच्छमणुए तिदुभोगभूमिजे दो दो।
सुरणिरये दो दो इदि जीवसमासा हु अडणउदी ॥८०॥

एकपंचाशत् एकविकले असंज्ञिसंज्ञिगतजलस्थलखगानां।
गर्भभवे सम्मूर्छे द्वित्रिकं भोगस्थलखेचरे द्वौ द्वौ ॥ ७९ ॥
आर्यम्लेच्छमनुष्ययोस्त्रयो द्वौ भोगकुभोगभूमिजयोर्द्वौ द्वौ।
सुरनिरयोर्द्वौ द्वौ इति जीवसमासा हि अष्टानवतिः ॥ ८० ॥

जी० प्र०–एकेंद्रियसप्तयुगलद्वित्रिचतुरिंद्रियाः पर्याप्तनिर्वृत्यपर्याप्तलब्ध्यपर्याप्ता इत्येकेंद्रियविकलेंद्रियेषु एकपंचाशत्। तिर्यग्गतौ कर्मभूमि-जलस्थलखचरास्त्रयोऽपि प्रत्येकमसंज्ञिसंज्ञिनौ भूत्वा षट्, ते च गर्भजेषु पर्याप्तनिर्वृत्यपर्याप्तौ संमूर्छिमेषु च पर्याप्तनिर्वृत्यपर्याप्तलब्ध्यपर्याप्ता इति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्रिंशत् । भोगभूमिसंज्ञिगर्भजस्थलखचरौ पर्याप्तनिर्वृत्त्यपर्याप्तौ भूत्वा चत्वारः, एवं तिर्यक्पंचेंद्रियस्य चतुस्त्रिंशत् । कर्मभूमौ मनुष्याणां आर्यखंडे गर्भजेषु पर्याप्तनिर्वृत्त्यपर्याप्तौ संमूर्छिमे तु लब्ध्यपर्याप्त एवेति त्रयः, म्लेच्छखंडे गर्भजेषु पर्याप्तनिर्वृत्त्यपर्याप्तौ द्वौ, भोगकुभोगभूम्योर्गर्भजे पर्याप्तनिर्वृत्त्यपर्याप्ताविति चत्वारः, मिलित्वा मनुष्यगतौ नव । देवनारकौपपादिकयोः प्रत्येकं पर्याप्तनिर्वृत्त्यपर्याप्ताविति चत्वारः । एवं चतुर्गतिषु पंचेंद्रियजीवसमासस्थानानि सप्तचत्वारिंशत् । एतानि च एकविकलेंद्रियाणामेकपंचाशता मिलित्वा अष्टानवतिर्भवंतीति सूत्रतात्पर्यं । अत्र विवक्षया स्थावराणां द्वाचत्वारिंशत् ४२, विकलेंद्रियाणां नव ९, तिर्यक्पंचेंद्रियाणां चतुस्त्रिंशत् ३४, देवानां द्वौ २, नारकाणां द्वौ २, मनुष्याणां नव ९ । सर्वाणि मिलित्वा अष्टानवतिः ९८। अमूनि संसारिणामेव न मुक्तानां विशुद्धचैतन्यनिष्ठज्ञानदर्शनोपयोगयुक्तत्वेन तेषां त्रसस्थावरभेदाभावात् संसारिणस्त्रसस्थावरा इति सूत्रसद्भावात् ॥ ७९ । ८० ॥ अथोक्तेभ्यो विशेषजीवसमासकथकमपराचार्योक्तं गाथासूत्रत्रयमाह—

मं० प्र०——एकद्वित्रिचतुरिंद्रियसंबंधिषु सप्तदशसु जीवसमासेषु पर्याप्तनिवृत्त्यपर्याप्तलब्ध्यपर्याप्तैस्त्रिभिर्गुणितेषु एकपंचाशदुत्तरा विशेषजीवसमासा भवंति तत्र सर्वत्र अप्रतिहतवृत्त्या पर्याप्तादित्रयस्य संभवात् । तज्जीवानां सर्वेषां संमूर्छनजन्मत्वात् । तिर्यग्गतौ, कर्मभूमौ जलचरस्थलचरखचराणां, असंज्ञिपंचेंद्रियाणां संज्ञिपंचेंद्रियाणां च गर्भभवेषु पर्याप्तानिवृत्यपर्याप्तौ द्वौ द्वौ जीवसमासौ तत्र लब्ध्यपर्याप्तकासंभवात् इति द्वादशजीवसमासाः । तत्रैव समूर्छिमेषु पर्याप्तादित्रयसद्भावात् त्रयस्त्रयो जीवसमासाः इत्यष्टादश मिलित्वा कर्मभूमौ त्रिंशत् । भोगभूमौ स्थलचरखचराणां संज्ञिपंचेंद्रियाणां गर्भभवेषु द्वौ द्वौ पर्याप्तनिवृत्यपर्याप्तकौ इति चत्वारः, तत्र जलचराणां विकलेंद्रियाणां असंज्ञिनां सम्मूर्छिमानां चाभावात्, इति तिर्यग्गतौ पंचेंद्रियजीवसमासाः चतुस्त्रिंशत् ॥७९॥

मं० प्र०——मनुष्यगतौ कर्मभूमौ आर्यखंडे पर्याप्तनिवृत्त्यपर्याप्तलब्ध्यपर्याप्तास्त्रयो जीवसमासाः । म्लेच्छखंडे लब्ध्यपर्याप्तकाभावात् द्वौ जीवसमासौ । भोगभूमौ कुभोगभूमौ च द्वौ द्वौ जीवसमासौ तत्रापि लब्ध्यपर्याप्तकाभावात् । एवं मनुष्यगतौ मिलित्वा नव । देवगतौ द्वौ । नरकगतौ द्वौ । उभयत्रापि लब्ध्यपर्याप्तकाभावात् । एवं चतुर्गतिषु पंचेंद्रियजीवसमासाः सप्तचत्वारिंशत् प्राक्तनैकविकलेंद्रियजीवसमासैरेकंपचाशता सह एतेषु मिलितेषु सर्वजीवसमासाः अष्टानवतिः खलु-स्फुटं परमागमकोविदैर्ज्ञातव्याः ॥ ८० ॥ अथ श्रीमाधवचंद्रत्रैविद्यदेवा योनिप्ररूपणायां आकारयोनिप्ररूपणार्थं गाथाद्वयमाह--

स. चं. पृथ्वी अप् तेज वायु नित्यनिगोद इतरनिगोदके सूक्ष्म वादर भेदकरि छह युगल अर प्रत्येकवनस्पतीका सप्रतिष्ठित अप्रतिष्ठित भेदकरि एक युगल ऐसैं एकेंद्रियके सात युगल बहुरि वेंद्री तेंद्री चौंद्री ए तीन ऐसैं ए सतरह भेद पर्याप्त निवृत्ति अपर्याप्त लब्धि अपर्याप्त भेदकरि तीन तीन प्रकार है ऐसैं एकेंद्रिय विकलेंद्रियनिविषैं इक्यावन भेद भये। बहुरि पंचेंद्रियरूप तिर्यंच गतिविषैं कर्मभूमिके तिर्यंच तीनप्रकार हैं। तहां जे जलविषैं गमनादिकरैं ते जलचर अर जे भूमिविषैं गमनादि करैं ते स्थलचर अर जे आकाशविषै उडना आदि गमनादि करैं ते नभचर तीनों प्रत्येक संज्ञी असंज्ञी भेदरूप हैं तिनिके छह भए। बहुरि ते छहौं गर्भज अर सन्मूर्छन ही हैं। तहां गर्भज-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषैं पर्याप्त अर निवृत्ति अपर्याप्त ए दोय भेद संभवै हैं तिनिके बारह भए। बहुरि सन्मूर्छनविषैं पर्याप्त निवृत्ति अपर्याप्त लब्धि अपर्याप्त ऐ तीन भेद संभवै हैं तिनिके अठारह भए ऐसैं कर्मभूमियां पंचेंद्रियतिर्यंचके तीस भेद भये। बहुरि भोग भूमिविषैं संज्ञी ही हैं असंज्ञी नाहीं। बहुरि स्थलचर अर नभचर ही हैं जलचर नाहीं। बहुरि पर्याप्त निवृति अपर्याप्त ही हैं लब्धि अपर्याप्त नाहीं। तातैं संज्ञी स्थलचर नभचरके पर्याप्त निवृत्यपर्याप्तभेदकरि च्यारि भए ऐसैं तिर्यंच पंचेंद्रियके चौतीस भेद भये। बहुरि मनुष्यनिके कर्मभूमिविषैं आर्यखंडविषैं तौ गर्भजके पर्याप्त निवृत्ति अपर्याप्तकरि दोय भेद अर सन्मूर्छनका लब्धि अपर्याप्तरूप एक भेद ऐसैं तीन भए। बहुरि म्लेच्छखंडविषैं गर्भजही हैं ताके पर्याप्त निर्वृत्ति अपर्याप्तकरि दोय भेद बहुरि भोगभूमि अर कुभोगभूमि इन दोऊनिविषैं गर्भज ही हैं तिनके पर्याप्त निवृत्ति अपर्याप्तकरि दोय दोय भेद भए च्यारि भेद मिलिकरि मनुष्यगतिविषैं नव भेद भए। बहुरि देवनारकी औपपादिक हैं तिनिके पर्याप्त निवृत्ति अपर्याप्त भेदकरि दोय दोय भेद होई च्यारि भेद ऐसैं च्यारि गतिनिविषैं पंचेंद्रियके जीवसमासके स्थान सैंतालीस हैं। बहुरि ए सैतालीस अर एकेंद्री विकलेंद्रियके इक्यावन मिलिकरि अठ्याणवै जीवसमास स्थान हो हैं ऐसा सूत्रनिका तात्पर्य जानना। इहां विवक्षाकरि स्थावरनिके बियालीस विकलेंद्रियनिके नव तिर्यंच पंचेंद्रियनिके चौंतीस देवनिके दोय नारकीनिके दोय मनुष्यनिके नव सर्वमिलि अठ्याणवे भए। ऐसैं ए कहे जीवसमासके स्थान ते संसारी जीवनिके जानने मुक्तजीवनिके नाहीं हैं। जातैं विशुद्ध चैतन्यस्वरूप ज्ञान दर्शन उपयोगका संयुक्तपनां करि तिन मुक्तजीवनिके त्रस स्थावर भेदनिका अभाव है। अथवा 'संसारिणस्त्रसस्थावराः' ऐसा तत्त्वार्थ सूत्रविषैं वचन है तातैं ए भेद संसारी जीवनिके ही जानने॥ ७९, ८०॥ अब कहे जे जीवसमास तिनितैं विशेष जीवसमासका कहनहारा अन्य आचार्यकरि कह्या हूवा गाथा सूत्र कहैं हैं—

सुद्धखरकुजलतेवा णिच्चचदुग्गदिणिगोदथूलिदरा।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पदिठिदरपंचपत्तियवियलतिपुण्णा अपुण्णदुगा ॥ १ ॥
इगिविगले इगिसीदी असण्णिसण्णिगयजलथलखगाणं ।
गब्भभवे सम्मुच्छे दुतिगतिभोगथलखेचरे दो दो ॥२॥
अज्जसमुच्छिगिगब्भे मलेच्छभोगतियकुणरछपणत्तीससये ।
सुरणिरये दो दो इदि जीवसमासा हु छहियचारिसयं॥ ३ ॥

शुद्धखरकुजलतेजोनित्यचतुर्गतिनिगोदस्थूलेतराः ।
प्रतिष्ठितेतरपंचप्रत्येकविकलत्रयः पूर्णाः अपूर्णद्विकाः ॥
एकविकले एकाशीतिः असंज्ञिसंज्ञिगतजलथलखगानां ।
गर्भभवे सम्मूर्च्छे द्वित्रिगा त्रिभोगथलखेचरे द्वौ द्वौ ॥
आर्यसंमूर्छिगर्भे म्लेच्छभोगत्रयकुनरषट्पंचत्रिंशत्शतं ।
सुरनिरये द्वौ द्वौ इति जीवसमासाः खलु षडाधिकचतुःशती ॥

जी॰ प्र–मृदादिरूपपृथ्वीकायिकः पाषाणादिरूपखरपृथ्वीकायिकः अप्कायिकः तेजस्कायिकः वायुकायिकः नित्यनिगोदः इतरनिगोदः परनामचतुर्गतिनिगोदश्चेति सप्तापि स्थूलसूक्ष्मभेदाच्चतुर्दश । तृणं वल्ली गुल्मः वृक्षः मूलं चेति पंचापि प्रत्येकवनस्पतयो निगोदशरीरैः प्रतिष्ठिताप्रतिष्ठितभेदाद्दश । द्वींद्रियत्रींद्रियचतुरिंद्रियश्चेति विकलेंद्रियास्त्रयः । एतेषु सप्तविंशत्येकेंद्रियविकलेंद्रियभेदेषु पर्याप्तनिर्वृत्त्यपर्याप्तलब्ध्यपर्याप्तभेदादेकाशीतिः । पंचेंद्रियेषु कर्मभूम्यसंज्ञिसंज्ञिभेदजलचरस्थलचरखचरेषु षट्स्वपि गर्भजेषु पर्याप्तनिर्वृत्त्यपर्याप्तभेदाद् द्वादश । तत्सम्मूर्छिमेषु पर्याप्तनिर्वृत्त्यपर्याप्तलब्ध्यपर्याप्तभेदादष्टादश । उत्कृष्टमध्यमजघन्यभोगभूमीनां संज्ञिस्थलचरखचराविति षट्सु पर्याप्तनिर्वृत्त्यपर्याप्तभेदाद्द्वादश २०१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मनुष्येषु आर्यखंडजे संमूर्छिमे लब्ध्यपर्याप्त एकः। तद्गर्भजे म्लेच्छखंडजे उत्कृष्टमध्यमजघन्यभोगभूमिजेषु कुभोगभूमिजे एवं षट्सु, तथा दशविधभावनाष्टविधव्यंतरपंचविधज्योतिष्कपटलापेक्षत्रिषष्टिविधवैमानिकभेदात् षडशीतिसुरेषु प्रस्तारापेक्षयैकान्नपंचाशद्विधनारकेषु च पर्याप्तनिर्वृत्यपर्याप्तभेदात् द्व्यशीत्यग्रद्विशतं मिलित्वा सर्वे षडधिकचतुःशती जीवसमासा भवंति ॥ १ ॥ २ ॥ ३ ॥ इति जीवसमासानां स्थानाधिकारः समाप्तः। अथ योनिप्ररूपणायाः प्रथममाकारयोनिभेदानाह–

स० चं०—माटी आदिरूप शुद्ध पृथ्वीकायिक, पाषाणादिरूप खरपृथ्वीकायिक, अप्कायिक, तेजःकायिक, वायुकायिक, नित्यनिगोद, इतरनिगोदका दूसरा नाम चतुर्गतिनिगोद ऐसैं इनि सातनिके वादर सूक्ष्म भेदतैं चौदह भए बहुरि तृण, वेलि, छोटे वृक्ष, बडे वृक्ष कंदमूल ऐसैं ए पांच प्रत्येक वनस्पतिके भेद हैं। ए जब निगोद शरीरकरि आश्रित होंइ तब प्रतिष्ठित कहिए। निगोदरहित होंइ तब अप्रतिष्ठित कहिए। ऐसैं इनिके दश भेद भए। बहुरि वे इंद्री त्रींद्रिय चतुरिंद्रिय ऐसैं विकलेंद्रियके तीन ए सर्वमिलि सत्ताइस भेद एकेंद्रिय विकलेंद्रियनिके भए। इनि एक येकके पर्याप्त निर्वृत्ति अपर्याप्त लब्धि अपर्याप्त भेद करि इक्यासी भए। बहुरि पंचेंद्रियनिविषैं तिर्यंच कर्मभूमिविषैं तौ संज्ञी असंज्ञी भेदलीयें जलचर स्थलचर नभचर भेदकरि छह तिनि छहौ गर्भजनिविषैं तौ पर्याप्त निर्वृत्ति अपर्याप्त भेदकरि बारह, अर तिनि छहौ सम्मूर्छननिविषैं पर्याप्त निर्वृत्ति अपर्याप्त लब्धि अपर्याप्त भेदनिकरि अठारह। बहुरि उत्कृष्ट मध्यम जघन्य भोगभूमिविषैं संज्ञी थलचर नभचर इनि छहौविषैं पर्याप्त निर्वृत्ति अपर्याप्त भेदकरि वारह सर्वमिलि पंचेंद्री तिर्यंचके बियालीस भेद भए। बहुरि मनुष्यनिविषैं आर्यखंडविषैं उपज्या सम्मूर्छनविषैं लब्धि अपर्याप्तक रूप एक स्थान है। बहुरि आर्यखंडविषैं उपजे गर्भज अर म्लेच्छखंडविषैं उपजे गर्भज ही हैं। अर उत्कृष्ट मध्यम जघन्य भोगभूमिविषैं उपजे गर्भज ही हैं। अर कुभोगभूमिविषैं उपजे गर्भज ही हैं। ऐसैं छह प्रकार तौ मनुष्य बहुरि तैसैं ही दश प्रकार भवनवासी आठ प्रकार व्यंतर पांच प्रकार ज्योतिषी पटलनिकी अपेक्षाकरि तरेसठि प्रकार वैमानिक सर्वमिलि छियासी प्रकार देव बहुरि प्रस्तारनिकी अपेक्षाकरि गुणचास प्रकार नारकी ए सर्वमिलि सर्व एकसौ इकतालीस भए।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिन एक एकके पर्याप्त निर्वृत्ति अपर्याप्त भेद कीए दोयसै वियासी होंइ ऐसैं एकेंद्री विकलेंद्रियके इक्यासी पंचेंद्रिय तिर्यंचके वियालीस सम्मूर्छन मनुष्यका एक गर्भज मनुष्य देवनारकिनिके दोयसै बियासी मिलिकरि छह अधिक च्यारिसै जीवसमास प्रकट रूप हो हैं। १। २। ३। इति जीवसमासनिका स्थान अधिकार समाप्त भया आगैं योनिप्ररूपणाविषैं प्रथम आकारयोनिके भेदनिकौं कहै हैं—

संखावत्तयजोणी कुम्मुण्णयवंसपत्तजोणी य।
तत्थ य संखावत्ते णियमादु विवज्जदे गब्भो ॥ ८१ ॥

शंखावर्तकयोनिः कूर्मोन्नतवंशपत्रयोनी च।
तत्र तु शंखावर्ते नियमात्तु विवर्ज्यते गर्भः ॥ ८१ ॥

जी० प्र०—शंखावर्तयोनिः कूर्मोन्नतयोनिः वंशपत्रयोनिश्चेति आकारयोनिस्त्रिविधा भवति। यौति-मिश्रीभवति औदारिकादिनोकर्मवर्गणा पुद्गलैः सह संबद्ध्यते जीवो यस्यां सा योनिः-जीवोत्पत्तिस्थानं। तत्त्रिविधयोनिषु शंखावर्तयोनौ गर्भो नियमेन विवर्ज्यते विपद्यते विनश्यति वा। देवीनां चक्रवर्तिस्त्रीरत्नादीनां कासांचित्तथाविधयोनिसंभवात्। ८१ ॥

मं० प्र०—शंखावर्तयोनिः, कूर्मोन्नतयोनिः, वंशपत्रयोनिश्चेति तिस्र आकारयोनयः। तत्र तासु शंखावर्ते शंखस्य आवर्त इव आवर्तो यस्यासौ शंखावर्तः तस्मिन् योनौ नियमात्-अवश्यंभावात् गर्भो विवर्ज्यते-निषिध्यते। देवीनां चक्रवर्तिस्त्रीरत्नादीनां च कासांचित् तथाविधयोनिसंभवात् ॥ ८१ ॥

सं० च०—शंखावर्तयोनि, कूर्मोन्नतयोनि, वंशपत्र योनि ऐसैं स्त्री शरीरविषैं संभवती आकाररूप योनि तीन प्रकार हैं। योनि कहिए मिश्ररूप होइ औदारिकादिक नोकर्मवर्गणारूप पुद्गलनिकरि सहित बंधै जीव जाविषैं सो योनि कहिए जीवका उपजनेका स्थान सो योनि है। तहां तीनि प्रकार योनिनिविषैं शंखावर्त योनि विषैं तो गर्भ नियमकरि विवर्जित है गर्भ रहै ही नाहीं अथवा कदाचित रहै तौ नष्ट होइ है ॥ ८१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुम्मुण्णयजोणीए तित्थयरा दुविहचक्कवट्टी य ।
रामा वि य जायंते सेसाये सेसगजणो दु ॥ ८२ ॥

कूर्मोन्नतयोनौ तीर्थंकराः द्विविधचक्रवर्तिनश्च ।
रामा अपि च जायंते शेषायां शेषकजनस्तु ॥ ८२ ॥

जी० प्र—कूर्मोन्नतयोनौ तीर्थंकराः सकलचक्रवर्तिनः अर्धचक्रवर्तिनः प्रतिवासुदेवा बलदेवाश्चोत्पद्यंते अपिशब्दान्नेतरजनाः । शेषवंशपत्रयोनौ शेषजना एवोत्पद्यंते न तीर्थंकरादयः ॥ ८२ ॥ अथ जन्मभेदनिर्देशपूर्वकं गुणयोनीर्निर्दिशति—

मं० प्र०—कूर्मपृष्ठवदुन्नता योनिः कूर्मोन्नतयोनिः, तस्यां तीर्थंकराः, द्विविधचक्रवर्तिनश्च-सकलचक्रवर्तिनः अर्धचक्रवर्तिनश्च वासुदेवप्रतिवासुदेवाः, रामा अपि च बलदेवा अपि च जायंते उत्पद्यंते । शेषायां वंशपत्रयोनौ-वंशपत्रसदृशयोनौ तु पुनः शेषा जना जायंते ॥ ८२ ॥ अथ गुणयोनिप्ररूपणार्थं ग्रंथकारा गाथाषट्कमाहुः—

सं० च०—कूर्मोन्नतयोनिविषैं तीर्थंकर वा सकलचक्रवर्ती वा अर्धचक्रवर्ती नारायण प्रतिनारायण वा बलभद्र उपजैं हैं। अपि शब्दकरि अन्य कोई नाहीं उपजै है बहुरि अवशेष वंशपत्र योनिविषैं अवशेष जन उपजैं हैं तीर्थंकरादि नाहीं उपजै हैं ॥ ८२ ॥ आगैं जन्म भेदनिका निर्देशपूर्वक गुणयोनिकौं निर्देश करैं हैं—

जम्मं खलु संमुच्छणगब्भुववादा दु होदि तज्जोणी ।
सच्चित्तसीदसंउडसेदरमिस्सा य पत्तेयं ॥ ८३ ॥

जन्म खलु संमूर्छनगर्भोपपादास्तु भवति तद्योनयः ।
सचित्तशीतसंवृतसेतरमिश्राश्च प्रत्येकं ॥ ८३ ॥

जी० प्र०—सम्मूर्छनगर्भोपपादाः संसारिजीवानां जन्मभेदा भवंति । सं समंतात्, मूर्छनं जायमानजीवानुग्राहकाणां शरीराकारपरिणम-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नयोग्यपुद्गलस्कंधानां समुच्छ्रयणं सम्मूर्छनं । जायमानजीवेन शुक्रशोणितरूपपिंडस्य गरणं-शरीरतया उपादानं गर्भः । उपपदनं संपुटशय्योष्ट्रमुखाकारादिषु लघुनांतर्मुहूर्तेनैव जीवस्य जननं उपपादः । इति संमूर्छिमादिभिर्निरुक्तिसिद्धास्तयोनयः जीवशरीरग्रहणाधाराः यथासंभवं सचित्तशीतसंवृत्ताः सेतरा मिश्राश्चेति नवविधा भवंति । तासु संमूर्छनादय एव प्रत्येकं यथासंभवं संभवंति । चित्तेन चेतनेन सह वर्तंते इति सचित्ताः प्राण्यंतःप्रदेशपरिगृहीतपुद्गलस्कंधाः इत्यर्थः । तद्विपरीता अचित्ताः । तदुभयात्मका मिश्राः । प्रादुर्भूतशीतस्पर्शाः पुद्गलाः शीताः । अभिव्यक्तोष्णस्पर्शाः पुद्गलाः उष्णाः । तदुभयात्मकाः पुद्गला मिश्राः । दुरुपलक्ष्यः गुप्ताकारः पुद्गलस्कंधः संवृतः । प्रकटाकार उपलक्षणीयः पुद्गलस्कंधो विवृतः । तदुभयात्मकः पुद्गलस्कंधो मिश्रः ॥ ८३ ॥ अथ संमूर्छनादीनां स्वामिनिर्देशं करोति—

मं० प्र०—संसारिजीवानां जन्म-उत्पत्तिः पूर्वभवशरीरं त्यक्त्वा पुनरुत्तरभवशरीरग्रहणं । यद्यपि परमार्थतः विग्रहगतौ प्रथमसमये उत्तरभवप्रथमपर्यायप्रादुर्भावो जन्म । पूर्वपर्यायविनाशोत्तरपर्यायप्रादुर्भावयोरंगुलिऋजुत्वविनाशवक्रत्वोत्पादवदेककालत्वात् तथापि सम्मूर्छनादिरूपेण पुद्गलपिंडादानस्य तत्प्रथमपर्याये अभावात् तत्समीपशरीरग्रहणप्रथमसमयपर्यायोत्पाद एव जन्मसमीपं जन्म इत्युपचारेणोच्यते । गंगातटं गंगेति यथा गंगायां घोष इत्युपचर्यते उपचारनिमित्तस्य सामीप्यस्य सद्भावात् अथवा ऋजुगत्यपेक्षया उत्तरभवप्रथमसमये एव सम्मूर्छनादिरूपशरीरग्रहणविशिष्टतत्प्रथमपर्यायोत्पादस्य पूर्वभवचरमपर्यायविनाशस्य च युगपत्संभवात् मुख्यमेव जन्मलक्षणं । तद्भेदास्तु पुनः सम्मूर्छनगर्भोपपादाः, खलु स्फुटं जन्म भवतीति संबंधः । 'सम्मूर्छनगर्भोपपादा जन्म' इति तत्त्वार्थशास्त्रेऽप्युक्तत्वात् । सं—समंतात् सर्वदिग्गतस्य शरीरयोग्यपुद्गलपिंडस्य मूर्छनं गर्भोपपादविलक्षणं शरीराकारेण परिणमनं संमूर्छनं । शरीरपरिणतिकारणशुक्रशोणितस्य गरणं स्वीकारो गर्भः । रूढिशब्दोयं पोतादिजन्मवाची । उपेत्य संपुटशय्यां, उष्ट्रकादिकं वा आश्रित्य पदनं—शरीरपरिणामयोग्यपुद्गलस्कंधस्य गमनं--प्राप्तिः, उपपादः, रूढिशब्दोयं देवनारकाणामेव जन्मवाची । अथवा सम्मूर्छनगर्भोपपादात्ता नाश्रित्य जन्म भवतीति गोम्मटपंचिकाकारादीनामभिप्रायः । तस्य जन्मनः योनयः उत्पत्तिस्थानानि प्रत्येकं सम्मूर्छनगर्भोपपादानां जन्मविशेषाणां यथासंभवं सचित्तादिगुणविशिष्टाः संभवंति । तद्यथा--चित्तेन--चेतनेन सह वर्तते यः पुद्गलपिंडः स सचित्तः । शीतः बहुलशीतस्पर्शः । संवृतः--अंतर्निगूढावयवः । एते त्रयोऽपि सेतराः-इतरैः--अचित्तोष्णविवृतैः सह वर्तमानाः । चेतनरहितः पुद्गलपिंडः अचित्तः । बहुलोष्णस्पर्शः--उष्णः । सुप्रकटावयवः--विवृतः । मिश्राश्च उभयगुणामिश्रिताः--सचित्ताचित्तमिश्रः । शीतोष्णमिश्रः । संवृतविवृतमिश्रश्चेति ॥ ८३ ॥

सं० च०—सम्मूर्छन १ गर्भज २ उपपाद ३ ए तीन संसारी जीवनिके जन्मके भेद हैं। सं कहिए समस्तपनैंकरि मूर्छनं कहिए जन्म धरता जो जीव ताकौं उपकारी ऐसे जे शरीरके आकार परिणमने योग्य पुद्गलस्कंध तिनिका स्वयमेव प्रकट होना सो सम्मूर्छन जन्म है। बहुरि जन्म धरता जीवकरि शुक्र शोणितरूप पिंडका गरणं कहिए अपना शरीररूप ग्रहण करना सो गर्भ है। बहुरि उपपादनं कहिए संपुट शय्या वा उष्ट्रादि मुखाकार

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योनिविषै लघु अंतर्मुहूर्त कालकरि ही जीवका उपजना सो उपपाद है। असे तीन प्रकार जन्म भेद हैं। भावार्थ-माता पितादिकका निमित्तविना स्वयमेव शरीराकार पुद्गलका प्रकट होनेकरि जीवका उपजना सो सम्मूर्छन जन्म है। बहुरि माताका रुधिर अर पिताका वीर्यरूप पुद्गलका शरीररूप ग्रहणकरि जीवका उपजना सो गर्भ जन्म है। बहुरि देवनिका संपुटशय्याविषै नारकीनिका उष्ट्रमुखादि आकाररूप योनि स्थानकनिविषै लघु अंतर्मुहूर्तकरि संपूर्ण शरीरकरि जीवका उपजना सो उपपाद जन्म है। अैसैं तीनप्रकार जन्म भेद जानने। बहुरि इनि सम्मूर्छनादिकरि तिनि जीवनिकी योनि कहिए। जीवके शरीर ग्रहणका आधारभूत स्थान ते यथासंभव नव प्रकार हैं-सचित्त १ शीत २ संवृत ३ इनिके प्रतिपक्षी इतर अचित्त ४ उष्ण ५ विवृत ६ बहुरि इनिके मिलनेसे मिश्र संचित्ताचित्त ७ शीतोष्ण ८ संवृतविवृत ९ अैसैं नव प्रकार हैं। बहुरि ते योनि सम्मूर्छनादिकनिविषैं प्रत्येक यथासंभव जानना। तहां चित्त कहिए अन्य चेतन तींहिकरि सहित वर्तै ते सचित्त हैं। अन्य प्राणीकरि पूर्वै ग्रहे हूवे पुद्गल स्कधं सचित्त कहिए। बहुरि तातैं विपरीत अन्य प्राणीनिकरि न ग्रहे जे पुद्गलस्कंध ते अचित्त हैं बहरि सचित्त आचित्त दोऊ रूप जे पुद्गलस्कंध ते मिश्र हैं। बहुरि प्रगट है शीत स्पर्श जिनके ऐसे पुद्ग ते शीत हैं। बहुरि प्रगट है उष्णस्पर्शन जिनिकैं अैसे पुद्गल ते उष्ण हैं। बहुरि शीत उष्ण दोऊरूप जे पुद्गल ते मिश्र हैं। बहुरि प्रगट जाकौं न अवलोकिए अैसा गुप्त आकार जाका सो पुद्गलस्कंध संवृत है। बहुरि प्रकट आकाररूप जाकौं अवलोकिए अैसा पुद्गल स्कंध सो विवृत है। बहुरि संवृत विवृत दोऊरूप पुद्गल स्कंध सो मिश्र है। अैसैं जीव उपजनेके आधाररूप पुद्गल स्कंध तिनिके नव प्रकार जानने। भावार्थ--गुणकौं धरैं त्रैलोक्यविषैं यथासंभव जीव जहां उपजैं अैसे योनिरूप पुद्गल स्कंध तिनिके भेद नव हैं ॥८३॥ आगै सम्मूर्छनादिक जन्म भेदके जे स्वामी हैं तिनिकौं निर्देश करै हैं–

पोतजरायुजअंडजजीवाणं गब्भ देवणिरयाणं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उबबादं सेसाणं सम्मुच्छणयं तु णिद्दिट्ठं ॥ ८४ ॥

पोतजरायुजांडजजीवानां गर्भः देवनारकाणां ।
उपपादः शेषाणां सम्मूर्छनकं तु निर्दिष्टं ॥ ८४ ॥

जी० प्र०—किंचित्परिवरणमंतरेण परिपूर्णावयवो योनिनिर्गममात्रेणैव परिस्पंदादिसामर्थ्योपेतः पोतः । जालवत्प्राणिपरिवरणं विततमांसशोणितं जरायुः, तस्मिन् जातो जरायुजः । शुक्रशोणितपरिवरणं उपात्तकाठिन्यं नखत्वक्सदृशं परिमंडलमंडं तस्मिन् जातोंडजः । एषां जीवानां गर्भ एव जन्म । चतुर्णिकायदेवानां नारकाणां च धर्मादिभवानामुपपाद एव जन्म । उक्तजीवेभ्यः शेषाणां एकद्वित्रिचतुरिंद्रियाणां केषांचित्पंचेंद्रियाणां लब्ध्यपर्याप्तमनुष्याणां च संमूर्च्छनमेव जन्मेति प्रवचने निर्दिष्टं--कथितं ॥ ८४ ॥ अथ सचित्तादियोनिभेदानां संमूर्छनादिजन्मभेदेषु संभवासंभवं गाथात्रयेण निर्दिशति—

मं० प्र०—अंडजजरायुजवर्जिताः संजातमात्रव्यक्तांगोपांगोपेताः पोताः । गर्भे शिशूनां मांसशोणितमेदोमयं कवचप्रायं परिवरणं जरायुः, तत्र जाता जरायुजाः । शुक्रशोणितयोः कठिनावयवं परिवरणं परिमंडलं अंडं, तत्र जाताः अंडजाः, तेषां पोतजरायुजांडजानां जीवानां गर्भो नाम जन्म भवति तेषामेव गर्भः, तेषां गर्भएवेति नियमद्वयं ज्ञातव्यं । देवनारकाणामेव उपपादः, उपपाद एव देवनारकाणामिति च नियमद्वयमत्रापि । शेषाणां पोतजरायुजांडजेभ्यः देवनारकेभ्यश्चान्येषां तिर्यग्मनुष्याणां सम्मूर्छनमेव शेषणामेव सम्मूर्छनमिति च नियमद्वयमत्रापि निर्दिष्टं--परमागमे प्रतिपादितं । तुशब्दः सर्वत्र नियमविशेषसूचनार्थं ॥ ८४ ॥

सं० च०—किछू भी शरीर ऊपरि आवरण विना संपूर्ण है अवयव जाका अर योनितैं निकसता ही चलना-
दिककी सामर्थ्य ताकरि संयुक्त ऐसा जो जीव सो पोत कहिए। बहुरि जालवत् प्राणीका शरीर ऊपरि आव-
रण मास लोही जामें विस्ताररूप पाइए ऐसा जो जरायु ताविषैं जो जीव उपज्या जो जरायुज कहिए। बहुरि
शुक्र लोही मय आवरण कठिनताकों लीएं नखकी चामडी समान गोल आकार धरै सो अंड तींहिविषै उपज्या
जो जीव सो अंडज कहिए। इनि पोत जरायुज अंडज जीवनिकै गर्भरूप ही जन्मका भेद जानना। बहुरि
च्यारि प्रकार देव अर धर्मादिविषै उपजे नारकी तिनिकैं उपपाद ही जन्मका भेद है। इनि कहे जीवनिविना अ-
न्य सर्व एकेंद्री बेंद्री तेंद्री चौंद्री अर केई पंचेंद्री तिर्यंच अर लब्धि अपर्याप्तक मनुष्य इनिकैं सम्मूर्छन ही जन्मका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भेद पाइए है ऐसा सिद्धांतविषै कह्या है ॥ ८४ ॥ आगै सचित्तादि योनिभेदनिका सम्मूर्छनादि जन्मभेदविषै संभवपना असंभवपना गाथा तीनिकरि दिखावै हैं–

उपवादे अच्चित्तं गब्भे मिस्सं तु होदि सम्मुच्छे ।
सच्चित्तं अच्चित्तं मिस्सं च य होदि जोणी हु ॥८५॥

उपपादे अचित्ता गर्भे मिश्रा तु भवति संमूर्छे ।
सचित्ता अचित्ता मिश्रा च च भवति योनिर्हि ॥ ८५ ॥

जी० प्र०––देवनारकसंबध्युपपादजन्मभेदे अचित्तैव योनिः स्यात् । गर्भजन्मनि सचित्ताचित्तमिश्र एव पुद्गलस्कंधो योनिः स्यात् । संमूर्छनजन्मनि तु पुनः सचित्ता अचित्ता उभया चेति त्रिविधा योनिर्भवति ॥ ८५ ॥

मं० प्र०––सम्मूर्छनगर्भोपपादेषु सचित्तादियोनयो विभज्यंते । तद्यथा––उपपादे अचित्त एव अन्यजीवानाश्रयैव योनिः संपुटशय्योष्ट्रकादिषु विवक्षितजीवोत्पत्तेः प्रागचेतनत्वादेव सचित्तमिश्रत्वासंभवात् । गर्भे तु पुनः मिश्र एव भवति पुरुषशरीराद्गलितेन अचितेन शुक्रेण मिश्रस्य स्त्रीशोणितस्य च सचित्तस्य मिश्रयोनित्वसंभवात् केवलाचित्तस्य शुक्रस्य केवलसचित्तस्य स्त्रीशोणितस्य च योनित्वासंभवात् । संमूर्छे सचित्तः, अचित्तः मिश्रश्च योनिर्भवति गर्भोपपादरहितप्रदेशेषु क्वचित् सचित्ते एव क्वचिदचित्ते एव क्वचिन्मिश्रे एव पुद्गलस्कंधे जीवानामुत्पत्तिसंभवात् । 'मिस्सं च य' इत्यत्र द्वितीयश्चशब्दः सर्वत्र नियमार्थः ॥८५॥

सं० च०––देव नारकी संबंधी जो उपपाद जन्मका भेद तींहिविषै अचित्त ही योनि है तहां योनिरूप पुद्गलस्कंध सर्व अचित्त ही हैं । गर्भजन्मका भेदविषै सचित्त अचित्त दोऊरूप मिश्र ही पुद्गल स्कंधरूप योनि है तहां योनिरूप पुद्गल स्कंधविषै कोई पुद्गल सचित्त हैं कोई अचित्त हैं । बहुरि सम्मूर्छन जन्मविषै सचित्त अचत्त मिश्र ए तीन प्रकार योनि पाइए है । कहीं योनिरूप पुद्गल स्कंध सचित्त ही हैं कहीं अचित्त ही हैं कहीं मिश्र हैं ॥ ८५ ॥

उपपादे सीदुसणं सेसे सीदुसणमिस्सयं होदि ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उबबादेयक्खेसु य संउड वियलेसु विउलं तु ॥८६॥

उपपादे शीतोष्णे शेषे शीतोष्णमिश्रका भवंति ।
उपपादैकाक्षेषु च संवृता विकलेषु त्रिवृता तु ॥ ८६ ॥

जी० प्र०—–उपपादजन्मनि शीतोष्णे द्वे योनी स्यातां । शेषे गर्भजन्मनि संमूर्छनजन्मनि च प्रत्येकं शीता उष्णा मिश्रा चेति तिस्रो योनयः स्युः। (तेजस्कायि॰षु उष्णैव योनिः स्यात्) उपपादजेषु एकेंद्रियेषु च संवृतैव योनिः स्यात्। विकलेंद्रियेषु विवृतैव योनिः स्यात्॥८६॥

मं० प्र०—–उपपादे क्वचित् शी॰ः क्वचिदुष्णः इति द्वावेव योनी भवतः। रत्नप्रभायाः प्रभृति धूमप्रभाविलानां त्रिचतुर्भागपर्यंतेषु विलेषु उष्णस्पर्शस्यैव, धूमप्रभायाश्चतुर्भागादारभ्य महातमःप्रभापर्यंतेषु विलेषु शीतस्पर्शस्यैव भावात्। शेषे गर्भे सम्मूर्छने च शीतः, उष्णः, मिश्रश्चेति त्रयोऽपि योनयो भवंति। उपपादे एकेंद्रियसंमूर्छने च संवृत एव योनिः संपुटशय्योष्ट्रकाद्युपपादस्थानानां विवक्षितजीवोत्पत्त्यनंतरं पुनरपरजीवोत्पत्तेः प्राक् नियमेन संवृतत्वात्। तु—पुनः, बिकलेषु- बिकलेंद्रियसम्मूर्छने विवृत एव योनिर्भवति ॥ ८६ ॥

सं० च०—उपपाद जन्मभेदविषै शीत अर उष्ण ए दोय योनि हैं--योनिरूप पुद्गल स्कंध शीत हैं वा उष्ण हैं। तहां नारकीनिके रत्नप्रभाका विलनितै लगाइ धूमप्रभा विलनिका तीन चौथा भाग पर्यंत विलनिविषै उष्ण योनि ही है। बहुरि धूमप्रभा विलनिका चौथा भागतैं लगाइ महातम प्रभाका विलनिपर्यंत विलनिविषै शीत योनि ही है। ऐसा विशेष जानना। बहुरि अवशेष गर्भ जन्म भेदविषै अर सम्मूर्छन जन्मके भेदविषै शीत उष्ण मिश्र तीनों योनि हैं। कोई योनिरूप पुद्गलस्कंध शीत ही हैं, कोऊ उष्ण ही हैं, कोऊ योनिरूप पुद्गल स्कंधविषैं कोई पुद्गल शीत है कोई उष्ण है तातैं मिश्र हैं। तहां तेजस्कायिक जीवनिविषै उष्ण ही योनि है। तहां योनिरूप पुद्गल स्कंध उष्ण ही है। बहुरि जलकायिक जीवनिविषै शीत ही योनि है तहां योनिरूप पुद्गल स्कंध शीत ही हैं। बहुरि उपपादज देव नारकी अर एकेंद्रिय इनविषै संवृत ही योनि है जहां उपजैं ऐसा योनिरूप पुद्गल स्कंध सो अप्रकट आकाररूप ही है। बहुरि विकलेंद्रियविषै विवृत योनि ही है जहां उपजैं ऐसा योनिरूप पुद्गल स्कंध सो प्रकट ही है ॥ ८६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गब्भजजीवाणं पुण मिस्सं णियमेण होदि जोणी हु ।
सम्मुच्छणपंचक्खे वियलं वा विउलजोणी हु ॥ ८७॥

गर्भजजीवानां पुनः मिश्रा नियमेन भवति योनिर्हि ।
संमूर्छनपंचाक्षयोः विकलं वा विवृतयोनिर्हि ॥ ८७ ॥

जी० प्र०—गर्भजजीवानां पुनः संवृतविवृताभ्यां मिश्रा एव योनिः स्यात् । संमूर्छनजपंचेंद्रियेषु विकलेंद्रियवद्विवृतैव योनिः स्यात्॥८७॥ अथ योनिप्रभेदसंख्योद्देशपुरस्सरमुपसंहारमाह—

मं० प्र०----गर्भजजीवानां गर्भे पुनर्विशेषेण संवृतविवृतयोः मिश्र एव योनिर्नियमेन भवति पुरुषशरीराद्गलितस्य शुक्रस्य विवृतरूपस्य स्त्रीशोणितस्य च संवृतरूपस्य मिश्रणात् मिश्रः । अयं गर्भे एव नान्यत्रेति नियमशब्दार्थः । पंचाक्षाणां--पंचेंद्रियाणां, सम्मूर्छने विकलानामिव विवृतयोनिरेव खलु--स्फुटं भवति । वियलंवेति छंदःपूरणार्थं विकलेंद्रियसादृश्यार्थं वा ॥ ८७ ॥ अथ पूर्वोक्तगुणयोन्युपसंहारपूर्वकं योनिविशेषसंख्यां प्ररूपयति--

सं० च०---बहुरि गर्भज जीवनिकै संवृत विवृत दोऊ मिश्ररूप योनि हैं जहां उपजैं ऐसा योनिरूप पुद्गल स्कंधविषै किछू प्रकट किछू अप्रकट हैं । बहुरि सम्मूर्छन पंचेंद्रियनिविषै विकलेंद्रियवत् विवृत योनि ही है ॥ ८७ ॥ आगैं योनिभेदनिकी संख्याका उद्देशके आगै कथनका संकोचनिकौं कहै हैं—

सामण्णेण य एवं णव जोणीओ हवंति वित्थारे ।
लक्खाण चदुरसीदी जोणीओ होंति णियमेण ॥ ८८ ॥

सामान्येन च एवं नव योनयो भवंति विस्तारे ।
लक्षाणां चतुरशीतिः योनयो भवंति नियमेन ॥ ८८ ॥

जी० प्र०—एवं--उक्तप्रकारेण, सामान्येन--संक्षेपेण, नव योनयो भवंति । विस्तरेण तु चतुरशीतिलक्षयोनयो भवंति नियमेन ॥ ८८ ॥ अथ तासां योनीनां विस्तरसंख्यां दर्शयति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं० प्र०---एवं-उक्तप्रकारेण, सामान्येन-संक्षेपेण नव योनयो भवंति, विस्तार--योनिविशेषे विवक्षिते सति लक्षाणां चतुरशीतिर्योनयो नियमेन अवश्यंभावेन भवंति। चशब्दः संक्षेपेण नवैवेति नियमार्थः ॥ ८८ ॥ अथ योनिविशेषसंख्यासंभवस्थाननिर्देशार्थमाह--

सं० च०---ऐसैं पूर्वोक्त प्रकारकरि सामान्येन कहिए संक्षेपकरि नव योनि हैं। बहुरि विस्तारकरि चौरासी लाख योनि हैं नियमकरि। भावार्थ-जीव उपजनेका आधारभूत पुद्गल स्कंधका नाम योनि है। ताके सामान्यपनै नव भेद हैं विस्तारकरि तिसहीके चौरासी लाख भेद हैं ॥ ८८ ॥ आगैं तिनि योनिनिकी विस्तारकरि संख्या दिखावै हैं-

णिच्चिदरधादुसत्त य तरुदस वियलंदियेसु छच्चेव।
सुरणिरयतिरियचउरो चोद्दस मणुए सदसहस्सा ॥ ८९ ॥

नित्येतरधातुसप्त च तरुदश विकलेंद्रियेषु षट् चेव।
सुरनिरयतिर्यक्चतस्रः चतुर्दश मनुष्ये शतसहस्राः ॥ ८९ ॥

जी० प्र०--नित्यनिगोदेतरनिगोदपृथिवीकायिकाप्कायादिकतेजस्कायिकवायुकायिकेषु एतेषु षट्सु अपि स्थानेषु प्रत्येकं सप्त सप्त लक्षयोनयो भवंति। मिलित्वा द्वाचत्वारिंशल्लक्षाणि भवंति। तरुषु प्रत्येकवनस्पतिकायिकेषु दशलक्षयोनयो भवंति। विकलेंद्रियरूपद्वित्रिचतुरिंद्रियेषु प्रत्येकं द्वे द्वे लक्षयोनयौ भवंति, मिलित्वा षट्। सुरेषु नारकेषु तिर्यग्पंचेंद्रियेषु च प्रत्येकं चतुश्चतुर्लक्षयोनयो भवंति। मिलित्वा द्वादशलक्षाणि। मनुष्येषु चतुर्दशलक्षयोनयो भवंति। एवं समस्तसंसारिजीवानां योनयः सर्वा मिलित्वा चतुरशीतिलक्षसंख्या प्रतिपत्तव्या ॥ ८९ ॥ अथ गत्याश्रयेण जन्म गाथाद्वयेनाह-

मं० प्र०---नित्यनिगोदेषु, इतरेषु -चतुर्गतिनिगोदेषु, धातुषु पृथिव्यप्तेजोवायुकायिकेषु एवं षट्सु स्थानेषु प्रत्येकं सप्त सप्त शतसहस्राणि लक्षाणि योनिविशेषा भवंति, मिलित्वा द्वाचत्वारिंशल्लक्षाणि तरुषु--वनस्पतिकायिकेषु दशशतसहस्राणि भवंति। विकलेंद्रियेषु द्वित्रिचतुरिंद्रियेषु प्रत्येकं द्वे द्वे लक्षे, मिलित्वा षडेव। देवनारकतिर्यक्षु प्रत्येकं चत्वारि लक्षाणि मिलित्वा द्वादशलक्षाणि। मनुजेषु चतुर्दशलक्षाणि सर्वाणि संपिंडितानि चतुरशीतिर्लक्षाणि संसारिजीवानां चतुर्गतिषु योनिविशेषा भवंति ॥ ८९ ॥ अथ संमूर्छनादित्रयस्य गतींद्रियवेदमार्गणासु यथासंभवं प्रवृत्तिस्थानं प्ररूपयितुं गाथाचतुष्टयमाह-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० च०—नित्यनिगोद १ इतरनिगोद २ अर धातु कहिए पृथ्वी कायिक ३ जलकायिक ४ तेजस्कायिक ५ वातकायिक ६ इनि छहौ स्थाननिविषैं प्रत्येक सात सात लाख योनि हैं। बहुरि तरु जो प्रत्येक वनस्पती तिनिविषैं दशलाख योनि हैं बहुरि विकलेंद्रीरूप बेंद्री तेंद्री चौंद्री इनिविषैं प्रत्येक दोय दोय लाख योनि हैं। बहुरि देव नारकी पंचेंद्री तिर्यंच इनिविषैं प्रत्येक च्यारि च्यारि लाख योनि हैं। बहुरि मनुष्यनिविषैं चौदह लाख योनि हैं। ऐसैं समस्त संसारी जीवनिके योनि सर्व मिलि चौरासी लाख संख्यारूप प्रतीति करनी ॥८९॥

आगैं गतिनिका आश्रयकरि जन्म भेदकौं गाथा दोय करि कहै हैं—

उववादा सुरणिरया गब्भजसमुच्छिमा हु णरतिरिया।
सम्मुच्छिमा मणुस्साऽपज्जता एयविलक्खा ॥ ९० ॥

उपपादाः सुरनिरयाः गर्भजसंमूर्छिमा हि नरतिर्यंचः।
सम्मूर्छिमा मनुष्या अपर्याप्ता एकविकलाक्षाः ॥ ९० ॥

जी० प्र०—उपपादजाः सुरा नारकाश्च भवंति। गर्भजाः संमूर्छिमाश्च खलु-स्फुटं यथासंभवं मनुष्याः तिर्यंच एव भवंति। केवलसंमूर्छिमा एव लब्ध्यपर्याप्तकमनुष्या एकेंद्रिया विकलेंद्रियाश्च भवंति ॥ ९० ॥

मं० प्र०—सुराः निरयाश्च—नारकाश्च उपपादाः—औपपादिका एव। निरयाः—नारकविलानि तत्रस्था जीवा निरया इत्युपचारतः। उपपादः—जन्मविशेषः तत्र भवा अपि उपपादा इत्युपचारशब्दोयं। एवमुत्तरोत्तरमुपचारशब्दा ज्ञातव्याः। नराः तिर्यंचश्च गर्भजाश्च सम्मूर्छिमाश्च खलु नियमेन भवंति। अपर्याप्ताः—लब्ध्यपर्याप्तमनुष्या सम्मूर्छिन एव। एकविकलाख्याश्च एकेंद्रियाः, विकलेंद्रियाश्च सम्मूर्छिमा एवेति नियमो ज्ञातव्यः ॥ ९० ॥

सं० च०—देव अर नारकी उपपाद जन्मसंयुक्त हैं। बहुरि मनुष्य अर तिर्यंच ए गर्भज अर सम्मूर्छन यथासंभव होहैं। तहां लब्धि अपर्याप्तक मनुष्य अर एकेंद्रिय विकलेंद्रिय केवल सम्मूर्छन ही हैं ॥ ९० ॥

पंचक्खतिरिक्खाओ गब्भसम्मुच्छिमा तिरिक्खाणं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भोगभुमा गब्भभवा नरपुण्णा गब्भजा चेव ॥ ९१ ॥

पंचाक्षतिर्यंचः गर्भजसम्मूर्छिमा तिरश्चां ।
भोगभूमा गर्भभवा नरपूर्णा गर्भजाश्चैव ॥ ९१ ॥

जी० प्र०-पचेंद्रियतिर्यंचो गर्भजाः संमूर्छिमाश्च भवंति । तिर्यक्षु भोगभूमिजा गर्भभवा एव । नरपर्याप्तका गर्भजा एव भवंति ॥ ९१ ॥ अथौपपादिकादिषु लब्ध्यपर्याप्तकत्वस्य संभवासंभवं कथयति–

मं० प्र०--पंचेंद्रियतिर्यंचः गर्भजाश्च सम्मूर्च्छिमाश्च भवंति, इदं संभववचनं । तिरश्चां मध्ये भोगभूमाः–भोगभूमिभवाः, तिर्यंचो गर्भभवा एव । अथवा–णं-ननु अहो शिष्येति संबोधनार्थमव्ययं । नरपूर्णाः पर्याप्तमनुष्या गर्भजा एव ॥ ९१ ॥

स० च०—पंचेंद्रिय तिर्यंच ते गर्भज अर सम्मूर्छन हो हैं। बहुरि तिर्यंचनिविषैं भोगभूमियां तिर्यंच गर्भज ही हैं बहुरि पर्याप्त मनुष्य गर्भज ही हैं ॥ ९१ ॥ आगैं औपपादिकादिनिविषैं लब्धि अपर्याप्तकपनाका संभवपना असंभवपनाकौं कहैं हैं–

उबबादगब्भजेसु य लद्धिअपज्जत्तगा ण णियमेण ।
णरसम्मुच्छिमजीवा लद्धिअपज्जत्तगा चेव॥ ९२॥

उपपादगर्भजेषु च लब्ध्यपर्याप्तका न नियमेन।
नरसम्मूर्छिमजीवा लब्ध्यपर्याप्तकाश्चैव ॥ ९२ ॥

जी० प्र०–औपपादिकेषु गर्भजेषु च लब्ध्यपर्याप्तका नियमेन न संति । संमूर्छिममनुष्या लब्ध्यपर्याप्ता एव भवंति ॥ ९२ ॥ अथ नरकादिगतिषु वेदानवधारयति–

मं० प्र०--उपपादजेषु देवनारकेषु गर्भजेषु च विशिष्टतिर्यग्मनुष्येषु च लब्ध्यपर्याप्तका नियमेन न संति । नरसम्मूर्छिमा जीवा लब्ध्यपर्याप्तका एव भवंति ॥ ९२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०—औपपादिकनिविषैं बहुरि गर्भजनिविषैं लब्धि अपर्याप्तक नियमकरि नाहीं हैं। बहुरि सम्मूर्छन मनुष्य लब्धि अपर्याप्तक ही हो हैं पर्याप्त न हो हैं ॥ ९२ ॥ आगैं नरकादि गतिनिविषैं वेदनिकों अवधारण करैं हैं—

णेरइया खलु संढा णरतिरिये तिण्णि होंति सम्मुच्छा।
संढा सुरभोगभुमा पुरिसिच्छीवेदगा चेव ॥ ९३ ॥

नैरयिकाः खलु षंढा नरतिरश्चोस्त्रयो भवंति सम्मूर्छाः।
षंढाः सुरभोगभुमाः पुरुषस्त्रीवेदकाश्चैव ॥ ९३ ॥

जी० प्र०—नारकाः सर्वेऽपि खलु नियमेन षंढाः-द्रव्यतो भावतश्च नपुंसकवेदा एव भवंति। मनुष्यतिर्यक्षु स्त्रीपुंनपुंसकवेदत्रयं स्यात्। संमूर्छिमतिर्यग्मनुष्या षंढवेदा एव भवंति। ते संमूर्छिममनुष्यास्तु स्त्रीयोनितत्कक्षास्तनमूलांतरालेषु चक्रवर्तिनः पट्टमहिषीं विना मूत्रपुरीषाद्यशुचिस्थानेषु चोत्पद्यंते। सुरा भोगभूमिजाश्च पुरुषस्त्रीवेदनियतोदया एव नियमेन भवंति ॥ ९३ ॥ इति विविधयोन्यधिकारो जीवसमासेषु कथितः। अथ शरीरावगाहनाश्रयेण जीवसमासान् वक्तुमनाः प्रथमं तत्सर्वजघन्योत्कृष्टशरीरावगाहनस्वामिनो निर्दिशति---

मं० प्र०----नैरयिकाः खलु-नियमेन षंढा एव--द्रव्यतो भावतश्च नपुंसकवेदा एव। नरतिर्यक्षु त्रयोऽपि वेदाः संति द्रव्यतो भावतश्च स्त्रियः पुमांसः नपुंसकानि च भवंति इत्यर्थः। सम्मूर्छिनो द्रव्यभावतः षंढा एव भवंति। सुरा भोगभूमिभवाश्च द्रव्यभावतः स्त्रीपुंसवेदा एव भवंति ॥ ९३ ॥ अथ जीवानामवगाहनभेदमष्टभिर्गाथासूत्रैः प्ररूपयति----

सं. चं.—नारकी सर्व ही नियमकरि षंढाः कहिए नपुंसक वेदी ही हैं। बहुरि मनुष्य तिर्यंचनिविषैं स्त्री पुरुष नपुंसक भेदरूप तीनों वेद हैं। बहुरि सम्मूर्छन तिर्यंच अर मनुष्य सर्व नपुंसक वेदी ही हैं। ते सम्मूर्छन मनुष्य स्त्रीकी योनि वा कांख वा स्तननिका मूल तिनिविषैं अर चक्रवर्तीकी पट्टराणी विना मूत्र विष्टा आदि अशुचिस्थानकनिविषैं उपजै हैं। ऐसा विशेष जानना। बहुरि देव अर भोगभूमियां ते पुरुषवेद स्त्री वेदका ही उदयसंयुक्त नियम करि हैं तहां नपुंसक न पाइए है ॥ ९३ ॥ इति तीनिप्रकार योनिनिका अधिकार जीवसमासनिका कह्या

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आगैं शरीरकी अवगाहना आश्रयकरि जीवसमासनिकौं कहनेका है मन जाका ऐसा आचार्य सो प्रथम ही सर्व जघन्य अर उत्कृष्ट अवगाहनाके जे स्वामी तिनिका निर्देश करै हैं–

सुहमणिगोदअपज्जत्तयस्स जादस्स तदियसमयम्हि ।
अंगुलअसंखभागं जहण्णमुक्कस्सयं मच्छे ॥ ९४ ॥

सूक्ष्मनिगोदापर्याप्तकस्य जातस्य तृतीयसमये ।
अंगुलासंख्यभागं जघन्यमुत्कृष्टकं मत्स्ये ॥ ९४ ॥

जी० प्र०—सूक्ष्मनिगोदस्य लब्ध्यपर्याप्तकस्य तद्भवे ऋजुगत्योत्पन्नस्य तृतीयसमये घनांगुला (ल) संख्यातैकभागमात्रप्रदेशावगाहविशिष्टशरीरं सर्वावगाहविकल्पेभ्यो जघन्यं भवति स्वयंभूरमणसमुद्रमध्यवर्तिमहामत्स्ये उत्कृष्टावगाहेभ्यः सर्वेभ्यः सर्वोत्कृष्टावगाहविशिष्टं शरीरं भवति । ननूत्पन्नतृतीयसमये एव सर्वजघन्यावगाहनं कथं संभवेत् ? इति चेत् तत्प्रथमसमये निगोदजीवशरीरस्यायतचतुरस्रत्वात् द्वितीसमये समचतुरस्रत्वात् तृतीयसमये कोणापनयनेन वृत्तत्वात् तदेव तदवगाहनस्याल्पत्वसंभवात् । तर्हि ऋजुगत्योत्पन्नस्यैव कथमुक्तं विग्रहगतौ योगवृद्धियुक्तत्वेन तदवगाहवृद्धिप्रसंगात् । तत्सर्वजघन्यावगाहे घनांगुलस्य भागहाराः पल्यासंख्यातैकभागा एकान्नविंशतिः । आवल्यसंख्यातैकभागा नव । रूपाधिकावल्यसंख्यातैकभागा द्वाविंशतिः संख्याता नव । गुणकारास्तु आवल्यसंख्यातैकभागा द्वाविंशतिः । संदृष्टिः–

६ । ८ । २२
 a

प । १९ । ८ । ९ । ८ । २२ । ॰ ॄ । ९
a a a

॥ ९४ ॥ अथेंद्रियाश्रयेणोत्कृष्टावगाहानां प्रमाणं तत्स्वामिनश्च निर्दिशति–

मं० प्र०—सूक्ष्मनिगोदस्य लब्ध्यपर्याप्तकस्य जातस्य–ऋजुगत्या उत्पन्नस्य, उत्पत्तेस्तृतीयसमये वर्तमानस्य जीवस्य घनांगुलासंख्येयभागमात्रं सर्वजघन्यमवगाहनं भवति । तथाहि–घनांगुलस्य भागहाराः पल्यासंख्येयभागाः एकान्नविंशतिवाराः, आवल्यसंख्येयभागा नववाराः, रूपाधिका आवल्यसंख्येयभागा द्वाविंशतिवाराः, संख्येयरूपाणि नववाराणि, गुणकारा आवल्यसंख्येयभागा द्वाविंशतिवाराः अपवर्तिते ईदृशं घनांगुलासंख्येयभागमात्रं भवति

६
a

स्वयंभूरमणमहासमुद्रमध्यवर्तिनि महामत्स्ये सहस्रयोजनायामपंचशतयोजनविस्तारपंचाशदुत्तरद्विशतयोजनोत्सेधशरीरप्रदेशप्रमाणं घनक्षेत्रफलं संख्यात- २१५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

घनांगुलमात्रं सर्वोत्कृष्टमवगाहनं भवति ६ ११ ११ ११ ११ ११ मध्ये जघन्यावगाहात् प्रदेशोत्तरा अवगाहनविकल्पा भवंति। सर्वेऽपि संपिंडिताः संख्यातघनांगुलमात्रा असंख्येया अवगाहनविकल्पा भवंति ६ ११ ११ ११ ११ ११ a / a। ननु विग्रहगत्या उत्पन्नस्य प्रथमद्वितीयसमययोश्च जघन्यावगाहनं किमिति नोच्यते ? इति चेत्तन्न, विग्रहगतौ योगवृद्ध्या शरीरवृद्धिप्रसंगात्। प्रथमसमये आयतचतुरस्रत्वात् द्वितीयसमये समचतुरस्रत्वात्, तृतीयसमये पुनः कोणापनयनेन वृत्तत्वे शरीराल्पत्वसंभवात्। अन्येषु द्वीपसमुद्रेषु इतरगतित्रये च सर्वोत्कृष्टावगाहस्यासंभवात्। स्वयंभूरमणसमुद्रेऽपि तटसमीपमत्स्यानां तथाविधसर्वोत्कृष्टावगाहनासंभवात् ॥ ९४ ॥

सं. चं.–जितना आकाश क्षेत्र शरीर रोकै ताका नाम इहां अवगाहना है। सो सूक्ष्मनिगोदिया लब्धि अपर्याप्तकजीव तींहि पर्यायविषैं ऋजुगतिकरि उत्पन्न भया ताका तीसरा समयविषैं घनांगुलके असंख्यातवें भाग प्रमाण प्रदेशनिकी अवगाह विशेषधरैं शरीर हो है। सो यहु अन्य सर्व अवगाहना भेदनितैं जघन्य है। बहुरि स्वयंभूरमण नामा समुद्रके मध्यवर्ती जो महामत्स्य ताका उत्कृष्ट अवगाहनातैं भी सबनितैं सर्वोत्कृष्ट अवगाहना विशेष धरैं शरीर हो है। इहां तर्क–जो उपजनेंतैं तीसरा समयविषैं सर्व जघन्य अवगाहना कैसैं संभवै है? तहां समाधान-जो उपजता ही प्रथम समयविषै तो निगोदिया जीवका शरीर लंबा बहुत चौडा थोडा ऐसा चौकोर हो है। बहुरि दूसरा समयविषैं लंबा चौडा समान ऐसा चौकोर हो है। बहुरि तीसरे समय कोण दूर करणेंकरि गोल आकार हो है तबही तिस शरीरकें अवगाहनाका अल्प प्रमाण हो है। जातैं लंबा चौकोर सम चौकोरतैं गोल क्षेत्रफल स्तोक हो है। बहुरि तर्क- जो ऐसैं हैं तो ऋजुगतिकरि उपज्याहीकैं होइ ऐसैं कैसैं कह्या ? ताका समाधान–जीव परभवकौं गमनकरै ताकी विदिशाकरि वर्जित च्यारि दिशा वा अधः ऊर्ध्वविषैं गमनक्रिया होइ है सो च्यारि प्रकार है-ऋजुगति १ पाणिमुक्ता गति २ लांगलगति ३ गोमूत्रिका गति ४। तहां सूधा गमन होइ सो ऋजुगति है। जामैं वीचि एकवार मुडे सो पाणिमुक्ता गति है जामैं वीच दोयवार मुडे सो लांगल गति है। जामैं वीच तीनवार मुडे सो गोमूत्रिका गति है। सो मुडनेविषैं जो विग्रह गति ताविषैं जीव

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योगनिकी वृद्धिकरि युक्त हो है ताकरि शरीरकी अवगाहना भी वृद्धिरूप हो है। तातैं ऋजुगतिकरि उपज्या जीवकैं जघन्य अवगाहना कही सो सर्वजघन्य अवगाहनाका प्रमाण कहैं हैं—घनांगुल रूप जो प्रमाण ताका पल्यका असंख्यातवां भाग उगणीसवार, बहुरि आवलीका असंख्यातवां भाग नववार, बहुरि एक अधिक आवलीका असंख्यातवां भाग बाईसवार बहुरि संख्यातका भाग नववार इतने तौ भागहार जानने। बहुरि तिस घनांगुलका आवलीका असंख्यातवां भाग बाईसवार आवलीका असंख्यातवां भागका बाईसवार गुणकार जानने। तहां पूर्वोक्त भागहारनिकौं माडि परस्पर गुणन किएं जेता प्रमाण आवै तितना भागहारका प्रमाण जानना। बहुरि बाईस जायगा आवलीका असंख्यात भागकौं माडि परस्परगुणै जो प्रमाण आवै तितना गुणकारका प्रमाण जानना। तहां घनांगुलके प्रमाणकौं भागहारके प्रमाणका भाग दीएं अर गुणकारका प्रमाणकरि गुणै जो प्रमाण आवै तितना जघन्य अवगाहनाके प्रदेशनिका प्रमाण जानना ऐसैं ही आगै भी गुणकार भागहारका अनुक्रम जानना ॥ ९४ ॥ आगै इंद्रिय आश्रयकरि उत्कृष्ट अवगाहनानिका प्रमाण तिनिके स्वामीनिकौं निर्देश करैं हैं—

साहियसहस्समेकं वारं कोसूणमेकमेकं च ।
जोयणसहस्सदीहं पम्मे वियले महामच्छे ॥ ९५ ॥

साधिकसहस्रमेकं द्वादश क्रोशोनमेकमेकं च ।
योजनसहस्रदीर्घं पद्मे विकले महामत्स्ये ॥ ९५ ॥

जी॰ प्र॰—एकेंद्रियेषु स्वयंभूरमणद्वीपमध्यवर्तिस्वयंप्रभाचलापरभागस्थितक्षेत्रोत्पन्नपद्मे साधिकसहस्रयोजनायामैकयोजनव्यासोत्कृष्टावगाहो भवति अस्य च व्यासः (यो॰) १। त्रिगुणः १। ३ परिधिः। अयं च व्यासचतुर्थां $\frac{1}{4}$ हतः १। ३। $\frac{1}{4}$ क्षेत्रफलं। तच्च वेधेन १००० चतुर्भिरपव

इतः द्वाविंशत्यतपाठाः क. पुस्तके नोपलब्धः।

५५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिंतेन गुणितं योजनात्मकं खातफलमेतावद्भवति ७५०। द्वींद्रियेषु तत्स्वयंभूरमणसमुद्रवर्तिशंखे द्वादशयोजनायामयोजनपंचचतुर्थांशोत्सेध ५/४ चतुर्योजनमुखव्यासोत्कृष्टावगाहो भवति। अस्य च व्यासः १२ तावद्गुणितः १४४ वदन ४ दल २ ऊन १४२ मुखार्द्धवर्ग ४ युतः १४६ द्विगुणः २९२ चतुर्भिर्भक्तः ७३ पंचगुणः ३६५ शंखखातफलं। त्रींद्रियेषु स्वयंभूरमणद्वीपापरभागवर्तिकर्मभूमिप्रतिबद्धक्षेत्रे रक्तवृश्चिक-जीवे योजनत्रिचतुर्भागायाम ३/४ तदष्टमांशव्यास ३/३२ तदर्द्धोत्सेध ३/६४ उत्कृष्टावगाहोऽस्ति अस्य च भुजकोटिवधात् प्रजायते क्षेत्रफलं ३/४ ३/३२ तच्च वेधगुणं ३/४ । ३/३२ । ३/६४ घनफलं भवति २७/८१९२। चतुरिंद्रियेषु स्वयंभूरमणद्वीपापरभागकर्मभूमिप्रतिबद्धक्षेत्रवर्तिभ्रमरे एकयोजना-यामतत्त्रिचतुर्भागव्यास ३/४ अर्धयोजनोत्सेध १/२ उत्कृष्टावगाहोऽस्ति। अस्य च भुजकोटीत्यादिनानीतघनफलं ३/८ योजनत्र्यष्टमभागो भव-ति। पंचेंद्रियेषु स्वयंभूरमणसमुद्रमध्यवर्तिमहामत्स्ये सहस्रयोजनायामपंचाशत्योजनव्यासपंचाशदग्रद्विशतयोजनोत्सेधोत्कृष्टावगाहोऽस्ति। अस्य च भुजकोटीत्यादिनानीतघनफलं १२५००००० सार्धद्वादशकोटियोजनमात्रं भवति। एतान्युक्तघनफलानि प्रदेशीकृतानि त-दैकेंद्रियस्य चतुस्संख्यातगुणितघनांगुलमात्रं ६ ७ ७ ७ ७ द्वींद्रियस्य त्रिसंख्यातगुणितघनांगुलमात्रं ६ ७ ७ ७ त्रींद्रियस्य एकसंख्यातगुणित घनांगुलमात्रं ६ ७ चतुरिंद्रियस्य द्विसंख्यातगुणितघनांगुलमात्रं ६ ७ ७। पंचेंद्रियस्य पंचसंख्यातगुणितघनांगुलमात्रं भवति ६ ७ ७ ७ ७ ७ ॥९५॥ अथ पर्याप्तकद्वींद्रियादीनां जघन्यावगाहप्रमाणं तत्स्वामिनिर्देशं चाह—

मं०प्र०-वादरपर्याप्तकैकद्वित्रिचतुःपचेंद्रियेषु यथाक्रमं पद्मे, विकलेंद्रियेषु शंखग्रैष्मीभ्रमरेषु महामत्स्ये च दैर्घ्यं--आयामः कथ्यते तद्यथा—पद्मे साधिकं यो-जनानामेकं सहस्रं पुष्पोत्सेधेन अधिकस्य सहस्रयोजनायामस्य एकयोजनविष्कंभस्य वृत्तस्य तन्नालस्य संभवात्। तस्य क्षेत्रफलं 'वासोत्तिगुणो' इत्यादिना गाथासूत्रमार्गेणानेतव्यं। तद्घनफलं योजनानि ७५० प्रदेशाः ६ ७ ७ ७ ७। शंखे द्वादशयोजनान्यायामः। चत्वारि मुखव्यासः। उदयः पंचचतुर्भागः 'आ-यामेकदीत्यादिगाथासूत्रमार्गेण नीतं घनफलं ३६५। ६ ७ ७ ७। ग्रैष्म्यां-ग्रीष्मकालभवे त्रसविशेषे क्रोशोनमेकयोजनमायामः। आयामाष्टमभागो २७ व्यासः, व्यासदलं वेधः। भुजकोटिवेधगुणनादानीतं चतुरस्रघनफलं ८१९२। ६ ७। भ्रमरे एकं योजनमायामः। त्रिचतुर्भागो व्यासः। योजनार्धं वेधः। तस्यापि भुजकोटिवेधगणनादानीतं घनफलं ३ ६ ७ ७ / ८ महामत्स्ये प्रागुक्ता आयामव्यासोदयाः। तस्यापि भुजकोटिवेधगुणनादानीतं घनफलं १२५००००० ६ ७ ७ ७ ७ ७ ॥ ९५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं॰ चं॰—एकेंद्रियनिविषैं स्वयंभूरमण द्वीपके मध्यवर्ती जो स्वयंप्रभ नामा पर्वत ताका परला भाग संबंधी कर्मभूमि रूप क्षेत्रविषैं उपज्या ऐसा जो कमल तींहिविषैं किछूअधिक एकहजार योजन लंबा एक योजन चौडा ऐसा उत्कृष्ट अवगाह है। याका क्षेत्रफल कहिए है-समान प्रमाण लीए खंडकल्पैं जितने खंड होंइ तिस प्रमाणका नाम क्षेत्रफल है । तहां ऊंचा लंबा चौडा क्षेत्रका ग्रहण जहां होइ तहां घनक्षेत्रफल वा खातक्षेत्रफल जानना। बहुरि जहां ऊंचापणाकी विवक्षा न होइ अर लंबा चौडा ही का ग्रहण होइ तहां प्रतरक्षेत्रफल वा वर्ग क्षेत्रफल जानना। बहुरि जहां ऊंचा चौडापणाकी विवक्षा न होइ एक लंबाईका ही ग्रहण होइ तहां श्रेणी क्षेत्रफल जानना। सो इहां खात क्षेत्रफल कहिए है—तहां कमल गोल है तातैं गोल क्षेत्रका क्षेत्रफल साधनरूप करण सूत्र करि साधिए है—

वासोत्तिगुणो परिही वासचउत्थाहदो दु खेत्तफलं।
खेत्तफलं वेहगुणं खादफलं होइ सव्वत्थ ॥

याका अर्थ—व्यास जो चौडाईका प्रमाण तातैं तिगुणा गिरदभ्रमणरूप जो परिधि ताका प्रमाण हो है। बहुरि परिधिकौं व्यासका चौथा भागकरि गुणैं प्रतररूप क्षेत्रफल हो है। बहुरि याकौं वेध जो उंचाईका प्रमाण ताकरिगुणैं सर्वत्र खात फल हो है सो इहां कमलविषैं व्यास एक योजन ताकौं तिगुणां कीएं परिधि तीन योजन हो है। याकौं व्यासका चौथा भाग पाव योजनकरि गुणैं प्रतर क्षेत्रफल पौंण योजन हो है। याकौं वेध हजार योजनकरि गुणैं च्यारिकरि अपवर्तन कीएं योजन स्वरूप कमलका क्षेत्र फल साड़ा सातसौ योजन प्रमाण हो है। भावार्थ—एक एक योजन लंबा चौड़ा ऊंचा खंड कल्पैं इतने खंड हो हैं। बहुरि द्वींद्रियनिविषैं तींहि स्वयंभूरमण समुद्रवर्ती शंखविषैं बारह योजन लंबा, योजनका पांच चौथा भाग प्रमाण चौडा, च्यारि योजन मुख व्यासकरि युक्त ऐसा उत्कृष्ट अवगाह है। याका क्षेत्रफल करण सूत्रकरि साधिए है-

व्यासस्तावद्द गुणितो वदनदलोनो मुखार्धवर्गयुतः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्विगुणश्चतुर्भिर्भक्तः पंचगुणः शंखखातफलं ॥

याका अर्थ--प्रथम व्यासकौं व्यासकरि गुणिए तामैं मुखका आधा प्रमाण घटाइ तामैं मुखका आधा प्रमाणका वर्ग जोडिए ताका दूणा करिए, ताकौं च्यारिका भाग दीजिए ताकौं पांचगुणां करिए ऐसैं करते शंख क्षेत्रका खातफल हो है। सो इहां व्यास वारह योजनकौं याही करि गुणैं एकसौ चवालीस होइ। यामैं मुखका आधाप्रमाण दोय घटाएं एकसौ व्यालीस होइ। यामैं मुखका आधा प्रमाणका वर्ग च्यारि जोडैं एकसौ छियालीस होइ याकौं दूणा कीएं दोयसै वाणवे होइ। याकौं च्यारिका भाग दीए तेहत्तरि होइ। याकौं पांचकरि गुणैं तीनसौ पैंसठि योजनप्रमाण शंखका क्षेत्र फल हौहै। बहुरि त्रींद्रियनिविषैं स्वयंभूरमण द्वीपका परला भाग विषैं जो कर्मभूमि संबंधी क्षेत्र है तहां रक्त वीछू जीव है। तीहि विषैं योजनका तीन चौथा भाग प्रमाण ३/४ लंबा लंबाईके आठवें भाग ३/३२ चौडा, चौडाईतैं आधा ३/६४ ऊंचा ऐसा उत्कृष्ट अवगाह है। यहु क्षेत्र आयत चतुरस्र है लंबाई लीएं चौकोर है सो याका प्रतर क्षेत्रफल भुज कोटि बध तैं होइ है। सन्मुख दोय दिशानिविषैं कोई एक दिशा विषैं जितना प्रमाण ताका नाम भुज है। बहुरि अन्य दोय दिशाविषैं कोइ एक दिशाविषैं जितना प्रमाण ताका नाम कोटि है। यहु अर्थ-जो लंबाई चौडाई विषैं एकका नाम भुज एकका नाम कोटि जानना। इनिका बध कहिए परस्पर गुणना तींहि थकी प्रतरक्षेत्र फल हो है सो इहां लंबाई तीन चौथा भाग चौडाई तीन वतीसवां भाग इनिका परस्पर गुणैं नवका एकसौ अठाईसवां भाग ९/१२८ भया बहुरि याकौं बेध उंचाईका प्रमाण तीनिका चौसाठिवां भाग ताकरि गुणैं सताईस योजनका इक्यासीसैं वाणवैंका भाग दीए एकभाग २७/८१९२ प्रमाण रक्तवीछूका घन क्षेत्रफल होहै। बहुरि चतुरिंद्रियनिविषैं स्वयंभूरमण द्वीपका परला भागवर्ती कर्मभूमि संबंधी क्षेत्रविषैं भ्रमर हो है सो तिहिविषैं एक योजन लांबा पौन योजन ३/४ चौडा आधा योजन १/२ ऊंचा उत्कृष्ट अवगाह है। ताकौं भुज कोटि बध-एक योजन अर तीन योजनका चौथा भाग अर एक योजनका दूसरा भाग इनिकौं परस्पर गुणैं तीन योजनका आठवां भाग ३/८ प्रमाण घन क्षेत्रफल हो है। बहुरि पंचेंद्रियनिविषैं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वयंभूरमण समुद्रके मध्यवर्ती महामच्छ तीहिविषैं हजार १००० योजन लांबा पांचसै ५०० योजन चौडा पचास अधिक दोयसै २५० योजन ऊंचा उत्कृष्ट अवगाह है। तहां भुज कोटि वेध हजार १००० अर पांचसै ५०० अर अढाईसै २५० योजन प्रमाण इनिकौं परस्पर गुणैं साढ वारा कोडि १२५०००००० योजन प्रमाण घन फल हो है। ऐसैं कहे जे योजन रूप घनफल तिनके प्रदेशनिका प्रमाण कीएं एकेंद्रियके च्यारिवार संख्यातगुणां घनांगुल प्रमाण द्वींद्रियकैं तीनवार संख्यातगुणा घनांगुल प्रमाण, त्रींद्रियके एकवार संख्यातगुणां घनांगुल प्रमाण चतुरिंद्रियकैं दोयवार संख्यातगुणा घनांगुल प्रमाण पंचेंद्रियके पांचवार संख्यातगुणां घनांगुल प्रमाण प्रदेशनिका उत्कृष्ट अवगाहनाविषैं हो है ॥ ९५ ॥ आगैं पर्याप्त द्वींद्रियादिक जीवनिका जघन्य अवगाहनाका प्रमाण अर ताका स्वामीका निर्देशकौं कहे हैं–

वितिचपपुण्णजहण्णं अणुंधरीकुंथुकाणमच्छीसु।
सिच्छयमच्छे विंदंगुलसंखं संखगुणिदकमा ॥ ९६ ॥

द्वित्रिचपपूर्णजघन्यमनुंधरीकुंथुकाणमक्षिकासु।
सिक्थकमत्स्ये वृंदांगुलसंख्यं संख्यगुणितक्रमाः ॥ ९६ ॥

जी॰ प्र॰—द्वित्रिचतुःपंचेंद्रियपर्याप्तकेषु यथासंख्यं अनुंधरीकुंथुकाणमक्षिकासिक्थकमत्स्यजीवेषु जघन्यावगाहविशिष्टशरीरावष्टब्धप्रदेशप्रमाणं वृंदांगुलसंख्यातैकभागमादिं कृत्वा संख्यातगुणितक्रमेण भवति। ६ द्वि ६ त्रि ६ च ६ पं। एषामिदानीं व्यासायामोत्सेधाना-
११११. १११ ११ १
मुपदेशो नास्ति इति घनफलमेवोक्तं ॥ ९६ ॥ अथ सर्वजघन्यावगाहनादीनां उत्कृष्टावगाहनपर्यंतानां शरीरावगाहनविकल्पानां स्वाम्यल्पबहुत्वगुणकारान् गाथापंचकेन प्रदर्शयति—

मं॰ प्र॰—वि–ति–च–पेषु द्वित्रिचतुःपंचेंद्रियेषु पर्याप्तेषु अनुंधरीकुंथुकाणमक्षीषु सिक्थकमत्स्ये च जघन्यमवगाहनं घनांगुलसंख्यातभागप्रमितं भ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वति तत्रानुंधरीजघन्यावगाहनात् कुंथ्वाद्युत्तरजघन्यावगाहनानि संख्यातगुणानि संत्यपि सर्वाणि घनांगुलसंख्यातभागप्रमितान्येव ६ / ९ । ९ । गुणकारभाग-
६ । ६ । ६ ।
हारापवर्तनेन ९ । ८ । ९ । ७ । ९ । ६ । हारा गुणयित्वा लघूक्ताः पूर्वाचार्यैः
६ ६ ६ ६
९ ९ ९ ९ । ९ ९ ९ । ९ ९ । ९ ॥ ९६ ॥

सं० चं०--पर्याप्त द्वींद्रियविषैं अनुंधरी, त्रींद्रियनिविषैं कुंथु, चतुरिंद्रियनिविषैं काणमाक्षिका, पंचेंद्रियनिविषैं तंदुलमच्छ इनि जीवनिविषैं जघन्य अवगाहना विशेष धरै जो शरीर ताकरि रोक्या हूवा क्षेत्रका प्रदेशनिका प्रमाण घनांगुलका संख्यातवां भागतैं लगाइ संख्यातगुणा अनुक्रमकरि जानना । तहां द्वींद्रियविषैं च्यारि वार त्रींद्रियविषैं तीनवार चतुरिंद्रियविषैं दोयवार पंचेंद्रियविषै एकबार संख्यातका भाग दीजिए ऐसा घनांगुल मात्र पर्याप्तनिका जघन्य अवगाहनाके प्रदेशनिका प्रमाण जानना । इनिका अब चौडाई लंबाई उंचाईका उपदेश इहां नाहीं है । घन फल कीएं जो प्रदेशनिका प्रमाण भया सो इहां कह्या है ॥ ९६ ॥ आगैं सर्वतैं जघन्य अवगाहनाकौं आदि देकरि उत्कृष्ट अवगाहना पर्यंत शरीरकी अवगाहनाके भेद तिनिका स्वामी वा अल्पबहुत्व वा क्रमतैं गुणकार तिनिकौं गाथा पंचकरि इहां दिखावै हैं—

सुहमणिवातेआभूवातेआपुणिपदिट्ठिदं इदरं ।
वितिचपमादिल्लाणं एयाराणं तिसेढीय ॥ ९७ ॥

सूक्ष्मनिवातेआभूवातेअपूनिप्रतिष्ठितमितरत् ।
द्वित्रिचपमाद्यानामेकादशानां त्रिश्रेणयः ॥ ९७ ॥

जी० प्र०---अत्र नामैकदेशो नाम्नि प्रवर्तत इति लघुकरणन्यायमाश्रित्य निवेत्यादिवर्णैर्निगोदवायुकायिकादयो जीवा गृह्यंते । निगोदवायुतेजोऽभूकायिकनामानः पंच सूक्ष्माः प्रथमकोष्ठे भवंति । पुनः वायुतेजोऽपृथ्वीकायिकनिगोदप्रतिष्ठितप्रत्येकनामानः षट् वादरास्तिर्यक्भागवत् क्रमेण द्वितीयकोष्ठे भवंति । पुनरुक्ततासामर्थ्यात् एते वादरा एवेति ज्ञातव्यं । पुनरप्रतिष्ठितप्रत्येकद्वित्रिचतुःपंचेंद्रिय

२२२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नामानः पंचवादरास्तृतीयकोष्ठे भवंति । एतेषु षोडशसु आद्यानां सूक्ष्मनिगोदादीनां एकादशानामग्रे तिस्रः पंक्तयः कर्तव्याः । तत्रैकैक-पंक्तेः कोष्ठद्वयं द्वयं ज्ञातव्यं ।

मं० प्र०----सूक्ष्माणां--निगोदवायुतेजोभूकायिकानां, वादराणां वायुतेजोऽप्पृथ्वीकायिकानां निगोदानां प्रतिष्ठितप्रत्येकशरीराणां च इतरेषामप्रतिष्ठित प्रत्येकशरीराणां द्वित्रिचतुःपंचेंद्रियाणां एवं षोडशानामपर्याप्तकानां एका पंक्तिः कर्तव्या । तत्र आद्यानां निगोदादिप्रतिष्ठितप्रत्येकपर्यंतानां एकादशानां अधोधस्तिस्रः पंक्तयो लेखितव्याः ॥ ९७ ॥

सं० चं०--इहां नामका एकदेश सो संपूर्ण नामविषैं वर्तै है। इस लघुकरण न्यायका आश्रयकरि गाथाविषैं कह्या हूवा णि वा इत्यादि आदि अक्षरनिकरि निगोदवायुकायिक आदि जीवनिका ग्रहण करना। सो इहां अवगाहनाके भेद जाननेके अर्थि एक यंत्र करना । तहां सूक्ष्मनिगोदिया १ सूक्ष्मवायुकायिक २ सूक्ष्म तेजःकायिक ३ सूक्ष्म अप् कायिक ४ सूक्ष्म पृथ्वीकायिक ५ नाम धारक पांच सूक्ष्म तिस यंत्रके प्रथम कोठेविषैं लिखे हो हैं। बहुरि ताकी बराबर आगैं बादर वायु १ तेज २ जल ३ पृथ्वी ४ निगोद ५ प्रतिष्ठित प्रत्येक ६ नामधारक ये छह वादर पूर्ववत् अनुक्रमकरि दूसरा कोठाविषैं लिखे हो हैं। पहिलैं जिनिके नाम लीए तिनहीके फेर लीए इस प्रयोजनकी समर्थतातैं प्रथम कोठाविषैं सूक्ष्म कहे थे इहां दूसरा कोठाविषैं वादर ही हैं ऐसा जानना। बहुरि ताके आगैं अप्रतिष्ठित प्रत्येक १ द्वींद्रिय २ त्रींद्रिय ३ चतुरिंद्रिय ४ पंचेंद्रिय ५ नामधारक ए पांच वादर तीसरा कोठाविषैं लिखे हो हैं। इनि सोलहौंविषैं आदिके सूक्ष्मनिगोदादिक ग्यारह तिनिकैं आगैं तीन पंक्ति करनी तहां एक एक पंक्तिविषैं दोय दोय कोठे जानने। कैसैं ? सो कहिए है--पूर्वैं तीसरा कोठा कह्या था ताके आगैं दोय कोठे करने। तिनिविषैं जैसैं पहला दूसरा कोठाविषैं पांच सूक्ष्म छह वादर लिखे थे तैसैं इहां भी लिखे हो हैं। बहुरि तिनि दोऊ कोठानिके नीचैं पंक्तिविषैं दोय कोठे और करने। तहां भी तैसैं ही पांच सूक्ष्म छह वादर लिखे हो हैं। बहुरि तिनके नीचै पंक्तिविषैं दोय कोठे और करने तहां भी तैसैं ही पांच सूक्ष्म छह वादर लिखे हो हैं ऐसैं सूक्ष्म निगोदादि ग्यारह स्थानकनिका दोय दोय कोठानिकरि संयुक्त तीन पंक्ति भई। याप्रकार

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ऊपरिकी पंक्तिविषै पांच कोठे तातै नीचली पंक्तिविषै दोय कोठे तातै नीचली पंक्तिविषै दोय कोठे तिनि मिलि नव कोठे भए ॥ ९७ ॥

अपदिट्ठिदपत्तेयं वितिचपतिचबिअपदिट्ठिदं सयलं ।
तिचविअपदिट्ठिदं च य सयलं बादालगुणिदकमा ॥ ९८ ॥

अप्रतिष्ठितप्रत्येकं द्वित्रिचपत्रिचद्व्यप्रतिष्ठितं सकलं ।
त्रिचद्व्यप्रतिष्ठितं च च सकलं द्वाचत्वारिंशद्गुणितक्रमाः ॥ ९८ ॥

जी० प्र०---पुनस्तत्पंक्तित्रयस्याग्रे दशमकोष्ठे अप्रतिष्ठितप्रत्येकद्वित्रिचतुःपंचेंद्रियनामानः पंचबादरा भवंति । तदग्रे एकादशे कोष्ठे त्रिचतुर्द्वींद्रियाप्रतिष्ठितप्रत्येकसकलेंद्रियनामानः पंच बादरा भवंति । तदग्रे द्वादशे कोष्ठे त्रिचतुर्द्व्यप्रतिष्ठितप्रत्येकसकलेंद्रियनामानः पंचबादरा भवंति एतेषु चतुष्षष्टिजीवसमासावगाहनविकल्पेषु उपरितनपंक्तिगतद्वाचत्वारिंज्जीवसमासावगाहनविकल्पा गुणितक्रमा भवंति । तदन्ये तु 'सेढिगया अहिया तत्थेकपडिभागो' इति सूचितं जातं ॥ ९८ ॥

मं० प्र०---अप्रतिष्ठितप्रत्येकद्वित्रिचतुःपंचेंद्रियाणां पर्याप्तकानामेका पंक्तिः कर्तव्या । पुनरग्रे त्रिचतुर्द्वींद्रियाप्रतिष्ठितप्रत्येकपंचेंद्रियाणामपर्याप्तकानामेका पंक्तिः कर्तव्या । पुनरग्रे त्रिचतुर्द्वींद्रियाप्रतिष्ठितप्रत्येकपंचेंद्रियाणां पर्याप्तकानामेका पंक्तिः कर्तव्या । तत्र प्रथमानां षोडशानां पुनः पंक्तित्रये, उपरितनपंक्तिगतानां एकादशानां पुनरग्राग्रपंक्तित्रयगतानां पंचदशानां च जीवानां शरीरावगाहनानि द्वाचत्वारिंशद्गुणितक्रमाणि । अवशिष्टाधःपंक्तिद्वयगतजीवानां द्वाविंशतिः शरीरावगाहनानि आवल्यसंख्यातभागाधिकानीति ज्ञातव्यानि ॥ ९८ ॥

सं० चं०—बहुरि तिनि तीनि पंक्तिनिके आगैं ऊपर पंक्तिविषैं दशवां कोठा करना तीहिविषैं अप्रतिष्ठित प्रत्येक १ द्वींद्रिय २ त्रींद्रिय ३ चतुरिंद्रिय ४ पंचेंद्रिय ५ नाम धारक पांच बादर लिखे हो हैं। बहुरि ताके आगैं ग्यारहवां कोठाविषैं त्रींद्रिय १ चौइंद्रिय २ बेंद्रिय ३ अप्रतिष्ठित प्रत्येक वनस्पती ४ पंचेंद्रिय ५ नाम धारक पांच बादर लिखे हो हैं। बहुरि ताके आगैं बारहवां कोठाविषै त्रींद्रिय १ चतुरिंद्रिय २ द्वींद्रिय ३ अप्रतिष्ठित प्रत्येक वनस्पती ४ पंचेंद्रिय ५ नाम धारक पांच बादर लिखे हो हैं। ऐसैं ए चौसठि जीवसमासनिकी अवगाह-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नाके भेद हैं। तिनिविषै ऊपरिकी पंक्तिनिके आठ कोठानिविषै प्राप्त ऐसे जे बियालीस जीवसमास तिनकी अवगाहनाके स्थान ते गुणितक्रम हैं अनुक्रमतैं पूर्वै स्थानकौं यथासंभव गुणकार करि गुणे उत्तरस्थान हो हैं। बहुरि तातैं इनि नीचैकी दोय पंक्तिनिविषै प्राप्त भए बाईस स्थान ते 'सेढिगया अहिया तत्थेकपडिभागो' इस वचनतैं अधिक रूप हैं। तहां एक प्रतिभागका अधिकपनां जानना। पूर्वस्थानकौं संभवता भागहारका भाग देइ एक भागकौं पूर्वस्थानविषै अधिक कीएं उत्तर स्थान हो है ऐसा सूचन कीया है॥ ९८॥

अवरमपुण्णं पढमं सोलं पुण पढमविदियतदियोली।
पुण्णिदरपुण्णियाणं जहण्णमुक्कस्समुक्कस्सं॥ ९९॥

अवरमपूर्णं प्रथमे षोडश पुनः प्रथमद्वितीयतृतीयावलिः।
पूर्णेतरपूर्णानां जघन्यमुत्कृष्टमुत्कृष्टं॥ ९९॥

जी० प्र०——प्रथमकोष्ठत्रयगतषोडशजीवसमासानां अपर्याप्तजघन्यावगाहा इति ज्ञातव्याः पुनरुपरि प्रथमद्वितीयतृतीयपंक्तिषु एकैकस्यां पंक्तौ द्वौ द्वौ कोष्ठौ यथाक्रमं पर्याप्तापर्याप्तपर्याप्ता इति त्रिविधजीवानां जघन्यमुत्कृष्टमुत्कृष्टं चावगाहनं स्यात्। तथाहि—प्रथमपंक्तौ सूक्ष्माः पंच बादराः षडित्येकादशानां पर्याप्तजीवसमासानां जघन्यावगाहनानि संति। तथा द्वितीयपंक्तिगततदेकादशापर्याप्तजीवसमासानामुत्कृष्टावगाहनस्थानानि संति। तथा तृतीयपंक्तिगतैकादशपर्याप्तजीवसमासानामुत्कृष्टावगाहनस्थानानि संतीत्ययं विभागो ज्ञातव्यः॥ ९९

मं० प्र०——प्रथमपंक्तिगतानां षोडशानां सूक्ष्मनिगोदादीनां पंचेंद्रियपर्यंतानां अपर्याप्तजीवानां अवगाहनानि जघन्यानि पुनरधोऽधः पंक्तित्रये प्रथमपंक्तिगतानां पर्याप्तकजीवानां एकादशानां अवगाहनानि जघन्यानि द्वितीयपंक्तिगतानामपर्याप्तकजीवानामेकादशानामवगाहनान्युत्कृष्टानि। तृतीयपंक्तिगतानां पर्याप्तकजीवानामेकादशानामवगाहनानि उत्कृष्टानि॥ ९९॥

सं० चं०—पहले तीन कोठेनिविषै प्राप्त जे सोलह जीवसमास तिनिकी अपर्याप्तविषै जघन्य अवगाहना जाननी। बहुरि आगै ऊपरितैं पहली दूसरी तीसरी पंक्तिनिविषै एक एक पंक्तिविषै दोय दोय कोठे कीए ते क्रमतैं पर्याप्त अपर्याप्त पर्याप्त रूप तीनप्रकार जीवकी जघन्य उत्कृष्ट अर उत्कृष्ट अवगाहना है। याका अर्थ यहु—जो २२५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ऊपरितैं प्रथम पंक्तिविषैं दोय दोय कोठानिविषैं पांच सूक्ष्म छह वादर इनि ग्यारह पर्याप्त जीवसमासनिकी जघन्य अवगाहनाके स्थान हैं। तैसें ही नीचैं दूसरी पंक्तिविषैं प्राप्त तिनि ग्यारह अपर्याप्त जीवसमासनिकी उत्कृष्ट अवगाहनाके स्थान हैं। तैसें ही तीसरी पंक्तिविषैं प्राप्त तिनि ग्यारह पर्याप्त जीव समासनिकी उत्कृष्ट अवगाहनाके स्थान हैं॥ ९९॥

पुण्णजहण्णं तत्तोवरं अपुण्णस्स पुण्णउक्कस्सं।
वीपुण्णजहण्णोत्ति असंखं संखं गुणं तत्तो॥ १००॥

पूर्णजघन्यं ततोवरमपूर्णस्य पूर्णोत्कृष्टं।
द्विपूर्णजघन्यमिति असंख्यं संख्यं गुणं ततः॥ १००॥

जी० प्र०—तदग्रे दशमे कोष्ठे पर्याप्तकपंचजीवसमासानां जघन्यावगाहनस्थानानि भवंति। ततस्तदग्रे एकादशे कोष्ठे अपर्याप्तकपंचजीवसमासानामुत्कृष्टावगाहनस्थानानि भवंति। तदग्रे द्वादशे कोष्ठे पर्याप्तकपंचजीवसमासानां उत्कृष्टावगाहनस्थानानि भवंति। तत्र दशमकोष्ठगतवादरपर्याप्तद्वींद्रियजघन्यावगाहनपर्यंतानि एकान्नत्रिंशदवगाहनानि असंख्यातगुणितक्रमाणि। तदग्रे वादरपर्याप्तसकलेंद्रियपर्यंतानि त्रयोदश तु संख्यातगुणितक्रमानीति ज्ञातव्यानि॥ १००॥

मं० प्र०—ततः अग्रे प्रथमपंक्तिगतानामप्रतिष्ठितप्रत्येकादीनां पंचानां पर्याप्तकजीवानां अवगाहनानि जघन्यानि। ततः द्वितीयाग्रपंक्तिगतानां त्रींद्रियादीनां पंचानामपर्याप्तकजीवानामवगाहनान्युत्कृष्टानि। ततस्तृतीयाग्रपंक्तिगतानां त्रींद्रियादीनां पंचानां पर्याप्तकजीवानां अवगाहनानि उत्कृष्टानि। सूक्ष्मनिगोदलब्ध्यपर्याप्तकजघन्यशरीरावगाहनादारभ्य पर्याप्तकद्वींद्रियजघन्यशरीरावगाहनपर्यंतानि एकोनत्रिंशच्छरीरावगाहनानि असंख्येयगुणानि। ततस्त्रींद्रियादिपंचेंद्रियपर्यंतानां जीवानां त्रयोदशशरीरावगाहनानि संख्येयगुणानि ज्ञातव्यानि॥ १००॥

सं० चं०—ताके आगैं दशवां कोठाविषैं प्राप्त पर्याप्त पांच जीवसमासनिकी जघन्य अवगाहनाके स्थान हैं। बहुरि तहांतैं आगैं ग्यारह्वां कोठाविषैं अपर्याप्त पांच जीवसमासनिकी उत्कृष्ट अवगाहनाके स्थान हैं। बहुरि ताके आगे वारह्वां कोठाविषैं पर्याप्त पंच जीवसमासनिकी उत्कृष्ट अवगाहनाके स्थान हैं। ऐसैं ए कहे स्थान ति-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निविषैं प्रथम कोठाविषैं प्राप्त सूक्ष्म अपर्याप्तनिगोदिया जीवकी जघन्य अवगाहनातैं लगाइ दशवां कोठाविषै प्राप्त बादरपर्याप्त द्वींद्रियजीवकी जघन्य अवगाहनापर्यंत ऊपरिकी पंक्तिसंबंधी गुणतीस अवगाहनाके स्थान ते असंख्यात असंख्यातगुणा क्रम लीएं है। बहुरि तिसतैं आगै बादरपर्याप्त पंचेंद्रियकी उत्कृष्ट अवगाहनापर्यंत तेरह अवगाहनाके स्थान ते संख्यातगुणां संख्यातगुणां अनुक्रम लीए हैं ऐसा जानना।

सुहमेदरगुणगारो आवलिपल्ला असंखभागो दु।
सट्ठाणे सेढिगया अहिया तत्थेकपडिभागो ॥ १०१ ॥

सूक्ष्मेतरगुणकार आवलिपल्यासंख्येयभागस्तु।
स्वस्थाने श्रेणिगता अधिकास्तत्रैकप्रतिभागः ॥ १०१ ॥

अब एकेंद्रिय लब्धि अपर्याप्तके निरंतर क्षुद्रभव कहे तिनकी संख्या स्वामीनिकी अपेक्षा कहे हैं--

पुढविदगागणिमारुदसाहारणथूलसुहमपत्तेया ।
एदेसु अपुण्णेसु य एक्केक्के वार खं छक्कं ॥ १२५ ॥

पृथ्वीदकाग्निमारुतसाधारणस्थूलसूक्ष्मप्रत्येकाः ।
एतेषु अपूर्णेषु च एकैकस्मिन् द्वादश खं षट्कं ॥ १२५ ॥

जी० प्र०---पृथिव्यप्तेजोवायुसाधारणवनस्पतयः पंचापि प्रत्येकं बादरसूक्ष्मभेदेन दश तथा प्रत्येकवनस्पतिश्चेत्येतेषु एकादशसु लब्ध्यपर्याप्त

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भेदेषु एकैकस्मिन् भेदे प्रत्येकं द्वादशोत्तरषट्सहस्री निरंतरक्षुद्रभवा भवंतीति एकादशभिः एकेंद्रियलब्ध्यपर्याप्तकस्य निरंतरक्षुद्रभवेषु ६६१३२ भक्तेषु एकस्य प्रागुक्तं 'वार खं छक्कमिति ६०१२ निरंतरक्षुद्रभवप्रमाणमागच्छति। उक्तसर्वनिरंतरक्षुद्रभवसंख्यां तत्कालादिप्रमाणं च निर्णेतुं चतुर्धापवर्तनं दर्श्यते तद्यथा--यद्येकक्षुद्रभवस्य उच्छ्वासाष्टादशैकभागकालः तदा षड्त्रिंशत्त्रिशतोत्तरषट्षष्टिसहस्र ६६३३६ निरंतरक्षुद्रभवानां कियंत उच्छ्वासाः ? इति संपाते सति प्र, भ १। फ, उ १/१८। इ, भ ६६३३६ लब्धोच्छ्वासाः ३६८५ १/३ इत्ययमंतर्मुहूर्तो ग्राह्यः।

आढ्यानलसानुपहतमनुजोच्छ्वासैस्त्रिसप्तसप्तत्रिमितैः ३७७३। आहुर्मुहूर्तमंतर्मुहूर्तमष्टाष्टवर्जितैस्त्रिभागयुतैः॥ इति वचनात्
आयुरंतर्मुहूर्तः स्यादेषोस्याष्टादशांशकः। उच्छ्वासस्य जघन्यं च नृतिरश्चां लब्ध्यपूर्णके॥

इत्युक्तोच्छ्वासाष्टादशैकभागमात्रस्यैकक्षुद्रभवः, तदा एतावतां उच्छ्वासानां कति क्षुद्रभवाः ? इति संपाते प्र उ १/१८। फ भ १। इ उ ३६८५ १/३। लब्धक्षुद्रभवाः ६६३३६, पुनः इयतां क्षुद्रभवानां ६६३३६ यदि इयंत उच्छ्वासाः ३६८५ १/३ तदा एकक्षुद्रभवस्य किमिति त्रैराशिके कृते लब्धैकक्षुद्रभवकालः उ १/१८, पुनरियतः कालस्य ३६८५ १/३ इयंतो भवाः ६६३३६ तदा इयतः कालस्य उ १/१८ कति भवाः ? इति संपातेन लब्धभवः १, एवमेकभवस्य तत्कालस्य समस्तभवानां तत्कालानां च क्रमशः प्रमाणराशिकरणात् चतुर्धा त्रैराशिकं सर्वत्र यथासंभवं ज्ञातव्यं॥ १२५॥ अथ समुद्घातकेवलिनः अपर्याप्तत्वसंभवमाह---

मं० प्र०---पृथ्वीदकाग्निमारुतसाधारणानां स्थूलानां सूक्ष्माणां च दशानां, प्रत्येकस्य च, एतेषामेकादशानां लब्ध्यपर्याप्तकानां एकैकस्य अव्यवहिताः क्षुद्रभवाः उत्कर्षेण द्वादशोत्तरषट्सहस्राणि। ६०१२। एकेंद्रियभवेषु एकादशसु भक्तेषु लब्धाः पृथ्वीकायिकाद्येकैकलब्ध्यपर्याप्तकभवा एतावंतो भवंति एतेभ्योऽधिकानि न भवंतीत्यर्थः॥ १२५॥

सं० च०--पृथ्वी १ अप २ तेज ३ वायु ४ साधारण वनस्पति ५ इनि पांचोंके सूक्ष्म वादरकरि दश भेद भये अर एक प्रत्येक वनस्पती इनि ग्यारह लब्धि अपर्याप्तकनिविषैं एक एक भेदविषैं वारह विंदी छह इनि अंकनिकरि छह हजार वारह ६०१२ निरंतर क्षुद्रभव जानने। पूर्वैं निरंतर क्षुद्रभव एकेंद्रियके छ्यासठिहजार एकसौ वत्तीस कहे तिनिकौं ग्यारहका भाग दीए एक एक के छहहजार बारह क्षुद्र भवनिका प्रमाण आवै है। ऐसैं लब्धि अपर्याप्तके निरंतर

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षुद्रभव कहे तहां तिनकी संख्या वा कालका निर्णय करनेकौं च्यारि प्रकार अपवर्तन त्रैराशिक करि दिखावै हैं सो त्रैराशिकका स्वरूप ग्रंथका पीठबंधविषैं कह्या था सो जानना। सो इहां दिखाइये है जो एक क्षुद्रभवका काल सासका अठारवां भाग होइ तो छ्यासठि हजार तीनसौ छत्तीस निरंतर क्षुद्रभवनिका कितना काल होइ तहां प्रमाणराशि १ फलराशि एकका अठारहवां भाग $\frac{1}{18}$ अर इच्छा राशि छ्यासठि हजार तीनसै छत्तीस ६६३३६ तहां फलकौं इच्छाकरि गुणैं प्रमाणका भाग दिये लब्ध राशिविषैं छत्तीससै पिच्यासी अर एक त्रिभाग $3685\frac{1}{3}$ इतना उस्वास भए ऐसैं सब क्षुद्रभवनिका कालका परिमाण भया इहां इतने प्रमाण अंतर्मुहूर्त जानना। जातैं ऐसा वचन है। उक्तं च–

आढ्यानलसानुपहतमनुजोच्छ्वासैस्त्रिसप्तसप्तात्रिमितैः।
आहुर्मुहूर्तमंतर्मुहूर्तमष्टाष्टवर्जितैस्त्रिभागयुतैः॥

याका अर्थ–सुखी धनवान आलस रहित नीरोगी मनुष्यका सैंतीससै तेहत्तरि ३७७३ उस्वासनिका एक मुहूर्त तहां अठ्यासी उस्वास अर एक उस्वासका तीसरा भाग हीन घटाए सर्व क्षुद्रभवनिका काल अंतर्मुहूर्त होइ। बहुरि उक्तंच–

आयुरंतर्मुहूर्तः स्यादेषोस्याष्टादशांशकः।
उच्छ्वासस्य जघन्यं च नृतिरश्चां लब्ध्यपूर्णके॥

याका अर्थ–लब्धि अपर्याप्तक मनुष्य तिर्यंचनिका आयु एक उस्वासका अठारहवां भाग प्रमाण अंतर्मुहूर्तमात्र है सो ऐसैं कह्या एक सासका अठारहवां भाग कालका एक क्षुद्रभव होइ तौ छत्तीससै पिच्यासी अर एकका त्रिभागप्रमाण उसासनिका कितना क्षुद्रभव होइ इहां प्रमाण राशि $\frac{1}{18}$ फलराशि १ इच्छाराशि $3685\frac{1}{3}$ यथोक्त करतैं लब्धि राशि ६६३३६ छ्यासठि हजार तीनसै छत्तीस क्षुद्रभवनिका परिमाण आया बहुरि जो छ्या-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सठि हजार तीनसै छत्तीस क्षुद्रभवनिका काल छत्तीससै पिच्यासी अर एकका त्रिभाग इतना उस्वास होइ तौ एक क्षुद्रभवका कितना काल होइ। इहां प्रमाणराशि ६६३३६ फलराशि ३६८५ $\frac{१}{३}$ इच्छाराशि १ यथोक्तकरतां लब्धराशि एक सांसका अठारहवां भाग $\frac{१}{१८}$ एक क्षुद्रभवका काल भया। बहुरि छत्तीससै पिच्यासी अर एकका त्रिभाग ३६८५ $\frac{१}{३}$ इतना सासांका छ्यासठि हजार तीनसै छत्तीस क्षुद्रभव हौंइ तौ सांसका अठारहवां भागका कितना क्षुद्रभव होइ इहां प्रमाण राशि ३६८५ $\frac{१}{३}$ फलराशि ६६३३६ इच्छाराशि एकका अठारहवां भाग $\frac{१}{१८}$ यथोक्तकरतां लब्धराशि १ क्षुद्रभव हूआ। इहां सर्व फलराशिकौं इच्छा राशिकरि गुणना, प्रमाण राशिका भाग देना तब लब्धराशिका प्रमाण हो है। ऐसैं एक क्षुद्रभव अर एक क्षुद्रभवका काल अर समस्त क्षुद्रभव समस्त क्षुद्रभवका काल इनिकौं क्रमतैं प्रमाणराशि करनेतैं च्यारि प्रकार त्रैराशिक किया है और भी जहां त्रैराशिकका वर्णन होइ तहां ऐसैं ही यथासंभव जानना ॥ १२५ ॥ आगैं समुद्घातकेवलीके अपर्याप्तपनैका संभव कहै हैं—

पज्जत्तसरीरस्स य पज्जत्तुदयस्स कायजोगस्स।
जोगिस्स अपुण्णत्तं अपुण्णजोगोत्ति णिद्दिट्ठं ॥ १२६ ॥

पर्याप्तशरीरस्य च पर्याप्त्युदयस्य काययोगस्य।
योगिनोऽपूर्णत्वमपूर्णयोगः इति निर्दिष्टं ॥ १२६ ॥

जी॰ प्र॰—परिपूर्णपरमौदारिकशरीरस्य पर्याप्तनामकर्मोदययुतस्य काययोगयुक्तस्य सयोगकेवलिभट्टारकस्य आरोहणावरोहणकपाटद्वये सम्भूते कथितमपूर्णत्वं अपूर्णकाययोग इति। ततः कारणादौदारिकमिश्रकाययोगाक्रांतः सयोगकेवलिभट्टारकः कपाटयुगलकाले अपर्याप्ततां भजतीति प्रवचने निर्दिष्टं-कथितं ॥ १२६ ॥ अथ लब्ध्यपर्याप्तकादीनां गुणस्थानेषु संभवासंभवप्रकारमाह—

मं॰ प्र॰—पर्याप्तशरीरस्य पर्याप्तनामकर्मोदयवतः काययोगिनः-योगिनः-सयोगकेवलिनः समुद्घातकाले कवाटयुगले प्रतरयुगले लोकपूरणे च पंचसु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समयेषु अपूर्णत्वं–अपर्याप्तत्वं कथं संभवति ? इति प्रश्ने, अपूर्णयोग एव औदारिकमिश्रकार्माणयोगसद्भाव एव तस्य उपचारतः अपर्याप्तत्वं न मुख्यतः तत एव निर्वृत्यपर्याप्तकगुणस्थानानि प्रथमद्वितीयचतुर्थषष्ठानि चत्वार्येवेति परमागमे नियमवचनादित्युत्तरं पूर्वाचार्यैर्निर्दिष्टं ॥ १२६ ॥

सं० च०—संपूर्ण परम औदारिक शरीर जाकैं पाइए बहुरि पर्याप्ति नामा नामकर्मका उदयकरि संयुक्त बहुरि काय योगका धारी ऐसा जो सयोगकेवली भट्टारक ताके समुद्घात करतैं कपाटका करिवा विषैं अर संहार विषैं अपूर्ण काययोग कह्या है जातैं तहां संज्ञी पर्याप्तवत् पर्याप्तिनिका आरंभकरि क्रमतैं निष्ठापन करै हैं तातैं औदारिक मिश्र काय योगका धारी केवली भगवान सो कपाट युगलका कालविषैं अपर्याप्तपनाकौं भजै है ऐसा सिद्धांतविषैं कह्या है ॥ १२६ ॥ आगैं लब्धि अपर्याप्तकादि जीवनिकैं गुणस्थाननिका संभवने असंभवनेका विशेष कहै हैं—

लद्धिअपुण्णं मिच्छे तत्थवि विदिये चउत्थछट्ठे य ।
णिव्वत्तिअपज्जत्ती तत्थवि सेसेसु पज्जत्ती ॥ १२७ ॥

लब्ध्यपूर्णं मिथ्यात्वे तत्रापि द्वितीये चतुर्थषष्ठे च ।
निर्वृत्त्यपर्याप्तिस्तत्रापि शेषेषु पर्याप्तिः ॥ १२७ ॥

जी० प्र०—लब्ध्यपर्याप्तकजीवो मिथ्यादृष्टिगुणस्थाने एव संभवति नान्यगुणस्थाने सासादनत्वादिविशेषगुणानां तस्याभावात् । पुनः तत्रापि–मिथ्यादृष्टिगुणस्थानेऽपि द्वितीये–सासादनगुणस्थाने, चतुर्थे–असंयतगुणस्थाने, षष्ठे–प्रमत्तगुणस्थाने चेति चतुर्षु गुणस्थानेषु निर्वृत्यपर्याप्तकजीवः संभवति, नान्यगुणस्थानेषु । मिथ्यादृष्टयसंयतगुणस्थानमृताश्चतुर्गतिषु, सासादनगुणस्थानमृता नरकवर्जितगतिषु चोत्पद्यंते, ततस्तद्गुणस्थानत्रये तदुत्पत्तिप्रथमसमयादारभ्य समयोनौदारिकवैक्रियिकशरीरपर्याप्तिकालपर्यंतं तथा प्रमत्तसंयतस्य समयोनाहारकशरीरपर्याप्तिकालपर्यंतं च निर्वृत्त्यपर्याप्तकत्वसंभवात् । पुनस्तत्रापि–उक्तगुणस्थानचतुष्टयेऽपि शेषेषु मिश्रदेशसंयताप्रमत्तादिसयोगकेवलिपर्यंतगुणस्थानेषु च पर्याप्तकजीवः संभवति तत्कारणस्य पर्याप्तिनामकर्मोदयस्य तत्र सर्वत्र संभवात् ॥१२७॥ अथापर्याप्तकाले सासादनासंयतयोर्नियमेन अभावस्थानान्याह—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं० प्र०---लब्ध्यपर्याप्तकः मिथ्यादृष्टिगुणस्थाने एवं नोत्तरत्र । सासादनस्य तत्रोत्पत्त्यभावात् । सम्यग्मिथ्यात्वोदयस्य दर्शनमोहोपशमस्य देशसंयमस्य सकलसंयमस्य च लब्ध्यपर्याप्तेकष्वसंभवात् । निर्वृत्त्यपर्याप्तः तत्र मिथ्यादृष्टिगुणस्थाने द्वितीयसासादने चतुर्थे असंयते षष्ठेऽपि च प्रमत्ते एतेष्वेव भवति नोत्तरगुणस्थानेषु सम्यग्मिथ्यात्वोदयस्य देशसंयमादेश्च निर्वृत्त्यपर्याप्तकाले असंभवात् । प्रमत्तसंयमस्य तत्र कथं संभव इति चेदाहारकशरीरप्रारंभसमयादारभ्य तन्निर्वृत्त्यपर्याप्तिपर्याप्त्योः प्रमत्तसंयतगुणस्थाने एव संभव इति परमागमे प्रसिद्धत्वात् । ऋद्धिप्राप्तानामप्रमत्ताद्युपरितनगुणस्थानेषु ऋद्धिप्रयोगासंभवात् । तत्र उक्तगुणस्थानेषु शेषेष्वप्यनुक्तगुणस्थानेषु सर्वेष्वपि पर्याप्तिः संभवति पर्याप्तिनामकर्मणः सर्वत्रोदयसंभवात् ॥ १२७ ॥

सं० च०--लब्धि अपर्याप्तक जीव मिथ्यादृष्टि गुणस्थान ही विषैं पाइए है और गुणस्थान वाकैं संभवै नाही जातैं सासादनपना आदि विशेष गुणनिका ताकैं अभाव है । बहुरि तींहि पहिला मिथ्यादृष्टिविषैं दूसरा सासादन विषैं चौथा असंयतविषैं छठा प्रमत्तविषैं इनि च्यारौ गुणस्थाननिविषैं निवृत्ति अपर्याप्तक पाइए है तहां पहला वा चौथासूं तौ मरिकरि जीव चारौं गतिनिविषैं उपजै है अर सासादनसौं मरिकरि नरक विना तीनि गतिविषै उपजै है सो इनि तीनों गुणस्थाननिविषैं जन्मका प्रथमसमयतैं लगाइ यावत् औदारिक वैक्रियिक शरीर पर्याप्ति पूर्ण न होइ तावत् एक समय घाटि शरीर पर्याप्तिका काल पर्यंत निवृत्ति अपर्याप्तक है । बहुरि प्रमत्त गुणस्थानविषै यावत् आहारक शरीरपर्याप्ति पूर्ण न होइ तावत् एक समय घाटि आहारक शरीर पर्याप्ति काल पर्यंत निवृत्ति अपर्याप्तक है । बहुरि इन कहे च्यारौं गुणस्थाननिविषैं अर अवशेष रहे मिश्रादिक सयोगी पर्यंत नव गुणस्थाननिविषैं पर्याप्तक जीव पाइए है जातैं ताका कारणभूत पर्याप्ति नामा नामकर्मका उदय सर्वत्र संभवै है । भावार्थ--लब्धि अपर्याप्तकनिकै गुणस्थान एक पहिला निवृत्ति अपर्याप्तकनिकै गुण स्थान च्यारि पहिला दूसरा चौथा छठ्ठा पर्याप्तकनिकैं गुणस्थान सर्वसयोगी पर्यंत जानने ॥ १२६ ॥ आगैं अपर्याप्तकालविषैं सासादन अर असंयत गुणस्थान जहां नियमकरि न संभवै सो कहे हैं--

हेट्ठिमछप्पुणवीणं जोइसिवणभवणसव्वइत्थीणं ।
पुण्णिदरे णहि सम्मो ण सासणो णारयापुण्णे ॥ १२८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अधस्तनषट्पृथ्वीनां ज्योतिष्कवानभवनसर्वस्त्रीणां ।
पूर्णेतरस्मिन् नहि सम्यक्त्वं न सासनो नारकापूर्णे ॥ १२८ ॥

जी॰ प्र॰—नरकगतौ रत्नप्रभारहितशेषषड्भूमिनारकाणां ज्योतिर्व्यंतरभावनदेवानां सर्वतिर्यग्मनुष्यदेवस्त्रीणां च निर्वृत्त्यपर्याप्तके सम्यग्दृष्टिर्नहि नास्त्येव, तदा तद्ग्रहणयोग्यकालाभावात् सम्यक्त्वेन सह मृतस्य तिर्यग्मनुष्यस्य तत्रोत्पत्त्यभावाच्च । मरणे विराधितसम्यक्त्वमिथ्यादृष्टिसासादनानां यथासंभवं तत्रोत्पत्तौ विरोधाभावात् । सप्तपृथ्वीनारकनिर्वृत्त्यपर्याप्तके सासादनसम्यग्दृष्टिर्नास्ति तस्य नरके गमनाभावात् । तत्रोत्पन्नस्य तु तस्मिन् काले सासादनत्वसंभवाभावाच्च ॥ १२८ ॥

इत्याचार्यश्रीनेमिचंद्रविरचितायां गोम्मटसारापरनामपंचसंग्रहवृत्तौ तत्त्वप्रदीपिकाख्यायां जीवकांडे विंशतिप्ररूपणासु पर्याप्तिप्ररूपणानामतृतीयोऽधिकारः ॥ ३ ॥

मं॰ प्र॰—अधस्तनीषु शर्कराप्रभादिषु षट्सु पृथ्वीषु नारकेषु ज्योतिष्कवानभावनेषु सर्वस्त्रीषु च गतित्रयवर्तिनीषु पूर्णेतरस्मिन् निर्वृत्त्यपर्याप्तके सम्यग्दृष्टिर्न संभवति प्राग्गृहीतसम्यक्त्वस्य तत्रोत्पत्त्यभावात् । निर्वृत्त्यपर्याप्तकाले तत्र सम्यक्त्वग्रहणाभावाच्च । पर्याप्तकस्यैव सम्यक्त्वग्रहणयोग्यत्वात् । नारकापर्याप्तके सासादनो नास्त्येव । सासादनस्य नरकगमनाभावात् । बद्धायुषः औपशमिकसम्यग्दृष्टेरपि सम्यक्त्वेन सह तत्र गमनाभावात् ॥ १२८ ॥

इति श्रीमदभयचंद्रसूरिसिद्धांतचक्रवर्तिकृतौ गोम्मटसारपंचसंग्रहवृत्तौ पर्याप्तिप्ररूपणा नाम तृतीयोऽधिकारः ॥ ३ ॥

सं॰ चं॰—नरक गतिविषैं रत्नप्रभा विना छह पृथ्वी संबंधी नारकीनिकैं अर ज्योतिषी व्यंतर भवन वासी देवनिके अर सर्व ही स्त्री देवांगना मनुष्यणी तिर्यंचनी तिनिकैं निर्वृत्ति अपर्याप्त दशाविषैं सम्यक्त्व न पाइए जातैं तींहि दशाविषैं सम्यक्त्वका ग्रहणेंकौं योग्य काल नाहीं अर सम्यक्त्व सहित मरै तिर्यंच मनुष्य सो तहां उपजै नाहीं बहुरि सम्यक्त्वतैं भ्रष्ट होइ जो जीव मिथ्यादृष्टी वा सासादन होइ तो तिनिका यथासंभव तहां नरकादिविषैं उपजनेका विरोध है नाहीं बहुरि सर्व ही सातौं पृथ्वीके नारकी तिनिकैं निर्वृत्ति अपर्याप्त दशाविषैं सासादन गुणस्थान न पाइए ऐसा नियम जानना जातैं नरकविषैं उपज्या जीवके तिसकालविषैं सासादनपनेका अभाव है ॥ १२८ ॥

इति श्रीआचार्य नेमिचंद्रसिद्धांतचक्रवर्तिविरचित गोम्मटसार द्वितीय नाम पंचसंग्रहग्रंथकी जीवतत्त्वप्रदीपिका नाम संस्कृत टीकाके अनुसारि इस सम्यग्ज्ञान चंद्रिका नामा भाषाटीका विषैं जीवकांडविषै प्ररूपित जे वीस प्ररूपणा तिनिविषैं पर्याप्तिप्ररूपणा नामा तीसरा अधिकार पूर्ण भया ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ प्राणप्ररूपणाधिकारः ॥ ४ ॥

विषघिं प्रकृतीर्हत्वा लब्ध्वार्हंत्यं जगन्नुतं ।
शास्ति भव्यान् द्विधा धर्मं यस्तं वंदेऽभिनंदनं ॥ ४ ॥

अथ प्राणप्ररूपणां निरूपयति—

वाहिरपाणेहिं जहा तहेव अब्भंतरेहिं पाणेहिं ।
पाणंति जेहिं जीवा पाणा ते होंति णिद्दिट्ठा ॥१२९॥

वाह्यप्राणैर्यथा तथैवाभ्यंतरैः प्राणैः ।
प्राणंति यैर्जीवाः प्राणास्ते भवंति निर्दिष्टाः ॥ १२९ ॥

जी० प्र०---यैरभ्यंतरैर्भावप्राणैः जीवाः जीवंति--जीवद्व्यवहारयोग्या भवंति कैरिव ? वाह्यैर्द्रव्यप्राणैरिव यथाशब्दस्य इवार्थवाचकत्वात् ते आत्मनो धर्माः प्राणाः भवंतीति निर्दिष्टाः । इति निर्वचनेनैव प्राणशब्दार्थस्य ज्ञातुं शक्यत्वात् तल्लक्षणं पृथग् नोक्तं । पौद्गलिकद्रव्येंद्रियादिव्यापाररूपाः द्रव्यप्राणाः । तन्निमित्तभूतज्ञानावरणवीर्यांतरायक्षयोपशमादिविजृंभितचेतनव्यापाररूपा भावप्राणाः । अत्र पर्याप्तिप्राणयोः को भेदः ? इति चेदुच्यते--पंचेंद्रियावरणक्षयोपशमजाः पंचेंद्रियप्राणाः तदुत्पन्नार्थग्रहणसमर्थत्वेनोत्पन्नप्रथमसमयादारभ्य अंतर्मुहूर्तस्योपरि जायमाना इंद्रियपर्याप्तिः । मनोज्ञानावरणक्षयोपशमसन्निधानविजृंभितमनोवर्गणाविरचितद्रव्यमनःसमुत्पन्ना जीवशक्तिः सानुभूतार्थग्रहणसमुत्पन्नांतर्मुहूर्तावसाननिष्पन्ना मनःपर्याप्तिः । अनुभूतार्थग्रहणं तद्योग्यता च मनःप्राणः । नोकर्मशरीरोपचीयमानशक्तिनिष्पत्तिः जीवस्य समुचितकालायातभाषावर्गणाविशेषपरिणतिविधायिभाषापर्याप्तिः । स्वरनामकर्मोदयसहकारिभाषापर्याप्त्युत्तरकालविशिष्टोपयोगप्रयोजनात्मको वाक्प्राणः । कायवर्गणावष्टंभजनितात्मप्रदेशप्रचयशक्तिः कायबलप्राणः । नोकर्मपुद्गलान् खलरसभागपरिणतान् अस्थ्यादिरुधिरादिस्थिरास्थिरावयवरूपेण परिणमयितुं शक्तिनिष्पत्तिर्जीवस्य शरीरपर्याप्तिः । उच्छ्वासनिःश्वासनिःसरणशक्तिनिष्पत्तिरानपानपर्याप्तिः । तत्परिणतिरेव तत्प्राणाः, इति भेदो ज्ञातव्यः ॥ १२९ ॥ अथ प्राणभेदानाह—

तुर्यं तीर्थकृतां धुर्यं हितसद्देशनाकृतं ।
वर्यं लोकत्रयेशानामभिनंदनमाश्रये ॥ ४ ॥

मं० प्र०---

अथ प्राणप्ररूपणार्थं शास्त्रकारो गाथापंचकमाह—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यथा वाह्यप्राणैः—अभ्यंतरप्राणकार्यैर्नयनोन्मीलनादींद्रियव्यापारकायचेष्टावाग्व्यापारोच्छ्वासनिश्वासप्रवृत्तिरूपैर्जीवाः प्राणंति–जीवंति तथा अभ्यंतरैः–इंद्रियावरणक्षयोपशमादिभिर्यैर्जीवाः जीवंति जीवद्व्यवहारयोग्या भवंति ते प्राणा इति पूर्वाचार्यैर्निर्दिष्टा भवंति तथैवेत्येवकारः जीवद्व्यवहारसाम्यसूचनार्थः ॥ १२९ ॥

सं० च०— अभिनंदन वंदौं सदा त्रेसठि प्रकृति खिपाय।
जगतनमतपद पाय जिन धर्म कह्यो सुखदाय ॥ ४ ॥

अथ प्राण प्ररूपणाकों निरूपै हैं—

जिनि अभ्यंतर भाव प्राणनिकरि जीव हैं ते प्राणंति कहिए जीवै हैं जीवनके व्यवहार योग्य हो हैं कौन वत् जैसैं वाह्य द्रव्य प्राणनिकरि जीव जीवै है जातैं यथा शब्द दृष्टांतवाचक हैं तातैं जे आत्माके भाव हैं तेई प्राण हैं ऐसा कह्या है। ऐसे कहनेकरि ही प्राण शब्दका अर्थका जाननेका समर्थपणा हो है तातैं तिस प्राणका लक्षण जुदा न कह्या है। तहां पुद्गल द्रव्यकरि निपजे जे द्रव्य इंद्रियादिक तिनके प्रवर्तन रूप तो द्रव्य प्राण हैं। बहुरि तिनिका कारणभूत ज्ञानावरण अर वीर्यांतरायके क्षयोपशमादिकतैं प्रगट भए चैतन्य उपयोगके प्रवर्तनरूप भाव प्राण हैं। इहां प्रश्न-जो पर्याप्ति अर प्राणविषैं भेद कहा ? ताका समाधान-पंच इंद्रियनिका आवरण का क्षयोपशमतैं निपजे ऐसे पांच इंद्रिय प्राण हैं। बहुरि तिस क्षयोपशमतैं भया जो पदार्थनिके ग्रहणका समर्थपना ताकरि जन्मका प्रथमसमयतैं लगाइ अंतर्मुहूर्त ऊपरि निपजै ऐसी इंद्रिय पर्याप्ति है। इहां कारण कार्यका विशेष है। बहुरि मनसंबंधी ज्ञानावरणका क्षयोपशमका निकटतैं प्रगट भई ऐसी मनोवर्गणाकरि निपज्या द्रव्यमन करि निपजी जो जीवकी शक्ति सो अनुभया पदार्थको ग्रहणकरि उपजी सो अंतर्मुहूर्त मनःपर्याप्तिकालके अंति संपूर्ण भई ऐसी मनः पर्याप्ति है बहुरि अनुभया पदार्थका ग्रहणकरना अर अनुभया पदार्थका ग्रहण करनेका योग्यपनाका होना सो मनः प्राण है। बहुरि नोकर्मरूप शरीरका संचयरूप शक्तिकी जो संपूर्णता सो जीवके योग्य कालविषैं प्राप्त भई जो भाषा वर्गणा तिनिकौं विशेष परिणमनकी करणहारी सो भाषा पर्याप्ति- ३४२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

है। बहुरि स्वर नामा नामकर्मका उदय है सहकारी जाका ऐसी भाषा पर्याप्ति पूर्ण भएं पीछैं वचनका विशेष रूप उपयोगादिकका परिणमावना तींहि स्वरूप वचन प्राण है। बहुरि कायवर्गणाका अवलंबन करि निवजी जो आत्माके प्रदेशनिका समुच्चय रूप होनेकी शक्ति सो कायबल प्राण है। बहुरि खल भाग रसभाग रूप परिणए नोकर्मरूप पुद्गलनिकौं हाड आदि स्थिर रूप अर रुधिर आदि अस्थिर रूप अवयवकरि परिणवामनेकी शक्तिका संपूर्ण होना सो जीवके शरीरपर्याप्ति है। बहुरि उस्वास निस्वासके निकसनेकी शक्तिका निपजना सो आनपान पर्याप्ति है। बहुरि सासोस्वासका परिणमन सो सासोस्वास प्राण है ऐसैं कारण कार्यादिका विशेष करि पर्याप्ति अर प्राणनिविषैं विशेष जानना ॥ १२९ ॥ आगैं प्राणके भेदनिकौं कहै हैं—

पंचवि इंदियपाणा मणवचकायेसु तिण्णि बलपाणा।
आणापाणप्पाणा आउगपाणेण होंति दह पाणा ॥१३०॥

पंचापि इंद्रियप्राणाः मनोवचःकायेषु त्रयो बलप्राणाः।
आनपानप्राणा आयुष्कप्राणेन भवंति दश प्राणाः ॥ १३० ॥

जी० प्र०—स्पर्शनाद्यः पंचेंद्रियप्राणाः मनोबलप्राणः वचोबलप्राणः कायबलप्राणः आनापानप्राण आयुःप्राणश्चेति दशैव प्राणा भवंति नाधिकाः ॥ १३० ॥ अथ द्रव्यभावप्राणानामुत्पत्तिसामग्रीमाह—

मं० प्र०—स्पर्शनरसनघ्राणचक्षुःश्रोत्रनामेंद्रियप्राणाः पंच। मनोवचःकायेषु बलप्राणास्त्रयः। आनपानप्राण एकः। आयुःप्राणेनैकेन सह मिलिताः सर्वेऽपि प्राणा दशैव नोनाधिका भवंति। तत्र एवकारो द्रव्येंद्रियाणां अन्नपानादीनां च परमार्थतः प्राणत्वव्यवच्छेदसूचनार्थः ॥ १३० ॥

सं० च०—पांच इंद्रिय प्राण हैं स्पर्शन १ रसन २ घ्राण ३ चक्षु ४ श्रोत्र ५ बहुरि तीन बलप्राण हैं मनोबल १ वचनबल २ कायबल ३ बहुरि एक आनपान कहिए सासोस्वास प्राण है। बहुरि एक आयु प्राण है। ऐसैं प्राण दश हैं अधिक नाहीं है ॥ १३० ॥ आगै तिनि द्रव्यभाव प्राणनिका उपजनेकी सामग्रीकौं कहैं हैं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वीरियजुदमदिखउवसमुत्था णोइंदियेंदियेसु बला ।
देहुदये कायाणा वचीवला आउ आउदये ॥ १३१ ॥

वीर्ययुतमतिक्षयोपशमोत्था नोइंद्रियेंद्रियेषु बलाः ।
देहोदये कायानौ वचोवला आयुः आयुरुदये ॥ १३१ ॥

जी० प्र०—वीर्यांतरायक्षयोपशमयुतमतिज्ञानावरणक्षयोपशमजनिताः नोइंद्रियेंद्रियेषु बलाः स्वार्थग्रहणशक्तिरूपलब्धिनामभावेंद्रियस्वभावाः स्पर्शनरसनघ्राणचक्षुःश्रोत्रजेंद्रियप्राणनोइंद्रियजमनोवलप्राणाः षट् भवंति । देहोदये-शरीरनामकर्मोदये सति कायचेष्टाजननशक्तिरूपः कायवलप्राणः । उच्छ्वासनिश्वासनामकर्मोदयसहितदेहोदयेसति उच्छ्वासनिश्वासप्रवृत्तिकारणशक्तिरूपः आनपानप्राणश्च भवति । स्वरनामकर्मोदये सति वचनव्यापारकरणशक्तिविशेषरूपो वचोवलप्राणो भवति । आयुःकर्मोदये सति नारकादिपर्यायरूपभवधारणशक्तिरूपः आयुःप्राणो भवति । एवं दशप्राणानामुत्पत्तिसामग्री सूचिता ॥ १३१ ॥ अथ प्राणानां स्वामिभेदमाह--

मं० प्र०—वीर्यांतरायक्षयोपशमयुतमतिज्ञानावरणक्षयोपशमोत्था नोइंद्रियेंद्रियेषु बलाः स्वार्थग्रहणशक्तिरूपलब्धिनामभावेंद्रियस्वभावाः इंद्रियमनोवलप्राणाः षट् ६ । देहोदये–शरीरनामकर्मोदये कायचेष्टाजननशक्तिरूपः कायबलप्राणः ७ । उच्छ्वासनिश्वासनामकर्मोदयसहितदेहोदये सति उच्छ्वासनिश्वासप्रवृत्तिकारणशक्तिरूप आनपानप्राणः ८ । स्वरनामकर्मोदयसहितदेहोदये सति वचनव्यापारकारणशक्तिविशेषरूपोवचोवलप्राणः ९ । आयुःकर्मोदये सति नारकादिपर्यायरूपभवधारणशक्तिरूपः आयुःप्राणः १० एवं दश प्राणाः १० उक्तकारणस्वरूपा भवंति । नन्वेवं पर्याप्तिप्राणयोः को भेदः, द्वयोरपि शक्तिरूपत्वाविशेषात् ? इति चेत्तन्न आहारभाषामनोवर्गणायातपुद्गलस्कंधानां खलरसभागशरीरावयवरूपद्रव्येंद्रियरूपोच्छ्वासनिश्वासरूपभाषारूपद्रव्यमनोरूपपरिणमनकारणात्मकशक्तिनिष्पत्तयः पर्याप्तयः, स्वार्थग्रहणव्यापारकायवाग्व्यापारोच्छ्वासनिश्वासप्रवृत्तिभवधारणरूपजीवद्व्यवहारकारणात्मशक्तिविशेषाः प्राणा इति भिन्नलक्षणलक्षितत्वात् पर्याप्तिप्राणयोर्भेदप्रसिद्धेः ॥ १३१ ॥

सं० चं०--स्पर्शन रसन घ्राण चक्षु श्रोत्रकरि निपजे पांच इंद्रिय प्राण अर नोइंद्रियकरि निपज्या एक मनोबलप्राण ए छहो तो मतिज्ञानावरण अर वीर्यांतराय तिनिके क्षयोपशमतैं हो हैं। बहुरि शरीर नामा नामकर्मके उदय होतैं कायबल अर सासोस्वास प्राण हो है। बहुरि शरीर नामा नामकर्मका उदय होतै अर स्वरनामाकर्मका उदय होतैं वचनवल प्राण हो है। बहुरि आयु कर्मका उदय होतैं आयु प्राण हो है ऐसैं प्राणनिके उपजनेकी सामग्री कही ॥ १३१ ॥ आगैं ए प्राण कौन कौनके पाइए सो भेद कहे हैं--

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

इंदियकायाऊणि य पुण्णापुण्णेसु पुण्णगे आणा।
वीइंदियादिपुण्णे वचीमणो सण्णिपुण्णेव ॥ १३२ ॥

इंद्रियकायायूंषि च पूर्णापूर्णेषु पूर्णके आनः।
द्वींद्रियादिपूर्णे वचो मनः संज्ञिपूर्णे एव ॥ १३२ ॥

जी० प्र०---इंद्रियकायायूंषीति त्रयः प्राणाः पर्याप्तेष्वपर्याप्तेषु च साधारणा भवंति। उच्छ्वासनिश्वासप्राणः पर्याप्तकेष्वेव भवति। तत्कारणोच्छ्वासनामकर्मोदयस्य पर्याप्तकाल एव संभवात्। द्वींद्रियादिषु पंचेंद्रियावसानेषु पर्याप्तेष्वेव वाग्बलप्राणः संभवति तद्धेतुस्वरनामकर्मोदयस्यान्यत्र संभवाभावात्। मनोबलप्राणः पर्याप्तसंज्ञिपंचेंद्रियेष्वेव संभवति तन्निबंधनवीर्यांतरायनोइंद्रियावरणक्षयोपशमस्यान्यत्रासंभवात् ॥ १३२ ॥
अथ प्राणानामेकेंद्रियादिजीवेषु संख्यानियममवधारयति---

मं० प्र०–इंद्रियकायबलायुःप्राणाः त्र्यादयः सप्तपर्यंताः एकद्वित्रिचतुःपंचेंद्रियेषु जीवेषु पूर्णेष्वपूर्णेषु च साधारणाः संभवंति। आनपानप्राणः पुनः पूर्णकेष्वेव संभवति नापर्याप्तकेषु। वचोबलप्राणः द्वींद्रियादिष्वेव पर्याप्तकेष्वेव नैकेंद्रियेषु नाप्यपर्याप्तकेषु। मनोबलप्राणः संज्ञिपंचेंद्रियपर्याप्तकेष्वेव नापर्याप्तकेषु पर्याप्तेष्वपि न विकलेंद्रियेषु। पर्याप्तपंचेंद्रियेष्वपि नासंज्ञिपंचेंद्रियेष्विति नियमार्थ एवकारः ॥ १३२ ॥

सं० च०--इंद्रिय प्राण कायबल प्राण आयु प्राण ए तो तीन प्राण पर्याप्त वा अपर्याप्त दोऊ दशाविषैं समान पाइए हैं। बहुरि सासोस्वास प्राण पर्याप्त दशाविषैं ही पाइए जातैं ताका कारण उच्छ्वास निश्वास नामा नामकर्मका उदय पर्याप्त कालविषैं ही संभवै है। बहुरि वचनबल प्राण वेइंद्रियादिक पंचेंद्रिय पर्यंत जीवनिकै पर्याप्त दशाही विषै पाइये है। जातैं ताका कारणभूत स्वरनामा नामकर्मका उदय अन्यत्र न संभवै है। बहुरि मनबल प्राण सैनी पंचेंद्रियके पर्याप्त दशाविषै ही पाइए है जातैं ताका कारण वीर्यांतराय अर मन आवरणका क्षयोपशम सो अन्यत्र न संभवै है ॥ १३२ ॥ आगैं एकेंद्रियादिक जीवांकै केते केते प्राण पाइये सो कहै हैं–

दस सण्णीणं पाणा सेसेगूणंतिमस्स वेऊणा।

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पज्जत्तेसिदरेसु य सत्त दुगे सेसगेगूणा ॥ १३३ ॥

दश संज्ञिनां प्राणाः शेषैकोनमंतिमस्य द्व्यूनाः।
पर्याप्तेष्वितरेषु च सप्त द्विके शेषकैकोनाः ॥ १३३ ॥

जी० प्र०––समनंतरोक्तस्वामिनियमेनायं विभागो लभ्यते तद्यथा-संज्ञिपंचेंद्रियेषु पर्याप्तकेषु दश प्राणा भवंति। शेषेषु असंज्ञ्यादिषु पश्चादानुपूर्व्या द्वींद्रियावसानेषु पर्याप्तकेषु एकैकोनाः प्राणाः भवंति। तथा हि--असंज्ञिषु मनोरहिता नव। चतुरिंद्रियेषु मनःश्रोत्रेंद्रियावशेषा अष्टौ। त्रींद्रियेषु मनःश्रोत्रचक्षुरिंद्रियावशेषाः सप्त। द्वींद्रियेषु मनःश्रोत्रचक्षुर्घ्राणावशेषाः षट् भवंति। अंतिमे एकेंद्रिये द्वींद्रियोक्तप्राणेषु द्वौ ऊनाविति मनःश्रोत्रचक्षुर्घ्राणरसनवाग्बलप्राणावशेषाश्चत्वारः प्राणा भवंति तथा इतरेषु अपर्याप्तजीवेषु तु संज्ञ्यसंज्ञिपंचेंद्रिययोः प्रत्येकं प्राणाः सप्तैव भवंति। पर्याप्तकालसंभविनां उच्छ्वासवाग्मनोबलप्राणानामत्रासंभवात्। शेषेषु चतुरिंद्रियाद्येकेंद्रियावसानेषु अपर्याप्तेषु यथासंख्यं श्रोत्रचक्षुर्घ्राणरसनेंद्रियावशेषाः षट्पंचचतुस्त्रिसंख्याः प्राणा भवंति ॥ १३३ ॥

इत्याचार्यश्रीनेमिचंद्रविरचितायां गोम्मटसारापरनामपंचसंग्रहवृत्तौ तत्त्वप्रदीपिकाख्यायां जीवकांडे विंशतिप्ररूपणासु प्राणप्ररूपणानाम चतुर्थोऽधिकारः ॥४॥

मं० प्र०––संज्ञिपंचेंद्रियाणामेव दश प्राणा भवंति। शेषेष्वसंज्ञिपंचेंद्रियचतुस्त्रिद्व्येकेंद्रियेषु पर्याप्तेषु एकैकोनाः मनोबलश्रोत्रचक्षुर्घ्राणहीनाः प्राणा भवंति। अंतिमस्य द्व्यूनाः रसनवचोबलहीना प्राणाः क्रमेण असंज्ञ्यादिषु एकेंद्रियपर्यंतेषु नवाष्टसप्तषट्चत्वारः। इतरेष्वपर्याप्तकेषु द्वयोः संज्ञ्यसंज्ञिपंचेंद्रिययोः सप्तैव उच्छ्वासनिश्वासवचोमनोबलरहिताः शेषाः पंचेंद्रियकायबलायुःप्राणाः। शेषेषु चतुस्त्रिद्व्येकेंद्रियेषु एकैकोनाः श्रोत्रचक्षुर्घ्राणरसनहीनाः क्रमेण षट्पंचचतुस्त्रिप्राणाः भवंति ॥ १३३ ॥

इति श्रीमदभयचंद्रसूरिसिद्धांतचक्रवर्तिकृतौ गोम्मटसार पंचसंग्रहवृत्तौ प्राणप्ररूपणानाम चतुर्थोऽधिकारः ॥ ४ ॥

सं० च०––पहिलैं कह्या जो प्राणनिके स्वामीनिका नियम ताहीकरि ऐसैं भेद पाइए है सो कहिए है-सैनी पंचेंद्रीपर्याप्तके तौ दश प्राण सर्व ही पाइए। पीछैं अवशेष असंज्ञी आदि द्वींद्रियपर्यंत पर्याप्त जीवनिके एक एक घाटि प्राण पाइए तहां असैनी पंचेंद्रियके मन विना नव प्राण पाइए। चौ इंद्रियके मन अर कर्ण इंद्रिय विना आठ प्राण पाइये। ते इंद्रियके मन कर्ण नेत्र इंद्रियविना सात प्राण पाइए। द्वींद्रियके मन कर्ण नेत्र नासिका विना छह प्राण पाइये। बहुरि अंतिम एकेंद्रियविषैं द्वींद्रियके प्राणनितैं दोय घटावना सो मन कर्ण नेत्र नासिका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

अर रसना इंद्रिय अर वचनबल इनि विना एकेंद्रियके च्यारि ही प्राण पाइए है। ऐसैं ए प्राण पर्याप्तदशाकी अपेक्षा कहे। अब इतर जो अपर्याप्त दशा ताकी अपेक्षा कहिए है-सैनी वा असैनी पंचेंद्रियके तौ सात सात प्राण हैं जातैं पर्याप्तकालविषैं संभवै ऐसे सासोस्वास वचनबल मनोबल ए तीन प्राण तहां न होंइ। बहुरि चौइंद्रियके श्रोत्र विना छह पाइए तेंद्रीके नेत्र विना पांच पाइए बेंद्रीके नासिका विना च्यारि पाइए एकेंद्रीकैं रसना विना तीन पाइए ऐसैं प्राण पाइए है।

इति श्रीआचार्य श्रीनेमिचंद्र सिद्धांतचक्रवर्तिविरचित गोम्मटसार द्वितीय नाम पंच संग्रह ग्रंथकी जीवतत्त्वप्रदीपिका नाम संस्कृत टीकाके अनुसार सम्यग्ज्ञान चंद्रिकानाम इस भाषटीकाविषै प्ररूपित जे वीस प्ररूपणा तिनिविषैं प्राण प्ररूपणा नामा चौथा अधिकार संपूर्ण भया ॥ ४ ॥

संज्ञा प्ररूपणाधिकारः ॥ ५ ॥

जितरजोरहस्यारिः प्राप्तानंतगुणो जिनः।
जितदोषो जगन्नाथः सुमतीशो नमस्यते ॥ ५ ॥

अथ संज्ञाप्ररूपणां प्ररूपयति—

इह जाहि बाहयावि य जीवा पावंति दारुणं दुक्खं।
सेवंतावि य उभये ताओ चत्तारि सण्णाओ ॥ १३४ ॥

इह याभिर्बाधिता अपि च जीवाः प्राप्नुवंति दारुणं दुःखं।
सेवमाना अपि च उभयस्मिन् ताश्चतस्रः संज्ञाः ॥ १३४ ॥

जी० प्र०---याभिः संज्ञाभिः-आहारभयमैथुनपरिग्रहवांछाभिः, एवं बाधिता जीवा अस्मिन् भवे तद्विषयान् सेवमानाः अपि च तत्प्राप्त्यप्राप्त्योः सत्योः उभयभवयोर्दारुणं दुःखं प्राप्नुवंति ताः चतस्रो वांछाः संज्ञा इति वदंति॥१३४॥ अथाहारसंज्ञोत्पत्तौ बहिरंतरंगहेतू कथयति—

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुमतिं निर्जिताशेषकुमतिं सुमतीडितं ।
पंचमं तीर्थकर्तारं वंदे सुमतिसिद्धये ॥ ५ ॥

अथ संज्ञाप्ररूपणार्थं गाथाषट्कमाह---

याभिराहारादिवांछाभिर्बाधिता अपि संक्लेशिता अपि जीवाः, इह भवे दारुणं-तीव्रं दुःखं प्राप्नुवंति । यद्विषयानाहारादीन् सेवमाना भुंजमाना जीवाः उभयस्मिन्-इहभवे परभवेऽपि च दारुणं दुःखं प्राप्नुवंति ताश्चतस्रः संज्ञा इति भण्यंते ॥ १३४ ॥

गुण अनंत पाए सकल रज रहस्य अरि जीति ।
दोषरहित जगस्वामि सो सुमति नमौं जुत प्रीति ॥ ५ ॥

अथ संज्ञा प्ररूपणा अधिकारकौं कहै हैं--

सं० च०--आहार भय मैथुन परिग्रह इनिके निमित्ततैं जो वांछा होइ ते च्यारि संज्ञा कहिए सो जिनि संज्ञानिकरि बाधित पीडित हुए जीव इस संसारविषैं विषयनिकौं सेवते भी इह लोक अर परलोकविषैं तिनिविषयनिकी प्राप्ति वा अप्राप्ति होतैं दारुण भयानक महा दुःखकौं पावैं है ते च्यारि संज्ञा जाननी। वांछाका नाम संज्ञा है वांछा है सो सर्व दुःखका कारण है ॥ १३४ ॥ आगैं आहार संज्ञा उपजनेके बाह्य अभ्यंतर कारण कहैं है--

आहारदंसणेण य तस्सुवजोगेण ओमकोठाए ।
सादिदरुदीरणाए हवदि हु आहारसण्णा हु ॥ १३५ ॥

आहारदर्शनेन च तस्योपयोगेन आमकोष्ठया ।
सातेतरोदीरणया भवति हि आहारसंज्ञा हि ॥ १३५ ॥

जी० प्र०--विशिष्टान्नादिचतुर्विधाहारदर्शनेन तत्स्मरणकथाश्रवणाद्युपयोगेन रिक्तकोष्ठतयेति बाह्यकारणैः असातवेदनीयोदीरणातीव्रोदयाभ्यां अंतरंगकारणाभ्यां च आहारसंज्ञा भवति--जायते । आहारे--विशिष्टान्नादौ संज्ञा--वांछा आहारसंज्ञा ॥ १३५ ॥ अथ भयसंज्ञोत्पत्तिकारणमाह--

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं०प्र०---आहारदर्शनेन--विविधरसरूपविशेषभक्ष्यपानादिपरिकरितान्नवीक्षणेन, तस्य पूर्वानुभूतविशिष्टाहारस्योपयोगेन--स्मृत्यादिप्रबोधेन, अवमकोष्ठतया--रिक्तोदरतया, सातेतरस्य--असातवेदनीयस्य उदीरणया च जीवस्य आहारे संज्ञा -वांछा, खलु नाम भवति जायते खलु स्फुटं ॥ १३५ ॥

सं० च०--विशिष्ट अन्नादिक च्यारि प्रकार आहारका देखना बहुरि आहारका यादि करना कथा सुनना इत्यादिक उपयोगका होना, बहुरि कोठा जो उदर ताका खाली होना क्षुधा होनी ए तौ वाह्य कारण हैं। बहुरि असाता वेदनीय कर्मका तीव्र उदय होना वा उदीरणा होनी ए अंतरंग कारण हैं इनि कारणनितैं आहार संज्ञा हो है। आहार कहिए अन्नादिक तींहिविषैं संज्ञा कहिए वांछा सो आहारसंज्ञा जाननी॥ १३५ ॥ आगैं भय संज्ञा उपजनेके कारण कहै हैं--

अइभीमदंसणेण य तस्सुवजोगेण ओमसत्तीए।
भयकम्मुदीरणाए भयसण्णा जायदे चदुहिं॥ १३६ ॥

अतिभीमदर्शनेन च तस्योपयोगेन अवमसत्त्वेन।
भयकर्मोदीरणया भयसंज्ञा जायते चतुर्भिः॥ १३६ ॥

जी० प्र०---अतिभयंकरव्याघ्रादिक्रूरमृगादिदर्शनेन तत्कथाश्रवणस्मरणाद्युपयोगेन रिक्तशक्तितया चेति वहिरंगकारणैः भयनोकषाय-तीव्रोदयेनेति अंतरंगकारणेन च भयसंज्ञा जायते। भयेन उत्पन्ना पलायनेच्छा भयसंज्ञा॥ १३६ ॥ अथ मैथुनसंज्ञासामग्रीं सूचयति--

मं० प्र०----अतिभीमदर्शनेन--तीव्रभयंकररूपवेषक्रियाद्यवलोकनेन, तस्यातिभीमस्य उपयोगेन स्मृत्यादिप्रबोधेन, अवमसत्त्वतया--हीनमनोबलतया, भय-कर्मणो नोकषायविशेषस्योदीरणया च एवं चतुर्भिःकारणैः, भयसंज्ञा भयादुत्पन्ना पलायनशरणान्वेषणादिवांछा जायते॥ १३६ ॥

सं० च०--अतिभयकारी व्याघ्र आदि वा क्रूर मृगादिक वा भूतादिकका देखना वा उनकी कथादिकका सुनना उनकौं यादि करणा इत्यादिक उपयोगका होना बहुरि अपनी हीन शक्तिका होना ए तौ वाह्य कारण हैं। बहुरि भय नामा नोकषायरूप मोह कर्म ताका तीव्र उदय होना यहु अंतरंग कारण है। इनि कारणनिकरि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भय संज्ञा हो है भयकरि भई जो भागि जाना छिपि जाना इत्यादिक रूप वांछा सो भय संज्ञा कहिये ॥ १३६ ॥
आगें मैथुन संज्ञा उपजनेके कारण कहै हैं--

पणिदरसभोयणेण य तस्सुवजोगे कुसीलसेवाए ।
वेदस्सुदीरणाए मेहुणसण्णा हवदि एवं ॥ १३७ ॥

प्रणीतरसभोजनेन च तस्योपयोगे कुशीलसेवया ।
वेदस्योदीरणया मैथुनसंज्ञा भवति एवं ॥ १३७ ॥

जी० प्र०--वृष्यरसभोजनेन कामकथाश्रवणानुभूतकामविषयस्मरणाद्युपयोगेन कुशीलविटकंदर्पादिजनसेवागोष्ठ्येति वहिरंगकारणैः स्त्रीपुंनपुंसकवेदान्यतमनोकषायोदीरणयेत्यंतरंगकारणेन च मैथुनसंज्ञा जायते । मैथुने-मिथुनकर्मणि सुरतव्यापाररूपे संज्ञा-वांछा मैथुनसंज्ञा ॥ १३७ ॥ अथ परिग्रहसंज्ञोत्पत्तिहेतूनाह---

मं० प्र०----प्रणीतरसभोजनेन--साधुवृष्यरससेवनेन, तस्य प्रणीतरसस्य प्रागनुभूतस्य उपयोगे--स्मृत्यादिप्रबोधे सति, कुशीलसेवया--विटजनादिसंसर्गेण, वेदस्य--स्त्रीपुंनपुंसकवेदानामन्यतमस्य उदीरणया च एवंप्रकारेण काव्यनाटकश्रवणादिना कारणांतरेण च मैथुनसंज्ञा--मिथुनकर्मणि-रतिक्रीडायां वांछा भवति जायते ॥ १३७ ॥

सं० च०--वृष्य जो कामोत्पादक गरिष्ठ भोजन ताका खाना अर काम कथाका सुनना अर भोगे हूवे काम विषयादिकका यादि करना इत्यादिकरूप उपयोग होना बहुरि कुशीलवान कामी पुरुषनिकरि सहित संगति करनी गोष्ठी करणी ए तौ वाह्य कारण हैं बहुरि स्त्री पुरुष नपुंसक वेदनिविषैं किसी ही वेदरूप नोकषायकी उदीरणा सो अंतरंग कारण है इनि कारणनितैं मैथुनसंज्ञा हो है। मैथुन जो कामसेवनरूप स्त्री पुरुषका युगल संबंधी कर्म तींहिविषैं वांछा सो मैथुनसंज्ञा जाननी ॥ १३७ ॥ आगैं परिग्रहसंज्ञा उपजनेके कारण कहै हैं--

उवयरणदंसणेण य तस्सुवजोगेण मुच्छिदाए य ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोहस्सुदीरणाए परिग्गहे जायदे सण्णा ॥ १३८ ॥

उपकरणदर्शनेन च तस्योपयोगेन मूर्छितायै च ।
लोभस्योदीरणया परिग्रहे जायते संज्ञा ॥ १३८ ॥

जी० प्र०---वाह्यपरिग्रहस्य धनधान्याद्युपकरणस्य दर्शनेन तत्कथाश्रवणादिभिः मूर्छितस्य परिग्रहार्यर्जनाद्यासक्तेः अयेन संबंधेनेति वाह्य-कारणैः लोभकषायोदीरणयेति अंतरंगकारणेन परिग्रहसंज्ञा--तदर्जनादिवांछा जायते ॥ १३८ ॥ अथ संज्ञानां स्वामिभेदानाह--

मं० प्र०--उपकरणदर्शनेन--मृदुशयनसुभोजनसुगंधिकुसुमसुरूपस्त्रीसुवर्णादींद्रियभोगसाधनं उपकरणं तस्य दर्शनेन, तस्य उपकरणस्य उपयोगेन--स्मृत्यादिप्रबोधेन, मूर्छितस्य--ममत्वस्य, अयः--संबंधः तस्मिन् सति, लोभस्य--कषायविशेषस्य, उदीरणया च, परिग्रहे--क्षेत्रादिवाह्यग्रंथे संज्ञा--वांछा, जायते। एकश्चशब्दः संज्ञाकारणसमुच्चयार्थः, अपरश्चशब्दः संज्ञाचतुष्टयसमुच्चयार्थः ॥ १३८ ॥

सं० च०--धन धान्यादिक वाह्य परिग्रहरूप उपकरण सामग्रीका देखना अर तींहि धनादिककी कथाका सुनना यादि करना इत्यादिक उपयोग होना, मूर्छित जो लोभी ताकैं परिग्रह उपजावनेविषै आसक्तता ताका इस जीव सहित संबंधी होना इत्यादिक वाह्य कारण है। बहुरि लोभ कषायकी उदीरणा सो अंतरंग कारण है। इनि कारणनिकरि परिग्रह संज्ञा हो है। परिग्रह जो धन धान्यादिक तिनिके उपजावने आदिरूप वांछा सो परिग्रह संज्ञा जाननी ॥ १३८ ॥ आगैं ए संज्ञा कौनके पाइए सो भेद कहै हैं--

णट्ठपमाए पढमा सण्णा णहि तत्थ कारणाभावा ।
सेसा कम्मत्थित्तेणुवयारेणत्थि णहि कज्जे ॥ १३९ ॥

नष्टप्रमादे प्रथमा संज्ञा नहि तत्र कारणाभावात् ।
शेषाः कर्मास्तित्वेन उपचारेण संति नहि कार्ये ॥ १३९ ॥

जी० प्र०--नष्टप्रमादे-अप्रमत्तादिगुणस्थानवर्तिजीवेषु प्रथमा आहारसंज्ञा नहि नैवास्ति। तद्धेत्वसातावेदनीयोदीरणायाः प्रमत्ते एव व्युच्छित्तेः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कारणाभावात् कार्यस्याप्यभावः । इति प्रमादरहितेषु प्रथमा संज्ञा नास्ति शेषसंज्ञाः तत्कारणकर्मोदयास्तित्वेन उपचारेणैव संति । न च तत्कार्यं प्रमादरहितेष्वस्ति ॥ १३९ ॥

इत्याचार्यश्रीनेमिचंद्रविरचितायां गोम्मटसारापरनामधेयपंचसंग्रहवृत्तौ तत्त्वप्रदीपिकाख्यायां जीवकांडे विंशतिप्ररूपणासु संज्ञाप्ररूपणानाम पंचमोऽधिकारः ॥ ५ ॥

मं० प्र०----एताः प्रागुक्ताः आहारादिसंज्ञाश्चतस्रोऽपि मिथ्यादृष्ट्यादिप्रमत्तपर्यंतेषु गुणस्थानेषु सभंवंति । नष्टप्रमादे-अप्रमत्तसंयतादुपरितनगुणस्थाने प्रथमासंज्ञा-आहारसंज्ञा नह्यस्ति कुतः कारणात् ? तत्र अप्रमत्तादौ आदौ आहारसंज्ञाकारणस्य असातवेदनीयोदीरणाख्यस्याभावात् । सातासातवेदनीयमनुष्यायुष्याणां त्रिप्रकृतीनां प्रमत्तविरते एव उदीरणा भवतीति परमागमे प्रसिद्धत्वात् । शेषा भयमैथुनपरिग्रहसंज्ञा अप्रमत्तसंयतादिगुणस्थानेषु तत्तत्कारणभयवेदलोभकर्मोदीरणानां तत्तदुदयव्युच्छित्तिचरमसमयपर्यंतमस्तित्वेन निमित्तेनोपचारेण संति स्वस्वकार्ये पलायनरतिक्रीडापरिग्रहस्वीकाररूपे प्रवृत्त्यभावात् मंदमंदतरमंदतमातिसूक्ष्मानुभागोदयसहितसंयमाविशेषसमाहितध्यानोपयुक्तानां महामुनीनां भयादिसंज्ञा मुख्यवृत्त्या न संत्येव अन्यथा कदाचिदपि शुक्लध्यानं घातिकर्मक्षयो वा न घटते इति जीवन्मुक्तेरभाव एव प्रसज्यते तदभावे च परमुक्तेरप्यभाव इत्यार्हतानां वैदिकमतप्रसंगः स्यात् ततो मोक्षमिच्छतां स्याद्वादिनां क्षपकश्रेण्यामाहारादिचतुःसंज्ञानामभाव एव संभावनीयः, इति केवलिनां कुतः कवलाहारभुक्तिराहारसंज्ञानिषेधात् स्त्रीणां च परिग्रहसंज्ञासद्भावात् क्षपकश्रेण्यारोहणाभावेन कुतो मुक्तिः तासां वस्त्रत्यागपूर्वकसकलसंयमस्य परमागमे प्रतिषिद्धत्वात् तद्विधायकश्वेतपटाद्यागमांतरस्य युक्त्यागमप्रमाणबाधितत्वेन आगमाभासत्वात् ततः केवलिनां कवलाहारभुक्तिः स्त्रीणां मुक्तिर्नास्तीति सिद्धः सत्सूरिसिद्धांतः ॥ १३९ ॥

इति श्रीमदभयचंद्रसूरिसिद्धांतचक्रवर्तिकृतौ गोम्मटसारपंचसंग्रहवृत्तौ संज्ञाप्ररूपणानाम पंचमोऽधिकारः ॥ ५ ॥

सं० च०—नष्ट भये हैं प्रमाद जिनिके ऐसे जे अप्रमत्तादि गुणस्थानवर्ती जीव तिनिकैं प्रथम आहार संज्ञा नाहीं है । जातैं आहार संज्ञाका कारणभूत जो असाता वेदनीयकी उदीरणा ताकी व्युच्छित्ति प्रमत्त गुणस्थानमें ही भई है तातैं कारणके अभावतैं कार्यका भी अभाव है । ऐसैं प्रमादरहित जीवनिकैं पहिली संज्ञा नाहीं है । बहुरि इनिकैं जो अवशेष तीन संज्ञा हैं सो भी उपचार मात्र हैं । जातैं उन संज्ञानिका कारण भूत जे कर्म तिनिका उदय पाइए है तींहि अपेक्षा है । बहुरि ते भय मैथुन परिग्रह संज्ञा अप्रमादी जीवनिके कार्यरूप नाहीं हैं ।

इति आचार्य श्रीनेमिचंद्रविरचित गोम्मटसार द्वितीय नाम पंचसंग्रह ग्रंथकी जीवतत्त्वप्रदीपिका नाम संस्कृत टीकाके अनुसारि सम्यग्ज्ञान चंद्रिका नामा भाषा टीकाविषैं जीवकांडविषैं प्ररूपित जे बीस प्ररूपणा तिनिविषैं संज्ञा प्ररूपणा नाम पंचम अधिकार संपूर्ण भया ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मार्गणामहाधिकारे गतिप्ररूपणाधिकारः ॥ ६ ॥

जित्वा घातीनि सर्वाणि लब्ध्वा लब्धिगुणव्रजं ।
प्रकाशितं हितं येन पद्मनामं भजेऽनघं ॥ ६ ॥

अथार्हत्परमेश्वरनमनरूपमंगलपुरस्सरमार्गणामहाधिकारप्ररूपणप्रतिज्ञां करोति---

धम्मगुणमग्गणाहयमोहारिबलं जिणं णमंसित्ता ।
मग्गणमहाहियारं विविहहियारं भणिस्सामो ॥ १४० ॥

धर्मगुणमार्गणाहतमोहारिबलं जिनं नमस्कृत्वा ।
मार्गणामहाधिकारं विविधाधिकारं भणिष्यामः ॥ १४० ॥

जी० प्र०—रत्नत्रयात्मको धर्मो धनुः, तदुपकारकज्ञानादिधर्माः गुणाः ज्याः, तदाश्रयाश्चतुर्दशमार्गणाः ता एव बाणाः तैराहतानि मोहारेः मोहनीयकर्मशत्रोः, बलानि ज्ञानावरणादिकर्मप्रकृतयः, येन असौ धर्मगुणमार्गणाहतमोहारिबलः तं जिनं-अर्हद्भट्टारकं, नमस्कृत्वा गत्यादिविविधाकारांचितं मार्गणामहाधिकारं भणिष्यामः । इत्यनेन मंगलकरणेन विनाशितविघ्नमलो नेमिचंद्रसैद्धांतचक्रवर्ती मार्गणाधिकारं वक्तुं प्रारभते ॥ १४० ॥ अथ मार्गणाशब्दस्य निरुक्तिसिद्धलक्षणमाह–

पद्मप्रभ जिनकौं भजौं जीति घाति सब कर्म ।
गुण समूह फुनि पाय जिनि प्रगट कियो हितधर्म ॥ ६ ॥

आगैं अरहंतदेवकौं नमस्काररूप मंगलपूर्वक मार्गणा महा अधिकार प्ररूपणकी प्रतिज्ञा करै हैं–

सं० च०–हम जो ग्रंथकर्ता ते नानाप्रकार गति इंद्रियादिक अधिकार संयुक्त जो मार्गणाका महा अधिकार ताहि कहैंगे ऐसी आचार्य प्रतिज्ञा करी । कहा करिकैं ? जिन जो अर्हंत भट्टारक तिसहिं नमस्कार करिकैं । कैसा है जिन भगवान ? रत्नत्रय स्वरूप धर्म सोही भया धनुष बहुरि ताका उपकारी जे ज्ञानादिक धर्म ते ही भए

१ ग. पुस्तकेयं मंदप्रबोधिकायां नोपलभ्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गुण कहिये चिह्ना बहुरि ताके आश्रयभूत जे चौदह मार्गणा तेही भए मार्गण कहिए वाण तिनिकारि हत्या है मोहनीय कर्मरूप अरि कहिये वैरीका बल जानै ऐसा जिन देव है ॥ १४० ॥ आगैं मार्गणा शब्दकी निरुक्तिने लीया लक्षण कहे हैं–

जाहि व जासु व जीवा मग्गिज्जंते जहा तहा दिट्ठा ।
ताओ चोदस जाणे सुयणाणे मग्गणा होंति ॥ १४१ ॥

याभिर्वा यासु वा जीवा मृग्यंते यथा तथा दृष्टाः ।
ताश्चतुर्दश जानीहि श्रुतज्ञाने मार्गणा भवंति ॥ १४१ ॥

जी० प्र०---याभिः यासु वा जीवाः यथा श्रुतज्ञानेन दृष्टाः तथा मृग्यंते विचार्यंते ज्ञायंते ताश्चतुर्दश मार्गणा भवंति। पूर्वं सामान्येन गुणस्थानजीवसमासपर्याप्तिप्राणसंज्ञाभिः एताभिः त्रिलोकोदरवर्तिनो जीवाः लक्षणेन भेदेन च विचारिताः पुनरिदानीं विशेषरूपगत्यादिमार्गणाभिः तानेव विचार्यमाणान् जीवान् जानीहि इति शिष्यसंबोधने प्रयुक्तं । गत्यादिमार्गणा यदा एकजीवस्य नारकत्वादिपर्यायस्वरूपा विवक्षिताः तदा 'याभिः' इतीत्थंभूतलक्षणे तृतीया विभक्तिः । यदा एकद्रव्यं प्रति पर्यायाणामधिकरणता विवक्ष्यते तदा 'यासु' इत्यधिकरणे सप्तमी विभक्तिः। विवक्षावशात्कारकप्रवृत्तिरिति न्यायस्य सद्भावात् ॥ १४१ ॥ अथ तासां चतुर्दशमार्गणानां नामदेशं करोति–

मं० प्र०—

पद्मप्रभाभिभावीद्धवपुःप्रवलसुप्रभं ।
पद्मप्रभजिनं वंदे षष्ठं तीर्थकृतामहं ॥ ६ ॥

अथ श्रीनेमिचंद्रसैद्धांतचक्रवर्ती चतुर्दशमार्गणास्थानप्ररूपणाः प्रारभमाणस्तदादौ निरुक्तिपूर्वकं मार्गणासामान्यलक्षणमाह––

याभिर्यासु वा जीवा मृग्यंते--विचार्यंते ताश्चतुर्दश मार्गणा भवंतीति यथा श्रुतज्ञाने प्रवचने दृष्टास्तथा हे भव्य! जानीहि इति शिष्यसंबोधनं। गुणस्थानजीवसमासपर्याप्तिप्राणसंज्ञाभिः संक्षेपेण विचारितानां जीवानां विस्तरेण गतींद्रियादिभिः पंचभावविशेषैर्विचारो युक्त इति करणे इत्थंभूतलक्षणे वा याभिरिति तृतीयानिर्देशः । गतींद्रियादिपंचभावेषु पर्यायेषु जीवद्रव्याणि वर्तंते इत्याधारे यास्विति सप्तमीनिर्देशो युक्तः, कारकांतरस्य तत्रासंभवात्, श्रुतं ज्ञायते अनेनेति श्रुतज्ञानं--वर्णपदवाक्यरूपं द्रव्यश्रुतं, गुरुशिष्यप्रशिष्यपरंपरया द्रव्यागमस्य अविच्छिन्नप्रवाहेण प्रवर्तमानत्वात् । तत्र यथा दृष्टास्तथा जानीहीति वचनेन शास्त्रकारस्य कालदोषात्प्रमादाद्वा यत्स्खलितं तन्मुक्त्वा परमागमानुसारेण व्याख्यातारः अध्येतारो वा अविरुद्धमेव वस्तुस्वरूपं गृह्णंति इति प्रव-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शितमाचार्यैः । ननु लोके व्यावहारिकपदार्थस्य विचारे कश्चित् मृगयिता किंचिन्मृग्यं कापि मार्गणा कश्चिन्मार्गणोपाय इति चतुष्टयमस्ति अत्र लोकोत्तरेऽपि तद्वक्तव्यं ? इति चेदुच्यते–मृगयिता भव्यवरपुंडरीकः गुरुः शिष्यो वा, मृग्याः गुणस्थानादिविशिष्टा जीवाः, मार्गणा गुरुशिष्ययोर्जीवतत्त्वविचारणा, मार्गणोपायः गतींद्रियादयः पंच भावविशेषाः करणाधिकरणरूपाः संतीति लोकव्यवहारानुसारेण लोकोत्तरव्यवहारोऽपि वर्तत इति ब्रह्माद्वैतहिंसायागादिशास्त्रवत् लोकविरुद्धमिदं प्रवचनं न भवति इति सूक्तं ॥ १४१ ॥ अथ मार्गणानां नामोद्देशं प्ररूपयति —

सं० च०--जैसें श्रुतज्ञानविषैं उपदेश्या तैसें ही जीवनामा पदार्थ जिनकरि वा जिनिविषैं जानिये ते चौदह मार्गणा हैं पूर्वें तौ सामान्यताकरि गुणस्थान जीवसमास पर्याप्ति प्राण संज्ञा इनिकरि त्रिलोकके मध्यवर्ती समस्त जीव लक्षणकरि वा भेदकरि विचारे। बहुरि अब विशेषरूप गति इंद्रियादि मार्गणानिकरि तिनहीकौं विचारे हैं ऐसैं हे शिष्य, तू सुनि जानि। गति आदि जे मार्गणा एक जीवकैं नारकादि पर्यायनिकी विवक्षा लीजिये तब तौ जिनि मार्गणानिकरि जीव जानिए ऐसैं तृतीया विभक्तिकरि कहिए। बहुरि जब एक द्रव्य प्रति पर्यायनिके अधिकरणकी विवक्षा 'इनि विषैं जीव पाइए है' ऐसी लीजिये तब जिनि मार्गणानिविषैं जीव जानिये ऐसैं सप्तमी विभक्तिकरि कहिए। जातैं विवक्षाके वशतैं कर्ता कर्म इत्यादि कारकनिकी प्रवृत्ति है ऐसा न्यायका सद्भाव है॥ १४१ ॥ आगैं तिनि चौदह मार्गणानिके नाम कहै हैं–

गइइंदियेसु काये जोगे वेदे कसायणाणे य।
संजमदंसणलेस्साभवियासम्मत्तसण्णिआहारे ॥ १४२ ॥

गतींद्रियेषु काये योगे वेदे कषायज्ञाने च।
संयमदर्शनलेश्याभव्यतासम्यक्त्वसंज्ञ्याहारे ॥ १४२ ॥

जी० प्र०---एतानि गत्यादिपदानि तृतीयांतानि वा सप्तम्यंतानि तदा एवं व्याख्येयानि गत्या गत्यां, इंद्रियेण इंद्रिये, कायेन काये, योगेन योगे, वेदेन वेदे, कषायेण कषाये, ज्ञानेन ज्ञाने, संयमेन संयमे, दर्शनेन दर्शने, लेश्यया लेश्यायां, भव्येन भव्ये, सम्यक्त्वेन सम्यक्त्वे,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संज्ञिना संज्ञिनि, आहारेण आहारे च जीवाः मार्ग्यंत इति ता मार्गणा यथानामोद्देशं कथयिष्यंते ॥ १४२ ॥ अथ तासु सांतरमार्गणानां स्व-रूपसंख्यातदनंतरकालप्रमाणं व्यवधाननिरूपणार्थं च गाथात्रयमाह[1]----

मं० प्र०---गतौ इंद्रिये च काये योगे वेदे कषाये ज्ञाने च संयमे दर्शनेलेश्यायां भव्यत्वे सम्यक्त्वे संज्ञिनि आहारके एतेषु पंचभावविशेषेषु जीवा मृग्यंत इत्येतानि चतुर्दशमार्गणास्थाननामानि । गतिकषायसंयमादिषु प्राकृतलक्षणेन विभक्तिलोपो वा द्वंद्वसमासो द्रष्टव्यः । अधिकरणत्वस्य मुख्यताप्रदर्शनार्थः सप्तम्यंतनिर्देशः । अपभ्रंशलक्षणेन तृतीयांतनिर्देशो वा तेन गत्यादीनां करणत्वमपि यथासंभवं संभावनीयं । गत्यादिशब्दानां अर्थनिरुक्त्यादिकं शास्त्रकारः स्वयमेव तत्तत्प्रकरणे वक्ष्यतीति नास्माभिरत्रोच्यते ॥ १४२ ॥ अथ सांतरमार्गणानां संख्यां तदंतरकालप्रमाणं च प्ररूपयितुं गाथाद्वयमाह–

सं० च०–गति १ इंद्रिय २ काय ३ योग ४ वेद ५ कषाय ६ ज्ञान ७ संयम ८ दर्शन ९ लेश्या १० भव्य ११ सम्यक्त्व १२ संज्ञी १३ आहार १४ ऐसैं ए गति आदि पद हैं ते तृतीया विभक्ति वा सप्तमी विभक्तिका अंति लीए हैं तातैं गतिकरि वा गतिविषैं इत्यादिक ऐसैं व्याख्यान करने । सो इनिकरि वा इनिविषैं जीव मार्ग्यंते कहिए जानिये ते चौदह मार्गणा जैसैं अनुक्रमकरि नाम हैं तैसैं कहैंगे ॥ १४२ ॥ आगैं तिनिविषैं आठ सांतर मार्गणा हैं तिनिका स्वरूप संख्या विधान निरूपणके अर्थि गाथा तीन कहै हैं–

उवसमसुहमाहारे वेगुव्वियमिस्सणरअपज्जत्ते ।
सासणसम्मे मिस्से सांतरगा मग्गणा अट्ठ ॥ १४३ ॥
सत्तदिणाछम्मासा वासपुधत्तं च वारसमुहुत्ता ।
पल्लासंखं तिण्हं वरमवरं एग्गसमयो दु ॥ १४४ ॥

उपशमसूक्ष्माहारे वैगूर्विकमिश्रनरापर्याप्ते ।
सासनसम्यक्त्वे मिश्रे सांतरका मार्गणा अष्ट ॥ १४३ ॥

1 "स्वरूपसंख्याविधाननिरूपणार्थं गाथात्रयमाह" इति घ पुस्तके पाठः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सप्तदिनानि षण्मासा वर्षपृथक्त्वं च द्वादश मुहूर्ताः।
पल्यासंख्यं त्रयाणां वरमवरमेकसमयस्तु ॥ १४४ ॥

जी० प्र०---लोके नानाजीवापेक्षया विवक्षितगुणस्थानं मार्गणास्थानं वा त्यक्त्वा गुणांतरे मार्गणास्थानांतरे वा गत्वा पुनर्यावत्तद्विवक्षितगुणस्थानं मार्गणास्थानं वा नायाति तावान् कालः अंतरं नाम । तच्च उत्कृष्टेन औपशमिकसम्यग्दृष्टीनां सप्त दिनानि । तदनंतरं कश्चित्स्यादेवेत्यर्थः । सूक्ष्मसांपरायसंयमिनां षण्मासाः । आहारकतन्मिश्रकाययोगिनां वर्षपृथक्त्वं । त्रिकादुपरि नवकादधः वर्षपृथक्त्वमित्यागमसंज्ञा । वैक्रियिकमिश्रकाययोगिनां द्वादशमुहूर्ताः । लब्ध्यपर्याप्तकमनुष्याणां सासादनसम्यग्दृष्टीनां सम्यग्मिथ्यादृष्टीनां च प्रत्येकं पल्यासंख्यातैकभागमात्रं । एवं सांतरमार्गणा अष्टौ तासां जघन्यांतरं एकसमय एव ज्ञातव्यः । लोके उपशमसम्यग्दृष्ट्यादयो यदि न संति तदा उत्कर्षेणोक्तस्वस्वकालपर्यंतमेव तेषामष्टानां अभावः ततो नाधिकः कालः ॥ १४३-१४४ ॥ अथ सांतरमार्गणाविशेषं प्ररूपयति---

मं० प्र०---उपशमसम्यक्त्वं सूक्ष्मसांपरायसंयमः आहारकयोगः आहारकमिश्रयोगः वैक्रियिकामिश्रयोगः नरापर्याप्तः सासादनत्वं मिश्रत्वमिति सम्यग्मिथ्यात्वं एतेषु गतियोगसंयमसम्यक्त्वमार्गणानामुत्तरभेदेषु अष्टसु सांतरेषु अंतरकालो यथासंख्यमुच्यते ॥ १४३ ॥

मं० प्र०-- नानाजीवापेक्षया उत्कृष्टांतरकालः उपशमसम्यक्त्वस्य सप्त दिनानि । सूक्ष्मसांपरायसंयमस्य षण्मासाः । आहारककाययोगस्य वर्षपृथक्त्वं सप्तवर्षाणि । आहारकमिश्रयोगस्य अष्टवर्षाणि । वैक्रियिकमिश्रयोगस्य द्वादश मुहूर्ताः । मनुष्यलब्ध्यपर्याप्तकस्य सासादनत्वस्य मिश्रत्वस्य च एतेषां त्रयाणां पल्यासंख्यातैकभागमात्रः । लोके उपशमसम्यग्दृष्ट्यादयो यदि न संति तदा उत्कर्षेण उक्तस्वस्वकालपर्यंतमेव तेषामष्टानामभावस्ततो नाधिककाले । जघन्येन तु पुनस्तेषां सर्वेषामेक एव समयोंतरकालः ॥ १४४ ॥ अथ श्रीमाधवचंद्रत्रैविद्यदेवाः सांतरमार्गणाविशेषं प्ररूपयंति ।

सं० च०--नाना जीवनिकी अपेक्षा विवक्षित गुणस्थान वा मार्गणास्थाननैं छोडि अन्य कोई गुणस्थान वा मार्गणा स्थानमें प्राप्त होइ बहुरि उसही विवक्षित स्थान वा मार्गणा स्थानकौं यावत् काल प्राप्त न होइ तिसकालका नाम अंतर है सो उपशम सम्यग्दृष्टी जीवनिका लोकविषैं नाना जीव अपेक्षा अंतर सात दिन है। तीन लोककेविषैं कोऊ जीव उपशम सम्यक्त्वी न होइ तो उत्कृष्टपनैं सात दिन ताईं न होइ पीछै कोऊ होय ही होय। ऐसैं ही सबका अंतर जानना। बहुरि सूक्ष्म सांपराय संयमी तिनिका उत्कृष्ट अंतर छह महीना है। पीछै कोऊ होय ही होय। बहुरि आहारक अर आहारकमिश्रकाययोगवाले तिनिका उत्कृष्टअंतर वर्ष पृथक्त्वका है। तीनतैं ऊपर अर नवतैं नीचै पृथक्त्व संज्ञा है तातैं यहां तीन वर्षके ऊपर अर नव वर्षके नीचै अंतर जानना २५७

९०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पीछे कोई होइ ही होय। बहुरि वैक्रियिक मिश्रकाययोगवालेका उत्कृष्ट अंतर वारह मुहूर्तका है पीछैं कोऊ होय ही होय। बहुरि लब्धि अपर्याप्तक मनुष्य अर सासादन गुणस्थानवर्ती जीव अर मिश्र गुणस्थानवर्ती जीव इनि तीनोंका अंतर एक एकका पल्यके असंख्यातवें भाग मात्र जानना पीछे कोई होय ही होय। ऐसैं ए सांतर मार्गणा आठ हैं इनि सबनिका जघन्य अंतर एक समय जानना ॥ १४३–१४४ ॥

पढमुवसमसहिदाए विरदाविरदीए चोद्दसा दिवसा।
विरदीए पण्णरसा विरहिदकालो दु बोधव्वो ॥ १४५ ॥

प्रथमोपशमसहितायाः विरताविरतेश्चतुर्दश दिवसाः।
विरतेः पंचदश विरहितकालस्तु बोद्धव्यः ॥ १४५ ॥

जी० प्र०—विरहकालः लोके नानाजीवापेक्षया उत्कृष्टेनांतरं प्रथमोपशमसम्यक्त्वसहिताया विरताविरतेः-अणुव्रतस्य, चतुर्दशदिनानि। तत्सहितविरतेः-महाव्रतस्य पंचदश दिनानि। तु-पुनः, द्वितीयसिद्धांतापेक्षया चतुर्विंशतिदिनानि। इदमुपलक्षणं इत्येकजीवापेक्षयापि उक्तमार्गणानामंतरं प्रवचनानुसारेण बोद्धव्यं ॥ १४५ ॥ अथ गतिमार्गणास्वरूपं निरूपयति—

मं० प्र०—लोके नानाजीवापेक्षया प्रथमोपशमसम्यक्त्वसहिताया विरत्याविरतेः-देशसंयमस्य चतुर्दश दिवसा उत्कर्षेणांतरकालः विरतेस्तु-सकलसंयमस्य पंचदश दिवसाः विरहितकालो जघन्येन एकः समयो बोद्धव्यः ॥ १४५ ॥ अथ शास्त्रकारो गतिमार्गणां प्रारभमाणः गतिशब्दस्य निरुक्तिपूर्वकं अर्थं तद्भेदांश्च प्ररूपयति—

सं० चं०–विरह काल कहिए उत्कृष्ट अंतर सो प्रथमोपशम सम्यक्त्वकरि संयुक्त जे विरताविरत पंचम गुणस्थानवर्ती जीव तिनिका चौदह दिनका जानना। बहुरि तिस प्रथमोपशम सम्यक्त्व संयुक्त विरती षष्ठमादि गुणस्थानवर्ती तिनिका पंद्रह दिन जानना। वा दूसरा सिद्धांतकी अपेक्षा करि चौवीस दिन जानना ऐसैं नाना जीव अपेक्षा अंतर कह्या बहुरि इनि मार्गणानिका एक जीव अपेक्षा अंतर अन्यग्रंथके अनुसारि जानना। इहां प्रसंग पाइ कार्यकारी जानि तत्त्वार्थ सूत्रकी टीकाके अनुसारि काल अंतरका कथन करिए है–

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तहां प्रथम कालका वर्णन दोय प्रकार—नाना जीव अपेक्षा अर एक जीव अपेक्षा। तहां विवक्षित गुणस्थाननिका वा मार्गणा स्थाननिविषैं संभवते गुणस्थाननिका सर्व जीवनिविषैं कोई जीवकैं जेते काल सद्भाव पाइए सो नाना जीव अपेक्षा काल जानना। अर तिनहीका विवक्षित एक जीवकैं जेते काल सद्भाव पाइए सो एक जीव अपेक्षा काल जानना। तिनिविषैं प्रथम नानाजीव अपेक्षा काल कहिए है सो सामान्य विशेषकरि दोय प्रकार। तहां गुणस्थाननिविषैं कहिए सो सामान्य अर मार्गणाविषैं कहिए सो विशेष जानना। तहां सामान्य करि मिथ्यादृष्टि असंयत देशसंयत प्रमत्त अप्रमत्त सयोग केवलनिका सर्व काल है इनिका कबहूं अभाव होता नाही बहुरि सासादनका जघन्य एक समय उत्कृष्ट पल्यका असंख्यातवां भाग। बहुरि मिश्रका जघन्य अंतर्मुहूर्त उत्कृष्ट पल्यका असंख्यातवां भाग। बहुरि च्यारौ उपशम श्रेणी वालोंका जघन्य एक समय, उत्कृष्ट अंतर्मुहूर्त। इहां जघन्य एक समय मरण अपेक्षा कह्या है। बहुरि च्यारौ क्षपकश्रेणीवाले अर अयोग केवलीनिका जघन्य वा उत्कृष्ट अंतर्मुहूर्त मात्र काल है। अब विशेषकरि कहिए है तहां गतिमार्गणाविषैं सातौ पृथ्वीनिके नारकीनिविषैं मिथ्यादृष्ट्यादि च्यारि गुणस्थाननिका सामान्यवत् काल है। तिर्यंचगतिविषैं मिथ्यादृष्ट्यादि पंच गुणस्थाननिविषैं सामान्यवत् काल है। मनुष्यगतिविषैं सासादनका जघन्य एक समय उत्कृष्ट अंतर्मुहूर्त अर मिश्रका जघन्य वा उत्कृष्ट अंतर्मुहूर्त अर अन्य सर्वगुणस्थाननिविषैं सामान्यवत् काल है। देवगतिविषैं मिथ्यादृष्ट्यादि च्यारि गुणस्थाननिका सामान्यवत् काल है। बहुरि इंद्रिय मार्गणा अर काय मार्गणाविषैं इंद्रिय काय अपेक्षा सर्वकाल है। गुणस्थान अपेक्षा एकेंद्री विकलेंद्री अर पंच स्थावरनिविषैं मिथ्यादृष्टीका सर्वकाल है। अर पंचेंद्रिय वा त्रसविषैं सर्व गुणस्थाननिका सामान्यवत् काल है। बहुरि योग मार्गणाविषैं तीनौं योगनिविषैं मिथ्यादृष्ट्यादि सयोगीपर्यंतनिका अर अयोगीका सामान्यवत् काल है। विशेष इतना—मिश्रका जघन्य काल एक समय ही है अर क्षपकनिका जघन्य एक समय उत्कृष्ट अंतर्मुहूर्त मात्र काल है। बहुरि वेदमार्गणाविषैं तीन वेदनिविषैं अर वेदरहितविषैं मिथ्यादृष्ट्यादि अनिवृत्ति करण पर्यंतनिका वा ऊपरि सामान्यवत् काल है। बहुरि कषा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यमार्गणाविषैं च्यारि कषायनिविषैं मिथ्यादृष्ट्यादि अप्रमत्त पर्यंतनिका मनोयोगीवत् अर दोय उपशमक वा क्षपक अर केवल लोभयुत सूक्ष्मसांपराय अर अकषाय इनिका सामान्यवत् काल है। बहुरि ज्ञान मार्गणाविषैं तीन कुज्ञान पांच सुज्ञाननिविषैं अपने अपने गुणस्थाननिका सामान्यवत् काल है। बहुरि संयममार्गणाविषैं सातभेदनिविषैं अपने अपने गुणस्थाननिका सामान्यवत् काल है बहुरि दर्शनमार्गणाविषैं च्यारि भेदनिविषैं अपने अपने गुणस्थाननिका सामान्यवत् काल है। बहुरि लेश्यामार्गणाविषैं छह भेदनिविषैं वा लेश्यारहितनिविषै अपने अपने गुणस्थाननिका सामान्यवत् काल है। बहुरि भव्य मार्गणाविषैं दोऊ भेदनिविषैं अपने २ गुणस्थाननिका सामान्यवत् काल है। बहुरि सम्यक्त्व मार्गणाविषैं छह भेदनिविषैं अपने अपने गुणस्थाननिका सामान्यवत् काल है विशेष इतना–औपशमिक सम्यक्त्वविषै असंयत देशसंयतका जघन्य अंतर्मुहूर्त उत्कृष्ट पल्यका असंख्यातवां भाग अर प्रमत्त अप्रमत्तका जघन्य एक समय उत्कृष्ट अंतर्मुहूर्त काल है। बहुरि संज्ञी मार्गणाविषैं दोऊ भेदनिविषैं अपने अपने गुणस्थाननिका सामान्यवत् काल है। बहुरि आहार मार्गणाविषैं आहारकविषैं मिथ्यादृष्ट्यादि सयोगी पर्यंतनिका सामान्यवत् काल है। अनाहारकविषैं मिथ्यादृष्टिका सर्वकाल, सासादन असंयतका जघन्य एक समय, उत्कृष्ट आवलीका असंख्यातवां भाग, सयोगीका जघन्य तीन समय, उत्कृष्ट संख्यात समय, अयोगीका सामान्यवत् काल है। अब एक जीव अपेक्षा काल कहिए है–

तहां प्रथम सामान्यकरि मिथ्यादृष्टिका कालविषैं तीन भंग–अनादि अनंत १ अनादि सांत २ सादि सांत ३। तहां सादि सांतकाल जघन्य अंतर्मुहूर्त उत्कृष्ट देशोन अर्धपुद्गल परिवर्तन मात्र है। किंचित हीनका नाम देशोन जानना। बहुरि सासादनका जघन्य एक समय उत्कृष्ट छह आवली, मिश्रका जघन्य वा उत्कृष्ट अंतर्मुहूर्त, बहुरि असंयतका जघन्य अंतर्मुहूर्त उत्कृष्ट साधिक तेतीस सागर, संयतासंयतका जघन्य अंतर्मुहूर्त उत्कृष्ट देशोन कोडि पूर्व, प्रमत्त अप्रमत्तका जघन्य एक समय उत्कृष्ट अंतर्मुहूर्त, च्यारौं उपशम श्रेणीवालौंका जघन्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एक समय उत्कृष्ट अंतर्मुहूर्त, च्यारौं क्षपक श्रेणीवाले वा अयोगिनिका जघन्य वा उत्कृष्ट अंतर्मुहूर्त सयोगीका जघन्य अंतर्मुहूर्त उत्कृष्ट देशोन कोडि पूर्वकाल है। अब विशेषकरि कहिए है—

मं० प्र०—ततः सौधर्मैशानकल्पाभ्यामूर्ध्वं निजैकादशवर्गमूलभक्तजगच्छ्रेणिमात्राः सनत्कुमारमाहेंद्रकल्पजा देवाः। निजनवमवर्गमूलविभक्तजगच्छ्रेणिप्रमिता ब्रह्मब्रह्मोत्तरकल्पजा देवाः । निजसप्तमवर्गमूलभाजितजगच्छ्रेणिसंख्या लांतवकापिष्ठकल्पजा देवाः । निजपंचमवर्गमूलावाप्तजगच्छ्रेणिप्रमाणाः शुक्रमहाशुक्रकल्पजा देवाः । निजचतुर्थवर्गमूलभाजितजगच्छ्रेणिप्रमाणाः शतारसहस्रारकल्पजा देवाः। आनतादिसुराः-आनतप्राणतारणाच्युतनवग्रैवेयकनवानुदिशविजयवैजयंतजयंतापराजिताभिधाः षट्विंशतिस्थानाविमानवासिनो देवाः प्रत्येकंपल्यासंख्यातैकभागप्रमिता भवंति तत्र आरणादिदेवाः संख्यातगुणहीनाः ॥१६२॥

सं० च०—बहुरि तहां ऊपरि सनत्कुमार माहेंद्र बहुरि ब्रह्म ब्रह्मोत्तर बहुरि लांतवकापिष्ठ शुक्रमहाशुक्र बहुरि शतार सहस्रार इनि पांच युगलनिविषैं अनुक्रमतैं जगतश्रेणीका ग्यारहवां नवमां सातवां पांचवां चौथा जो वर्ग- ३८७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मूल तिनिका भाग जगत श्रेणीकौं दीएं जितना जितना परिमाण आवै तितना तितना तहांके वासी देवनिका प्रमाण जानना। बहुरि ता ऊपरि आनत प्राणत युगल बहुरि आरण अच्युत युगल बहुरि तीन अधोग्रैवेयक तीन मध्य ग्रैवेयक तीन उपरिम ग्रैवेयक बहुरि नव अनुदिश विमान बहुरि सर्वार्थसिद्धि विमान विना च्यारि अनुत्तर विमान इन एक एकविषैं देव पल्यके असंख्यातवे भाग प्रमाण जानने ॥ १६२ ॥

तिगुणा सत्तगुणा वा सव्वट्ठा माणुसीपमाणादो।
सामण्णदेवरासी जोइसियादो विसेसहिया ॥ १६३ ॥

त्रिगुणा सप्तगुणा वा सर्वार्था मानुषीप्रमाणतः।
सामान्यदेवराशिः ज्योतिष्कतो विशेषाधिकः ॥ १६३ ॥

जी० प्र०--सर्वार्थसिद्धिजाहमिंद्राः मनुष्यस्त्रीसंख्यातः त्रिगुणा भवंति। अथवा आचार्यांतराभिप्रायेण सप्तगुणा भवंति ४२=४२=४२=$\frac{३}{४}$। ३ । ७ । ज्योतिष्कराशिमध्ये भावनकल्पवासिदेवसाधिकव्यंतरराशौ संख्येयभागमात्रे ४ । ६५=। ८१ । १० युक्ते सति सर्वसामान्यराशिर्भवति। ४ । ६५= ७॥ १६३ ॥

इत्याचार्य श्रीनेमिचंद्रविरचितायां गोम्मटसारापरनामपंचसंग्रहवृत्तौ जीवतत्त्वप्रदीपिकाख्यायां जीवकांडे विंशतिप्ररूपणासु गतिप्ररूपणनाम षष्ठोऽधिकारः ॥ ६ ॥

मं० प्र०-सर्वार्थसिद्धिदेवाः, मनुष्यस्त्रीप्रमाणात् त्रिगुणा इति केषांचिदाचार्याणां संप्रदायः। वा--अथवा सप्तगुणा इत्यपरेषां संप्रदायः। नास्माकमत्रनिर्णयशक्तिरस्ति। ज्योतिषिकदेवराशेर्विशेषाधिकः सामान्यदेवराशिर्भवति। ज्योतिष्कराशेः संख्येयभागमात्रेण व्यंतरदेवराशिना असंख्येयश्रेणिमात्रेण भावनदेवराशिना, असंख्यातश्रेणिमात्रेण वैमानिकदेवराशिना च साधिक इत्यर्थः ॥ १६३ ॥

इति श्रीमदभयचंद्रसूरिसिद्धांतचक्रवर्तिकृतौ गोम्मटसारपंचसंग्रहवृत्तौ गतिमार्गणाप्ररूपणो नाम षष्ठोऽधिकारः ॥ ६ ॥

——:०:——

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० च०--बहुरि सर्वार्थसिद्धिके वासी अहमिंद्र देव मनुषिणीनिका जो परिमाण पर्याप्त मनुष्यनिका च्यारिभागमें तीन भाग प्रमाण कह्या था तातैं तिगुणा जानना। बहुरि कोई आचार्यका अभिप्रायतैं सात गुणा है। बहुरि ज्योतिषी देवनिका परिमाणविषै भवनवासी कल्पवासी देवनिका प्रमाणकरि साधिक ऐसा ज्योतिषी देवनिके संख्यातवें भाग जो व्यंतर राशि सो जोडे सर्व सामान्य देवनिका परिमाण हो है॥ १६३॥

इति श्रीआचार्य नेमिचंद्र सिद्धांतचक्रवर्तीविरचित गोम्मटसार द्वितीयनाम पंचसंग्रह ग्रंथकी जीवतत्त्वप्रदीपिका नाम संस्कृतटीकाके अनुसारि इस सम्यग्ज्ञानचंद्रिका नामा भाषाटीकाविषैं प्ररूपित जे वीस प्ररूपणा तिनिविषैं गतिप्ररूपणा नामा छठा अधिकार संपूर्ण भया॥ ६॥

अथ इंद्रियमार्गणाप्ररूपणाधिकारः॥ ७॥

जी०-प्र०-

श्रीमंतं त्रिजगत्पूज्यं लोकालोकप्रकाशकं।
सप्तमं तीर्थकर्तारं श्रीसुपार्श्वं नमाम्यहं॥ ७॥

अथेंद्रियमार्गणां प्रारभमाणः इंद्रियशब्दस्य निरुक्तिपूर्वकमर्थं कथयति-

मं०-प्र०-

सुपार्श्वं भवसंतापसंतानहरपार्श्वकं।
सप्तमं तीर्थकर्तारं जिनेंद्रं प्रणमाम्यहं॥ ७॥

अथैकादशभिर्गाथाभिः शास्त्रकारः इंद्रियमार्गणां प्ररूपयति-

सं० चं०-

लोकालोकप्रकाशकर जगत पूज्य श्रीमान।
सप्तम तीर्थंकर नमौं श्रीसुपार्श्व भगवान॥ ७॥

आगैं इंद्रियमार्गणाका आरंभ करैं हैं तहां प्रथम इंद्रिय शब्दका निरुक्ति पूर्वक अर्थ कहैं हैं—

अहमिंदा जह देवा अविसेसं अहमहंति मण्णंता।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ईसंति एक्कमेक्कं इंदा इव इंदिये जाण ॥ १६४ ॥

अहमिंद्रा यथा देवा अविशेषमहमहमिति मन्यमानाः ।
ईशते एकैकमिंद्रा इव इंद्रियाणि जानीहि ॥ १६४ ॥

जी० प्र०—यथा ग्रैवेयकादिजाता अहमिंद्रदेवा अहमहमिति स्वामिभृत्यादिविशेषशून्यं मन्यमाना एकैके भूत्वा आज्ञादिभिरपरतंत्राः संतः ईशते -प्रभवंति-स्वामिभावं श्रयंति तथा स्पर्शनादींद्रियाण्यपि स्पर्शादिस्वस्वविषयेषु ज्ञानमुत्पादयितुं ईशते-परानपेक्षतया प्रभवंति ततः कारण तु अहमिंद्रा इव इंद्रियाणीति सादृश्यार्थ.श्रयनिरुक्तिसिद्धमिंद्रियशब्दार्थं जानीहि इति शिष्यसंबोधनं प्रतिपत्तव्यं ॥ १६४ ॥ अथेंद्रियभेदस्वरूपं निरूपयति—

मं० प्र०—यथा अहमिंद्रदेवाः-ग्रैवेयकनिवास्यादयः अविशेषं-इंद्रसामानिकादिभेदं विना स्वस्वव्यापारेषु अहमहमिति स्वतंत्रतया आत्मानं मन्यमानाः, एकैकं-प्रत्येकं, ईशते-स्वामित्वेन सेवादैन्यविरहिताः प्रवर्तंते तथा स्पर्शनादींद्रियाण्यपि स्पर्शादिस्वस्वविषयग्रहणव्यापारेषु हीनाधिकभावविशेषं विना अहमहमिति स्वतंत्रया आत्मानं मन्यमानानि प्रत्येकमीशते—परापेक्षां विना वर्तंते । ततः इंद्रा इव इंद्रियाणीति इवार्थे घप्रत्ययो निपात्यते । स्पर्शनेंद्रियस्य स्वविषये स्पर्शे ज्ञानं जनयितुं रसनाद्यपेक्षा नहि विद्यते एवं रसनादीनामपींद्रियांतरनिरपेक्षतया स्वस्वविषयज्ञानजननस्वभावोऽस्तीति ज्ञातव्यं । इदं निरुक्तिवचनं इंद्रस्य आत्मनो लिंगमिंद्रियं, इंद्रेण जातिनामकर्मणा अंगोपांगनामकर्मणा वा सृष्टमिंद्रियमित्यादिनिरुक्तीनामुपलक्षणत्वेन सूचकं भवति ॥ १६४ ॥

सं० चं०—जैसैं ग्रैवेयकादिकविषैं उपजे ऐसे अहमिंद्र देव ते सेवक स्वामीके भेदरहित मैं ही मैं हौ ऐसैं मानते संते जुदे जुदे एक एक होइ आज्ञादिककरि पराधीनतातैं रहित होते संते ईश्वरताकौं धरैं हैं प्रभावकौं धरैं हैं स्वामीपनांकौं धरैं हैं तैसैं स्पर्शनादिक इंद्रिय भी अपने अपने स्पर्शादिविषयविषैं ज्ञान उपजावनेविषैं कोई किसीके आधीन नाहीं जुदे जुदे एक एक इंद्रिय परकी अपेक्षा रहित ईश्वरताकौं धरैं हैं प्रभावकौं धरैं हैं तातैं अहमिंद्रवत् इंद्रिय हैं । ऐसैं समानतारूप निरुक्तिकरि सिद्ध भया ऐसा इंद्रिय शब्दका अर्थकौं हे शिष्य तू जानि ॥ १६४ ॥ आगैं इंद्रियनिके भेदस्वरूप कहै हैं—

मदिआवरणखओवसमुत्थविसुद्धी हु तज्जबोहो वा ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भाविंदियं तु दव्वं देहुदयजदेहचिण्हं तु ॥ १६५ ॥

मत्यावरणक्षयोपशमोत्थविशुद्धिर्हि तज्जबोधो वा ।
भावेंद्रियं तु द्रव्यं देहोदयजदेहचिह्नं तु ॥ १६५ ॥

जी० प्र०—मतिज्ञानावरणक्षयोपशमोत्था विशुद्धिर्जीवस्यार्थग्रहणशक्तिलक्षणलब्धिः, सा च मतिज्ञानावरणक्षयोपशमजनितबोधः स्वार्थग्रहणव्यापाररूपोपयोगः इति द्वयं भावेंद्रियं । भावः—चित्परिणामः, तदात्मकमिंद्रियं भावेंद्रियं, इंद्रस्य—आत्मनो लिंगं इंद्रियं इति व्युत्पत्त्यापि लब्ध्युपयोगलक्षणस्यैव भावेंद्रियत्वसमर्थनात् । पुनः जातिनामकर्मोदयसहकारि देहनामकर्मोदयजनितं निर्वृत्त्युपकरणरूपं, देहचिह्नं—एकेंद्रियादिशरीरस्य प्रतिनियतसंस्थानाभिव्यंजकरूपपुद्गलद्रव्यात्मकमिंद्रियं द्रव्येंद्रियं । एवमिंद्रियं द्रव्यभावात्मकतया द्विधा भिद्यते । तत्र लब्ध्युपयोगौ भावेंद्रियमिति, अर्थग्रहणशक्तिर्लब्धिः अर्थग्रहणव्यापार उपयोगः । 'प्रत्यक्षनिरतानींद्रियाणि' अक्षाणि इंद्रियाणि, अक्षमक्षं प्रति वर्तत इति प्रत्यक्षं विषयः, अक्षबोधो वा । तत्र निरतानि व्यापृतानींद्रियाणि । विशेषाभावात्तेषां संकरव्यतिकररूपेण व्यापृतिः प्राप्नोति ? इति चेन्न, प्रत्यक्षे नियमिते रतानीति प्रतिपादनात् । संकरव्यतिकरदोषनिवारणाय स्वविषयनिरतानींद्रियाणीति वा वक्तव्यं । स्वेषां विषयः स्वविषयः, तत्र निश्चयेन निर्णयेन रतानींद्रियाणि स्वविषयनिरतानींद्रियाणि, संशयविपर्यासावस्थायां निर्णयात्मकरतेरभावात् । तत्र आत्मनोऽनिंद्रियत्वं स्यात् ? इति चेन्न रूढिबलादुभयत्र प्रवृत्त्यविरोधः । अथवा 'स्ववृत्तिनिरतानींद्रियाणि' संशयविपर्ययनिर्णयादौ वर्तनं—वृत्तिः तस्यां स्ववृत्तौ निरतानींद्रियाणि । निर्व्यापारावस्थायामनिंद्रियव्यपदेशः स्यादिति चेन्न, दत्तोत्तरत्वात् । अथवा 'स्वार्थनिरतानींद्रियाणि' अर्यते—परिच्छिद्यते इत्यर्थः स्वस्मिन्नर्थे च निरतानींद्रियाणि निरवद्यत्वान्नात्र वक्तव्यमस्ति । अथवा इंदनादाधिपत्यात् इंद्रियाणि स्पर्शरसगंधरूपशब्दज्ञानावरणकर्मणां क्षयोपशमाः द्रव्येंद्रियकारणानींद्रियाणीत्यर्थः ।

यदिंद्रस्यात्मनो लिंगं यदि वा इंद्रेण कर्मणा । सृष्टं जुष्टं तथा दृष्टं दत्तं वेति तदिंद्रियं ॥
मलविद्धमणिव्यक्तिर्यथानेकप्रकारतः । कर्मविद्धात्मविज्ञप्तिस्तथानेकप्रकारतः ॥

पुनस्तेष्विंद्रियेषु तत्तदावरणक्षयोपशमविशिष्टात्मकप्रदेशसंस्थानमभ्यंतरनिर्वृत्तिः । तदवष्टब्धशरीरप्रदेशसंस्थानं बाह्यनिर्वृत्तिः । इंद्रियपर्याप्त्यायातनोकर्मवर्गणास्कंधरूपं स्पर्शाद्यर्थज्ञानसहकारि यत्तदभ्यंतरमुपकरणं । तदाश्रयभूतत्वगादिकं बाह्यमुपकरणमिति ज्ञातव्यं ॥ १६५ ॥

अथ तथाविधेंद्रियोपलक्षितजीवानाह—

मं० प्र०—मतिज्ञानावरणवीर्यांतरायक्षयोपशमोत्था तत्क्षयोपशमाज्जाता आत्मनो विशुद्धिः अर्थग्रहणशक्तिः, लब्धिः, योग्यतेत्यपरनामधेया, तज्जबोधो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वा तद्विशुद्धेर्जातः स्वार्थग्रहणव्यापाररूप उपयोगश्च भावेंद्रियं। भावः-चित्पर्यायः, तल्लक्षणमिंद्रियं भावेंद्रियमित्यनेन लब्ध्युपयोगौ भावेंद्रियमिति तत्त्वार्थशास्त्राविसंवादेन खलु स्फुटं भावेंद्रियस्य द्वैविध्यमुक्तं। वाशब्दः समुच्चयार्थः पक्षांतरसूचनार्थो वा तु-पुनः देहोदयजदेहचिह्नं जातिनामकर्मोदयसहितात् शरीरनामकर्मोदयाज्जातं शरीरगतं स्पर्शनादिभावेंद्रियस्य चिह्नं-लिंगं निर्वृत्त्युपकरणभेदेन द्विविधं। द्रव्यं-पुद्गलपर्यायः, तद्रूपमिंद्रियं द्रव्येंद्रियं नामैकदेशस्य नाम्नि वर्तनात्। निर्वृत्त्युपकरणे द्रव्येंद्रियामिति परमागममाश्रित्य ग्रंथकारः स्वयमेवाग्रे वक्ष्यति। द्वितयिस्तुशब्दः द्रव्येंद्रियभावेंद्रियभेदेनेंद्रियप्रकारप्रदर्शनार्था इयं गाथा इति सूचयति ॥ १६५ ॥

सं०चं०--इंद्रिय दोय प्रकार हैं एक भावेंद्रिय एक द्रव्येंद्रिय। तहां लब्धि उपयोगरूप तौ भावेंद्रिय है। तहां मतिज्ञानावरणके क्षयोपशमतैं भई जो विशुद्धता इंद्रियनिके जे विषय तिनके जाननेकी शक्ति जीवकैं भई सो ही है लक्षण जाका सो लब्धि कहिए। बहुरि मतिज्ञानावरणके क्षयोपशमतैं निपज्या ज्ञान विषय जाननेका प्रवर्तनरूप सो उपयोग कहिए जैसैं किसी जीवकैं सुननेकी शक्ति है परंतु उपयोग कहीं और जायगां लगि रह्या था सो विना उपयोग किछू सुनै नाहीं। बहुरि कोऊ जान्या चाहै है अर क्षयोपशम शक्ति नाहीं तौ कैसैं जानै तातैं लब्धि अर उपयोग दोऊ मिलैं विषयका ज्ञान होइ तातैं इनिकौं भावेंद्रिय कहिए। भाव कहिए चेतना परिणाम तींहिस्वरूप जो इंद्रिय सो भावेंद्रिय कहिए जातैं इंद्र जो आतमा ताका जो लिंग कहिए चिह्न सो इंद्रिय है असी निरुक्तिं करि भी लब्धि उपयोगरूप भावेंद्रियका ही दृढपना हो है। बहुरि निर्वृत्ति अर उपकरण रूप द्रव्येंद्रिय है तहां जिनि प्रदेशनिकरि विषयनिकौं जानैं सो निर्वृत्ति कहिए बहुरि वाके सहकारी निकटवर्ती जे होंइ तिनिकौं उपकरण कहिए सो जातिनामा नामकर्मके उदयसहित शरीरनामा नामकर्मके उदयतैं निपज्या जो निर्वृत्ति उपकरणरूप देहका चिह्न एकेंद्रियादिकका शरीरका यथायोग्य अपने अपने ठिकानैं आकारका प्रकट करनहारा पुद्गल द्रव्यस्वरूप इंद्रिय सो द्रव्येंद्रिय है। असैं इंद्रिय द्रव्य भाव भेदकरि दोय प्रकार है तहां लब्धि उपयोग भावेंद्रिय है। तहां विषयके ग्रहण करनेकी शक्ति सो लब्धि है अर विषयके ग्रहणरूप व्यापार सो उपयोग है। अब इंद्रिय शब्दकी निरुक्ति करि लक्षण कहै हैं-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'प्रत्यक्षनिरतानि इंद्रियाणि' अक्ष कहिए इंद्रिय सो अक्ष अक्ष प्रति जो प्रवर्तै सो प्रत्यक्ष कहिए। ऐसा प्रत्यक्षरूप विषय अथवा इंद्रिय ज्ञान तिहिंविषैं निरतानि कहिए व्यापार रूप प्रवर्तैं ते इंद्रिय हैं। इहां तर्क-जो इस लक्षणविषैं विशेषके अभावतैं तिन इंद्रियनिके संकर व्यतिकररूपकरि प्रवृत्ति प्राप्त होय। जो परस्पर इंद्रियनिका स्वभाव मिलि जाय सो संकर कहिए अपने स्वभावतैं जुदापनाका होना सो व्यतिकर कहिए। तहां समाधान-जो इहां 'प्रत्यक्षे नियमिते रतानि इंद्रियाणि' अपने अपने नियमरूप प्रत्यक्षविषै जे रत ते इंद्रिय हैं ऐसा लक्षणका प्रतिपादन है। तातैं नियमरूप कहनेकरि अपना अपना विशेषका ग्रहण भया। अथवा संकर व्यतिकर दोष निवारणेके अर्थि 'स्वविषयनिरतानि इंद्रियाणि' स्वविषय कहिए अपना अपना विषय तिहिविषैं 'नि' कहिए निश्चयकरि निर्णयकरि रतानि कहिए प्रवर्तैं ते इंद्रिय हैं ऐसा कहना। इहां तर्क-जो संशय विपर्ययविषैं निर्णयरूप रत नाहीं है तातैं इस लक्षणकरि संशय विपर्ययरूप विषय ग्रहणविषैं आत्माकैं अतींद्रियपना होइ। तहां समाधान-जो रूढिके बलतैं निर्णयविषैं वा संशय विपर्ययविषैं दोऊ जायगा तिसलक्षणकी प्रवृत्तिका विरोध नाहीं। जैसैं 'गच्छतीति गौः' गमन करै ताहि गो कहिए सो समभिरूढ नयकरि गमनकरतैं वा शयनादि करतैं भी गो कहिए तैसैं इहां भी जानना। अथवा 'स्ववृत्तिनिरतानि इंद्रियाणि' स्ववृत्तिकहिए संशय विपर्यय रूप वा निर्णयरूप अपना प्रवर्तन तींहिविषैं निरतानि कहिये व्यापार रूप प्रवर्तैं ते इंद्रिय हैं ऐसा लक्षण कहिए। इहां तर्क-जो ऐसा लक्षण कीएं अपने विषयका ग्रहण रूप व्यापारविषैं जीव न प्रवर्तैं तीहिं अवस्थाविषै अतींद्रियपना कहना होइ। तहां समाधान–कि ऐसैं नाहीं, जातैं पूर्वैं ही उत्तर दीया है। रूढिकरि विषय ग्रहण व्यापार होतैं वा न होतैं पूर्वोक्त लक्षण संभवै है। अथवा 'स्वार्थनिरतानि इंद्रियाणि' अर्यते कहिए जानिए सो अर्थ, सो अपनेविषैं वा विषयरूप अर्थविषैं जे निरत ते इंद्रिय हैं सो इसलक्षणविषै कोऊ दोष नाहीं, तातैं इहां किछू तर्क रूप कहना ही नाहीं। अथवा 'इंदनात् इंद्रियाणि' इंदनात् कहिए स्वामीपनांतैं इंद्रिय हैं। स्पर्श रस गंध वर्ण शब्द इनिका जानने रूप ज्ञानका आवरणभूत जे कर्म तिनिका क्षयोपशमतैं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अपना अपना विषय जाननेरूप स्वामित्वकौं धरैं द्रव्येंद्रिय है कारण जिनिका ते इंद्रिय हैं। ऐसा अर्थ जानना। उक्तं च श्लोक—

यदिंद्रस्यात्मनो लिंगं यदि वेंद्रेण कर्मणा।
सृष्टं जुष्टं तथा दृष्टं दत्तं चेति तदिंद्रियं॥

याका अर्थ—इंद्र जो है आत्मा ताका चिह्न सो इंद्रिय है। अथवा इंद्र जो कर्म ताकरि निपज्या वा सेया वा तैसैं देख्या वा दीया सो इंद्रिय है।

मलविद्धमणिव्यक्तिर्यथानेकप्रकारतः।
कर्मविद्धात्मविज्ञप्तिस्तथानेकप्रकारतः॥

याका अर्थ—जैसैं मलसंयुक्त मणिकी व्यक्ति अनेक प्रकारतैं हो है। तैसैं कर्मसंयुक्त आत्माकी जाननेरूप क्रिया अनेक प्रकारतैं होइ ऐसैं इंद्रिय शब्दके निरुक्तिका अनेक प्रकारकरि वर्णन कीया। बहुरि तिनि इंद्रियनिविषैं निर्वृत्ति दोय प्रकार अभ्यंतर, वाह्य। तहां जो निज निज इंद्रियावरणकी क्षयोपशमताकी विशेषता लीएं आत्माके प्रदेशनिका संस्थान सो अभ्यंतर निर्वृत्ति है। बहुरि तिसही क्षेत्रविषैं जो शरीरकें प्रदेशनिका संस्थान सो वाह्य निर्वृत्ति है। बहुरि उपकरण भी दोयप्रकार है अभ्यंतर, वाह्य। तहां इंद्रिय पर्याप्तिकरि आई जो नो कर्मवर्गणा तिनिका स्कंधरूप जो स्पर्शादिविषय ज्ञानकौं सहकारी होइ सो तौ अभ्यंतर उपकरण है अर ताके आश्रयभूत जो चामडी आदि सो वाह्य उपकरण है। ऐसा विशेष जानना॥१६५॥ आगैं इनि इंद्रियनिकरि संयुक्त जीवनिकौं कहैं हैं—

फासरसगंधरूवे सद्दे णाणं च चिण्हयं जेसिं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इगिबितिचदुपंचिंदियजीवा णियभेयभिण्णा ओ ॥१६६॥

स्पर्शरसगंधरूपे शब्दे ज्ञानं च चिह्नकं येषां।
एकद्वित्रिचतुःपंचेंद्रियजीवाः निजभेदभिन्ना ओः ॥ १६६ ॥

जी० प्र०—येषां जीवानां स्पर्शे ज्ञानं चिह्नं ते जीवा एकेंद्रियाः। येषां स्पर्शरसयोर्ज्ञानं चिह्नं ते जीवा द्वींद्रियाः। येषां स्पर्शरसगंधेषु ज्ञानं चिह्नं ते जीवास्त्रींद्रियाः। येषां स्पर्शरसगंधरूपेषु ज्ञानं चिह्नं ते जीवाश्चतुरिंद्रियाः। येषां स्पर्शरसगंधरूपशब्देषु ज्ञानं चिह्नं ते जीवाः पंचेंद्रियाः। ते सर्वे जीवा निजनिजभेदभिन्ना इति ज्ञातव्याः ॥ १६६ ॥ अथैकेंद्रियादिजीवानां संभवदिंद्रियसंख्यां प्ररूपयति—

मं० प्र०—येषां जीवानां स्पर्शे रसे गंधे रूपे शब्दे च ज्ञानं साकारोपयोगरूपं स्वार्थग्रहणशक्तिजनितं भावेंद्रियाख्यलिंगमास्ति ते जीवा यथाक्रममेकद्वित्रिचतुःपंचेंद्रियाः, निजभेदभिन्नाः—स्वावांतरभेदाविशिष्टा भवंति ओ इति शिष्यसंबोधनार्थं प्राकृते अव्ययं। अत्रायं विभागः—एकस्मिन्नेव स्पर्शे ज्ञानं येषां ते एकेंद्रियाः। द्वयोः स्पर्शरसनयोर्ज्ञानं येषां ते द्वींद्रियाः। त्रिषु स्पर्शरसगंधेषु ज्ञानं येषां ते त्रींद्रियाः। चतुर्षु स्पर्शरसगंधरूपेषु ज्ञानं येषां ते चतुरिंद्रियाः। पंचसु स्पर्शरसगंधरूपशब्देषु ज्ञानं येषां ते पंचेंद्रिया इति ॥ १६६ ॥

सं० च०—जिनि जीवनिका स्पर्शविषैं ज्ञान है ऐसा चिह्न होइ ते एकेंद्रिय हैं। बहुरि जिनिका स्पर्श अर रसविषैं ज्ञान है ऐसा चिह्न होइ ते जीव द्वींद्रिय हैं। बहुरि जिनिका स्पर्श रस गंधविषैं ज्ञान है ऐसा चिह्न होइ ते जीव तेइंद्रिय हैं। बहुरि जिनिका स्पर्श रस गंध वर्णविषैं ज्ञान है ऐसा चिह्न होइ ते जीव चतुरिंद्रिय हैं। बहुरि जिनिका स्पर्श रस गंध वर्ण शब्दविषैं ज्ञान ऐसा चिह्न होइ ते जीव पंचेंद्रिय हैं ते सर्व जीव अपने अपने भेदकरि जुदे हैं ऐसैं जानने ॥ १६६ ॥ आगे एकेंद्रियादिक जीवनिकै केती केती इंद्री संभवै हैं सो कहै हैं—

एइंदियस्स फुसणं एक्कंवि य होदि सेसजीवाणं।
होंति कमउड्ढियाइं जिब्भाघाणच्छिसोत्ताइं ॥१६७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकेंद्रियस्य स्पर्शनमेकमपि च भवति शेषजीवानां।
भवंति क्रमवर्धितानि जिह्वाघ्राणाक्षिश्रोत्राणि ॥ १६७ ॥

जी० प्र०–एकेंद्रियजीवस्य एकं स्पर्शनमेव भवति शेषद्वींद्रियादिजीवानां जिह्वाघ्राणाक्षिश्रोत्राणि क्रमेणैकैकवृद्धानि भवंति। एकमेव इंद्रियं येषां ते एकेंद्रियाः। द्वे एव इंद्रिये येषां ते द्वींद्रियाः। त्रीण्येवेंद्रियाणि येषां ते त्रींद्रियाः। चत्वारि एव इंद्रियाणि येषां ते चतुरिंद्रियाः। पंचैव इंद्रियाणि येषां ते पंचेंद्रिया इति व्युत्पत्तिसिद्धत्वात् ॥ १६७ ॥ अथ स्पर्शनादींद्रियाणां विषयक्षेत्रं प्रमाणयति–

म०प्र०–प्राक्तनसूत्रे एकेंद्रियादीनां विषय वृद्धिक्रमो दर्शितः। अत्रेंद्रियवृद्धिक्रमो दर्श्यते तद्यथा-एकेंद्रियस्य जीवस्य स्पर्शनमेकमेवेंद्रियं भवति। शेषाणां द्वींद्रियादीनां पंचेंद्रियपर्यंतानां क्रमवृद्धानि जिह्वाघ्राणाक्षिश्रोत्राणींद्रियाणि भवंति। जिह्वा-रसनं, अक्षि-चक्षुः,। द्वे स्पर्शनरसने इंद्रिये येषां ते द्वींद्रियाः। त्रीणि स्पर्शनरसनघ्राणानींद्रियाणि येषां ते त्रींद्रियाः। चत्वारि स्पर्शनरसनेनघ्राणचक्षूंषि इंद्रियाणि येषां ते चतुरिंद्रियाः। पंच स्पर्शनरसनघ्राणचक्षुश्रोत्राणींद्रियाणि येषां ते पंचेंद्रिया इति ॥ १६७ ॥

सं० च०—इंद्रिय पंच हैं तिनिविषैं सर्व शरीरकौं स्पर्शन कहिए, जिह्वाकौं रसना कहिए, नासिकाकौं घ्राण कहिए, नेत्रकौं चक्षु कहिए, कर्णकौं श्रोत्र कहिए। तहां एकेंद्रिय जीवके स्पर्शन इंद्री ही है। बहुरि अवशेष जीवनिकै एक एक बंधता इंद्रिय अनुक्रमतैं जानने सो बेइंद्रीके रसना इंद्री बध्या, तेइंद्रीके घ्राण इंद्री बध्या, चतुरिंद्रियकैं चक्षु इंद्रिय बध्या, पंचेंद्रियकैं श्रोत्र इंद्रिय बध्या जातैं एक है इंद्रिय जिनिकैं ते जीव एकेंद्रिय हैं। दोय है इंद्रिय जिनिकैं ते द्वींद्रिय है। तीन है इंद्रिय जिनिकैं ते त्रींद्रिय हैं। च्यारि हैं इंद्रिय जिनके ते चतुरिंद्रिय हैं। पांच हैं इंद्रिय जिनके ते पंचेंद्रिय है। ऐसैं निरुक्ति हो है ॥ १६७ ॥ आगैं स्पर्शनादि इंद्रियनिके विषयभूत क्षेत्रका परिमाण कहैं हैं–

धणुवीसडदसयकदी जोयणछादालहीणतिसहस्सा।
अट्ठसहस्स धणूणं विसया दुगुणा असण्णित्ति ॥ १६८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धनुर्विंशत्यष्टदशककृतिः योजनषट्चत्वारिंशद्धीनत्रिसहस्राणि ।
अष्टसहस्रं धनुषां विषया द्विगुणा असंज्ञीति ॥ १६८ ॥

जी॰ प्र॰—एकेंद्रियजीवस्य स्पर्शनेंद्रियविषयक्षेत्रं विंशतिकृतिदंडप्रमितं भवति । ४०० । द्वींद्रियाद्यसंज्ञिपर्यंतं स्पर्शनेंद्रियविषयक्षेत्राणि द्विगुणद्विगुणक्रमाणि भवंति । ८०० । १६०० । ३२०० । ६४०० । द्वींद्रियजीवस्य रसनेंद्रियविषयक्षेत्रं अष्टकृतिदंडप्रमाणं भवति । ६४ । त्रींद्रियाद्यसंज्ञिपंचेंद्रियावसानजीवानां रसनेंद्रियविषयक्षेत्राणि द्विगुणद्विगुणक्रमाणि भवंति । १२८ । २५६ । ५१२ । त्रींद्रियजीवस्य घ्राणेंद्रियविषयक्षेत्रं दशकृतिदंडपरिमितं भवति १०० । चतुरिंद्रियासंज्ञिपंचेंद्रियजीवयोर्घ्राणेंद्रियविषयक्षेत्रं द्विगुणद्विगुणक्रमं भवति । २०० । ४०० । चतुरिंद्रियजीवस्य चक्षुरिंद्रियविषयक्षेत्रं षट्चत्वारिंशन्न्यूनत्रिसहस्रयोजनप्रमितं भवति २९५४ । असंज्ञिपंचेंद्रियस्य चक्षुरिंद्रियविषयक्षेत्रं द्विगुणं भवति । ५९०८ । असंज्ञिपंचेंद्रियस्य श्रोत्रेंद्रियविषयक्षेत्रं अष्टसहस्रदंडावच्छिन्नं भवति ८००० ॥ १६८ ॥

म॰प्र॰—एकेंद्रियादीनां जीवानां स्वस्वेंद्रियविषयोत्कृष्टक्षेत्रं गाथाद्वयेनं प्रदर्श्यते । तद्यथा—एकद्वित्रिचतुरसंज्ञिपंचेंद्रियाणां स्पर्शनेंद्रियविषयोत्कृष्टक्षेत्रप्रमाणं यथाक्रमं धनुषां विंशतिकृतिश्चतुश्शतानि, उत्तरत्र द्विगुणद्विगुणानि अष्टशतानि, षोडशशतानि, द्वात्रिंशच्छतानि चतुःषष्टिशतानि च भवंति । द्वींद्रियस्य रसनेंद्रियविषयोत्कृष्टक्षेत्रप्रमाणं दंडानामष्टकृतिश्चतुःषष्टिः ततः पुनस्त्रींद्रियादीनां द्विगुणद्विगुणं, अष्टाविंशत्युत्तरशतं, षट्पंचाशदुत्तरद्विशती द्वादशोत्तरपंचशती च भवति । त्रींद्रियस्य घ्राणेंद्रियविषयोत्कृष्टक्षेत्रप्रमाणं दंडानां दशकृतिः शतं । ततो द्विगुणद्विगुणं शतद्वयं, शतचतुष्टयं च भवति । चतुरिंद्रियस्य चक्षुर्विषयोत्कृष्टक्षेत्रप्रमाणं चतुःपंचाशदुत्तरनवशताधिकद्विसहस्री योजनानां, ततो द्विगुणं अष्टोत्तरनवशताधिकपंचसहस्री योजनानां, असंज्ञिपंचेंद्रियस्य श्रोत्रेंद्रियविषयोत्कृष्टक्षेत्रप्रमाणं दंडानामष्टसहस्री भवति ॥ १६८ ॥

सं॰च॰—एकेंद्रिय जीवकैं स्पर्शन इंद्रियके विषयका क्षेत्र वीसकी कृति च्यारिसै धनुषका प्रमाण जानना । बहुरि वेइंद्रियादिक असैनी पंचेंद्रिय पर्यंतकैं दूणा दूणा जानना । सो द्वींद्रियकै आठसै धनुष, त्रींद्रियकैं सोलासै धनुष, चतुरिंद्रियकै बत्तीससै धनुष, असैनी पंचेंद्रियकैं चौसठिसै धनुष स्पर्शन इंद्रियका विषय क्षेत्र जानना । इतना इतना क्षेत्र पर्यंत तिष्ठता जो स्पर्शनरूप विषय ताकौं जानैं । बहुरि द्वींद्रियजीवकैं रसना इंद्रियका विषय क्षेत्र आठकी कृति चौसठि धनुष प्रमाण जानना । आगैं दूणां दूणां सो तेइंद्रियकैं एकसौ अठाईस धनुष चतुरिंद्रियकैं दोयसै छप्पन धनुष असैनी पंचेंद्रियकै पांचसै बारा धनुष रसना इंद्रियका विषयभूत क्षेत्रका परिमाण जानना । बहुरि ते इंद्रियकैं घ्राण इंद्रियका विषयभूत क्षेत्र दशकी कृति सौ धनुष प्रमाण जानना । आगैं दूणां दूणां सो ३९७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चौइंद्रीकैं दोयसै धनुष असैनी पंचेंद्रियकैं च्यारिसै धनुष घ्राण इंद्रियका विषय भूत क्षेत्रका प्रमाण जानना। बहुरि चौ इंद्रियकैं नेत्र इंद्रियका विषय क्षेत्र छियालीस घाटि तीन हजार योजन जानना। यातैं दूणां पांच हजार नौसै आठ योजन असैनी पंचेंद्रियकै नेत्र इंद्रियका विषयभूत क्षेत्र जानना। बहुरि असैनी पंचेंद्रियकै श्रोत्र इंद्रियका विषय क्षेत्रका परिमाण आठ हजार धनुष प्रमाण जानना॥ १६८॥

सण्णिस्स वार सोदे तिण्हं णव जोयणाणि चक्खुस्स।
सत्तेतालसहस्सा वेसदतेसट्ठिमदिरेया॥ १६९॥

संज्ञिनो द्वादश श्रोत्रे त्रयाणां नव योजनानि चक्षुषः।
सप्तचत्वारिंशत्सहस्राणि द्विशतत्रिषष्ट्यतिरेकाणि॥ १६९॥

जी० प्र०—संज्ञिपंचेंद्रियस्य स्पर्शनरसनघ्राणेंद्रियविषयक्षेत्राणि नवनवयोजनमात्राणि चक्षुरिंद्रियविषयक्षेत्रं साधिकं त्रिषष्ट्यभ्यधिकशतद्वयोत्तरसप्तचत्वारिंशत्सहस्रयोजनप्रमितं भवति। ४७२६३, ७/२० श्रोत्रेंद्रियविषयक्षेत्रं द्वादशयोजनमात्रं भवति॥ १६९॥

म० प्र०—संज्ञिपंचेंद्रियस्य त्रयाणां स्पर्शनरसनघ्राणेंद्रियाणां विषयोत्कृष्टक्षेत्रप्रमाणं समानमेव नवयोजनमात्रं। चक्षुरिंद्रियविषयोत्कृष्टक्षेत्रप्रमाणं सप्तविंशतिभागाधिकत्रिषष्ट्युत्तरद्विशताधिकसप्तचत्वारिंशत्सहस्रयोजनमात्रं। श्रोत्रेंद्रियविषयोत्कृष्टक्षेत्रप्रमाणं द्वादश योजनमात्रं भवति॥ १६९॥

सं० च०—सैनी पंचेंद्रियकै स्पर्शन रसना घ्राण इनि तीनौं इंद्रियनिका नव नव योजन विषय क्षेत्र है। बहुरि नेत्र इंद्रियका विषय क्षेत्र सैतालीस हजार दोयसै तरेसठि योजन बहुरि सात योजनका वीसवां भागकरि अधिक है। बहुरि श्रोत्र इंद्रियका विषयक्षेत्र बारह योजन है॥ १६९॥

तिण्णिसयसट्ठिविरहिदलक्खं दशमूलताडिदे मूलं।
णवगुणिदे सट्ठिहिदे चक्खुप्फासस्स अद्धाणं॥ १७०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्रिशतषष्टिविरहितलक्षं दशमूलताडिते मूलं ।
नवगुणिते षष्टिहते चक्षुःस्पर्शस्य अध्वा ॥ १७० ॥

जी० प्र०–जंबूद्वीपस्य लक्षयोजनव्यासः पार्श्वद्वयद्वीपचारक्षेत्रेण षष्ट्यधिकत्रिशतयोजनमात्रेण विरहितोऽभ्यंतरपरिधिविष्कंभः स्यात् ९९६४० अस्य वर्गं कृत्वा दशकरण्या वर्गमूलग्रहणयोग्यराशिना गुणयित्वा ९९२८१२९६००० मूले गृहीते अभ्यंतरपरिधिप्रमाणं भवति । ३१५०८९ षष्टिमुहूर्तानां प्र ६० एतावद्गम्यक्षेत्रं फ ३१५०८९ तदा नवमुहूर्तानां इ ९ कियदिति त्रैराशिकं कृत्वा नवभिर्गुणयित्वा षष्ट्याहते सति यल्लब्धं तच्चक्षुरिंद्रियविषयसर्वोत्कृष्टक्षेत्रं भवति ४७२६३७ ॥ १७० ॥ अथेंद्रियाणां संस्थानं निर्दिशति—

२०

म० प्र०––संज्ञिपंचेंद्रियस्य चक्षुरिंद्रियविषयोत्कृष्टक्षेत्रप्रमाणानयनक्रमोयं तद्यथा–जंबूद्वीपविष्कंभात् योजनलक्षात् उभयप्रांतद्वीपचारक्षेत्रप्रमाणं षष्ट्युत्तरत्रिशतमात्रं विशोध्य शेषमभ्यंतरवीथीविष्कंभप्रमाणं भवति तत् विक्खंभवग्गदहगुणकरणीत्यादिना सूत्रेण वर्गयित्वा दशकरण्या गुणयित्वा च पुनर्वर्गमूलं ग्राह्यमेतन्मनसिकृत्य त्रिशतषष्टिविरहितलक्षे दशकरणिताडिते मूलमित्याचार्यैरुक्तं । तन्मूलं अभ्यंतरवीथीविष्कंभसूक्ष्मपरिधिप्रमाणं पुनः दिनद्वयमुहूर्ताः षष्टिः प्रमाणराशिः प्रकृतसूक्ष्मपरिधिप्रमाणे फलराशौ अर्धदिननवमुहूर्तप्रमितेन इच्छाराशिना गुणिते पुनः प्रमाणराशिना मुहूर्तषष्ट्याहते भक्ते यल्लब्धं सप्तविंशतिभागाधिकत्रिषष्ट्युत्तरशतद्वयाभ्यधिकसप्तचत्वारिंशत्सहस्रयोजनप्रमितं तच्चक्षुरिंद्रियस्पर्शनस्य अध्वा चक्षुरिंद्रियग्रहणयोग्योत्कृष्टं क्षेत्रं भवति । अभ्यंतरवीथ्यां निषधगिरेरुपरि सहस्रस्थाने उदयमानं सूर्यं अयोध्यामध्यसौधोपरितनभागस्थितः पुरुतीर्थकरभरतेश्वरादिविशिष्टक्षयोपशमवान् पुरुषविशेषः पश्यतीति नवमुहूर्तक्षेत्रं सिद्धं । एकः सूर्यो दिनद्वयेन परिधिं समापयति इति षष्टिमूहूर्ताः प्रमाणराशिः सिद्धः ॥ १७० ॥

सं० च०––सूर्यका चारक्षेत्र पांचसै वारा योजन चौडा है तामैं एकसौ अस्सी योजन तौ जबूंद्वीप है ताविषै है। अर तीनसै वत्तीस योजन लवण समुद्रविषै है सो जब सूर्य श्रावण मास कर्कसंक्रांतिविषै अभ्यंतर परिधिविषै आवै तब जंबूद्वीपका अंतरसौ एकसौं अस्सी योजन उरै भ्रमण करै है सो इस अभ्यंतर परिधिका प्रमाण कहै हैं–लाख योजन जंबूद्वीपका व्यासमेंसौं दोनौं तरफका चार क्षेत्रका परिमाण तीनसै साठि घटाया तब निन्याणवै हजार छसै च्यालीस योजन व्यास रह्या। याका परिधिके निमित्त 'विक्खंभवग्गदहगुण' इत्यादि सूत्र अनुसारि याका वर्गकरि ताकौं दशगुणा करिए पीछै जो परिमाण होइ ताका वर्गमूल ग्रहण कीजिए यों करतैं तीन लाख पंद्रह हजार निवासी योजन प्रमाण याका परिधि भया सो दोय सूर्यनिकी अपेक्षा साठि मुहूर्तमें इ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

तनै क्षेत्रविषै भ्रमण होइ तौ अभ्यंतर परिधिविषै दिनका प्रमाण अठारह मुहूर्त सो मध्याह्न समय सूर्य मध्य आवै तब अयोध्याकी बराबर होइ तातैं नौ मुहूर्तमैं कितने क्षेत्रमैं भ्रमण होइ ऐसैं त्रैराशिक करना। इहां प्रमाणराशि साठि ६० फलराशि ३१५०८९ इच्छाराशि ९ स्थापि उस परिधिके प्रमाणकौं नौकरि गुणै साठिका भाग दीजिए तहां लब्ध प्रमाण सैतालीस हजार दोयसै त्रैसठि योजन अर सात योजनका बीसवांभाग इतना चक्षु इंद्रियका उत्कृष्ट विषय क्षेत्र जानना। भावार्थ याका यहु है—जो अयोध्याका चक्री अभ्यंतर परिधिविषै तिष्ठता सूर्यकौं इहांतै पूर्वोक्त प्रमाण योजन धरै देखै है तातैं इतना चक्षु इंद्रियका उत्कृष्ट विषय क्षेत्र कह्या है।

एकेंद्रियादि पंचेंद्रिय जीवनिकै स्पर्शनादि इंद्रियनिके उत्कृष्ट विषय ज्ञानका यंत्र

इंद्रियनिके नाम	एकेंद्रिय	द्वींद्रिय	त्रींद्रिय	चतुरिंद्रिय		असंज्ञीपंचेंद्रिय		संज्ञीपंचेंद्रिय
०	धनुष	धनुष	धनुष	धनुष	योजन	धनुष	योजन	योजन
स्पर्शन	४००	८००	१६००	३२००	०	६४००	०	९
रसन	०	६४	१२८	२५६	०	५१२	०	९
घ्राण	०	०	१००	२००	०	४००	०	९
चक्षु	०	०	०	०	२९५४	०	५९०८	४७२६३ । ७ प्रमाण / २० योजन
श्रोत्र	०	०	०	०	०	८०००	०	१२

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0:In Public Domain. Digitized by Sarayu Trust/eGangotri

आगैं इंद्रियनिका आकार कहे हैं—

चक्खू सोदं घाणं जिब्भायारं मसूरजवणाली ।
अतिमुत्तखुरप्पसमं फासं तु अणेयसंठाणं ॥ १७१ ॥

चक्षुःश्रोत्रघ्राणजिह्वाकारं मसूरयवनाल्य-
तिमुक्तक्षुरप्रसमं स्पर्शनं तु अनेकसंस्थानं ॥ १७१ ॥

जी० प्र०–चक्षुःश्रोत्रघ्राणजिह्वाकारा यथासंख्यं मसूरिकायवनाल्यतिमुक्तकक्षुरप्रसमाना भवंति । स्पर्शनमनेकसंस्थानं भवति । पृथिव्यादीनां द्वींद्रियादीनां च शरीराकारस्यानेकविधत्वात् सर्वव्यापिनः स्पर्शनेंद्रियस्यापि तथात्वसंभवात् ॥ १७१ ॥ अथेंद्रियसंस्थानानां प्रदेशावगाहं प्रमाणयति—

मं० प्र०—भावेंद्रियस्य स्वरूपविषयक्रमवृद्धिस्वामिविषयक्षेत्रनिर्देशं कृत्वा इदानीं निर्वृत्त्युपकरणभेदं द्रव्येंद्रियं कथयति–तत्र बाह्यनिर्वृत्तिः अभ्यंतरनिर्वृत्तिरिति निर्वृत्तिर्द्वेधा । तत्र चक्षुःश्रोत्रघ्राणजिह्वेंद्रियाणां मसूरिकायवनाल्यतिमुक्तकपुष्पक्षुरप्रमुखसदृशी यथाक्रमं स्वस्वस्थानेषु नोकर्मपुद्गलपरिणामाकृतिर्बाह्यनिर्वृत्तिः । स्पर्शनेंद्रियस्य सर्वांगसंगतानियतानेकसंस्थाननोकर्मपुद्गलपरिणतिर्बाह्यनिर्वृत्तिः निर्वृत्त्यते तत्तदर्थग्रहणव्यापारोऽनयेति निर्वृत्तिरिति भावेंद्रियं प्रति सहकारिकारणत्वात् करणव्युत्पत्तिः सिद्धा । अभ्यंतरनिर्वृत्तिस्तु तत्तत्स्थानेषु स्वस्वावरणक्षयोपशमविशिष्टकार्मणस्कंधपुद्गलसहचरितात्मप्रदेशपरिणतिः । उपकरणं च बाह्याभ्यंतरभेदाद् द्वेधा । तत्र बाह्यमुपकरणं पक्ष्मपुटशष्कुलीचंपककुसुमचपेटहस्तानियताकारदृश्यनोकर्मपुद्गलपरिणामरूपं । अभ्यंतरमुपकरणं श्वेतकृष्णारुणगोलकाद्याकारदृश्यनोकर्मपुद्गलपरिणामरूपं । तुशब्देन बाह्यनिर्वृत्तिवचनोपलक्षणसूचितमभ्यंतरनिर्वृत्तिबाह्याभ्यंतरोपकरणत्रयमनुक्तमपि प्रकाशितमित्यागमानुसारेण व्याख्यातं ॥१७१॥

सं० च०—चक्षु इंद्री तौ मसूरकी दालिका आकार है । बहुरि श्रोत्र इंद्री जवकी जो नाली तीहिके आकार है । बहुरि घ्राण इंद्रिय अतिमुक्तक जो कदंबका फूल ताके आकार है । बहुरि जिह्वा इंद्रिय खुरपाके आकार है । बहुरि स्पर्शन इंद्रिय अनेक आकार है जातैं पृथ्वी आदि वा वेंद्री आदि जीवनिका शरीरका आकार अनेक प्रकार हैं तातैं स्पर्शन इंद्रियका भी आकार अनेक प्रकार कह्या जातैं स्पर्शन इंद्रिय सर्व शरीरविषैं व्याप्त

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

है ॥ १७१ ॥ आगैं निर्वृत्तिरूप द्रव्येंद्रिय स्पर्शनादिकनिका आकार कह्या सो कितने कितने क्षेत्र प्रदेशकौं रोकैं ऐसा अवगाहनाका प्रमाण कहै हैं–

अंगुलअसंखभागं संखेज्जगुणं तदो विसेसहियं।
तत्तो असंखगुणिदं अंगुलसंखेज्जयं तत्तु ॥ १७२ ॥

अंगुलासंख्यभागं संख्यातगुणं ततो विशेषाधिकं।
ततोऽसंख्यगुणितमंगुलसंख्यातं तत्तु ॥ १७२ ॥

जी० प्र०–रूपाधिकपल्यासंख्यातसंख्यातद्वयपल्यासंख्यातभक्तपल्यासंख्यातगुणितघनांगुलमात्रं ६ । प / प, a / a । १ १ । प / a चक्षुरिंद्रियप्रदेशावगाहप्रमाणं भवति। ततः संख्यातेन गुणितं श्रोत्रेंद्रियावगाहप्रमाणं भवति– ६ । प a / प । १ । प / a a ततस्तस्यैवपल्यासंख्येयभागेनासमच्छेदेन ६ । प / प a प प / a । a a अधिकमपवर्तितं घ्राणेंद्रियप्रदेशावगाहप्रमाणं भवति ६ । प१ / a ततः पल्यासंख्येयभागगुणितं जिह्वेंद्रियप्रदेशावगाहप्रमाणं भवति तच्च घनांगुलासंख्येयभागमात्रमेव। ६ / १ ॥ १७२ ॥ अथ स्पर्शनेंद्रियप्रदेशावगाहप्रमाणमाह–

मं० प्र०—घनांगुलासंख्यातभागमात्रं चक्षुरिंद्रियावगाहनक्षेत्रं तच्च पल्यासंख्यातभागेन रूपाधिकपल्यासंख्यातभागेन संख्यातद्वयेन च विभक्तं पल्यासंख्यातभागेन गुणितं घनांगुलं भवति। ततः संख्येयगुणं श्रोत्रेंद्रियावगाहनक्षेत्रं। ततोविशेषाधिकं घ्राणेंद्रियावगाहनक्षेत्रं। अधिकागमनानिमित्तप्रतिभागहारः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पल्यासंख्यातभागमात्रः । ततः पल्यासंख्यातभागगुणं रसनेंद्रियावगाहनक्षेत्रं तच्च घनांगुलसंख्यातभागमात्रं भवति तत्र तत्र गुणकारभागहाराणामपवर्तनवशात्, तुशब्दः चशब्दार्थः ॥ १७२ ॥

सं० च०—घनांगुलके असंख्यातवें भाग प्रमाण आकाश प्रदेशनिकौं चक्षु इंद्रिय रोकै है। सो घनागुलकौं पल्यका असंख्यातवां भागकरि तौ गुणीए अर एक अधिक पल्यका असंख्यातवां भागका अर दोयवार संख्यातका अर पल्यका असंख्यातवां भागका भाग दीजिये जो प्रमाण आवै तितना चक्षु इंद्रियकी अवगाहना है बहुरि यातैं संख्यातगुणा श्रोत्र इंद्रियकी अवगाहना है। बहुरि इस गुणकारकरि एकवार संख्यातके भागहारका अपवर्तन करना। बहुरि याका पल्यका असंख्यातवां भागका भागदीए जो परिमाण आवै तितना उसही श्रोत्र इंद्रीकी अवगाहनाविषैं मिलाए घ्राण इंद्रियकी अवगाहना होइ। सो इहां इस अधिक प्रमाणकरि एक अधिक पल्यका असंख्यातवां भागका भागहार अर पल्यका असंख्यातवां भागका गुणकारका अपवर्तन करना। बहुरि याकौं पल्यका असंख्यातवां भागकरि गुणिए तब जिह्वा इंद्रियकी अवगाहना होइ इस गुणकारकरि पल्यका असंख्यातवां भागहारका अपवर्तन करना। ऐसैं यहु जिह्वा इंद्रीकी अवगाहना घनांगुलके संख्यातवे भाग मात्र जानना ॥ १७२ ॥ आगैं स्पर्शन इंद्रियके प्रदेशनिकी अवगाहनाका प्रमाण कहै हैं।

सुहमणिगोदअपज्जत्तयस्स जादस्स तदियसमयह्मि।
अंगुलअसंखभागं जहण्णमुक्कस्सयं मच्छे ॥ १७३ ॥

सूक्ष्मनिगोदापर्याप्तकस्य जातस्य तृतीयसमये।
अंगुलासंख्यभागं जघन्यमुत्कृष्टकं मत्स्ये ॥ १७३ ॥

स० चं०—स्पर्शनेंद्रियस्य जघन्यप्रदेशावगाहप्रमाणं सूक्ष्मनिगोदलब्ध्यपर्याप्तकस्य उत्पन्नस्य तृतीयसमये यत्पूर्वोक्तजघन्यशरीरावगहनघनांगु-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लसंख्येयभागप्रमितं—६ । ८ । २२
a

तदेव भवति । उत्कृष्टं तु महामत्स्ये यदुत्कृष्टशरीरावगाहनं संख्यातघनांगुलप्रमि-

प १९ । ८ । ९ । ८ । २२ । ७ । ९
a a a

तमुक्तं ६ ७ ७ ७ ७ ७ तद्भवति । सर्वत्र स्पर्शनेंद्रियस्य स्वशरीरप्रमाणसर्वात्मप्रदेशसंगतत्वात् ॥ १७३ ॥ एवमिंद्रियज्ञानिजीवान्-संसारिजीवान् प्ररूप्य अधुना अतींद्रियज्ञानिजीवान् प्ररूपयति—

मं० प्र०--सूक्ष्मनिगोदलब्ध्यपर्याप्तकस्य जातस्य तृतीयसमये यत्पूर्वोक्तं घनांगुलासंख्यातभागमात्रं जघन्यशरीरावगाहनक्षेत्रं तदेव स्पर्शनेंद्रियस्य जघन्यावगाहनक्षेत्रं भवति । महामत्स्ये यत्प्रागुक्तं संख्यातघनांगुलमात्रमुत्कृष्टशरीरावगाहनक्षेत्रं तदेव स्पर्शनेंद्रियस्योत्कृष्टावगाहनक्षेत्रं भवति सर्वत्र स्पर्शनेंद्रियस्य स्वशरीरप्रमाणसर्वात्मप्रदेशसंभवात् ॥ १७३ ॥

सं० च०—स्पर्शन इंद्रियका जघन्य अवगाहना सूक्ष्म निगोदिया लब्धि अपर्याप्तक उपजनैतैं तीसरा समय विषैं जो जघन्य शरीरका अवगाहना घनांगुलके असंख्यातवैं भाग मात्र हो है सोई है। बहुरि उत्कृष्ट अवगाहना स्वयंभू रमण समुद्रविषैं महामच्छका उत्कृष्ट शरीर संख्यात घनांगुल मात्र हो है सो है॥ १७३ ॥ आगैं इंद्रियज्ञानवाले जीवनिकौं कहि अब अतींद्रिय ज्ञानवाले जीवनिका निरूपण करै हैं—

णवि इंदियकरणजुदा अवग्गहादीहिं गाहया अत्थे ।
णेव य इंदियसोक्खा अणिंदियाणंतणाणसुहा ॥ १७४ ॥

नापि इंद्रियकरणयुता अवग्रहादिभिः ग्राहकाः अर्थे ।
नैव च इंद्रियसौख्या अनिंद्रियानंतज्ञानसुखाः ॥ १७४ ॥

जी० प्र०—ये जीवा नियमेन इंद्रियकरणैः—उन्मीलनादिव्यापारैः, युताः—युक्ता न संति कस्मात् ? तेषामशरीरत्वात् तत्कारणजातिनामादिकर्माभावाच्च । तथा च अवग्रहादिभि—क्षायोपशमिकज्ञानैरर्थग्राहका न भवंति । पुनः इंद्रियविषयसंश्लेषजनितसुखयुता नैव संति ते जिनसिद्धनामानो जीवा अनिंद्रियानंतज्ञानसुखकलिता भवंति । कस्मात् ? तज्ज्ञानसुखयोः शुद्धात्मस्वरूपोपलब्ध्युत्पन्नत्वात् ॥ १७४ ॥ अथेंद्रियादीनां सामान्यसंख्यामाह—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं० प्र०—संसारिजीवानामिंद्रियस्वरूपं प्ररूप्य इदानीं मुक्तजीवानामतींद्रियत्वं कथयति। तद्यथा—ते मुक्तजीवा इंद्रियकरणयुता न भवंति इंद्रियाणां करणानि—क्रिया उन्मीलननिमीलनादिव्यापाराः, तैर्युक्ता न भवंत्येव तेषामशरीरत्वात् तत्कारणजातिनामादिकर्माभावाच्च। तथा अवग्रहादिभिः-अवग्रहेहावायधारणास्मृतिप्रत्यभिज्ञानतर्कानुमानादिक्षायोपशमिकोपयोगैः छद्मस्थसंभवैः, अर्थानां—जीवादिपदार्थानां, ग्राहकाः-ज्ञायकाः न भवंत्येव तथा इंद्रियसौख्याश्च इंद्रियविषयसंयोगसद्वेद्योदयजनिताभिमानिकाह्लादरूपसुखपरिणामाश्च न भवंत्येव। कुतः कारणात्? इति प्रश्ने यतः कारणात्ते मुक्तजीवाः अनिंद्रियानंतज्ञानसुखाः संजातास्ततः कारणादिति समाधानं। अनिंद्रिये-द्रव्यभावेंद्रियरहिते, अनंते विनाशरहिते अनंतानंतशक्तिसंपन्ने वा ज्ञानसुखे केवलज्ञानपरमस्वास्थ्यलक्षणसुखे येषां विद्येते ते अनिंद्रियानंतज्ञानसुखा इति केवलसम्यक्त्ववीर्यादिशेषगुणानामेतत्साहचर्यनियमादनुक्ता अपि सिद्धानां ते ग्राह्याः। आत्मनः केवलसम्यक्त्वज्ञानदर्शनादिगुणानां स्वाभाविकत्वेन इंद्रियादिनिरपेक्षतया अस्तित्वप्रसिद्धेः स्फटिकस्य स्वच्छतावत् सुवर्णस्य उत्कृष्टवर्णशुद्धतावच्च। वस्तुनः स्वभावः परनिरपेक्ष एव औपाधिकधर्माणामेव परापेक्षकत्वात् स्फटिकसुवर्णयोः शोणत्वकालिकावत् ॥ १७४ ॥ अथ संक्षेपतः एकेंद्रियादिजीवसंख्यां प्ररूपयति—

सं० च०—जे जीव नियमकरि इंद्रियनिके करण भोंहैं टिमकारना आदि व्यापार तिनिकरि संयुक्त नाहीं हैं तातैं ही अवग्रहादिक क्षयोपशम ज्ञानकरि पदार्थका ग्रहण न करै हैं बहुरि इंद्रियजनित विषय संबंधकरि निपज्या सुख तिहिकरि संयुक्त नाहीं हैं ते अर्हंत वा सिद्ध अतींद्रिय अनंत ज्ञान वा अतींद्रिय अनंत सुखकरि विराजमान जानने जातैं तिनिका ज्ञान अर सुख सो शुद्धात्मतत्त्वकी उपलब्धितैं उत्पन्न भया है ॥१७४॥ आगै एकेंद्रियादि जीवनिकी सामान्यपनै संख्या कहै हैं—

थावरसंखपिपीलियभमरमणुस्सादिगा सभेदा जे।
जुगवारमसंखेज्जाणंताणंता णिगोदभवा ॥ १७५ ॥

स्थावरशंखपिपीलिकाभ्रमरमनुष्यादिकाः सभेदा ये।
युगवारमसंख्येया अनंतानंता निगोदभवाः ॥ १७५ ॥

जी० प्र०—स्थावराः पृथिव्यप्तेजोवायुप्रत्येकवनस्पतिकायिकनामानः पंचविधैकेंद्रियाः। शंखादयो द्वींद्रियाः। पिपीलिकादयस्त्रींद्रियाः। भ्रमरादयश्चतुरिंद्रियाः। मनुष्यादयः पंचेंद्रियाश्च स्वस्वावांतरभेदसहिताः प्राक् कथिताः ते प्रत्येकं द्विकवारासंख्यातप्रमिता भवंति। निगोदाः-साधारणवनस्पतिकायिकाः, अनंतानंता भवंति ॥ १७५ ॥ अथ विशेषसंख्यां कथयंस्तावदेकेंद्रियसंख्यामाह—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं० प्र०——स्थावराः पृथिव्यादयः साधारणशरीररहितवनस्पत्यंताः एकेंद्रिया ये जीवास्ते द्विकवारासंख्येयाः असंख्यातलोकमात्राः। तद्विशेषः पुनरग्रे वक्ष्यते। निगोदभवाः साधारणशरीराः एकेंद्रिया ये जीवास्ते अनंतानंताः। त्रसप्रत्येकपृथिव्यादिचतुष्टयराशित्रयरहितसंसारिजीवराशिसंख्याप्रमिताः। शंखादयो द्वींद्रियाः, पिपीलिकादयस्त्रींद्रियाः, भ्रमरादयश्चतुरिंद्रियाः, मनुष्यादयः पंचेंद्रियाश्च ये जीवास्तेऽपि द्विकवारासंख्येयाः जगत्प्रतरासंख्येयभागमात्राः। असंख्यातासंख्याता इत्यर्थः। तद्विशेषश्च अग्रे वक्ष्यते ॥ १७५ ॥ अथ श्रीमाधवचंद्रत्रैविद्यदेवाः गाथापंचकेन एकेंद्रियादिसंख्याविशेषं कथयंति–

जी० प्र०——स्थावर जो पृथ्वी अप तेज वायु प्रत्येक वनस्पती ए पंच प्रकार तौ एकेंद्री बहुरि संख कौडी लट इत्यादि बेंद्री बहुरि कीडी मकोडा इत्यादि तेंद्री बहुरि भ्रमर माखी पतंग इत्यादि चौइंद्रिय बहुरि मनुष्य देव नारकी अर जलचरादि तिर्यंच ते पंचेंद्री ए जुदे जुदे एक एक असंख्यातासंख्यात प्रमाण हैं। बहुरि निगोदिया जो साधारण वनस्पती रूप एकेंद्री ते अनंतानंत हैं ॥ १७५ ॥ आगैं विशेष संख्या कहै हैं तहां प्रथम ही एकेंद्रिय जीवनिकी संख्या कहैं हैं–

तसहीणो संसारी एयक्खा ताण संखगा भागा।
पुण्णाणं परिमाणं संखेज्जदिमं अपुण्णाणं ॥ १७६ ॥

त्रसहीनाः संसारिणः एकाक्षाः तेषां संख्यका भागाः।
पूर्णानां परिमाणं संख्येयकमपूर्णानां ॥ १७६ ॥

जी०प्र०——त्रसराशिहीनसंसारिराशिरेवैकेंद्रियराशिर्भवति १३-। अस्य च संख्यातबहुभागाः पर्याप्तकपरिमाणं भवति १३--। ४/५ तदेकभागः अपर्याप्तकराशिप्रमाणं भवति १३-। १/५ अत्र संख्यातस्य संदृष्टिः पंचांकः ५ ॥ १७६ ॥ अथैकेंद्रियावांतरभेदसंख्याविशेषमाह–

मं० प्र० त्रसजीवराशिना हीनसंसारिजीवराशिप्रमिताः एकाक्षाः–एकेंद्रियजीवाः भवंति, तेषां संख्येयभक्तबहुभागाः एकेंद्रियपर्याप्तजीवानां परिमाणं १३–।४ भवति शेषसंख्येयभक्तैकभागः एकेंद्रियापर्याप्तजीवानां परिमाणं १३–१/५ भवति ॥ १७६ ॥
५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी० प्र०—सर्व जीव राशि प्रमाणमैंस्यौं सिद्धनिका प्रमाण घटाए संसारी राशि होइ सोईं संसारीजीवनिका परिमाणमैंस्यौं त्रस जीवनिका परिमाण घटाएं एकेंद्रिय जीवनिका परिमाण हो है। बहुरि तींहि एकेंद्रिय जीवनिका परिमाणकौं संख्यातका भाग दीजिये तामैं एक भाग प्रमाण तौ अपर्याप्त एकेंद्रियनिका परिमाण है बहुरि अवशेष बहुभाग प्रमाण पर्याप्त एकेंद्रियनिका परिमाण है ॥ १७६ ॥ आगैं एकेंद्रियनिके भेदनिकी संख्याका विशेष कहै हैं—

वादरसुहमा तेसिं पुण्णापुण्णेत्ति छव्विहाणंपि ।
तक्कायमग्गणाये भणिज्जमाणक्कमो णेयो ॥ १७७ ॥

वादरसूक्ष्मास्तेषां पूर्णापूर्ण इति षड्विधानामपि ।
तत्कायमार्गणायां भणिष्यमाणक्रमो ज्ञेयः ॥ १७७ ॥

जी० प्र०—सामान्यैकेंद्रियराशेर्वादरसूक्ष्माविति द्वौ भेदौ तयोः पुनः प्रत्येकं पर्याप्तापर्याप्ताविति चत्वारः। एवं षड्भेदानां तत्कायमार्गणायां भणिष्यमाणः क्रमो ज्ञेयः। तद्यथा-एकेंद्रियसामान्यराशेरसंख्यातलोकभक्तैकभागो वादरैकेंद्रियराशिप्रमाणं १३-- १ तद्बहुभागः १३--८
९ ९
सूक्ष्मैकेंद्रियराशिप्रमाणं। अत्रासंख्यातलोकस्य संदृष्टिर्नवांकः ९। पुनः वादरैकेंद्रियराशेरसंख्यातलोकभक्तैकभागस्तत्पर्याप्तराशिः। १३--। १ १
९ ७
बहुभागस्तदपर्याप्तराशिः १३--। १ ६ अत्रासंख्यातलोकस्य संदृष्टिः सप्तांकः। सूक्ष्मैकेंद्रियराशेः संख्यातभक्तबहुभागस्तत्पर्याप्तराशिः १३-। ८।४
९।७ ९।५
तदेकभागस्तदपर्याप्तराशिः १३-। ८। १ अत्र संख्यातस्य संदृष्टिः पंचांकः ॥ १७७ ॥ अथ त्रसजीवसंख्यां गाथात्रयेणाह--
९। ५

मं० प्र०---तेषामेकेंद्रियाणां वादराः सूक्ष्मा इति द्वौ भेदौ। तयोश्च प्रत्येकं पूर्णाः--पर्याप्ताः, अपूर्णाः--अपर्याप्ताश्चेति द्वौ द्वौ भेदौ इति षड्विधानामपि--षड्भेदानामपि राशीनां तत्कायमार्गणायां भणिष्यमाणः क्रमः संख्याविधानं ज्ञेयं। अत्रैकेंद्रियमार्गणायामपि तथा ज्ञेयः नेयः नेतव्यो वा। तद्यथा ४०७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकेंद्रियजीवराशौ असंख्यातलोकेन खंडिते तदेकभागो वादरैकेंद्रियजीवराशिप्रमाणं १३-१/९ शेषबहुभागाः सूक्ष्मैकेंद्रियजीवराशिप्रमाणं १३ । ८/९ असंख्यातलोकस्य संदृष्टिर्नवांकः । पुनर्वादरैकेंद्रियजीवराशौ असंख्यातलोकेन खंडिते तदेकभागः वादरैकेंद्रियपर्याप्तजीवराशिप्रमाणं । तद्बहुभागाः वादरैकेंद्रियापर्याप्तजीवराशिप्रमाणं । अत्रासंख्यातलोकस्य संदृष्टिः सप्तांकः । सूक्ष्मैकेंद्रियजीवराशौ संख्यातेन खंडिते तद्बहुभागाः सूक्ष्मैकेंद्रियपर्याप्तजीवराशिप्रमाणं । तदेकभागः सूक्ष्मैकेंद्रियपर्याप्तजीवराशिप्रमाणं । अत्र संख्यातंसंदृष्टिः पंचांकः ॥ १७७ ॥

स० चं०—सामान्य एकेंद्रिय राशिके वादर अर सूक्ष्म ए दोय भेद बहुरि एक एक भेदके पर्याप्त अपर्याप्त ए दोय दोय ऐसैं च्यारि भए तिनिका परिमाण आगै कायमार्गणाविषै कहिएगा सो अनुक्रम जानना सो कहिए है सामान्य पणै एकेंद्रियका जो परिमाण ताकौं असंख्यात लोकका भाग दीजिए तामै एक भाग प्रमाण तौ वादर एकेंद्रिय जानने । अर अवशेष बहुभाग प्रमाण सूक्ष्म एकेंद्रिय जानने । बहुरि वादर एकेंद्रियनिके परिमाणकौं असंख्यात लोकका भाग दीजिए तामै एक भाग प्रमाण तौ पर्याप्त हैं अर अवशेष बहुभाग प्रमाण अपर्याप्त हैं । बहुरि सूक्ष्म एकेंद्रियका परिमाणकौं संख्यातका भागदीजिए तामैं एक भाग प्रमाण तौ अपर्याप्त हैं । बहुरि अवशेष भाग प्रमाण पर्याप्त हैं । वादरविषैं तौ पर्याप्त थोरे हैं अपर्याप्त घने हैं बहुरि सूक्ष्मविषैं पर्याप्त घने हैं अपर्याप्त थोरे हैं ऐसा भेद जानना ॥ १७७ ॥ आगैं त्रस जीवनिकी संख्या तीन गाथानिकरि कहैं हैं—

वितिचपमाणमसंखेणवहिदपदरंगुलेण हिदपदरं ।
हीणकमं पडिभागो आवलियासंखभागो दु ॥ १७८ ॥

द्वित्रिचतुःपंचमानमसंख्येनावहतप्रतरांगुलेन हतप्रतरं ।
हीनक्रमं प्रतिभाग आवलिकासंख्यभागस्तु ॥ १७८ ॥

जी० प्र०—द्वित्रिचतुःपंचेंद्रियजीवानां सामान्यराशिप्रमाणं असंख्यातभक्तप्रतरांगुलेन भक्तं जगत्प्रतरप्रमितं भवति $\frac{\overset{=}{४}}{a}$ । अत्र द्वींद्रियराशिप्र-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

माणं सर्वतोऽधिकं । ततस्त्रींद्रियराशिः विशेषहीनः । ततश्चतुरिंद्रियराशिः विशेषहीनः । ततः पंचेंद्रियराशिः विशेषहीनः । अत्र विशेषागमननिमित्तं भागहारः प्रतिभागहारः स चावल्यसंख्येयभागमात्रः ॥ १७८ ॥ तद्विभागक्रमः कथमिति चेदाह--

मं० प्र०----प्रतरांगुलासंख्यातभागविभक्तजगत्प्रतरमात्रं द्वित्रिचतुःपंचेंद्रियजीवसंख्यापरिमाणं भवति तथासत्यपि द्वींद्रियादिपूर्वपूर्वप्रमाणात् त्रींद्रियाद्युत्तरोत्तरप्रमाणं हीनक्रमं--क्रमेण हीनं भवति । तु पुनः, तद्धान्यानयने आवल्यसंख्येयभागः प्रतिभागहारः ऋणं भवति आवल्यसंख्यातभागस्यापि संदृष्टिर्नवांकः ॥ १७८ ॥

जी० प्र०----द्वींद्रिय त्रींद्रिय चतुरिंद्रिय पंचेंद्रिय इनि सर्व त्रसनिका मिलाया हुवा प्रमाण प्रतरांगुलकौं असंख्यातका भाग दीजिए जो प्रमाण आवै ताका भाग जगत प्रतरकौं दीएं या करतैं जितना होइ तितना जानना । इहां द्वींद्रिय राशिका प्रमाण सर्वतैं अधिक है बहुरि तातैं त्रींद्रिय विशेष घाटि है तातैं चौंइंद्रिय विशेष घाटि है। तातैं पंचेंद्रिय विशेष घाटि है सो घाटि घाटि कितने हैं ऐसा विशेषका प्रमाण जाननेके निमित्त भागहार अर भागहारका भागहार आवलीका असंख्यातवां भाग मात्र जानना । सो भागहारका अनुक्रम कैसैं हैं ? सो कहिये है--

बहुभागे समभागो चउण्णमेदेसिमेक्कभागह्मि ।
उत्तकमो तत्थवि बहुभागो बहुगस्स देओ दु ॥ १७९ ॥

बहुभागे समभागश्चतुर्णमितेषामेकभागे ।
उक्तक्रमस्तत्रापि बहुभागो बहुकस्य देयस्तु ॥ १७९ ॥

जी० प्र०---त्रसराशिं ४̿/a आवल्यसंख्यातभागेन भक्त्वा एकभागं पृथक् संस्थाप्य बहुभागं ४̿/a । ८/९ चतुर्भिर्भक्त्वा द्वित्रिचतुःपंचेंद्रियाणां चतुर्षु स्थानेषु समभागतया दत्त्वा ४̿/a । ४ । ९ । ८ । ४̿/a । ४ । ९ । ८ । ४̿/a । ४ । ९ । ८ । ४̿/a । ४ । ९ । ८ तत्पृथक्स्थापितैकभागमिमं ४̿/a । ९ । १ पु-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नरावल्यसंख्यातैकभागेन (=१ / ४९।९ / a) भक्त्वा बहुभागं द्वींद्रियस्य दत्त्वा (=।८ / ४।९।९ / a) तदेकभागमिमं (=।१ / ४।९।९ / a) पुनरावल्यसंख्यातैकभागेन भक्त्वा बहुभागं त्रींद्रियस्य दत्त्वा (=।८ / ४।९।९।९ / a) तदेकभागमिमं (=१ / ४।९।९।९ / a) पुनरावल्यसंख्यातैकभागेन भक्त्वा बहुभागं चतुरिंद्रियस्य दत्त्वा (=८ / ४।९।९।९।९ / a) तदेकभागं पंचेंद्रियस्य दद्यात् (=१ / ४।९।९।९।९ / a) तद्विन्यासः—

समभागः	वि = ८ / ४।४।९ / a	ति = ८ / ४।४।९ / a	च = ८ / ४।४।९ / a	पं = ८ / ४।४।९ / a
देयभागः	=८ / ४।९।९ / a	= ८ / ४।९।९।९ / a	= ८ / ४।९।९।९।९ / a	= १ / ४।९।९।९।९ / a

स्वस्वाधस्तनराशयः स्वस्वोपरि समच्छेदेन मिलिता ईदृशा भवंति—

वि = ८४२४ / ४, ४, ६५६१ / a	ति = ६१२० / ४, ४, ६५६१ / a	च = ५८६४ / ४, ४, ६५६१ / a	पं = ५८३६ / ४ ४, ६५६१ / a

म० प्र०——आवल्यसंख्यातैकभागभक्तप्रतरांगुलभाजितजगत्प्रतरमात्रं त्रसराशिपरिमाणं संस्थाप्य पुनरावल्यसंख्यातेन तत्खंडयित्वा एकभागं संस्थाप्य तद्बहुभागं गृहीत्वा चतुर्भिर्भक्त्वा तदेकैकभागः एतेषां चतुर्णां द्वित्रिचतुःपंचेंद्रियजीवानां प्रत्येकं समभाग एव न्यूनाधिकत्वरहित एव दातव्यः। प्राक्संस्थापितैकभागं पुनरावल्यसंख्यातभागेन खंडयित्वा तदेकभागं संस्थाप्य तद्बहुभागः बहुकस्य-त्रींद्रियादिभ्योऽधिकस्य द्वींद्रियस्य देयः। तु-पुनरपि तदेकभागं आवल्यसंख्यातभागेन खंडयित्वा तदेकभागं संस्थाप्य तद्बहुभागः अवशिष्टबहुकस्य त्रींद्रियस्य देयः। पुनरपि तदेकभागं आवल्यसंख्यातभागेन खंडयित्वा तदेकभागं संस्थाप्य तद्बहुभागः शेषबहुकस्य चतुरिंद्रियस्य देयः। तदेकभागः पुनः सर्वाल्पस्य पंचेंद्रियस्य देयः। एतत्सर्वं विधानं मनसिकृत्य तत्राप्येकभागे उक्तः क्रमः पुनः पुनरेकभागबहुभागविधानं कर्तव्यं, इत्युक्तमाचार्यैः। एते सर्वेऽपि भागाः समच्छेदीकृत्य पंचेंद्रियमारभ्य मेलनीयाः, एवं मेलिते सति जगत्प्रतरस्य गुणकाराः—अंकसंदृष्ट्या पंचेंद्रियस्य षट्त्रिंशदुत्तराष्टशताधिकपंचसहस्राणि। चतुरिंद्रियस्य चतुःषष्ट्युत्तराष्टशताधिकपंचसहस्राणि। त्रींद्रियस्य विंशत्युत्तरैकशता-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ति = ८ / ४ । ४ । ९ / ५	वि = ८ / ४ । ४ । ९ / ५	पं = ८ / ४ । ४ । ९ / ५	च = ८ / ४ । ४ । ९ / ५
= ८ / ४ । ९ । ९ / ५	= ८ / ४ । ९ ९ ९ / ५	= ८ / ४ । ९ ९ ९ ९ / ५	= १ / ४ ९ ९ ९ ९ / ५

समच्छेदेन मिलितानां न्यासोयं।

ति = ८४२४ / ४ । ४ । ६५६१ / ५	वि = ६१२० / ४ । ४ । ६५६१ / ५	पं = ५८६४ / ४ । ४ । ६५६१ / ५	च = ५८३६ / ४ । ४ । ६५६१ / ५

एतेषु पर्याप्तराशिषु निजनिजद्वींद्रियादिसामान्यराशिषु अपनीतेषु शेषद्वींद्रियादिपंचेंद्रियपर्यंतानां अपर्याप्तकजीवराशीनां प्रमाणं भवतीति ज्ञातव्यं—

वि = ५ । ६१२० / ८४२४ ३ / ४ । ४ । ६५६१	ति = ५ । ८४२४ / । ६१२० ३ / ४ । ४ । ६५६१	च = ५ । ५८३६ / । ५८६४ ३ / ४ । ४ । ६५६१	पं० = ५ । ५८६४ / । ५८३६ ३ / ४ । ४ । ६५६१

इत्याचार्यश्रीनेमिचंद्रविरचितायां गोम्मटसारापरनामपंचसंग्रहवृत्तौ तत्त्वप्रदीपिकाख्यां जीवकांडे विंशतिप्ररूपणासु इंद्रियमार्गणाप्ररूपणानाम सप्तमोऽधिकारः ॥ ७ ॥

मं० प्र०——त्रिद्विपंचचतुरिंद्रियपर्याप्तजीवानां परिमाणसंख्या प्रत्येकं प्रतरांगुलसंख्यातभागभक्तजगत्प्रतरमात्रं हीनक्रमं-क्रमेण हीनं भवति। अत्रापि प्रतिभागहारः आवल्यसंख्यातभागमात्रः। हान्यानयनविधानं च पूर्ववत् 'बहुभागे समभागो' इति गाथासूत्रव्याख्यानेनैव एकभागबहुभागकरणं, बहुभागस्य चतुर्षु समभागप्रदानं, पुनरवशिष्टैकभागबहुभागस्य त्रींद्रियेषु प्रदानं, पुनरप्यवशिष्टैकभागबहुभागस्य द्वींद्रियेषु प्रदानं, पुनरवशिष्टैकभागबहुभागस्य पंचेंद्रियेषु प्रदानं शेषैकभागस्य चतुरिंद्रियेषु प्रदानं तद्भागानां च समच्छेदीकरणपूर्वकमेलनं च सर्वविधानं निरवशेषं वक्तव्यं। पुनः पूर्णैः द्वींद्रियादिपर्याप्तजीवप्रमाणैरूनाः--परिहीणाः सामान्यद्वींद्रियादिराशय एव अपर्याप्तद्वित्रिचतुःपंचेंद्रियजीवराशयो भवंति। सामान्यद्वींद्रियराशेः सकाशात् = ८४२४ । ३ / ४ । ४ । ६५६१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विकषट्सहस्राणि । द्वींद्रियस्य चतुर्विंशत्युत्तरचतुःशताधिकाष्टसहस्राणि । भागहाराः पुनः सर्वेषां समाना एव एकषष्ट्युत्तरपंचशताधिकषट्सहस्रमात्राः ॥१७९॥

सं० च०—त्रस जीवनिका जो परिमाण कह्या तीहिंनैं आवलीका असंख्यातवां भागका भाग दीजिये तामैं एक भाग तौ जुदा राखिये अर जे अवशेष बहु भाग रहे तिनिके च्यारि वट कीजिये सो एक एक वट द्वींद्रिय त्रींद्रिय चतुरिंद्रिय पंचेंद्रियनिकौं बरोवरि दीजिये । बहुरि जो एक भाग जुदा राख्या था ताकौं आवलीका असंख्यातवां भागकौं भाग दीजिए तामैं एक भाग तौ जुदा राखिए अर अवशेष बहुभाग द्वींद्रियनिकौं दीजिये जातैं सर्व त्रसविषैं बहुत प्रमाण द्वींद्रियका है । बहुरि जो एक भाग जुदा राख्या था ताकौं बहुरि आवलीका असंख्यातवां भागका भाग दीजिए तामैं एक भाग तौ जुदा राखिये बहुरि अवशेष भाग ते इंद्रियनिकौं दीजिए बहुरि जो एक भाग जुदा राख्या था ताकौं बहुरि आवलीका असंख्यातवां भागका भाग दीजिये तामैं बहु भाग तौ चौइंद्रियनिकौं दीजिए अर एक भाग पंचेंद्रियकौं दीजिए । ऐसैं दीए हूवे परिमाण कहे ते नीचैं स्थापिए । बहुरि पूर्वैं जे बराबरि च्यारि वट किए थे तिनिकौं ऊपरि स्थापिए बहुरि अपने अपने नीचैं ऊपरिके परिमाणकौं मिलाएं द्वींद्रियादि जीवनिका परिमाण हो है ॥ १७९ ॥

तिविपचपुण्णपमाणं पदरंगुलसंखभागहिदपदरं ।
हीणकमं पुण्णूणा वितिचपजीवा अपज्जत्ता ॥ १८० ॥

त्रिद्विपंचचतुःपूर्णप्रमाणं प्रतरांगुलासंख्यभागहतप्रतरं ।
हीनक्रमं पूर्णोना द्वित्रिचतुःपंचजीवा अपर्याप्ताः ॥ १८० ॥

जी० प्र०—त्रिद्विपंचचतुरिंद्रियपर्याप्तराशिप्रमाणं प्रतरांगुलसंख्येयभागभक्तजगत्प्रतरप्रमितं भवति $\frac{=}{4\,5}$ अत्र त्रींद्रियादय उक्तक्रमेण हीनक्रमा भवंति । अत्रापि 'बहुभागे समभागो' इत्यादिसूत्रक्रमेण त्रिद्विपंचचतुरिंद्रियपर्याप्तकानां विभक्तस्य विन्यासोऽयं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पर्याप्तद्वींद्रियराशौ $= \frac{६१२०}{४।४।६५६१}$ अपनीते तस्यावशिष्टः अपर्याप्तद्वींद्रियजविराशिर्भवति $= \frac{५६१२०}{४।४।६५६१}$ ८४२४ a ¨ एवं त्रींद्रियादिष्वपि स्वस्वसामान्यराशेः सकाशात्स्वस्वपर्याप्तराशावपनीते सति अवशिष्टः स्वस्वापर्याप्तराशिर्भवति इति विचार्य ज्ञातव्यं । तिविपचेतिव्युत्क्रमकथनं तत्तद्धानिविशेषानयनार्थं ॥१८०॥

इति श्रीमदभयचंद्रसूरिसिद्धांतचक्रवर्तिकृतौ गोम्मटसारपंचसंग्रहवृत्तौ इंद्रियमार्गणाप्ररूपणानाम सप्तमोऽधिकारः ॥ ७ ॥

सं० च०—बहुरि पर्याप्त त्रसजीव प्रतरांगुलका संख्यातवां भागका भाग जगत्प्रतरकौं दीएं जो परिमाण आवै तितने हैं तिनिविषै घने तौ तेइंद्रिय हैं । तिंहिस्यों घाटि द्वींद्रिय हैं । तिहिस्यों घाटि पंचेंद्रिय हैं । तिहिसौं घाटि चौइंद्रिय हैं सो इहां भी पूर्वोक्त 'बहुभागे समभागो' इत्यादि सूत्रोक्त प्रकारकरि सामान्य पर्याप्त त्रस राशिकौं आवलीका असंख्यातवां भागका भाग देइ एक भाग जुदा राखि अवशेष बहुभागनिके च्यारि समान भागकरि एक एक भाग तेंद्री वेंद्री पंचेंद्री चौंद्रीनिकौं देना । बहुरि तिस एक भागकौं भागहार आवलीका असंख्यातवां भागका भाग देइ एक भाग जुदा राखि बहुभाग ते इंद्रियनिकौं देना । बहुरि तिस एक भागकौं भागहारका भाग देइ एक भाग जुदा राखि बहुभाग द्वींद्रियनिकौं देनां बहुरि तिस एकभागकौं भागहारका भाग देइ एक भाग जुदा राखि बहुभाग पंचेंद्रियनिमें देनां अर एक भाग चौइंद्रियनिकौं देना ऐसें अपना अपना समभाग ऊपरि स्थापि देय भाग नीचै स्थापि जोडें तेंद्री आदि पर्याप्त जीवनिका प्रमाण हो है । बहुरि पूर्वै जो सामान्यपनैं वेइंद्रिय आदि जीवनिका प्रमाण कह्या था तामैं सौं इहां कह्या जो अपना अपना पर्याप्तका परिमाण सो घटाय दीएं अपनां अपनां वेंद्री आदि पंचेंद्री पर्यंत अपर्याप्त जीवनिका परिमाण हो है । सो अपर्याप्तनिविषै घने तौ वेइंद्रिय तिहिस्यों घाटि तेइंद्रिय तिहिसौं घाटि चौइंद्रिय तिहिसौं घाटि पंचेंद्रिय हैं ऐसैं इनिका परिमाण कह्या ॥ १८० ॥

इति आचार्य श्रीनेमिचंद्र सिद्धांतचक्रवर्ती विरचित गोम्मटसार द्वितीय नाम पंचसंग्रह ग्रंथकी जीवतत्त्वप्रदीपिका नाम संस्कृत टीकाके अनुसारि सम्यग्ज्ञान चंद्रिका नाम भाषाटीकाविषैं जीवकांडविषैं प्ररूपित जे बीस प्ररूपणा तिनिविषैं इंद्रियप्ररूपणानामा सातवां अधिकार संपूर्ण भया ॥७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ कायमार्गणाप्ररूपणाधिकारः ।

जी० प्र०— चंद्रकोटिप्रभाचक्रं समवसृतिसंयुतं ।
नवकेवललब्धीशं चंद्रप्रभजिनं भजे ॥ ८ ॥

अथ कायमार्गणामाह—

मं० प्र०— चंद्रप्रभं प्रभाधूतचंद्रकोटिप्रभं प्रभुं ।
अष्टमं तीर्थकर्तारं वंदे त्रैलोक्यवंदितं ॥ ८ ॥

अथ विंशत्या गाथाभिः शास्त्रकारः कायमार्गणां प्ररूपयति—

सं० च०— चंद्रप्रभ जिनकौं भजौं चंद्रकोटि सम जोति ।
जाकैं केवल लब्धि नव समवसरण जुत होति ॥

अथ काय मार्गणाकौं कहै हैं—

जाई अविणाभावी तसथावरउदयजो हवे काओ ।
सो जिणमदह्मि भणिओ पुढवीकायादिछब्भेओ ॥ १८१ ॥

जात्यविनाभावित्रसस्थावरोदयजो भवेत्कायः ।
स जिनमते भणितः पृथ्वीकायादिषड्भेदः ॥ १८१ ॥

जी० प्र०—जातिनामकर्मोदयाविनाभावित्रसस्थावरनामकर्मोदयजनितः आत्मनः त्रसत्वस्थावरत्वपर्यायः कायो नाम । स च कायः पृथिव्यप्तेजोवायुवनस्पतित्रसकायभेदात् षड्भेदो जिनमते भणितः । कायते-त्रस इति स्थावर इति च व्यवहर्तृजनैः शब्द्यते-कथ्यते इति काय इति उद्वेजनक्रियायां स्थानक्रियायां च तल्लक्षणस्य निरुक्तिसिद्धत्वात् । चीयते-पुष्टिं नीयते पुद्गलस्कंधैरिति वा कायः-औदारकादिशरीरं, कायस्थ आत्मपर्यायोऽपि काय इत्युपचर्यते । जातित्रसस्थावरनामकर्मणां जीवविपाकित्वेन तेषां कार्यस्य जीवपर्यायस्य काय इति व्यवहारसिद्धेः । पुद्गलविपाकिशरीरनामकर्मोदयकार्यत्वेन अत्र शरीरस्यैव कायशब्देन ग्रहणं नास्ति ॥ १८१ ॥ अथ स्थावरकायपंचकं प्रपंचयति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं०प्र०--जातिनामकर्माविनाभावित्रसस्थावरनामकर्मोदयाज्जातः आत्मनस्त्रसत्वपर्यायः स्थावरत्वपर्यायश्च कायः इति जिनमते-सर्वज्ञवीतरागसमये भणितो भवेत्। कायते त्रस इति स्थावर इति च व्यवहर्तुं जनैः शब्द्यते-कथ्यते इति काय इति उद्वेजनक्रियां स्थानक्रियां च प्रति तल्लक्षणस्य निरुक्तिसिद्धत्वात्। चीयते पुष्टिं नीयते पुद्गलस्कंधैरिति कायः औदारिकादिशरीरं। कायस्थ आत्मपर्यायोऽपि काय इत्युपचारेणोच्यते। जातित्रसस्थावरनामकर्मणां जीवविपाकित्वेन तेषां कार्यस्य जीवपर्यायस्यैव काय इति व्यवहारविषयत्वात् शरीरस्य तु पुद्गलविपाकिशरीरनामकर्मोदयकार्यत्वेन अत्र कायशब्देन ग्रहणात्। स कायः पृथ्वीकायादिविकल्पैः-पृथिव्यप्तेजोवायुवनस्पतित्रसकायाविशेषैः, षड्भेदो भवति ॥ १८१ ॥

सं० च०--एकेंद्रियादिक जातिनामा नामकर्मका उदयसहित जो त्रसथावर नामा नामकर्मका उदयकरि निपज्या त्रस स्थावर पर्याय जीवकैं होइ सो काय कहिए सो काय छह प्रकार जिनमतविषैं कह्या है-पृथ्वीकाय १ अपकाय २ तेजकाय ३ वायुकाय ४ वनस्पतीकाय ५ त्रसकाय ६ ए छह भेद जानना। कायते कहिए त्रस हैं स्थावर हैं ऐसा कहिए सो काय जानना। तहां जो भयादिकतैं उद्वेगरूप होइ भागना आदि क्रिया संयुक्त हो है सो त्रस कहिये। बहुरि जो भयादिक आए स्थितिक्रियायुक्त होइ सो स्थावर कहिए। अथवा चीयते कहिए पुद्गल स्कंधनिकरि संचयरूप कीजिये पुष्टताकौं प्राप्त कीजिए सो काय औदारिकादि शरीरका नाम काय है। बहुरि कायविषैं तिष्ठता जो आत्माका पर्याय ताकौं भी उपचारकरि काय कहिए जातैं जीव विपाकी जो त्रस स्थावर प्रकृति तिनिके उदयतैं जो जीवका पर्याय होइ सो काय है। ऐसा व्यवहारकी सिद्धि है। बहुरि पुद्गलविपाकी शरीर नामा नाम कर्मकी प्रकृतिके उदयतैं भया शरीर ताका इहां काय शब्दकरि ग्रहण नाहीं है ॥ १८१ ॥ आगैं स्थावरकायके पांच भेद कहे हैं-

पुढवी आऊतेऊवाउ,कम्मोदयेण तत्थेव।
णियवण्णचउक्कजुदो ताणं देहो हवे णियमा ॥१८२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पृथिव्यप्तेजोवायुकर्मोदयेन तत्रैव ।
निजवर्णचतुष्कयुतस्तेषां देहो भवेन्नियमात् ॥ १८२ ॥

जी० प्र०—पृथिव्यप्तेजोवायुविशिष्टनामकर्मोत्तरोत्तरप्रकृत्युदयेन तत्रैव पृथिव्यप्तेजोवायुपुद्गलस्कंधेषु तत्तद्वर्णचतुष्कयुतः तेषां जीवानां देहः नियमेन भवेत् । तथासति पृथ्वीकायिका अप्कायिकाः तेजस्कायिकाः वायुकायिकाश्च भवंति । पृथ्वीकायः-पृथ्वीत्वविशिष्टस्थावरपर्यायोऽस्त्येषामिति पृथ्वीकायिकाः । अथवा पृथ्वी कायः-शरीरं येषां ते पृथ्वीकायिकाः । अप्कायः--अप्त्वविशिष्टस्थावरपर्यायोऽस्त्येषामित्यप्कायिकाः । अथवा आपः कायः शरीरं येषां ते अप्कायिकाः । तेजस्कायः-तेजस्त्वविशिष्टस्थावरपर्यायोऽस्त्येषामिति तेजस्कायिकाः । अथवा तेजः कायः शरीरं येषां ते तेजस्कायिकाः । वायुकायः--वायुत्वविशिष्टस्थावरपर्यायोऽस्त्येषामिति वायुकायिकाः । अथ वा वायुः कायः-शरीरं येषां ते वायुकायिकाः । तिर्यग्गत्येकेंद्रियजात्यौदारिकशरीरस्थावरकायादीनां नामकर्मप्रकृतीनां उदयमाश्रित्यैव एवंविधनिरुक्तिसंभवात् । पृथ्वीकायिकत्वपर्यायाभिमुखो विग्रहगतौ वर्तमानः पृथ्वीजीवः । गृहीतपृथ्वीशरीरः पृथ्वीकायिकः । तत्त्यक्तो देहः पृथ्वीकायः । तथैव अब्जीवः अप्कायिकः अप्कायः । तेजोजीवः तेजस्कायिकः तेजस्कायः । वायुजीवः वायुकायिकः वायुकायः, इति त्रिविधत्वं ज्ञातव्यं ॥ १८२ ॥

मं० प्र०—सर्वेषां संसारिणामेकेंद्रिया एव प्रथमाः । द्वींद्रियादीनां स्पर्शनमाश्रित्य एकैकेंद्रियवृद्ध्या तदनंतरभावित्वाद् द्वितीयत्वं । एकेंद्रियाश्च कायविवक्षया स्थावरकाया एव नान्ये वनस्पत्यंतानामेकमेव स्पर्शनेंद्रियमिति तत्त्वार्थशास्त्रेऽप्यभिधानात् अतः स्थावरकाया एव आदौ वक्तव्याः तत्र वनस्पतिकायिकं स्थाप्यं कृत्वा इदमुच्यते-पृथिव्यप्तेजोवायुकायिकनाम्नां नामकर्मोत्तरोत्तरप्रकृतीनामुदयेन जीवा पृथ्वीकायिकाः, अप्कायिकाः, तेजस्कायिकाः वायुकायिकाश्च जायंते । पृथ्वीकायः पृथ्वीत्वविशिष्टस्थावरपर्यायः अस्ति एषामिति पृथ्वीकायिकाः, अथवा पृथ्वी कायः शरीरं येषां ते पृथ्वीकायिकाः । अप्कायः अप्त्वविशिष्टस्थावरपर्यायः अस्त्येषामिति अप्कायिकाः अथवा आपः कायः शरीरं येषां ते अप्कायिकाः । तेजस्कायः--तेजस्त्वविशिष्टस्थावरपर्यायः अस्त्येषामिति तेजस्कायिकाः अथवा तेजः कायः शरीरं येषां ते तेजस्कायिकाः । वायुकायः-वायुत्वविशिष्टस्थावरपर्यायः अस्त्येषामिति वायुकायिकाः अथवा वायुः कायः शरीरं येषां ते वायुकायिकाः । तिर्यग्गत्येकेंद्रियजात्यौदारिकशरीरस्थावरकायादीनां नामप्रकृतीनामुदयमाश्रित्यैवंविधनिरुक्तिसद्भावात् तत्र तथासति तेषां पृथ्वीकायिकादीनां निजनिजवर्णगंधरसस्पर्शचतुष्कयुतो देहः-शरीरं, नियमात् प्रतिनियमात् भवेदेव । पृथ्वीत्वविशिष्टस्थावरनामकर्मोदयसहितौदारिकशरीरनामकर्मोदयात् पृथ्वीकायिकदेहो भवति । एवमप्कायिकादिदेहा अपि तत्तद्विशिष्टस्थावरनामकर्मोदयसहितौदारिकशरीरनामकर्मोदयाद्भवंतीति नियमशब्दार्थः । विग्रहगतौ वर्तमानः पृथ्वीत्वविशिष्टस्थावरकायनामकर्मोदयकृतपर्यायः पृथ्वीजीवः । गृहीततच्छरीरो जीवः पृथ्वीकायिकः, तेन त्यक्तदेहः पृथ्वीकायः, एवमब्जीवः, अप्कायिकः अप्काय इत्यादि त्रिधा व्यवस्था ज्ञातव्या ॥ १८२ ॥

सं० च०-पृथ्वी अप तेज वायु विशेष धरै जो नामकर्मकी स्थावर प्रकृतिके भेदरूप उत्तरोत्तर प्रकृति ताके

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उदयकरि जीवनिके तहां ही पृथिवी अप तेज वायु रूप परिणये जे पुद्गलस्कंध तिनिविषैं अपने २ पृथिवी आदि रूप वर्णादिक चतुष्क संयुक्त शरीर नियमकरि हो हैं। ऐसैं होतैं पृथिवीकायिक अप्कायिक तेजःकायिक वात कायिक जीव हो हैं। तहां पृथिवी विशेष लीए स्थावर पर्याय जिनकैं होइ ते पृथिवी कायिक कहिये अथवा पृथिवी है काय कहिये शरीर जिनका ते पृथिवीकायिक कहिए। ऐसैं ही अप कायिक तेजःकायिक वात कायिक जानने। तिर्यंच गति एकेंद्री जाति औदारिक शरीर स्थावर काय इत्यादिक नामकर्मकी प्रकृतिनिके उदय अपेक्षा ऐसी निरुक्ति संभवै है। बहुरि जो जीव पूर्व पर्यायकों छोडि पृथ्वीविषै उपजनेकौं सन्मुख भया होइ सो विग्रह गतिविषैं अंतरालमें यावत् रहै तावत् वाकौं पृथ्वी जीव कहिये। जातैं इहां केवल पृथिवीका जीवही है शरीर नाहीं। बहुरि जो पृथिवीरूप शरीरकौं धरै होइ सो पृथिवीकायिक कहिए। जातैं उहां पृथिवीका शरीर वा जीव दोऊ पाइए है। बहुरि जीव तौ निकसि गया होइ वाका शरीर ही होइ ताकौं पृथिवीकाय कहिये जातैं उहां केवल पृथिवीका शरीरही पाइए है। ऐसैं तीन भेद जानने। बहुरि अन्य ग्रंथिनिविषैं च्यारि भेद कहे हैं। तहां ए तीनौं भेद जिस विषैं गर्भित होंइ सो सामान्य पृथिवी ऐसा एक भेद जानना। जातैं पूर्वोक्त तीनों भेद पृथिवीके ही हैं। ऐसैं ही अप् जीव अप् कायिक अप् काय बहुरि तेजःजीव तेजःकायिक तेजःकाय बहुरि वातजीव वातकायिक वात कायरूप तीन तीन भेद जानने॥ १८२॥

वादरसुहुमदयेण य वादरसुहमा हवंति तद्देहा।
घादसरीरं थूलं अघाददेहं हवे सुहुमं॥ १८३॥

वादरसूक्ष्मोदयेन च वादरसूक्ष्मा भवंति तद्देहाः।
घातशरीरं स्थूलं अघातदेहं भवेत्सूक्ष्मं॥ १८३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी॰ प्र॰—वादरनामकर्मोदयेन तद्देहाः पृथ्वीकायिकादिजीवाः वादरा भवंति । सूक्ष्मनामकर्मोदयेन च पृथ्वीकायिकादिजीवाः सूक्ष्मा भवंति । जीवविपाकिवादरसूक्ष्मनामकर्मोदयाभ्यां वादरसूक्ष्मजीवव्यपदेशसद्भावात्तद्देहा अपि वादरसूक्ष्मा भवंति । तेन इंद्रियविषयसंयोगजनितसुखदुःखवत् परेण स्वस्य स्वेन परस्य वा प्रतिघातसंभवात् घातशरीरं स्थूलं भवति। अघातदेहः सूक्ष्मो भवति। तद्देहिनोऽपि घातशरीराः स्थूलाः, अघातदेहाः सूक्ष्मा भवंति । घातोपलक्षितं शरीरं येषां ते घातशरीराः । अघातो देहो येषां ते अघातदेहा इति वाध्यावाध्यत्वपरिणतिसंभवात् १८३

मं॰ प्र॰——पूर्वोक्ताः पृथ्वीकायिकादयो जीवाः प्रत्येकं वादरसूक्ष्मनामकर्मणोर्जीवविपाकिनोरुदयेन वादराः सूक्ष्माश्च भवंति । तद्देहाश्च–तेषां जीवानां देहाश्च--शरीराणि च वादराः सूक्ष्माश्च भवंति । अथवा ते पृथिव्यादयो देहा येषां ते तद्देहाः वादरा स्थूला इत्यर्थः । कथं जीवानां वादरसूक्ष्मत्वं तेषाममूर्तत्वादित्याशंक्य तयोर्लक्षणमाह-घातलक्षितं शरीरं यस्यासौ घातशरीरो जीवः स्थूलो वादरो भवेत् । अघातः-घातरहितो देहो यस्यासौ अघातदेहो जीवः सूक्ष्मो भवेत् परेण स्वस्य स्वेन परस्य वा घातः-पीडा निग्रह इत्यर्थः । अनेन संसारिजीवस्य स्वभावादमूर्तत्वेऽपि मूर्तकार्मणपुद्गलस्कंधसहचारितस्य कथंचिन्मूर्तत्वप्रसिद्धेः । इंद्रियविषयसंयोगजानितसुखदुःखवत् । परेण स्वस्य स्वेन परस्य वा प्रतिघातसंभवात् तेषां वादरसूक्ष्मशरीरयोरपि वाध्यत्वावाध्यत्वपरिणामसंभवात् ॥ १८३ ॥

सं॰ चं॰—पूर्वें कहे जे पृथिवीकायिकादिक जीव ते वादर नामा नाम कर्मकी प्रकृतिके उदयतैं वादर शरीर धरैं वादर शरीर हो है। बहुरि सूक्ष्म नामकर्मकी प्रकृतिके उदयतैं सूक्ष्म होइ। जातैं वादर सूक्ष्म प्रकृती जीवविपाकी हैं तिनके उदयकरि जीवकौं वादर सूक्ष्म कहिए। बहुरि उनका शरीर भी वादर सूक्ष्म ही हो है। तहां इंद्रिय विषयका संयोगकरि निपज्या सुख दुःखकी ज्यों अन्य पदार्थकरि आपका घात होइ रुकै वा आपकरि और पदार्थका घात होइ रुकि जाय ऐसा घात शरीरकौं स्थूल वा वादर शरीर कहिए। बहुरि जो किसीकौं घातै नाहीं वा आपका घात अन्यकरि जाकैं न होइ ऐसा अघात शरीर सो सूक्ष्म शरीर कहिए। बहुरि तिनि शरीरनिके धारक जे जीव ते घातकरि युक्त है शरीर जिनिका ते घातदेह तौ वादर जानने। बहुरि अघातरूप है देह जिनका ते अघातदेह सूक्ष्म जानने। ऐसैं शरीरनिकैं रुकना वा न रुकना संभवै है॥ १८३॥

तद्देहमंगुलस्स असंखभागस्स विंदमाणं तु ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आधारे थूला ओ सव्वत्थ णिरंतरा सुहुमा ॥ १८४ ॥

तद्देहमंगुलस्यासंख्यभागस्य वृंदमानं तु ।
आधारे स्थूला ओ सर्वत्र निरंतराः सूक्ष्माः ॥ १८४ ॥

जी० प्र०—तेषां वादरसूक्ष्मपृथ्वीकायिकादिचतुर्विधजीवानां शरीराणि घनांगुलासंख्येयभागमात्राणि भवंति । सूक्ष्मवायुकायिकापर्याप्तक-जघन्यशरीरावगाहनादारभ्य वादरपर्याप्तपृथ्वीकायिकोत्कृष्टशरीरावगाहनपर्यंतं द्वाचत्वारिंशत्स्थानेषु घनांगुलस्य पल्यासंख्यातभागहारसंभवात् अथवा परमागमे—

वीपुण्णजहण्णोत्तियअसंखसंखं गुणं तत्तो ।

इत्यसंख्यातगुणकारसंभववचनाचस्यामंख्यातभागहारामिव्यक्तिप्रसिद्धेः । तत्र तु सूक्ष्मापर्याप्तवातकायजघन्यावगाहनन्यासोयं

६।८।२२   ६।८।४।
a   a
प १९।८।८।८।२२।७।९ पृथ्वीकायवादरपर्याप्तकोत्कृष्टावगाहनप्रमाणमिदं प।४।८।४।७।९ आधारे आश्रये वर्तमानशरीर-
a a a   a a

विशिष्टाः ये जीवास्ते सर्वेऽपि स्थूलाः-वादरा इत्यर्थः । आधारेण तेषां वादरस्वभावप्रतिघाताभावेऽग्यधःपतनरूपप्रतिघातसंभवात्प्रागुक्त-लक्षणमेव समर्थितं भवति । सर्वत्र-सर्वलोके जले स्थले आकाशे वा निरंतराः--आधारानपेक्षितशरीराः जीवाः सूक्ष्मा भवंति । जलस्थलरूपाधारेण तेषां शरीरगतिप्रतिघातो नास्ति । अत्यंतसूक्ष्मपरिणामत्वाच्चे जीवाः सूक्ष्मा भवंति । अंतरयति-व्यवदधाति विलंबयतीत्यतरं—आधारः, ततो निष्क्रांता निरंतरा इत्यत्रापि पूर्वोक्तलक्षणमेव समर्थितं ज्ञातव्यं । ओ इति शिष्यसंबोधनं । यद्यपि वादरापर्याप्तवायुकायिकादीनां जघन्य-शरीरावगाहनमल्पं । ततोऽसंख्येयगुणत्वेन सूक्ष्मपर्याप्तकवायुकायिकादिपृथ्वीकायिकावसानजीवानां जघन्योत्कृष्टशरीरावगाहनानि महांति तथापि सूक्ष्मनामकर्मोदयसामर्थ्यात् अन्यतस्तेषां प्रतिघाताभावात् निष्क्रम्य गच्छंति श्लक्ष्णवस्त्रनिष्क्रांतजलविंदुवत् । वादराणां पुनरल्पश-रीरत्वेऽपि वादरनामकर्मोदयवशादन्येन प्रतिघातो भवत्येव श्लक्ष्णवस्त्रानिष्क्रांतसर्षपवत् । य (द्यपि) द्येवं ऋद्धिप्राप्तानां स्थूलशरीरस्य वज्र-शिलादिनिष्क्रांतिरस्ति सा कथं ? इति चेत् तपोऽतिशयमाहात्म्येनेति ब्रूमः, अचित्यं हि तपोविद्यामणिमंत्रौषधिशक्त्यतिशयमाहात्म्यं दृष्टस्व-भावत्वात् । 'स्वभावोऽतर्कगोचरः' इति समस्तवादिसंमतत्वात् । अतिशयरहितवस्तुविचारे पूर्वोक्तशास्त्रमार्ग एव वादरसूक्ष्माणां सिद्धः॥१८४॥

मं० प्र०---तेषां वादराणां सूक्ष्माणां च पृथ्वीकायिकादीनां चतुर्णां देहः-शरीरं, अंगुलस्यासंख्यातभागस्य वृंदमानं घनप्रमाणं घनांगुलासंख्यातभागप्रमा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णमित्यर्थः । सूक्ष्मवायुकायिकापर्याप्तजघन्यशरीरावगाहनादारभ्य वादरपर्याप्तपृथ्वीकायिकोत्कृष्टशरीरावगाहनपर्यंतं घनांगुलस्य पल्यासंख्यातभागमात्रभागहारसंभवात् । परमागमे द्वींद्रियपर्याप्तजघन्यावगाहनपर्यंतमसंख्यातगुणकारसंभववचनाद् घनांगुलस्यासंख्यातभागहाराभिव्यक्तिप्रसिद्धेः । तु पुनः, वादरसूक्ष्माणां लक्षणांतरं प्रदर्शयितुं गाथोत्तरार्धमाह्-तद्यथा-आधारे आश्रये, वर्तमानशरीराः ये जीवास्ते सर्वेऽपि स्थूलाः वादराः भवंति। आधारेण तेषां बाधस्वभावप्रतिघाताभावेप्यधःपतनरूपगतिप्रतिघातसंभवात्, पूर्वोक्तलक्षणसमर्थनं वा इदं भवेत् सर्वत्र सर्वस्मिन् लोके जले स्थले आकाशे वा, निरंतराः-आधारानपेक्षवर्तमानशरीराः जीवाः सूक्ष्मा भवंति । जलस्थलरूपाधारेण येषां शरीरगति तिघातो नास्ति अत्यंतसूक्ष्मपरिणामादेव ते जीवाः सूक्ष्मा भवंति । अंतरयति व्यवदधाति विलंबियतीत्यंतरं-आधारः, ततो निष्क्रांता निरंतराः । अत्रापि पूर्वोक्तलक्षणसमर्थनं वेति ज्ञातव्यं । ओ इति शिष्यसंबोधने । यद्यपि वादरापर्याप्तकवायुकायिकादीनां जघन्यशरीरावगाहनमल्पं ततोऽसंख्येयगुणत्वेनापि वादरनामकर्मोदयवशादन्येन प्रतिघातो भवत्येव श्लक्ष्णवस्त्रानिष्क्रांतसर्षपवत् । यद्येवं ऋद्धिप्राप्तशरीरस्य स्थूलस्य वज्रशिलादिनिष्क्रांतिः कथं ? इति चेत्त तेऽतिशयमाहात्म्यादिति ब्रूमः । अचिंत्यं हि तपोविद्यामणिमंत्रौषधिशक्त्यतिशयमाहात्म्यं दृष्टस्वभावत्वात् 'स्वभावोऽतर्कगोचरः' इति सकलवादिसम्मतत्वात् । अतिशयरहितवस्तुविचारे पूर्वोक्तशास्त्रमार्ग एव वादरसूक्ष्मयोः सिद्धः ॥ १८४ ॥

सं० चं०—तिनि वादर वा सूक्ष्म पृथ्वीकायिक अप कायिक तेजःकायिक वातकायिक जीवनिके शरीर घनांगुलके असंख्यातवें भाग प्रमाण हैं । जातैं पूर्वै जीवसमासाधिकारविषैं अवगाहनाका कथन कीया है । तहां सूक्ष्म वायुकायिक अपर्याप्तककी जघन्य शरीर अवगाहना है तातैं लगाइ वादर पर्याप्त पृथिवीकायिककी उत्कृष्ट अवगाहना पर्यंत वियालीस स्थान कहे तिनि सबनिविषैं घनांगुलकौं पल्यके असंख्यातवां भागका भागहार संभवै है । अथवा तहां ही 'वीपुण्णजहण्णोत्तिय असंखसंखं गुणं तत्तो' इस सूत्रकरि वियालीसवां स्थानकौं असंख्यातका गुणकार कीएं अगले स्थानविषैं संख्यात घनांगुल प्रमाण अवगाहना हो है तातैं तिस वियालीसवां स्थानविषैं घनांगुलकौं असंख्यातका भागहार प्रकट ही सिद्ध भया । तहां सूक्ष्म अपर्याप्त वातकायकी जघन्य अवगाहना वा पृथ्वीकाय वादर पर्याप्तकी उत्कृष्ट अवगाहनाका प्रमाण तहां ही जीवसमासाधिकारविषैं कह्या है सो जानना बहुरि 'आधारे थूलाओ' आधार कहिए अन्य पुद्गलनिका आश्रय तींहिविषैं वर्तमान शरीर संयुक्त जे जीव ते सर्व स्थूल कहिए वादर जानने । यद्यपि आधारकरि तिनके शरीरका वादर स्वभाव रुकना न हो है तथापि नीचैं गिरना रूप जो गमन ताका रुकना हो है सो तहां प्रतीघात संभवै है तातैं ४२०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पूर्वोक्त घातरूप लक्षण ही वादर शरीरनिका दृढभया। बहुरि सर्वत्र लोकविषैं जलविषैं वा स्थलविषैं वा आकाशविषैं निरंतर आधारकी अपेक्षारहित जिनकैं शरीर पाइए ते जीव सूक्ष्म हैं जल स्थल रूप आधारकरि तिनिकैं शरीरके गमनका नीचैं ऊपरि इत्यादि कहीं भी रुकना न हो है। अत्यंत सूक्ष्म परिणमनतैं ते जीव सूक्ष्म कहिए है। अंतरयति कहिए अंतराल करै है ऐसा जो अंतर कहिए आधार तातैं रहित ते निरंतर कहिए। इस विशेषण करि भी पूर्वोक्त ही लक्षण दृढ भया। 'ओ' ऐसा संबोधन पद जानना। याका अर्थ यहु–जो हे शिष्य ऐसैं तू जानि। बहुरि यद्यपि वादर अपर्याप्त वायुकायिकादि जीवनिकी अवगाहना स्तोक है। बहुरि यातैं सूक्ष्म पर्याप्त वायुकायिकादिक पृथ्वीकायिक पर्यंत जीवनिकी जघन्य वा उत्कृष्ट अवगाहना असंख्यात गुणी है तथापि सूक्ष्म नामकर्मके उदयकी समर्थतातैं अन्य पर्वतादिकतैं भी तिनिका रुकना न हो है निकसि जाय है। जैसैं जलका विंदु वस्त्रतैं निकसि जाय रुकै नाहीं तैसैं सूक्ष्म शरीर जानना। बहुरि वादर नामकर्मके उदयके वशतैं अन्यकरि रुकना हो है जैसैं सरिसौं वस्त्रतैं निकसै नाहीं तैसैं वादर शरीर जानना। बहुरि यद्यपि ऋद्धिकौं प्राप्त भए मुनि देव इत्यादिक तिनिका शरीर वादर है तौ भी ते वज्र पर्वतादिकतैं रुकैं नाहीं निकसि जांय हैं सो यहु तपजनित अतिशयका महिमा है जातैं तप विद्या मणि मंत्र औषधि इनिकी शक्तिके अतिशयका महिमा अचिंत्य है सो दीखै है ऐसा ही द्रव्यका स्वभाव है। बहुरि स्वभावविषैं किछू तर्क नाहीं यहु समस्त वादी मानै हैं। सो इहां अतिशयवानोंका ग्रहण नाहीं। तातैं अतिशयरहित वस्तुका विचारविषैं पूर्वोक्त शास्त्रका उपदेश ही वादर सूक्ष्म जीवनिका सिद्ध भया ॥ १८४ ॥

उदये दु वणप्फदिकम्मस्स य जीवा वणप्फदी होंति।
पत्तेयं सामण्णं पदिट्ठिदिदरेत्ति पत्तेयं ॥ १८५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उदये तु वनस्पतिकर्मणश्च जीवा वनस्पतयो भवंति ।
प्रत्येकं सामान्यं प्रतिष्ठितेतरे इति प्रत्येकं ॥ १८५ ॥

जी० प्र०—वनस्पतिविशिष्टस्थावरनामकर्मोत्तरोत्तरप्रकृत्युदये तु पुनः जीवा वनस्पतिकायिका भवंति । ते च प्रत्येकशरीराः सामान्यशरीरा इति द्विविधा भवंति । एकं प्रति नियतं प्रत्येकं एकजीवस्य एकशरीरमित्यर्थः । प्रत्येकं शरीरं येषां ते प्रत्येकशरीराः । समानमेव सामान्यं, सामान्यं शरीरं येषां ते सामान्यशरीराः—साधारणशरीरा इत्यर्थः तत्र प्रत्येकशरीराः प्रतिष्ठिताप्रतिष्ठितभेदाद् द्विविधाः । इतिशब्दोऽत्र प्रकारवाची । वादरनिगोदैराश्रिताः प्रतिष्ठिताः, तैरनाश्रिताः अप्रतिष्ठिता इति तयोर्भेदावगमनात् ॥ १८५ ॥

मं० प्र०—स्थावरनामकर्मोत्तरप्रकृतिभेदस्य वनस्पतिकायिकनामकर्मणः उदये सति तु-पुनः- जीवा वनस्पतिकायिका भवंति । ते च प्रत्येकशरीराः सामान्यशरीराश्चेति द्विविधाः । एकं प्रति नियतं प्रत्येकं, एकस्य जीवस्य एकं शरीरमित्यर्थः, प्रत्येकं शरीरं येषां ते प्रत्येकशरीराः समानमेव सामान्यं सामान्यं शरीरं येषां ते सामान्यशरीराः साधारणशरीरा इत्यर्थः । प्रत्येकशरीरनामकर्मोदयात् साधारणशरीरनामकर्मोदयाच्च जीवानां तथाविधपरिणतिविभागसंभवात् । तत्र प्रत्येकशरीराः प्रतिष्ठिताप्रतिष्ठितभेदाद् द्विविधाः । इतिशब्दः प्रकारवाची । प्रतिष्ठिताः वादरनिगोदशरीरैराश्रिताः । अप्रतिष्ठिताः–तैरनाश्रिताः प्रत्येकादिषु जात्याश्रयेणैकवचनं प्रयुक्तं ॥ १८५ ॥

सं० च०—वनस्पती रूप विशेषकौं धरैं स्थावरनामकर्मकी उत्तरोत्तर प्रकृतिके उदय होतैं जीव वनस्पती कायिक हो हैं ते दोय प्रकार–एक प्रत्येक शरीर एक सामान्य कहिए साधारण शरीर । तहां एक प्रति नियम रूप होइ एक जीव प्रति एक शरीर होइ सो प्रत्येक शरीर है । प्रत्येक है शरीर जिनिका ते प्रत्येकशरीर जानने । बहुरि समानका भाव सो सामान्य, सामान्य है शरीर जिनिका ते सामान्य शरीर जीव हैं भावार्थ–बहुत जीवनिका एक ही जीवशरीर साधारण समानरूप होइ सो साधारण शरीर कहिए ऐसा शरीर जिनिकैं होइ ते साधारणशरीर जानने । तहां प्रत्येक शरीरके दोय भेद–एक प्रतिष्ठित एक अप्रतिष्ठित । इहां गाथाविषैं इति शब्द प्रकार वाची जानना । तहां प्रत्येक वनस्पतीके शरीर वादर निगोद जीवनिकरि आश्रित संयुक्त होंइ ते प्रतिष्ठित जानने । जे वादर निगोदके आश्रय रहित होंइ ते अप्रतिष्ठित जानने ॥ १८५ ॥

मूलग्गपोरबीजा कंदा तह खंदबीजबीजरुहा ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समुच्छिमा य भणिया पत्तेयाणंतकाया य ॥ १८६ ॥

मूलाग्रपर्वबीजाः कंदास्तथा स्कंधबीजबीजरुहाः ।

सम्मूर्छिमाश्च भणिता प्रत्येकानंतकायाश्च ॥ १८६ ॥

जी० प्र०—मूलं बीजं येषां ते मूलबीजाः । (येषां मूलं प्रादुर्भवति ते) आर्द्रकहरिद्रादयः । अग्रं बीजं येषां ते अग्रबीजाः (येषां अग्रं प्ररोहयति ते) आर्यकोदीच्यादयः । पर्व बीजं येषां ते पर्वबीजाः इक्षुवेत्रादयः । कंदो बीजं येषां ते कंदबीजाः पिंडालसूरणादयः । स्कंधो बीजं येषां ते स्कंधबीजाः सल्लकीकंटकीपलाशादयः । बीजात् रोहंतीति बीजरुहाः शालिगोधूमादयः । संमूर्छे समंतात् प्रसृतपुद्गलस्कंधे भवाः सम्मूर्छिमाः मूलादिनियतबीजनिरपेक्षाः ते च ये प्रत्येकशरीरा जीवाः परमागमे भणितास्ते अनंतकायाश्च अनंतानंतनिगोदजीवानां कायाः–शरीराणि एष्विति अनंतकायाः प्रतिष्ठितप्रत्येका इत्यर्थः, चशब्दादप्रतिष्ठितप्रत्येकाश्च संतीत्यर्थः । एते मूलबीजादिसंमूर्छिमपर्यंताः प्रतिष्ठिताप्रतिष्ठितप्रत्येकशरीरजीवास्तेऽपि संमूर्छिमा एव भवंति । प्रतिष्ठितं-साधारणशरीरमाश्रितं प्रत्येकशरीरं येषां ते प्रतिष्ठितप्रत्येकशरीराः तैरनाश्रितशरीरा अप्रतिष्ठितप्रत्येकशरीराः स्युः । एवं प्रत्येकजीवानां निगोदशरीरैः प्रतिष्ठिताप्रतिष्ठितभेदेन द्विविधत्वं उदाहरणदर्शनपूर्वकं व्याख्यातं । प्रतिष्ठितप्रत्येकवनस्पतिजीवशरीरस्य सर्वोत्कृष्टावगाहनमपि घनांगुलासंख्येयभागमात्रमेवेति पूर्वोक्तार्द्रकादिस्कंधेषु एकैकस्मिंस्तानि असंख्यातानि असंख्यातानि संति । यद्येतावत्क्षेत्रस्य प्र ६ प । २ । ७ । ९ एकं प्रतिष्ठितप्रत्येकशरीरं फ–१ । स्यात् तदैतावत्क्षेत्रस्य इ–।६।७ कति प्रतिष्ठितप्रत्येक-

a

शरीराणि स्युरिति त्रैराशिकलब्धानि एकैकार्द्रकादिस्कंधसंभवीनि प्रतिष्ठितप्रत्येकशरीराणि भवंति प २ । ७ । १० । अप्रतिष्ठितप्रत्येकवनस्पतिजी-

a

वशरीराणि यथासंभवं असंख्यातानि संख्यातानि वा भवंति । यावंति प्रत्येकशरीराणि तावंत एव प्रत्येकवनस्पतिजीवाः तत्र प्रतिशरीरं एकैकस्य जीवस्य प्रतिज्ञानात् ॥ १८६ ॥

मं० प्र०—मूलं बीजं येषां ते मूलबीजाः-आर्द्रकहरिद्रादयः । अग्रं बीजं येषां ते अग्रबीजाः- आर्यकोदीच्यादयः । पर्व बीजं येषां ते पर्वबीजाः–इक्षुवेत्रादयः । कंदो बीजं येषां ते कंदबीजाः–पिंडालसूरणादयः स्कंधो बीजं येषां ते स्कंधबीजाः सल्लकीकंटकीपलाशादयः । बीजाद्रोहंतीति बीजरुहाः–बीजबीजाः शालिगोधूमादयः । सम्मूर्छे भवाः सम्मूर्छिमाः मूलादिनियतबीजनिरपेक्षाः समंतात्प्रसृतपुद्गलस्कंधाज्जातास्ते च ये प्रत्येकशरीरा जीवाः परमागमे-भणिताः ते अनंतकायाश्च–अनंतानां निगोदजीवानां कायाः–शरीराणि येषु ते अनंतकायाः निगोदजीवशरीरैः प्रतिष्ठिताः, चशब्देन तैरप्रतिष्ठिताश्च संतीत्यर्थोऽनुक्तोऽपि समुच्चीयते एवं प्रत्येकजीवानां निगोदशरीरैः प्रतिष्ठिताप्रतिष्ठितभेदेन द्विविधत्वमुदाहरणप्रदर्शनपूर्वकं व्याख्यातं । प्रतिष्ठितप्रत्येकवनस्पति-

Ganesh Varni Digambar Jain Institute, Narla, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जीवशरीरस्यापि घनांगुलासंख्यातभागमात्रत्वेन पूर्वोक्तार्द्रकादिषु स्कंधेषु एकैकस्मिन्नसंख्यातानि प्रतिष्ठितप्रत्येकशरीराणि ज्ञातव्यानि एतावत्क्षेत्रस्य प्र-
६
प । २ । ॢ । ९ यद्येकं प्रतिष्ठितप्रत्येकशरीरं भवेत् । फ १ । तदा एतावत्क्षेत्रस्य इ ६ ॢ कियंति प्रतिष्ठितप्रत्येकशरीराणि भवंतीति त्रैराशिकलब्धानि
a
प । २ । ॢ । १० । अप्रतिष्ठितप्रत्येकवनस्पतिजीवशरीराणि यथासंभवं असंख्यातानि संख्यातानि वा संति यावंति प्रत्येकशरीराणि तावंत एव प्रत्येक-
a
वनस्पतिजीवा भवंति । तत्र प्रतिशरीरमेकैकजीवप्रतिज्ञानात् ॥ १८६ ॥

सं० च०––जिनिकी मूल जो जड़ सोई वीज होइ ते आदा हलद आदि मूल जीव जानने। बहुरि जिनिका अग्र जो अग्रभाग सो ही बीज होइ ते आर्यक आदि अग्रबीज जानने। बहुरि जिनिका पर्व जो पेली सो ही बीज होइ ते सांठा आदि पर्व बीज जानने। बहुरि कंद है बीज जिनिका ते पिंडालु सूरणा आदि कंद बीज जानने। बहुरि स्कंध जो पेड सो ही है बीज जिनिका ते सालरि पलास आदि स्कंध बीज जानने। बहुरि जे बीजहीतैं लगैं ते गौंहू शालि आदि बीजरुह जानने। बहुरि जे मूल आदि निश्चित बीजकी अपेक्षा तैं रहित आपै आप उपजैं ते सम्मूर्छिम कहिए समंततैं भए पुद्गल स्कंध तिनिविषैं उपजैं असे दोव आदि सम्मूर्छिम जानने। असैं ए कहे ते सर्वही प्रत्येकवनस्पती हैं ते अनंत जे निगोद जीव तिनके 'कायः' कहिए शरीर जिनिविषैं पाइए असे 'अनंतकायाः' कहिए प्रतिष्ठित प्रत्येक हैं। बहुरि चकारतैं अप्रतिष्ठित प्रत्येक हैं। असैं प्रतिष्ठित कहिए साधारण शरीरनिकरि आश्रित है प्रत्येक शरीर जिनका ते प्रतिष्ठित प्रत्येक शरीर हैं। बहुरि तिनिकरि आश्रित नाहीं हैं प्रत्येक शरीर जिनिका ते अप्रतिष्ठित प्रत्येक शरीर हैं। असे ए मूल बीज आदि संमूर्छिम पर्यंत सर्व दोय दोय अवस्था लीएं जानने। बहुरि कोऊ जानैगा कि इनिविषै संमूर्छिमकै तौ संमूर्छिम जन्म होगा अन्यकै गर्भादिक होगा सो नाहीं है। ते सर्व ही प्रतिष्ठित अप्रतिष्ठित प्रत्येकशरीरी जीव संमूर्छिम ही हैं। बहुरि प्रतिष्ठित प्रत्येक शरीरकी सर्वोत्कृष्ट अवगाहना घनांगुलके असंख्यात भाग मात्र ही है तातैं पूर्वोक्त आदांकौ आदि देकरि एक एक स्कंधविषै असंख्यात प्रतिष्ठित प्रत्येक शरीर पाइए हैं। कैसैं? घनांगुलकौं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दोयवार पल्यका असंख्यातवां भाग अर नव वार संख्यातका भाग दीएं जो प्रमाण होइ तितने क्षेत्रविषै जो एक प्रतिष्ठित प्रत्येक शरीर होइ तो संख्यात घनांगुलप्रमाण आदा मूला आदि स्कंधविषै केते पाइए? ऐसें त्रैराशिक कीएं लब्ध राशि दोयवार पल्यका असंख्यातवां भाग दशवार संख्यात माडि परस्पर गुणैं जितना प्रमाण होइ तितने एक एक आदा आदि स्कंधविषै प्रतिष्ठित प्रत्येक शरीर पाइए हैं। बहुरि एक स्कंधविषै अप्रतिष्ठित प्रत्येक वनस्पती जीवनिकैं शरीर यथासंभव असंख्यात भी होंइ वा संख्यात भी होंइ। बहुरि जेते प्रत्येक शरीर हैं तितने ही तहां प्रत्येक वनस्पती जीव जानने जातैं तहां एक एक शरीर प्रति एक एक ही जीव होनेका नियम है ॥ १८६ ॥

बीजे[1] जोणीभूदे जीवो चंकमदि सो व अण्णो वा।
जे वि य मूलादीया ते पत्तेया पढमदाए ॥ १८७ ॥

बीजे योनीभूते जीवः चंक्रामति स वा अन्यो वा।
येऽपि च मूलादिकास्ते प्रत्येकाः प्रथमतायां ॥ १८७ ॥

जी० प्र०—बीजे-मूलादिबीजावसाने, योनिभूते-जीवोत्पत्तियोग्ये, जाते सति स एव-तत्र स्थित एव जीवः मृत्वा--स्वायुःक्षयवशेन मुक्तशरीरो भूत्वा पुनस्तत्रैव प्रक्रामति-उत्पद्यते। अन्यो वा अन्यशरीरांतःऽन्यत्रस्थितो जीवः स्वायुःक्षयवशेन त्यक्तशरीरो भूत्वा आगत्य स्वयोग्यमूलादिबीजे प्रक्रामति। येऽपि च मूलकादयः प्रतिष्ठितप्रत्येकशरीरत्वेन प्रतिबद्धाः तेऽपि खलु प्रथमतायां स्वोत्पन्नप्रथमसमये अंतर्मुहूर्तकालं साधारणजीवैरप्रतिष्ठितप्रत्येका एव भवंति ॥ १८७ ॥ अथ साधारणशरीरवनस्पतिजीवस्वरूपं गाथाचतुष्टयेन प्ररूपयति–

मं० प्र० बीजे पूर्वोक्तमूलादिबीजपर्यंते जीवोत्पत्त्याधारपुद्गलस्कंधे योनिभूते अविनष्टशक्तिके प्राप्तकालादिबाह्यकारणसन्निधाने स जीवो वा यः पूर्वं तत्र प्रत्येकशरीरत्वेन जीवित्वा मृतः पुनः स एव तदेव मूलादिबीजं शरीरं कृत्वा प्रक्रामति -उत्पद्यते, वा--अथवा पूर्वशरीरस्वामिना जीवे न अन्यत्रोत्पन्ने सति

१ जीवतत्त्वप्रदीपिकामें यह गाथा १९० नंबर पर है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पुनरन्यो जीवो गत्यंतरादागत्य तदैव तस्मिन् बीजे प्रक्रामति--उत्पद्यते विरोधाभावात् । ये पुनर्मूलकादयः प्रतिष्ठितप्रत्येकत्वेन परमागमे प्रसिद्धास्तेऽपि प्रथमतायां शरीरग्रहणकाले प्रथमसमये अंतर्मुहूर्तमात्रे वा प्रत्येकाः--अप्रतिष्ठितप्रत्येका एव पश्चान्निगोदजीवैर्यदा आश्रियंते तदा प्रतिष्ठिता भवंतीति तात्पर्यं । ॥ १८७ ॥ अथ श्रीमाधवचंद्रत्रैविद्यदेवाः प्रत्येकजीवानां प्रतिष्ठिताप्रतिष्ठितविशेषलक्षणं गाथात्रयेणाह--

सं० च०--बीजे कहिए पूर्वें जे कहे मूलकों आदि देकरि बीज पर्यंत बीजजीव उपजनेका आधार भूत पुद्गलके स्कंध सो योनीभूते कहिए जिस विषैं जीव उपजैं ऐसी शक्ति संयुक्त होतसंतैं जल वा कालादिकका निमित्त पाइ सोई जीव वा और जीव आनि उपजैं हैं। भावार्थ--पूर्वें जो बीजविषैं जीव तिष्ठै था सो जीव तौ निकरी गया अर उस बीज विषै ऐसी शक्ति रही जो इसविषैं जीव आनि उपजै तहां जलादिकका निमित्त होतैं पूर्वें जो जीव उस बीजकौं अपना प्रत्येक शरीरकरि पीछैं अपना आयुके नाशतै मरण पाइ निकसि गया था सोई जीव बहुरि तिसही अपने योग्य जो मूलादि बीज तींहि विषै आनि उपजै है अथवा जो वह जीव और ठिकानै उपज्या होइ तौ इस बीजविषै अन्य कोई शरीरांतरविषै तिष्ठता जीव अपना आयुके नाशतैं मरण पाइ आनि उपजै है। किछु विरोध नाहीं। जैसैं गौहूं विषै जीव था सो निकसि गया बहुरि याकौं वोया तब उस ही विषै सोई जीव वा अन्य जीव आनि उपज्या सो यावत् काल जीव उपजनेकी शक्ति होइ तावत् काल योनीभूत कहिए। बहुरि जब ऊगनेकी शक्ति न होइ तब अयोनीभूत कहिए ऐसा भेद जानना। बहुरि जे मूलतैं आदि देकरि वनस्पती काय प्रत्येक प्रतिष्ठित प्रसिद्ध हैं तेऊ प्रथम अवस्थाविषैं जन्मतैं प्रथम समयतैं लगाइ अंतर्मुहूर्तकालपर्यंत अप्रतिष्ठित प्रत्येक ही रहै हैं। पीछैं निगोदजीव जब आश्रय करै हैं तब सप्रतिष्ठित प्रत्येक होय हैं ॥ १८७ ॥ आगैं श्रीमाधवचंद्र नामा आचार्य त्रैविद्यदेव सो सप्रतिष्ठित अप्रतिष्ठित जीवनिका विशेष लक्षण तीन गाथानिकरि कहैं हैं--

गूढसिरसंधिपव्वं समभंगमहीरुहं (यं) च छिण्णरुहं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साहारणं सरीरं तव्विवरीयं च पत्तेयं ॥ १८८ ॥

गूढशिरासंधिपर्वसमभंगमहीरुकं च छिन्नरुहं ।
साधारणं शरीरं तद्विपरीतं च प्रत्येकं ॥ १८८ ॥

जी० प्र०—यत् प्रत्येकशरीरं गूढशिरं-अदृश्यबहिःस्नायुकं, गूढसंधि-अदृश्यसंधिरेखाबंधं, गूढपर्व-अदृश्यग्रंथिकं, समभंगं-त्वग्रहितत्वेन सदृशच्छेदं, अहीरुकं-अंतर्गतसूत्ररहितं, छिन्नं रोहतीति छिन्नरुहं च तच्छरीरं साधारणं-साधारणजीवाश्रितत्वेन साधारणमित्युपचर्यते। प्रतिष्ठितशरीरमित्यर्थः। तद्विपरीतं गूढशिरत्वादिपूर्वोक्तलक्षणरहितं तालनालिकेरतिंतिणीकादिशरीरं अप्रतिष्ठितप्रत्येकशरीरमिति विभागं चशब्दः सूचयति ॥ १८८ ॥

मं० प्र०—यत्प्रत्येकशरीरं गूढशिरं अदृश्यबहिःस्नायुकं गूढसंधि अदृश्यसंधिरेखाबंधं गूढपर्व अदृश्यग्रंथिकं समभंगं त्वग्रहितत्वेन सदृशच्छेदं अहिरुकं-अंतर्गतसूत्ररहितं छिन्नं रोहतीति छिन्नरुहं च तच्छरीरं साधारणं। साधारणजीवाश्रितत्वेन साधारणमित्युपचारेणोच्यते प्रतिष्ठितशरीरमित्यर्थः। तद्विपरीतं गूढशिरत्वादिपूर्वोक्तलक्षणरहितं तालनालिकेरादिशरीरमप्रतिष्ठितप्रत्येकशरीरमिति विभागार्थश्चशब्दः ॥ १८८ ॥

सं० च०—जिस प्रत्येक वनस्पती शरीरका सिरा संधि पर्व गूढ होइ वाह्य दीखै नाहीं तहां सिरा तौ लंबी लकीरसी जैसैं कांकडीविषैं होइ। बहुरि संधि बीचिमें छेहा जैसैं दाड्यौ वा नारंगीविषैं हो है। बहुरि पर्व गांठि जैसैं सांठाविषैं हो है सो कची अवस्थाविषै जाकैं ए वाह्य दीखैं नाही ऐसा वनस्पती बहुरि समभंग कहिए जाका टूंक ग्रहण कीजिये तो कोऊ तातूं लगा न रहै समान बराबरि टूटै ऐसा। बहुरि अहीरुहं कहिए जाके विषै सूत सारिखा तातूं न होइ ऐसा। बहुरि छिन्नरुहं कहिए जो काट्या हुवा ऊगै ऐसा वनस्पती सो साधारण है। इहां प्रतिष्ठित प्रत्येक साधारण जीवनिकरि आश्रितकी अपेक्षा उपचारकरि साधारण कह्या है। बहुरि तद्विपरीतं कहिये पूर्वोक्त गूढ सिरा आदि लक्षण रहित नालिकेर आम्रादि शरीर अप्रतिष्ठित प्रत्येक शरीर जानना। गाथा विषैं कह्या है जो चकार सो इस भेदकौं सूचै है ॥ १८८ ॥

मूले कंदे छल्लीपवालसालदलकुसुमफलबीजे।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समभंगे सदि णंता असमे सदि होंति पत्तेया ॥ १८९ ॥

मूले कंदे त्वक्प्रवालशालादलकुसुमफलबीजे ।
समभंगे सति नांता असमे सति भवंति प्रत्येकाः ॥ १८९ ॥

जी० प्र०—मूले कंदे त्वचि पल्लवांकुरे क्षुद्रशाखायां पत्रे कुसुमे फले बीजे च समभंगे सति अनंताः--अनंतकायाः--प्रतिष्ठितप्रत्येकशरीरा इत्यर्थः । मूलादिषु समभंगरहितवनस्पतिषु अप्रतिष्ठितप्रत्येकशरीरा भवंति ॥ १८९ ॥

मं० प्र० ---येषां प्रत्येकवनस्पतीनां मूलं-कंदः, त्वक्, प्रवालः–नवपल्लवः, शाला-क्षुद्रशाखा, दलं-पत्रं, कुसुमं, फलं, बीजं च समभंगं भवेत् हीरुकं विना भज्येत तथासति ते जीवाः अनंताः–अनंतैर्निगोदैराश्रिताः प्रतिष्ठिता इत्यर्थः येषां मूलादिः समभंगो न भवति तथासति ते जीवाः अप्रतिष्ठित-प्रत्येका भवंति ॥ १८९ ॥

सं० च०—मूल कहिये जड कंद कहिये पेड छली कहिए छालि प्रवाल कहिए कौंपल अंकुरा, शाला कहिए छोटी डाहली शाखा कहिए बडी डाहली दल कहिए पान कुसुम कहिए फूल फल कहिए फल बीज कहिये जातैं फेरि उपजैं सो बीज सो ए समभंग होइ तो अनंत कहिए अनंतकायरूप प्रतिष्ठित प्रत्येक हैं। बहुरि जो मूल आदि वनस्पती समभंग न होइ सो अप्रतिष्ठित प्रत्येक हैं। जीहि वनस्पतिका मूलकंद छाल इत्यादिक समभंग होइ सो प्रतिष्ठित प्रत्येक है अर जाका समभंग न होइ सो अप्रतिष्ठित प्रत्येक है। तोड्या थका तांतू कोई लग्या न रहै बराबरि टूटै सो समभंग कहिए ॥ १८९ ॥

कंदस्स व मूलस्स व सालाखंदस्स वावि बहुलतरी ।
छल्ली साणंतजिया पत्तेयजिया तु तणुकदरी ॥ १९० ॥

कंदस्य वा मूलस्य वा शालास्कंधस्य वापि बहुलतरी ।
त्वक् सा अनंतजीवा प्रत्येकजीवास्तु तनुकतरी ॥ १९० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी० प्र०—येषां प्रत्येकवनस्पतीनां कंदस्य वा मूलस्य वा शालायाः क्षुद्रशाखाया वा स्कंधस्य या त्वक् बहुलतरी-स्थूलतरी स्यात् ते वनस्पतयः अनंतकायजीवा भवंति-अनंतजीवैः-निगोदजीवैः सहिताः प्रतिष्ठितप्रत्येकशरीरा भवंति इत्यर्थः तु पुनः येषां कंदादिषु त्वक् तनुतरी ते वनस्पतयः अप्रतिष्ठितप्रत्येकशरीरा भवंति ॥ १९० ॥

मं० प्र०—येषां प्रत्येकवनस्पतीनां कंदस्य वा मूलस्य वा शालाया वा स्कंधस्यापि वा त्वक् बहुलतरा-स्थूलतरा भवति ते सानंतजीवाः--अनंतजीवै-निगोदजीवैः सहिताः प्रतिष्ठितप्रत्येका इत्यर्थः । तु पुनः, येषां कंदादीनां त्वक् तनुतरा--अत्यल्पा ते अप्रतिष्ठितप्रत्येकजीवा भवंति ॥ १९०॥ अथ श्रीनेमिचंद्रसिद्धांतचक्रवर्तिनः साधारणजीवस्वरूपं गाथासप्तकेन प्ररूपयंति--

सं० च०—जिस वनस्पतीका कंदकी वा मूलकी वा क्षुद्र शाखाकी वा स्कंधकी छालि मोटी होइ सो अनंत काय है। निगोदजीव सहित प्रतिष्ठित प्रत्येक है। बहुरि जिस वनस्पतीका कंदादिककी छालि पतली होइ सो अप्रतिष्ठित प्रत्येक है॥ १९० ॥ आगें श्रीनेमिचंद्र सिद्धांतचक्रवर्ती साधारण वनस्पतीका स्वरूप सात गाथानिकरि कहै हैं–

साहारणोदयेण णिगोदसरीरा हवंति सामण्णा ।
ते पुण दुविहा जीवा वादरसुहमात्ति विण्णेया ॥ १९१ ॥

साधारणोदयेन निगोदशरीरा भवंति सामान्याः ।
ते पुनर्द्विविधा जीवा वादरसूक्ष्मा इति विज्ञेयाः ॥ १९१ ॥

जी० प्र०—साधारणनामकर्मोदयेन जीवा निगोदशरीरा भवंति । नि-नियतां गां-भूमिं क्षेत्रं निवासं, अनंतानंतजीवानां ददाति इति निगोदं । निगोदं शरीरं येषां ते निगोदशरीराः इति लक्षणसिद्धत्वात् । त एव सामान्याः-साधारणशरीरा जीवा पुनः वादराः सूक्ष्माश्चेति द्विधा पूर्वोक्तलक्षणलक्षिता विज्ञेयाः ॥ १९१ ॥

मं० प्र०—स्थावरनामकर्मोत्तरप्रकृतिभेदस्य साधारणनामकर्मणः उदयेन जीवाः सामान्याः साधारणा भवंति । किंविशिष्टाः संतः ? निगोदशरीराः—नियतानामनंतजीवानामेकामेव गां -भूमिं क्षेत्रं निवासं ददातीति निगोदं शरीरं येषां ते निगोदशरीराः ते साधारणजीवाः पुनः वादराः सूक्ष्मा इति द्विविधा विज्ञेयाः । अत्रापि वादरसूक्ष्मलक्षणं प्रागुक्तमेव ज्ञातव्यं ॥ १९१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० च०—साधारण नामा नामकर्मकी प्रकृतिके उदयतें निगोद शरीरके धारक साधारण जीव हो हैं। नि कहिये नियतिले अनंते जीव तिनिकौ गो कहिये एकही क्षेत्रकौं जो द कहिये देइ सो निगोद शरीर जानना। सो जिनकैं पाइए ते निगोदशरीरी हैं बहुरि तेई सामान्य कहिये साधारण जीव हैं। बहुरि ते बादर अर सूक्ष्म ऐसे भेदतैं दोय प्रकार पूर्वोक्त वादर सूक्ष्मपना लक्षणके धारक जानने॥ १९१ ॥

साहारणमाहारो साहारणमाणपाणगहणं च।
साहारणजीवाणं साहारणलक्खणं भणियं ॥ १९२ ॥

साधारणमाहारः साधारणमानपानग्रहणं च।
साधारणजीवानां साधारणलक्षणं भणितं ॥ १९२ ॥

जी० प्र०—यत्साधारणनामकर्मोदयवशवर्त्यनंतजीवानां उत्पन्नप्रथमसमये आहारपर्याप्तिस्तत्कार्यं च आहारवर्गणायातपुद्गलस्कंधानां खलरसभागपरिणमनं साधारणं सदृशं समकालं च भवति। तथा शरीरपर्याप्तिः तत्कार्यं च आहारवर्गणायातपुद्गलस्कंधानां शरीराकारपरिणमनं तथा इंद्रियपर्याप्तिः तत्कार्यं च स्पर्शनादींद्रियाकारपरिणमनं तथा आनपानपर्याप्तिः तत्कार्यं च उच्छ्वासनिश्वासग्रहणं साधारणं सदृशं समकालं च भवति। तथा प्रथमसमयोत्पन्नानामिव तत्रैव शरीरे द्वितीयादिसमयोत्पन्नानामपि अनंतानंतजीवानां पूर्वपूर्वसमयोत्पन्नानंतानंतजीवैः सह आहारपर्याप्त्यादिकं सर्वं सदृशं समकालं च भवति। तदिदं साधारणलक्षणं पूर्वसूरिभिर्भणितं ज्ञातव्यं। चशब्देन शरीरेंद्रियपर्याप्तिद्वयं समुच्चयीकृतं ॥ १९२ ॥

मं० प्र०—येषामनंतजीवानां साधारणनामकर्मोदयवशवर्तिनां, उत्पन्नप्रथमसमये आहारपर्याप्तिः, तत्कार्यं आहारवर्गणायातपुद्गलस्कंधखलरसभागपरिणमनं च साधारण–सदृशं समकालं च तथा शरीरपर्याप्तिः तत्कार्यं आहारवर्गणायातपुद्गलस्कंधस्य शरीराकारपरिणमनं च तथा इंद्रियपर्याप्तिः तत्कार्यं स्पर्शनेंद्रियाकारपरिणमनं च तथा आनपानपर्याप्तिः तत्कार्यं उच्छ्वासनिश्वासग्रहणं च साधारणं सदृशरूपं समकालं च भवति ते साधारणजीवा इति साधारणजीवानां उत्पत्तिप्रथमसमयोत्पन्नानामिव तस्मिन्नेव शरीरे द्वितीयादिसमयोत्पन्नानामपि अनंतजीवानां पूर्वपूर्वसमयोत्पन्नानंतजीवैः सह आहारपर्याप्त्यादिकं सर्वं सदृशरूपं समकालं भवतीति साधारणलक्षणं पूर्वसूरिभिर्भाणितं ज्ञातव्यं। चशब्देन शरीरेंद्रियपर्याप्तिद्वयतत्कार्यसमुच्चयः कृतः ॥ १९२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० च०—साधारण नामा नामकर्मके उदयके वशवर्ती जे साधारण जीव तिनिके उपजते पहला समय विषै आहार पर्याप्ति हो है सो साधारण कहिए अनंत जीवनिकैं युगपत एक काल हो है। सो आहार पर्याप्तिका कार्य यहु जो आहार वर्गणारूप जे पुद्गल स्कंध तिनिकौं खल रस भागरूप परिणमावै है। बहुरि तिनही आहार वर्गणारूप पुद्गलस्कंधनिकौं शरीरके आकार परिणमावनेरूप है कार्य जाका ऐसा शरीर पर्याप्ति सो भी तिनि जीवनिके साधारण हो है। बहुरि तिनहीकौं स्पर्शन इंद्रियके आकार परिणमावना है कार्य जाका ऐसा इंद्रिय पर्याप्ति सो भी साधारण हो है। बहुरि सासोस्वास ग्रहणरूप है कार्य जाका ऐसा आनपान पर्याप्ति सो भी साधारण हो है। बहुरि एक निगोद शरीर है तीहिविषैं पूर्वैं अनंत जीव थे। बहुरि दूसरा तीसरा आदि समय विषैं नये अनंत जीव उसही विषैं अन्य आनि उपजैं तौ तहां जैसैं वे नये उपजे जे जीव आहार आदि पर्याप्तिकौं धरै हैं तैसैं ही पूर्व २ समय विषै उपजे थे जे अनंतानंत जीव ते भी उनहीकी साथि आहारादिक पर्याप्तिनिकौं धरै हैं सदृश युगपत् सर्व जीवनिके आहारादिक हो है तातैं इनिकौं साधारण कहिये है सो यह साधारणका लक्षण पूर्वाचार्यनिकरि कह्या हूवा जानना ॥ १९२ ॥

जत्थेक्क मरइ जीवो तत्थ दु मरणं हवे अणंताणं।
वक्कमइ जत्थ एक्को वक्कमणं तत्थ णंताणं ॥ १९३ ॥

यत्रैको म्रियते जीवस्तत्र तु मरणं भवेदनंतानां।
प्रक्रामति यत्र एकः प्रक्रमणं तत्रानंतानां ॥ १९३ ॥

जी० प्र०—यन्निगोदशरीरे यदा एको जीवः स्वस्थितिक्षयवशेन म्रियते तदा तन्निगोदशरीरे समस्थितिकाः अनंतानंता जीवाः सहैव म्रियंते। यन्निगोदशरीरे यदा एको जीवः प्रक्रामति-उत्पद्यते तदा तन्निगोदशरीरे समस्थितिकाः-अनंतानंता जीवाः सहैव प्रक्रामंति। एवमुत्पत्तिमरणयोः समकालत्वमपि साधारणलक्षणं प्रदर्शितं। द्वितीयादिसमयोत्पन्नानामनंतानंतजीवानामपि स्वस्थितिक्षये सहैव मरणं ज्ञातव्यं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवमेकनिगोदशरीरे प्रतिसमयमनंतानंतजीवास्तावत्सहैव म्रियंते सहैवोत्पद्यंते यावदसंख्यातसागरोपमकोटीकोटिमात्री असंख्यातलोकमात्रसमयप्र-
मिता उत्कृष्टनिगोदकायस्थितिः परिसमाप्यते। अत्र विशेषोऽस्ति-स च कः ? एकबादरनिगोदशरीरे सूक्ष्मनिगोदशरीरे वा अनंतानंताः साधारण-
जीवा केवलपर्याप्ता एवोत्पद्यंते पुनरपि एकशरीरे केवलमपर्याप्ता एवोत्पद्यंते न च मिश्रा उत्पद्यंते तेषां समानकर्मोदयनियमात् । एकस्य साधा-
रणजीवस्य कर्मादानशक्तिलक्षणयोगेन गृहीतपुद्गलपिंडोपकारोऽनंतानंतसाधारणजीवानां तस्य चानुग्रहणं भवति । पुनरपि अनंतानंतसाधारण-
जीवानां योगशक्तिभिः गृहीतपुद्गलपिंडोपकारः एकस्य अनंतानंतसाधारणजीवानां चानुग्रहणं समासेन संपिंडितत्वेन भवति । एकबादरनि-
गोदशरीरे सूक्ष्मनिगोदशरीरे वा यथासंख्यं पर्याप्ताः बादरनिगोदजीवाः सूक्ष्मनिगोदजीवाश्च भवप्रथमसमये अनंतानंता उत्पद्यंते । द्वितीयस-
मये तेभ्योऽसंख्येयगुणहीना उत्पद्यंते । एवं निरंतरमावल्यसंख्येयभागकालपर्यंतं प्रतिसमयमसंख्येयगुणहीनक्रमेणोत्पद्यंते। ततः परं जघन्येनैकस-
मयं उत्कृष्टेन आवल्यसंख्येयभागमात्रकालमंतरयित्वा पुनरपि जघन्येनैकसमयं उत्कृष्टेन आवल्यसंख्येयभागमात्रकालं निरंतरं निगोदशरीरे अ-
संख्यातगुणहीनक्रमेण साधारणजीवा उत्पद्यंते । एवं सांतरनिरंतरक्रमेण तावदुत्पद्यंते यावत्प्रथमसमयोत्पन्नसाधारणजीवस्य सर्वजघन्यो निर्वृत्य-
पर्याप्तकालोऽवशिष्यते २ १ पुनरपि तत्प्रथमादिसमयोत्पन्नसर्वसाधारणजीवानां आहारशरीरेंद्रियोच्छ्वासनिःश्वासपर्याप्तीनां स्वस्वयोग्यकाले नि-
ष्पत्तिर्भवति ॥ १९२ ॥ अथ बादरनिगोदशरीराधारं प्रतिपादयति—

मं० प्र०—यस्मिन्नेकस्मिन् शरीरे यदा एको जीवः स्वस्थितिक्षयवशान्म्रियते तदा तस्मिन् समये समस्थितिकानामनंतजीवानां मरणं सहैव भवेत् ।
यस्मिन्नेकस्मिन्निगोदशरीरे यदा एको जीवः प्रक्रामति–उत्पद्यते तदैव–तस्मिन्निगोदशरीरे समस्थितिकानामनंतजीवानां प्रक्रमणमुत्पत्तिः सहैव भवेत् इत्युत्पत्ति-
मरणयोः समकालत्वमपि साधारणलक्षणं प्रदर्शितं द्वितीयादिसमयोत्पन्नानामपि अनंतजीवानां स्वस्थितिक्षये सह मरणं द्रष्टव्यं । एवमेकस्मिन्निगोदशरीरे
प्रतिसमयमनंतानंतजीवानां सहोत्पत्तिः सहमरणं च तावत्संभवति यावदसंख्यातसागरोपमकोटीकोटीनामसंख्यातलोकमात्रसमयप्रमिता उत्कृष्टनिगोदकायस्थितिः
परिसमाप्यते ॥ १९३ ॥

सं० च०– एक निगोद शरीरविषैं जिस काल एक जीव अपना आयुके नाशतैं मरै तिसही काल विषैं जि-
नकी आयु समान होइ ऐसे अनंतानंत जीव युगपत् मरै हैं। बहुरि जिस कालविषैं एक जीव तहां उपजै है उस
ही कालविषैं उसही जीवकी साथि समान स्थितिके धारक अनंतानंत जीव उपजैं हैं ऐसैं उपजना मरनाका स-
मकालपनाकौं भी साधारण जीवनिका लक्षण कहिए है। बहुरि द्वितीयादि समयनिविषैं उपजे अनंतानंत जीव-
निका भी अपना आयुका नाश होतै साथि ही मरना जानना। ऐसैं एक निगोद शरीरविषैं समय समय प्रति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनंतानंत जीव साथिही मरै हैं साथि ही उपजै हैं। निगोद शरीर ज्योंका त्यों रहै है सो निगोद शरीरकी उत्कृष्ट स्थिति असंख्यात कोडाकोडी सागरमात्र है। सो असंख्यात लोकमात्र समय प्रमाण जानना सो स्थिति यावत् पूर्ण न होइ तावत् ऐसें ही जीवनिका उपजना मरना हुवा करै है। इतना विशेष–जो कोई एक वादर निगोद शरीर विषैं वा एक सूक्ष्मनिगोद शरीरविषैं अनंतानंत जीव केवल पर्याप्त ही उपजै हैं तहां अपर्याप्त नाहीं उपजैं हैं। बहुरि कोई एक शरीरविषैं केवल अपर्याप्त ही उपजैं हैं तहां पर्याप्त नाहीं उपजै हैं। एक शरीर विषैं पर्याप्त अपर्याप्त दोऊ नाहीं उपजैं है। जातैं तिन जीवनिके समान कर्मके उदयका नियम है। बहुरि एक साधारण जीवकैं कर्मका ग्रहण शक्तिरूप लक्षण धरै जो काय योग ताकरि ग्रह्या हूवा जो पुद्गल पिंड ताका उपकार कार्य सो तिस शरीर विषैं तिष्ठते अनंतानंत अन्य जीवनिका अर तिस जीवका उपकारी हो है। बहुरि अनंतानंत साधारण जीवनिका जो काय योग रूप शक्ति ताकरि ग्रहे हूये पुद्गलपिंडनिका कार्यरूप उपकार सो कोई एक जीवका वा तिन अनंतानंत साधारण जीवनिका उपकारी समान एक साथिपनै हो है। बहुरि एक वादर निगोद शरीरविषैं वा सूक्ष्म निगोद शरीर विषै क्रमतैं पर्याप्त वादर निगोद जीव वा सूक्ष्म निगोद जीव उपजैं है। तहां पहले समय अनंतानंत उपजै हैं। बहुरि दूसरे समय तिनतैं असंख्यात गुणा घाटि उपजै हैं। ऐसैं ही आवलीका असंख्यातवां भाग प्रमाण काल पर्यंत समय समय प्रति निरंतर असंख्यात गुणा घाटि क्रमकरि जीव उपजै हैं तातैं परैं जघन्य एक समय उत्कृष्ट आवलीका असंख्यातवां भाग प्रमाण कालका अंतराल हो है तहां कोऊ जीव न उपजै है। वहां पीछै बहुरि जघन्य एक समय उत्कृष्ट आवलीका असंख्यातवां भाग प्रमाण काल पर्यंत निरंतर असंख्यात गुणा घाटि क्रमकरि तिस निगोद शरीरविषै जीव उपजै हैं। ऐसैं अंतर सहित वा निरंतर निगोद शरीरविषै जीव उपजै हैं सो यावत् प्रथम समय विषै उपज्या साधारण जीवका जघन्य निर्वृति अपर्याप्त अवस्थाका काल अवशेष रहै तावत् ऐसैं ही उपजना होइ बहुरि ४३२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पीछे तिनि प्रथमादि समयनिविषै उपजे सर्व साधारण जीव तिनिकै आहार शरीर इंद्रिय सासोस्वास पर्याप्तिनिकी संपूर्णता अपने अपने योग्य कालविषै होइ है ॥ १९३ ॥

खंधा असंखलोगा अंडरआवासपुलविदेहावि ।
हेट्ठिल्लजोणिगाओ असंखलोगेण गुणिदकमा ॥ १९४ ॥

स्कंधा असंख्यलोकाः अंडरावासपुलविदेहा अपि ।
अधस्तनयोनिका असंख्यलोकेन गुणितक्रमाः ॥ १९४ ॥

जी० प्र०——वादरनिगोदजीवशरीरसंख्यानयनार्थं उदाहरणपूर्वकमिदं गाथाद्वयेनोच्यते (आह) तद्यथा–स्कंधाः प्रतिष्ठितप्रत्येकजीवशरीराणि, असंख्यातलोकाः स्वयोग्यासंख्यातगुणितलोकप्रदेशमात्रा इत्यर्थः । तत्र एकैकस्मिन् स्कंधे लोकाकाशप्रदेशेषु जगच्छ्रेणिघनप्रमितेषु अनंतानंतपुद्गलानामवगाहपरिणामवत्, एकनिगोदजीवकार्मणशरीरे अनंतानंतनिगोदजीवकार्मणशरीराणामवगाहनवद्वा असंख्यातलोकमात्रा अंडराः प्रत्येकजीवशरीरविशेषाः संति । तथैव एकैकस्मिन्नंडरे असंख्यातलोकमात्रा आवासाः तेऽपि प्रत्येकजीवशरीरभेदाः संति । एकैकस्मिन्नावासे असंख्यातलोकमात्राः पुलवयः तेऽपि प्रत्येकजीवशरीरविशेषाः संति । एकैकस्मिन् पुलवौ असंख्यातलोकमात्राणि वादरनिगोदजीवशरीराणि संति । एवमंडरादीनि उत्तरोत्तराण्यधस्तनस्कंधादियोनिकानि तत्र जातानि भवंति । यद्येकैकस्मिन् स्कंधे असंख्यातलोकमात्रा अंडराः संति तदा असंख्यातलोकमात्रस्कंधानां कति अंडराः स्युः ? इति त्रैराशिकेन–प्र स्कं १, फ अं ≡ a । इ स्कं ≡ a । लब्धांडराः असंख्यातलोकगुणितासंख्यातलोकमात्रा भवंति एवमावासादिषु प्रत्येकं त्रैराशिकक्रमेण लब्धानामसंख्यातलोकगुणिताकाराणां विन्यासोयं–स्कंधाः ≡ a । अंडराः ≡ a ≡ a । आवासाः ≡ a ≡ a ≡ a । पुलवयः ≡ a ≡ a ≡ a ≡ a । वादरनिगोदशरीराणि ≡ a ≡ a ≡ a ≡ a ≡ a ॥ १९४ ॥

म० प्र०---वादरनिगोदजीवानां शरीरसंख्यानयनार्थमुदाहरणपूर्वकमिदमुच्यते-स्कंधाः प्रतिष्ठितप्रत्येकजीवशरीराण्यसंख्यलोकाः स्वयोग्यासंख्यातगुणितलोकप्रदेशमात्राः संति । ननु लोकाकाशप्रदेशाः जगच्छ्रेणिघनमात्राः तेषु ततोऽसंख्येयगुणाः प्रतिष्ठितप्रत्येकजीवशरीरस्वभावस्कंधाः कथमवगाहंते ? इति चेत्तन्न अवगाहनसामर्थ्यात्तदुत्पत्तेः, एकस्मिन् प्रत्येकशरीरे असंख्यातलोकमात्रप्रत्येकशरीराणामवगाहपरिणामस्य परमागमे प्रतिपादितत्वात् । अनंतानंतपुद्गलपरमाणूनामसंख्यातेषु लोकाकाशप्रदेशेष्ववगाहपरिणामवत् । एकनिगोदजीवकार्मणशरीरे अनंतानंतनिगोदजीवकार्मणशरीराणामवगाहपरिणामवद्वा । तत्र एकैकस्मिन्

Ganesh Varni Digambar Jain Institute, Naria; Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्कंधे असंख्यातलोकमात्रा अंडराः प्रत्येकजीवशरीरविशेषाः संति । एकैकस्मिन्नंडरे असंख्यातलोकमात्राः आवासाः, तेऽपि प्रत्येकजीवशरीरभेदा संति । एकैकस्मिन्नावासे असंख्यातलोकमात्राः पुलवयः तेऽपि प्रत्येकजीवशरीरविशेषा संति । एकैकस्मिन् पुलवौ असंख्यातलोकमात्राणि वादरनिगोदजीवशरीराणि संति इत्यंडरादीन्युत्तरोत्तराणि अधस्तनाधस्तनस्कंधादियोनिकानि तत्र जातानि संतीति । एकस्मिन् स्कंधे प्र १ यद्यसंख्यातलोकमात्रा अंडरा जायंते । फ ≡ a । तदा असंख्यातलोकमात्रस्कंधेषु कियंतोऽडराः ? इ ≡ a इति त्रैराशिकेन लब्धाः अंडराः असंख्यातलोकमात्रस्कंधेभ्यः असंख्यातलोकगुणिता भवंति । एवमावासादिष्वपि प्रत्येकं त्रैराशिकक्रमेण लब्धः असंख्यातलोकमात्रगुणकारः । तन्न्यासोयं- स्कंधाः ≡ a अंडराः ≡ a ≡ a आवासाः ≡ a ≡ a ≡ a पुलवयः ≡ a ≡ a ≡ a ≡ a वादरनिगोदशरीराणि ≡ a ≡ a ≡ a ≡ a ≡ a ॥ १०४ ॥

सं० च०—वादरनिगोद जीवनिके शरीरकी संख्या जाननेनिमित्त उदाहरणपूर्वक यहु कथन करिए है- इस लोकाकाशविषैं स्कंध यथायोग्य असंख्यात लोक प्रमाण हैं । जे प्रतिष्ठित प्रत्येक जीवनिके शरीर तिनिकौं स्कधं कहिये हैं । सो यहु यथा योग्य असंख्यातकरि लोकके प्रदेश गुणें जो प्रमाण होइ तितने प्रतिष्ठित प्रत्येक शरीर इस लोकविषै जानने । बहुरि एक एक स्कंधविषैं असंख्यात लोक प्रमाण अंडर हैं । इहां प्रश्न—जो एक स्कंधविषैं असंख्यात लोक प्रमाण अंडर कैसैं संभवै ? ताका समाधान—यहु अवगाहनाकी समर्थता है जैसैं जगत श्रेणीका घन प्रमाण लोकके प्रदेशनिविषैं अनंतानंत पुद्गल परमाणू पाइए जैसैं जहां एक निगोद जीवका कार्माण स्कंध है तहां ही अनंतानंत जीवनिके कर्माण शरीर पाइये है तैसैं ही एक एक स्कंध विषैं असंख्यात लोक प्रमाण अंडर हैं ते प्रतिष्ठित प्रत्येक शरीरके अवयवरूप विशेष हैं जैसैं मनुष्य शरीरविषैं हस्तादिक हो हैं तैसै स्कंधविषै अंडर जानने । बहुरि एक एक अंडरविषै असंख्यात लोक प्रमाण आवास पाइए है ते आवास भी प्रतिष्ठित प्रत्येकके शरीरके अवयव रूप विशेष ही जानने । जैसैं हस्तविषै अंगुरी आदि हो हैं । बहुरि एक एक आवासविषै असंख्यात लोक प्रमाण पुलवी हैं ते पणि प्रतिष्ठित प्रत्येक शरीरके अवयव रूप विशेष ही जानने । जैसैं एक अंगुलीविषैं रेखा आदि हो हैं । बहुरि एक एक पुलवीविषै असंख्यातलोक प्रमाण वादरनिगोदके शरीर जानने । ऐसैं ए अंडरादिक अधस्तन योनि कहे । इनिविषै अधस्तन जो पीछे कह्या भेद ताकी संख्याकी उत्पत्तिकौं कारण ऊपरिका भेद जानना । ऐसैं तहां एक स्कंधविषै असंख्यातलोक प्रमाण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अंडर हैं तौ असंख्यातलोक प्रमाण स्कंधनविषैं केते अंडर हैं ? ऐसैं त्रैराशिक करि लब्धराशी असंख्यात लोक गुणे असंख्यात लोक प्रमाण अंडर जानने। बहुरि ऐसैं ही आवासादिविषैं त्रैराशिक कीएं तिनतैं असंख्यातलोक गुणे आवास जानने। बहुरि तिनतैं असंख्यात लोक गुणे पुलवी जानने। बहुरि तिनतैं असंख्यात लोक गुणे वादरनिगोद शरीर जानने। ते सर्वनिगोदशरीर पांच जायगा असंख्यात लोक माडि परस्पर गुणें जेता प्रमाण होइ तितने जानने ॥ १९४ ॥

जंबूदीवं भरहो कोसलसागेदतग्घराइं वा।
खंधंडरआवासापुलविसरीराणि दिट्ठंता ॥ १९५ ॥

जंबूद्वीपो भरतः कोशलसाकेततद्गृहाणि वा।
स्कंधांडरावासाः पुलविशरीराणि दृष्टांताः ॥ १९५ ॥

जी० प्र०——स्कंधानां दृष्टांताः जंबूद्वीपादयः। अंडराणां भरतादिक्षेत्राणि। आवासानां कोशलादिदेशाः। पुलवीनां साकेतादिनगराणि। वादरनिगोदजीवशरीराणां साकेतादिनगरगृहाणि। वा शब्दः इवार्थः। उक्तदृष्टांतादन्येऽपि दृष्टांता नेतव्याः ॥ १९५ ॥

मं० प्र०——स्कंधानां जंबूद्वीपादयो दृष्टांताः, अंडराणां भरतादिक्षेत्राणि, आवासानां कोशलादिदेशाः, पुलवीनां साकेतादिनगराणि। वादरनिगोदशरीराणां तद्गृहाः तस्य नगरस्य गृहाः तद्गृहा दृष्टांताः। वा शब्द इवार्थे। उक्तदृष्टांतवत् अन्येऽपि दृष्टांता नेतव्याः ॥ १९५ ॥

सं० च०——स्कंधनिका दृष्टांत जंबूद्वीपादिक जानने। जैसैं मध्यलोकविषैं जंबूद्वीपादिक द्वीप हैं तैसैं लोकविषैं स्कंध हैं। बहुरि अंडरनिका दृष्टांत भरतादि क्षेत्र जानने। जैसैं एक जंबूद्वीपविषैं भरतक्षेत्र आदि क्षेत्र पाइए तैसैं स्कंधविषैं अंडर जानने। बहुरि आवासनिका दृष्टांत कोशल आदि देश जानने जैसैं भरतक्षेत्रविषै कोशल देश आदि अनेक देश पाइए तैसैं अंडरविषै आवास जानने। बहुरि पुलवीनिका दृष्टांत अयोध्यादि नगर जानने। जैसैं एक कोशलदेशविषैं अयोध्या नगर आदि अनेक नगर पाइए तैसैं आवासविषैं पुलवी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जानने। बहुरि शरीरनिका दृष्टांत अयोध्याके गृहादिक जानने जैसैं अयोध्याविषैं मंदरादिक पाइए तैसे पुलवी विषै बादर निगोद शरीर जानने। बहुरि वा शब्दकरि यहु दृष्टांत दीया। ऐसैं ही और कोऊ उचित दृष्टांत जानने॥ १९५॥

एगणिगोदसरीरे जीवा दव्वप्पमाणदो दिट्ठा।
सिद्धेहिं अणंतगुणा सव्वेण वितीदकालेण॥ १९६॥

एकनिगोदशरीरे जीवा द्रव्यप्रमाणतो दृष्टाः।
सिद्धैरनंतगुणाः सर्वेण व्यतीतकालेन॥ १९६॥

जी० प्र०—एकस्मिन् निगोदशरीरे वर्तमाना जीवा द्रव्यप्रमाणतः द्रव्याश्रयप्रमाणसंख्यया अनंतानंताः सर्वजीवराश्यनंतबहुभागमात्रसंसारिजीवराश्यसंख्येयभागप्रमिताः सर्वदा विद्यमानाः ते अक्षयानंता इति परमागमे भण्यंते। ते च सर्वजीवराश्यनंतैकभागमात्रेभ्योऽनादिकालसिद्धजीवेभ्योऽनंतगुणाः। तथैव सर्वातीतकालतोऽप्यनंतगुणाः। अनेन कालमाश्रित्यैकशरीरनिगोदजीवसंख्या कथिता। क्षेत्रभावावाश्रित्य तत्संख्या आगमानुसारेण योज्यते। सर्वाकाशप्रदेशेभ्यः केवलज्ञानाविभागप्रतिच्छेदेभ्यश्चानंतगुणहीनाः, तथा लोकाकाशप्रदेशेभ्यः सर्वावधिज्ञानविषयभावेभ्यश्चानंतगुणिताः संति। तत्संख्यायाः परमागमे जिनदृष्टत्वप्रसिद्धेर्विरोधो नास्ति। ननु अष्टसमयाधिकषण्मासाभ्यंतरे अष्टोत्तरषट्शतजीवेषु कर्मक्षयं कृत्वा सिद्धेषु सत्सु सिद्धराशेर्वृद्धिदर्शनात् संसारिजीवराशेश्च हानिदर्शनात् कथं सर्वदा सिद्धेभ्योनंतगुणत्वं एकशरीरनिगोदजीवानां सर्वजीवराश्यनंतगुणकालसमयसमूहस्य तद्योग्यानंतभागे गते सति संसारिजीवराशिक्षयस्य सिद्धराशिबहुत्वस्य च सुघटत्वात्? इति चेत्तन्न, केवलज्ञानदृष्ट्या केवलिभिः, श्रुतज्ञानदृष्ट्या श्रुतकेवलिभिश्च सदा दृष्टस्य भव्यसंसारिजीवराश्यक्षयस्यातिसूक्ष्मत्वात्तर्कविषयत्वाभावात्। प्रत्यक्षागमबाधितस्य च तर्कस्याप्रमाणत्वात्। अनुष्णोऽग्निर्द्रव्यत्वात् यद्यद्द्रव्यं तत्तदनुष्णं यथा जलं। प्रेत्यासुखप्रदो धर्मः पुरुषाश्रितत्वात् यो यः पुरुषाश्रितः स सोऽसुखप्रदो यथाऽधर्मः इत्यादितर्कवत्। तर्हि तर्कबाधितस्य आगमस्य कथं प्रामाण्यं? इति चेत्तन्न प्रत्यक्षप्रमाणतर्कांतरसंभावितस्यागमस्याविसंवादित्वेन प्रामाण्यसुनिश्चयात्। तद्द्वयविरोधिनस्तव तर्कस्याप्रमाणत्वाच्च। तर्हि किमिदं तर्कांतरमिति चेदुच्यते सर्वो भव्यसंसारिराशिरनंतेनापि कालेन न क्षीयते अक्षयानंतत्वात् यो योऽक्षयानंतः स सोनंतेनापि कालेन न क्षीयते यथा इयत्तया परिच्छिन्नः कालसमयौघः, सर्वद्रव्याणां पर्यायोऽविभागप्रतिच्छेदसमूहो वा इत्यनुमानांगस्य तर्कस्य प्रामाण्यसुनिश्चयात्। तर्हि हेतोः साध्य-

४३७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समत्वमिति चेन्न भव्यराश्यक्षयानंतत्वस्याप्तागमसिद्धस्य साध्यसमत्वाभावात् । किं बहुना सर्वतत्त्वानां प्रवक्तरि पुरुषे आप्ते सिद्धे सति तद्वाक्यस्यागमस्य सूक्ष्मांतरितदूरार्थेषु प्रामाण्यसुप्रसिद्धेः । तदागमपदार्थेषु निश्शंकं मम चित्तं किन्तु वावदूकतया । आप्तसिद्धिस्तु विश्वतश्चक्षुरुत विश्वतो मुखः इत्यादिवेदवाक्येन । प्रणम्य शंभुमित्यादिनैयायिकवाक्येन । बुद्धो भवेयमित्यादिबौद्धवाक्येन मोक्षमार्गस्य नेतारमित्यार्हतवाक्येन अपरैस्तत्तद्दर्शनदेवतास्तवनरूपवाक्यैश्च सामान्यतोंगीकृता । विशेषेण सर्वज्ञवीतरागस्याद्वाद्याप्तस्यैव युक्तयापि साधनात् । विस्तरतः स्याद्वादतर्कशास्त्रेषु तत्सिद्धिर्ज्ञातव्या इत्येकं सुनिश्चितासंभवद्बाधकप्रमाणत्वात् आप्तस्य तदागमस्य च सिद्धत्वात् तत्प्रणीतं मोक्षतत्त्वं बंधतत्त्वं चावश्यमभ्युपगमनीयमिति सिद्धं सिद्धेभ्योऽनंतगुणत्वमेकशरीरनिगोदजीवानां ॥ १९६ ॥

मं० प्र०—एकस्मिन्निगोदशरीरे साधारणशरीरे वर्तमाना जीवाः द्रव्यप्रमाणतः द्रव्याश्रयसंख्ययानंतानंताः सर्वजीवराश्यनंतबहुभागमात्रसंसारजीवराश्यसंख्येयभागप्रमिताः सर्वदा संति ते चाक्षयानंता इत्युच्यंते । सर्वजीवराश्यनंतैकभागमात्रेभ्यः अनादिकालसिद्धजीवेभ्योऽनंतगुणा । तथा सर्वस्मादतीतकालादपि अनंतगुणा । अनेन कालमाश्रित्य एकशरीरनिगोदजीवसंख्या कथिता क्षेत्रभावावाश्रित्य तत्संख्या आगमानुसारेण योजनीया । सर्वाकाशप्रदेशेभ्यः केवलज्ञानाविभागप्रतिच्छेदेभ्यश्चानंतगुणहीनतया लोकाकाशप्रदेशेभ्यः सर्वावधिज्ञानविषयभावेभ्यश्चानंतगुणतया जिनदृष्टभावायास्तत्संख्यया: परमागमे प्रसिद्धत्वात् । ननु अष्टसमयाधिकषण्मासाभ्यंतरे अष्टोत्तरषट्शतजीवेषु कर्मक्षयं कृत्वा सिद्धेषु सत्सु सिद्धिराशेर्वृद्धिदर्शनात् संसारिजीवराशेश्च हानिदर्शनात् कथं सर्वदा सिद्धेभ्योऽनंतगुणत्वमेकशरीरनिगोदजीवानां सर्वजीवराश्यनंतगुणकालसमयसमूहस्य तद्योग्यानंतभागे गते सति संसारिजिवराशिक्षयस्य सिद्धराशिबहुत्वस्य च सुघटत्वादिति चेत्तन्न, केवलज्ञानचक्षुषा केवलिभिः, श्रुतज्ञानचक्षुषा श्रुतकेवलिभिश्च सदा दृष्टस्य भव्यसंसारिजीवाक्षयस्य अति सूक्ष्मतया तर्कागोचरत्वात् । प्रत्यक्षागमबाधितस्य तर्कस्याप्रमाणत्वात् । अनुष्णोऽग्निर्द्रव्यत्वात् । यद्यद्द्रव्यं तत्तदनुष्णं यथा जलं । प्रेत्यासुखप्रदो धर्मः पुरुषाश्रितत्वात् योयः पुरुषाश्रितः स सः, असुखप्रदः यथा अधर्म इत्यादितर्कवत् । तर्कबाधितस्य आगमस्य कथं प्रामाण्यं ? इति चेत्तन्न प्रत्यक्षप्रमाणतर्कांतरसंभावितस्यागमस्य अविसंवादित्वेन प्रामाण्यसुनिश्चयात् तद्द्वयविरोधिनस्तव तर्कस्याप्रमाणत्वाच्च । तर्हि किमिदं तर्कांतरं ? इति चेदुच्यते सर्वो भव्यसंसारराशिरनंतेनापि कालेन न क्षीयते अक्षयानंतत्वात् । योयः अक्षयानंतः स सः, अनंतेनापि कालेन न क्षीयते यथा इयत्तया परिच्छिन्नः कालसमयौघः सर्वद्रव्याणां पर्यायाविभागप्रतिच्छेदसमूहो वा इति तर्कस्यानुमानप्रमाणांगस्य प्रामाण्यसुनिश्चयात् । हेतोः साध्यसमत्वं ? इति चेन्न भव्यराशेरक्षयानंतत्वस्य आप्तागमसिद्धस्य साध्यसमत्वाभावात् । किं बहुना ? सर्वतत्त्वानां प्रवक्तरि पुरुषे आप्ते सिद्धे सति तद्वाक्यस्यागमस्य सूक्ष्मांतरितदूरार्थेषु प्रामाण्यसुप्रसिद्धेः । तदागमपदार्थेषु निश्शंकमस्माकं चित्तमित्यलं वावदूकतया । आप्तसिद्धिश्च विश्वतश्चक्षुरिति विश्वतोमुखः, इत्यादि वेदवाक्येन, प्रणम्य शंभुमित्यादिनैयायिकवाक्येन, बुद्धो भवेयमित्यादि बौद्धवाक्येन, मोक्षमार्गस्य नेतारमित्याद्यार्हतवाक्येन परैश्च तत्तद्दर्शनदेवतास्तवनवाक्यैः सामान्यतोऽभ्युपगता । विशेषतस्तु सर्वज्ञवीतरागस्याप्तस्य स्याद्वादिन

---

१ प्रथमे समये ३२ । द्वितीये समये ४८ । तृतीये समये ६० । चतुर्थे समये ७२ । पंचमे समये ८४ । षष्ठे समये ९६ । सप्तमे समये १०८ । अष्टमे समये १०८ । एवं संकलितजीवाः ६०८ ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एव युक्तितः साधनात् । विस्तरतः स्याद्वादतर्कशास्त्रेषु तत्सिद्धिर्ज्ञातव्या । तदेवं सुनिश्चितासंभवद्बाधकप्रमाणत्वेन आप्तस्य तदागमस्य च सिद्धत्वात्तत्प्रणीतं मोक्षतत्त्वं बंधतत्त्वं चावश्यमभ्युपगमनीयं इति सिद्धं सिद्धेभ्योऽनंतगुणत्वमेकशरीरनिगोदजीवानां ॥ १९६ ॥

अधिकाः संति ततः कारणात् तत्तदधिकप्रमितद्विकान्योन्याभ्याससंभूतासंख्यातलोकेन ते जीवराशयो गुणितक्रमा भवंति । तदसंख्यातलोकोत्पत्तिक्रमः अंकसंदृष्ट्यर्थसंदृष्टिभ्यां दर्श्यते तत्रांकसंदृष्ट्या यथा-षोडशद्विकान्योन्याभ्यासे यदि पणट्ठिराशिर्लभ्यते तदा चतुःषष्टिद्विकान्योन्याभ्यासे को राशिर्लभ्यते इति प्रमाणफलेच्छाराशीन् कृत्वा—

प्र । वि १६ दे २ । फ ६५ = । इ वि ६४ दे २ | लब्धानयने करणसूत्रमाह—

मं॰ प्र॰—तेष्यर्धच्छेदाः पूर्वपूर्वतः उत्तरोत्तरे पल्यासंख्येयभागमात्रेण द्वितीयादिषु पल्यासंख्यातैकभागस्य बहुभागमात्रेण वातकायिकेषु चरमपल्यासंख्यातैकभागमात्रेण विशेषेणाधिका भवंति तस्मात्कारणात् अधिकपल्यासंख्यातभागमात्रार्धच्छेदपरिमितद्विकान्योन्यगुणनसंभूतेन असंख्यातलोकेन गुणितक्रमास्ते बादरतेजस्कायिकादिराशयो भवंति । अत्र तेजस्कायिकार्धच्छेदेभ्यः अप्रतिष्ठितप्रत्येकानामधिकार्धच्छेदाः प ८ / ९ । ९ एतेभ्यः प्रतिष्ठितप्रत्येकानामधिकार्धच्छेदाः प ८ / ९९९ एतेभ्यः बादरपृथ्वीकायिकानामधिकार्धच्छेदाः प ८ / ९९९९ एतेभ्यः बादराप्कायिकानामधिकार्धच्छेदाः प ८ / ९९९९९ एतेभ्यः बादरवातकायिकानामधिकार्धच्छेदाः प १ / ९९९९९ एतेषामधिकार्धच्छेदानां रूपं रूपं प्रति द्विकान्योन्यगुणने असंख्यातलोकोत्पत्तिक्रमो दर्श्यते तद्यथा—अंकसंदृष्ट्या एतावद्रूपमात्रद्विकान्योन्यगुणने प्र—दे २ / वि १६ यद्ययं राशिरुत्पद्यते फ इष्ट ६५ = तदा एतावद्रूपमात्रद्विकान्योन्यगुणने को राशिरुत्पद्यते इ दे २ / वि ६४ लब्धराशिः १८ = अत्र त्रैराशिकविशेषकारणसूत्रमिदं ॥ २१४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० च०—जा कारणतैं कहे जे अर्धच्छेद राशि ते वादर तेज कायिक राशिके अर्धच्छेद राशितैं लगाइ अप्रतिष्ठित प्रत्येक आदि राशिनिके अर्धच्छेद पांचौ आवलीके असंख्यातवें भागमात्र अपना अपना एक एक विशेष करि क्रमतैं अधिक हैं। तहां अग्निकायिक राशिनिके अर्धच्छेदनितैं अप्रतिष्ठित प्रत्येक राशिके अर्धच्छेद पल्यकौं एक घाटि आवलीका असंख्यातवां भागकरि गुणिए अर दोय वार आवलीका असंख्यातवां भागका भाग दीजिए जो प्रमाण होइ तितने अधिक हैं। बहुरि अप्रतिष्ठित प्रत्येक राशिके अर्धच्छेदनितैं प्रतिष्ठित प्रत्येक राशिके अर्धच्छेद पल्यकौं एक घाटि आवलीका असंख्यातवां भागकरि गुणिए अर तीन वार आवलीका असंख्यातवां भागका भाग दीएं जो प्रमाण होइ तितने अधिक हैं। बहुरि प्रतिष्ठित प्रत्येक राशिके अर्धच्छेदनितैं वादर पृथ्वी कायिक राशिके अर्धच्छेद पल्यकौं एक घाटि आवलीका असंख्यातवां भागकरि गुणिए अर च्यारि वार आवलीका असंख्यातवां भागका भाग दीजिए जो प्रमाण होइ तितने अधिक हैं। बहुरि वादर पृथ्वीकायिक राशिके अर्धच्छेदनितैं वादर जल कायिक राशिके अर्धच्छेद पल्यकौं एक घाटि आवलीका असंख्यातवां भागकरि गुणिए अर पांच वार आवलीका असंख्यातवां भागका भाग दीजिए जो प्रमाण होइ तितने अधिक हैं। बहुरि वादर जलकायिकराशिके अर्धच्छेदनितैं वादर वातकायिक राशिके अर्धच्छेद पल्यकौ एक करि गुणिए अर पांचवार आवलीका असंख्यातवां भागका भाग दीजिये जो प्रमाण आवै तितने अधिक हैं ऐसैं अधिक अधिक अर्धच्छेद जानने। अब इस कथनकौं अंकसंदृष्टिकरि दिखाइए है-पल्यका प्रमाण पैसठि हजार पांचसै छत्तीस ६५५३६ आवलीका असंख्यातवां भागका प्रमाण आठ, सागरका प्रमाण छह लाख पचपन हजार तीनसै साठि ६५५३६० तहां एक वार दोयवार तीनवार च्यारिवार पांचवार आठका भाग पणट्ठीकौं दीएं इक्यासीसै वाणवै, एक हजार चौबीस, एकसौ अठाईस, सोलह, दोय ८१९२।१०२४।१२८।१६।२। इतने पाइए सो ए क्रमतैं आठ आठ गुणे घाटि हैं बहुरि इतने इतने छह लाख पचावन हजार तीनसै साठिविषैं घटाएं अंतविषैं संपूर्ण हैं तातैं किछू भी न घटाएं अग्निकायिकादि राशिके अर्धच्छेदनिका प्रमाण होइ ६४७१६८। ६५४३३६। ६५५२-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

३२। ६५५३४४। ६५५३५८। ६५५३६०। इहां अधिक प्रमाण ल्यावनेकौं पणट्ठीकौं सातकरि गुणें दोय तीन च्यारि पांचवार आठका भाग दीएं अंतविषैं एककरि गुणि पांचवार आठका भाग दीएं इकहत्तरिसै अडसठ, आठसै छिनवै, एकसौ बारह, चौदह, दोय ७१६८। ८९६। ११२। १४। २। अनुक्रमतैं अधिकका प्रमाण आवै है। ऐसैं ही पूर्वोक्त कथनका भावार्थ जानना। बहुरि इहां जितना जितना अर्धच्छेदनिका अधिक प्रमाण कह्या तितना तितना दूवा माडि परस्पर गुणैं जो जो यथासंभव असंख्यात लोकमात्र प्रमाण होइ तींहि तींहिकरि गुण्या हूवा अनुक्रमतैं अग्निकायिकादितैं अप्रतिष्ठित प्रत्येकादि राशि जानने। जातैं ऐसैं सूत्र पूर्वैं गणित कथनविषैं कह्या है—

विरलिदरासीदो पुण जेत्तियमेत्ताणि अहियरूवाणि।
तेसिं, अण्णोण्णहदी गुणयारो लद्धरासिस्स॥

इस सूत्रके अभिप्रायतैं जेते जेते पूर्वराशिके अर्धच्छेदनितैं उत्तर राशिके अर्धच्छेद अधिक कहे तितने तितने दूवे मांडि परस्पर गुणैं जो जो प्रमाण होइ तितने तितने प्रमाणकरि पूर्वराशिकौं गुणैं उत्तर राशिका प्रमाण होइ सो इहां सामान्यपनैं गुणकारका प्रमाण सर्वत्र असंख्यात लोकमात्र है। इहां पूर्वोक्तप्रमाण दूवानिकौ परस्पर गुणैं असंख्यात लोक कैसैं होइ? सो इस कथनकौ प्रकट अंक संदृष्टिकरि अर अर्थसंदृष्टिकरि दिखाइए है जैसैं सोलह दूवानिकौं परस्पर गुणैं पणट्ठी होइ तौ चौसठि दूवानिकौं परस्पर गुणैं कितने होइ ऐसैं त्रैराशिक करिए तहां प्रमाण राशिविषैं देय राशि दोय, विरलनराशि सोलह फलराशिविषैं इष्टराशि पणट्ठी ६५५३६ इच्छाराशिविषैं देयराशि दोय विरलनराशि चौसठि ॥ २१४ ॥ अब इहां लब्धराशिका प्रमाण ल्यावनेकौं करण सूत्र कहै हैं—

दिण्णच्छेदेणवहिदइट्ठच्छेदेहिं पयदविरलणं भजिदे।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लद्धमिदइट्ठरासीणण्णोण्णहदीए होदि पयदधणं ॥२१५॥

देयच्छेदेनावहितेष्टच्छेदः प्रकृतविरलनं भाजिते।
लब्धमितेष्टराश्यन्योन्यहत्या भवति प्रकृतधनं ॥ २१५ ॥

जी॰ प्र॰—देयराश्यर्धच्छेदेन १ फलभूतेष्ट६५= राश्यर्धच्छेदान् १६ भक्त्वा १६/१ तल्लब्धेन साध्यभूतप्रकृतराशेः १८= विरलनराशिं ६४ भक्त्वा ६४/१६ तल्लब्ध ४ प्रमितेष्टराशि ६५=/१ । ६५=/१ । ६५=/१ । ६५=/१ अन्योन्याभ्यासेन साध्यभूतप्रकृतधनमे- कट्टराशिर्भवति १८= एवमर्थसंदृष्ट्यापि---एतावतां द्विकानामभ्यासे यदि लोको जायते तदा एतावतां द्विकानामभ्यासे को राशिर्जायते इति त्रैराशिकं रचयित्वा प्र दे २ वि छे छे छे ९ । ३ । फ इष्टराशिः । ≡ इ प्रकृतस्य दे २ वि सा--प ९ प्रकृतधनमानीयते-

देयस्य रूपद्वयस्य अर्धच्छेदेनैकेन फलभूतेष्टराशेर्लोकस्यार्धच्छेदान् भक्त्वा तेन लब्धेनेच्छाराशिभूतप्रकृतधनार्धच्छेदे विरलनराशौ भक्ते सति सा — प छे छे छे ९ । ९ ३ यल्लब्धं लोकार्धच्छेदभक्तं किंचिन्न्यूनसंख्यातपल्यप्रमितं प ॰— छे छे छे ९ ३ एतावतां लोकानामभ्यासे कृते यो लब्धराशिः सो- ऽसंख्यातलोकमात्रो भवति- ≡ ३ । अस्य च लोकच्छेदभक्तन्यूनप्रमाण प ३ छे छे छे ९ ३ मात्रलोकानामन्योन्याभ्यासेन समुत्पन्नासंख्यात- लोकं स्तोकत्वात् संदृष्ट्या नवांकं कृत्वा न्यूनराशिमात्रद्विकैर्जनितत्वात् वारं कुर्यात् । सोयमसंख्यातलोको बादरतेजस्कायिकराशिर्भवति ≡ ३ । अस्य च भागहारः अप्रतिष्ठितप्रत्येकादिजीवराशीनां सर्वभागहारेभ्योऽसंख्यातलोकगुणितः तत्तन्न्यूनराशीनामावश्य- ९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संख्येयगुणहीनक्रमेण सद्भावात् । तत एव प्रागुक्तत्रैराशिकक्रमेणागता अप्रतिष्ठितादिराशयोऽसंख्यातलोकमात्रा अपि उत्तरोत्तरे असंख्यातलोकगुणितक्रमा भवंति । अत्रासंख्यातलोकस्यावल्यसंख्येभागस्य च संदृष्टिभूतो नवांको भाज्यारश्चबहुत्वं ज्ञात्वा विवेचनीयः ॥ २१५ ॥

इत्याचार्यश्रीनेमिचंद्रविरचितायां गोम्मटसारापरनामपंचसंग्रहवृत्तौ जीवतत्त्वप्रदीपिकाख्यायां जीवकांडे विंशतिप्ररूपणासु कायप्ररूपणानामाष्टमोऽधिकारः ॥ ८ ॥

मं० प्र०—देयराश्यर्धच्छेदैः १ फल ६५ = भूतेष्टराश्यर्धच्छेदान् १६ भक्त्वा तल्लब्धेन १६ साध्यभूत १८ = प्रकृतराशेर्विरलनराशिं ६४ भक्त्वा तल्लब्धमितेष्ट ६५ = राश्यन्योन्यगुणकारे उत्पन्नः १८ = प्रकृतराशिर्भवति एवमर्थसंदृष्ट्या एतावद्रूपमात्रद्विकान्योन्यगुणने प्र

दे २
वि छे छे छे९
a

यद्ययं राशिरुत्पद्यते फ तदा एतावद्रूपमात्रद्विकान्योन्यगुणने को राशिरुत्पद्यते इ त्रैराशिकं कृत्वा दिण्णच्छेदेण इत्यादि करणसूत्रो-
इ ≡
दे २
वि. स. प १
९

क्तविधानेन लब्धः लोकार्धच्छेदविभक्तकिंचिदूनसंख्यातपल्यस्य प ๑ -। यावंति रूपाणि तावतो वारान् लोकानां परस्परगुणकारे सति उत्पन्नः असंख्या-
छे छे छे ९
a

तलोकमात्रः बादरतेजस्कायिकजीवराशिर्भवति ≡ a लोकच्छेदभक्तमूलप्रमाणं विरलयित्वा तद्रूपमात्रान् वारान् लोके अन्योन्यसंगुणिते यः असंख्यातलो-
९

क उत्पन्नः तत्प्रमाणो भागहार इति ज्ञातव्यं । स च सर्वभागहारेभ्योऽधिकः । एवमप्रतिष्ठितप्रत्येकादिराशीनामर्धच्छेदान् ऊनप्रमाणानि च ज्ञात्वा उक्तत्रैराशिकविधानेन असंख्यातलोकमात्रा अपि उत्तरोत्तरमसंख्यातलोकगुणिताः तत्तद्राशयस्तत्तद्भागहाराश्च असंख्यातलोकमात्रा अपि उत्तरोत्तरमसंख्यातलोकगुणहीना आनेतव्याः । अत्रासंख्यातलोकस्य आवल्यसंख्यातभागस्यापि संदृष्टिर्नवांकः तथापि तयोर्भाज्यराश्यर:बहुत्वे वक्ष्य विवेचनीयः ॥ २१५ ॥

इतिश्रीमदभयचंद्रसूरिसिद्धांतचक्रवर्तिकृतौ गोम्मटसारपंचसंग्रहवृत्तौ कायमार्गणाप्ररूपणानामाष्टमोऽधिकारः ॥८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स. चं.—देय राशिके अर्धच्छेदका प्रमाण करि जे फलराशिके अर्धच्छेद प्रमाण राशिविषैं विरलन राशि रूप कहे तिनिका भाग दीएं जो प्रमाण आवै तीहि करि इच्छाराशिरूप प्रकृतराशिविषैं जो विरलन राशिका प्रमाण कह्या ताकौं भाग दीएं जो प्रमाण आवै तितना जायगा फल राशिरूप जो इष्ट राशि ताकौं माडि परस्पर गुणैं जो प्रमाण आवैं तितनां लब्धराशिरूप प्रकृतिधनका प्रमाण हो है सो इहां देय राशि दोय ताका अर्धच्छेद एक तीहिंका जे फलराशि पणट्ठीके अर्धच्छेद प्रमाण राशिविषै विरलन राशिरूप कहे सोलह तिनिकौं भाग दीए सोलह ही पाए इनिका साध्यभूत राशिका इच्छाराशिविषैं कह्या जो विरलन राशि चौंसठि ताकौं भाग दीए च्यारि पाए सो च्यारि जायगा फलराशिरूप पणट्ठी माडि ६५५३६। ६५५३६। ६५५३६। ६५५३६। परस्पर गुणैं लब्धराशि एकट्ठी प्रमाण हो है ऐसैं ही यथार्थ कथन जानना। जो पूर्वै गणित कथनविषैं लोकके अर्धच्छेदनिका जेता परिमाण कह्या है तितने दूवे मांडि परस्पर गुणैं लोक होइ तौ इहां अग्निकायिक राशिके अर्धच्छेद प्रमाण दूवे मांडि परस्पर गुणे कितने लोक होंहि? ऐसैं त्रैराशिककरि इहां प्रमाण राशिविषैं देय राशि दोय, विरलन राशि लोकका अर्धच्छेदराशि, अर फलराशि लोक अर इच्छाराशि विषै देय राशि दोय, विरलन राशि अग्निकायिक राशिके अर्धच्छेद प्रमाण जानना। तहां लब्धराशि ल्यावनेकौं देय राशि दोय ताका अर्धच्छेद एक ताका भाग फलराशि जो लोक ताका अर्धच्छेदरूप प्रमाण राशिविषैं विरलन राशि है ताकौं भाग दीएं लोकका अर्धच्छेद मात्र पाए। इनका साध्यभूत अग्निकायिक राशिका अर्धच्छेदरूप जो इच्छाराशि ताविषै विरलनराशि अग्निकायिक राशिके अर्धच्छेद तिनिकौं भाग दीएं जो प्रमाण आया सो किछू घाटि संख्यात पल्यकौं लोकका अर्धच्छेदराशिका भाग दीएं जो प्रमाण होइ तितना यहु प्रमाण आया सो इतने लोक मांडि परस्पर गुणैं जो असंख्यात लोकमात्र परिमाण भया सोई लब्धिराशिरूप वादर अग्निकायिक राशिका प्रमाण इहां जानना। इहां किंचिदून संख्यात पल्य प्रमाण लोकनिकौं परस्पर गुणैं जो महत असंख्यात लोक मात्र परिमाण आया सो तौ भाज्य राशि जानना। अर लोकका अर्धच्छेद प्रमाण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोकनिकौं परस्पर गुणें जो छोटा असंख्यात लोकमात्र परिमाण आया सो भागहार जानना। भागहारका भाग भाज्यकौं दीएं जो प्रमाण होइ तितना बादर अग्निकायिक जीवनिका प्रमाण जानना। बहुरि इहां अग्निकायिक राशिविषैं जो भागहार कह्या सो अगले अप्रतिष्ठित प्रत्येक आदि राशिनिविषैं जो भागहारका प्रमाण पूर्वोक्त प्रकार कीएं आवै तिनि सबनितैं असंख्यात लोक गुणा जानना। जातै सागरमैंस्यौं जो जो राशि घटाया सो सो क्रमतैं आवलीका असंख्यातवां भाग गुणा घाटि है तातै प्रमाण राशि फलराशि पूर्वोक्तवत् स्थापि अर इच्छाराशिविषैं बिरलन राशि अपने अपने अर्धच्छेद प्रमाण स्थापि पूर्वोक्त प्रकार त्रैराशिककरि अप्रतिष्ठित प्रत्येक आदि राशि भी सामान्यपनैं असंख्यात लोकमात्र हैं तथापि उत्तर उत्तर राशि असंख्यात लोक गुणा जानना। भागहार जहां घटता होइ तहां राशि बंधता होइ सो इहां भागहार असंख्यात लोक गुणा घटता क्रमतैं भया तातैं राशि असंख्यात लोक गुणा भया इहां असंख्यात लोक वा आवलीका असंख्यातवां भागकी संदृष्टि स्थापि अर्थ संदृष्टिका स्थापन है। सो आगै संदृष्टि अधिकारविषै लिखैंगे ॥ २१५ ॥

इति आचार्य श्रीनेमिचंद्रविरचितगोम्मटसारद्वितीयनाम पंचसंग्रह ग्रंथकी जीवतत्त्वप्रदीपिका नाम संस्कृतटीका अनुसारि सम्यग्ज्ञान चंद्रिका नामा इस भाषा टीकाविषैं जीवकांडविषैं प्ररूपित जे वीस प्ररूपणा तिनिविषैं कायप्ररूपणा नामा आठवां अधिकार संपूर्ण भया ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0. In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ योगमार्गणाप्ररूणाधिकार ॥ ९ ॥

जी० प्र०— कल्याणैः पंचभिर्भातं नवकेवललब्धिभिः ।
शतेंद्रपूज्यपादाब्जं पुष्पदंतं नमाम्यहं ॥ ९ ॥

अथ शास्त्रकारो योगमार्गणां प्रक्रममाणस्तदादौ योगस्य साधारणलक्षणमाह—

म० प्र०— श्रीपुष्पदंततीर्थेशं कुंदपुष्पाभदंतकं ।
वंदेहं पुष्पदंतौघप्रभाभ्यार्चिवपुःप्रभं ॥ ९ ॥

अथ शास्त्रकारो योगमार्गणां प्रक्रममाणस्तावद्योगस्य सामान्यलक्षणमाह—

स० चं०— कुंदकुसुमसम दंतजुत पुष्पदंत जिनराय ।
वंदौ ज्योति अनंतमय पुष्पदंतवतकाय ॥ ९ ॥

आगैं शास्त्रकर्ता योगमार्गणाका निरूपण करैं हैं तहां प्रथम ही योगका सामान्य लक्षण कहे हैं—

पुग्गलविवाइदेहोदयेण मणवयणकायजुत्तस्स ।
जीवस्स जा हु सत्ती कम्मागमकारणं जोगो ॥ २१६ ॥

पुद्गलविपाकिदेहोदयेन मनोवचनकाययुक्तस्य ।
जीवस्य या हि शक्तिः कर्मागमकारणं योगः ॥ २१६ ॥

जी० प्र०—पुद्गलविपाकिनः अंगोपांगनामकर्मणः, देहस्य च शरीरनामकर्मणः, उदयेन मनोवचनकायपर्याप्तिपरिणतस्य कायवाग्मनोवर्गणावलंबिनः संसारिजीवस्य लोकमात्रप्रदेशगता कर्मादानकारणं या शक्तिः सा भावयोगः । तद्विशिष्टात्मप्रदेशेषु यः किंचिच्चलनरूपपरिस्पंदः स द्रव्ययोगः । कर्मेतिलक्षणेन कर्मनोकर्मवर्गणारूपपुद्गलस्कंधस्य ज्ञानावरणादिकर्मौदारिकादिनोकर्मभावेन परिणमनहेतुर्यत्सामर्थ्यं आत्मप्रदेशपरिस्पंदश्च योग इत्युच्यते । अंगोपांगशरीरनामकर्मोदयेन मनोवर्गणायातपुद्गलस्कंधानां आहारवर्गणायातनोकर्मपुद्गलस्कंधानां च संबंधेन जीवप्रदेशानामग्निसंयोगेन लोहस्य दहनशक्तिवत् कर्मनोकर्मादानशक्तिः सामर्थ्यमुत्पद्यते इति भावार्थः ॥२१६॥ अथ योगविशेषमाह—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

म.प्र. संसारिणो जीवस्य कर्मागमकारणं कर्मेत्युपलक्षणात् कर्मनोकर्मवर्गणारूपपुद्गलस्कंधस्य ज्ञानावरणादिकर्मभावेन औदारिकशरीरादिनोकर्मभावेन च परिणमनहेतुर्या शक्तिः--सामर्थ्यं तद्विशिष्टात्मप्रदेशपरिस्पंदश्च स योग इत्युच्यते। किंविशिष्टस्य जीवस्य ? मनोवचनकाययुक्तस्य मनोभाषाशरीरपर्याप्तिपरिणतस्य मनोवाक्कायवर्गणासहितस्य च। केन हेतुना ? पुद्गलविपाकिदेहोदयेन हेतुना, पुद्गलविपाकिनः यथसंभवमंगोपांगनामकर्मणः, देहस्य--औदारिकादिशरीरनामकर्मणश्च, उदयेन--फलदानपरिणत्या, अंगोपांगशरीरनामकर्मोदयागतपुद्गलस्कंधकर्मनोकर्मतापरिणमनहेतुः शरीरभाषामनःपर्याप्तिपरिणतस्य कायवाग्मनोवर्गणावलंबिनः संसारिजीवस्य लोकमात्रप्रदेशगता या शक्तिः स भावयोगः। तद्विशिष्टात्मप्रदेशानां यः परिस्पदः किंचिच्चलनरूपः स द्रव्ययोग इति तात्पर्यार्थः॥२१६॥

अथ योगविशषलक्षणमाह---

सं० च०---संसारी जीवकैं कर्म जो ज्ञानावरणादिक कर्म अर उपलक्षणतैं औदारिकादिक नोकर्म तिनिका आगम कहिए कर्म नोकर्म वर्गणारूप पुद्गलस्कंधनिका कर्म नोकर्मरूप परिणमना ताकौं कारणभूत जो शक्ति बहुरि उस शक्तिका धारी जो आत्मा ताके प्रदेशनिका चंचलरूप होना सो योग कहिए है। कैसा है जीव ? पुद्गलबिपाकी जो यथासंभव अंगोपांग नाम प्रकृति वा देह जो शरीर नाम प्रकृति ताका उदय जो फल देना रूप परिणमना ताकरि मन वा भाषा वा शरीररूप जे पर्याप्ति तिनिकौं धरै है। मनोवर्गणा भाषावर्गणा कायवर्गणाका अवलंबनकरि संयुक्त है। इहां अंगोपांग वा शरीर नामा नामकर्मके उदयतैं शरीर भाषा मनःपर्याप्तिरूप परिणम्या काय भाषा मन वर्गणाका अवलंबनयुक्त आत्मा ताकौं लोकमात्र सर्व प्रदेशनिविषैं प्राप्त जो पुद्गलस्कंधनिकौं कर्म नोकर्मरूप परिणमावनेकौ कारणभूत शक्ति समर्थता सो भाव योग है। बहुरि उस शक्तिका धारी आत्माके प्रदेशनिविषै किछू चलनरूप सकंप होना सो द्रव्य योग है। इहां यहु अर्थ जानना जैसैं अग्निके संयोगकरि लोहके जलावनेकी शक्ति हो है तैसै अंगोपांग शरीर नामा नामकर्मके उदयकरि मन वर्गणा वा भाषा वर्गणाका आए पुद्गल स्कंध अर आहार वर्गणाका आए नोकर्म पुद्गलस्कंध तिनिका संबंधकरि जीवके प्रदेशनिके कर्म नोकर्म ग्रहणकी शक्ति समर्थता हो है॥ २१६॥ आगैं योगनिका विशेष लक्षण कहै हैं--

मणवयणाण पउत्ती सच्चासच्चुभयअणुभयत्थेसु।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तण्णामं होदि तदा तेहिं दु जोगा हु तज्जोगा ॥२१७॥

मनोवचनयोः प्रवृत्तयः सत्यासत्योभयानुभयार्थेषु ।
तन्नाम भवति तदा तैस्तु योगाद्धि तद्योगाः ॥ २१७ ॥

जी० प्र०—सत्यासत्योभयानुभयार्थेषु याः प्रवृत्तयः मनोवचनयोः तदा ज्ञानवाक्प्रयोगजनने जीवप्रयत्नरूपप्रवृत्तीनां सत्यादि तन्नाम भवति सत्यमन इत्यादि । तु–पुनः तैः सत्याद्यर्थैः सद्योगात्–संबंधात्, खलु–स्फुटं, ताः मनोवचनप्रवृत्तयः, तद्योगाः–सत्यादिविशेषणविशिष्टाः, चत्वारो मनोयोगाश्चत्वारो वाग्योगाश्च भवंति । सम्यग्ज्ञानविषयोर्थः सत्यं यथा जलज्ञानविषयो जलं स्नानपानाद्यर्थक्रियासद्भावात् । मिथ्याज्ञानविषयोर्थः असत्यः यथा जलज्ञानविषयो मरीचिकाचके जलं स्नानपानाद्यर्थक्रियाविरहात् । सत्यासत्यज्ञानविषयोर्थः उभयः सत्यासत्यस्वार्थः यथा जलज्ञानविषयः कमंडलुनि घटः । अत्र जलधारणार्थक्रियायाः सद्भावात् सत्यतायाः घटाकारविकलत्वादसत्यतायाश्च प्रतीतेः । अयं गौणार्थः अग्निर्माणवक इत्यादिवत् । अनुभयज्ञानविषयोर्थः अनुभयः सत्यासत्यार्थद्वयेनावक्तव्यः यथा किंचित्प्रतिभासते । सामान्येन प्रतिभासमानोऽर्थः स्वार्थक्रियाकारिविशेषनिर्णयाभावात् सत्य इति वक्तुं न शक्यते । सामान्यप्रतिभासात् असत्य इत्यपि वक्तुं न शक्यते इति जात्यंतरं अनुभयार्थः स्फुटं चतुर्थो भवति । एवं घटे घटविकल्पः सत्यः, घटे पटविकल्पोऽसत्यः, कुंडिकायां जलधारणे घटविकल्पः उभयः, आमंत्रणादिषु अहो देवदत्त इति विकल्पः अनुभयः । कालेनैव गृहीता सा कन्या किं मृत्युना अथवा धर्मणा इत्यनुभयः ॥ २१७ ॥ सत्यार्थविषयो मनोयोग इत्यादिविशेषलक्षणं गाथाचतुष्टयेन कथयति—

मं० प्र०—सत्यासत्योभयानुभयार्थेषु मनोवचनयोः याः प्रवृत्तयः तत्तज्ज्ञानवाक्प्रयोगजनने आत्मनः प्रयत्नास्तासां प्रवृत्तीनां तन्नाम भवति तु–पुनः, तैर्योगात्–सत्याद्यर्थैः संबंधात्, खलु–स्फुटं, ताः मनोवचनप्रवृत्तयः, तद्योगाः–सत्यादिविशेषणविशिष्टाश्चत्वारो मनोयोगाश्चत्वारो वाग्योगाश्च भवंति । सम्यग्ज्ञानविषयोर्थः सत्यः, यथा जलज्ञानविषयो जलं स्नानपानाद्यर्थक्रियासद्भावात् । मिथ्याज्ञानविषयोऽर्थः असत्यः यथा जलज्ञानविषयो मरीचिकाचके जलं स्नानपानाद्यर्थक्रियाविरहात् । सत्यासत्यज्ञानविषयोर्थः उभयः सत्यासत्यरूपः यथा घटज्ञानविषयः कमंडलुनि घटः अत्र जलधारणार्थक्रियासद्भावात् सत्यता, घटाकारविकलत्वात् असत्यता च प्रतीयते इति अयमेव गौणार्थः । अग्निर्माणवक इत्यादिरूपः अनुभयज्ञानविषयोर्थः अनुभयः सत्यासत्यत्वाभ्यामवक्तव्यः यथा किंचित्प्रतिभासत इति सामान्येन प्रतिभासमानोऽर्थः स्वार्थक्रियाकारिविशेषनिर्णयाभावात् सत्य इति वक्तुं न शक्यते सामान्यप्रतिभासादसत्य इति वक्तुं न शक्यते इति जात्यंतरमनुभयार्थो नाम चतुर्थो भेद इति ॥ २१७ ॥ सत्यार्थविषयो मनोयोगः सत्यमनोयोग इत्यादिविशेषलक्षणं प्ररूपयितुं गाथाचतुष्टयमाह—

सं० च०—सत्य असत्य उभय अनुभय रूप जे पदार्थ तिनिंविषैं जो मन वचनकी प्रवृत्ति होइ उनके जा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ननेकौं वा कहनेकौं जीवका प्रयत्नरूप प्रवृत्ति होइ सो सत्यादिक पदार्थका संबंधतैं सो सत्य असत्य उभय अनुभय है विशेषण जिनिका ऐसे च्यारि प्रकार मनोयोग अर च्यारिप्रकार वचनयोग जानने । तहां यथार्थ जैसाका तैसा सांचा ज्ञानगोचर जो पदार्थ होइ ताकौं सत्य कहिए जैसैं जलका जाननाके गोचर जल होइ जातैं स्नान पानादिक जल संबंधी क्रिया उसतैं सिद्ध हो है तातैं सत्य कहिए । बहुरि अयथार्थ अन्यथारूप पदार्थ जो मिथ्याज्ञानके गोचर होइ ताकौं असत्य कहिए जैसैं जलका जाननाके गोचर भाडली होइ जातैं स्नान पानादिक जल संबंधी क्रिया भाडलीस्यों सिद्ध न हो हैं तातैं असत्य कहिए । बहुरि यथार्थ वा अयथार्थ रूप पदार्थ जो उभय ज्ञान गोचर होइ ताकौं उभय कहिए जैसैं कमंडलु विषैं घटका ज्ञान होइ जातैं घटकी ज्यों जलधारणादि क्रिया कमंडलुस्यों सिद्ध हो है तातैं सत्य है । बहुरि घटकासा आकार नाहीं है तातैं असत्य है ऐसैं यहु उभय जानना । बहुरि जो यथार्थ अयथार्थका निर्णय करि रहित पदार्थ सो अनुभय गोचर होइ ताकौं अनुभय कहिए । सत्य असत्यरूप कहने योग्य नांहीं जैसैं यह किछू प्रतिभासै है ऐसैं सामान्यरूप पदार्थ प्रतिभास्या तहां उस पदार्थकरि कौन क्रिया सिद्ध हो है ऐसा विशेष निर्णय न भया तातैं सत्य भी न कह्या जाय बहुरि सामान्यपनें प्रतिभास्या तातैं असत्य भी न कह्या जाय तातैं याकौं अनुभय कहिए । ऐसैं च्यारि प्रकार पदार्थनिविषैं मनकी वा वचनकी प्रवृत्ति होइ सो च्यारि प्रकार मनोयोग वा च्यारि प्रकार वचनयोग जानने । इहां घटविषैं घटकौ विकल्प सो सत्य अर घटविषैं पटका विकल्प सो असत्य, अर कुंडीविषैं जलधारन करि घटका विकल्प सो उभय अर संबोधन आदिविषैं हे देवदत्त इत्यादि विकल्प सो अनुभय जानना ॥ २१७ ॥

आगैं सत्य पदार्थ हैं गोचर जाकैं ऐसा मनोयोग सो सत्य मनोयोग इत्यादिक विशेष लक्षण च्यारि गाथानि करि कहैं हैं—

सब्भावमणो सच्चो जो जोगो तेण सच्चमणजोगो ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi.

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तव्विवरीओ मोसो जाणुभयं सच्चमोसोत्ति ॥ २१८ ॥

सद्भावमनः सत्यं यो योगः स तु सत्यमनोयोगः ।
तद्विपरीतो मृषा जानीहि उभयं सत्यमृषेति ॥ २१८ ॥

जी० प्र०—सद्भावः सत्यार्थः, तद्विषयं मनः सत्यमनः, सत्यार्थज्ञानजननशक्तिरूपं भावमन इत्यर्थः । तेन सत्यमनसा जनितो योगः–प्रयत्नविशेषः स सत्यमनोयोगः । तद्विपरीतः असत्यार्थविषयज्ञानजनितशक्तिरूपभावमनसा जनितप्रयत्नविशेषः मृषा–असत्यमनोयोगः । उभयः–सत्यमृषार्थज्ञानजननशक्तिरूपभावमनोजनितप्रयत्नविशेषः उभयमनोयोगः इति हे भव्य! त्वं जानीहि ॥ २१८ ॥

मं० प्र०––सद्भावः–सत्यार्थः तद्विषयं मनः–सत्यमनः सत्यार्थज्ञानजननशक्तिरूपं भावमन इत्यर्थः तेन जनितो यो योगः–प्रयत्नविशेषः स सत्यमनोयोगः । तद्विपरीतः असत्यार्थविषयज्ञानजननशक्तिरूपभावमनसा जनितः प्रयत्नविशेषः मृषा–असत्यमनोयोगः । उभयः सत्यमृषार्थज्ञानजननशक्तिरूपभावमनोजनितप्रयत्नविशेषः उभयमनोयोग इति हे भव्य! जनीहि ॥ २१८ ॥

सं० च०—'सद्भावः' कहिए सत्पदार्थ सो है गोचर जाका ऐसा जो मन सत्य पदार्थके ज्ञान उपजावनेकी शक्ति लीएं भाव मन होइ तींहि सत्यमनकरि निपज्या जो चेष्टा प्रवर्त्तन रूप योग सो सत्यमनोयोग कहिये। बहुरि ऐसैं ही विपरीत असत्य पदार्थरूप विषयके ज्ञान उपजावनेकी शक्ति रूप जो भावमन ताकरि जो चेष्टा प्रवर्तन रूप योग होइ सो असत्य मनोयोग कहिए बहुरि युगपत् सत्य असत्य रूप पदार्थके ज्ञान उपजावनेकी शक्तिरूप जो भावमन ताकरि जो प्रवर्तन रूप योग होइ सो उभय मनोयोग कहिये ऐसैं हे भव्य! तू जानि।

ण य सच्चमोसजुत्तो जो दु मणो सो असच्चमोसमणो ।
जो जोगो तेण हवे असच्चमोसो दु मणजोगो ॥ २१९ ॥

न च सत्यमृषायुक्तं यत्तु मनस्तदसत्यमृषामनः ।
यो योगस्तेन भवेत् असत्यमृषा तु मनोयोगः ॥ २१९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी० प्र०—यन्मनः सत्यमृषायुक्तं न च भवति तु-पुनः, तदसत्यमृषामनः, अनुभयार्थज्ञानजननशक्तिरूपं भावमन इत्यर्थः। तेन भावमनसा जनितो यो योगः--प्रयत्नविशेषः स तु पुनः असत्यमृषामनोयोगो भवेत् अनुभयमनोयोग इत्यर्थः। इति चत्वारो मनोयोगाः कथिताः ॥ २१९ ॥

म० प्र०---यन्मनः सत्यमृषायुक्तं न च नैव भवति तु--पुनः असत्यमृषामनः अनुभयार्थज्ञानजननशक्तिरूपभावमनः इत्यर्थः। तेन जनितो यो योगः प्रयत्नविशेषः स तु पुनः असत्यमृषामनोयोगो भवेत् अनुभयमनोयोग इत्यर्थः एवं चत्वारो मनोयोगाः कथिताः ॥ २१९ ॥

सं० च०—जो मन सत्य अर मृषा कहिए असत्य तींहिकरि युक्त न होइ बहुरि सत्य असत्य निर्णयकरि रहित जो अनुभय पदार्थ ताके ज्ञान उपजावनेकी शक्तिरूप जो भाव मन तींहिकरि निपज्या जो प्रवर्तनरूप योग सो सत्य असत्यरहित अनुभय मनोयोग कहिए ऐसै च्यारि प्रकार मनोयोग कह्या ॥ २१९ ॥

दसविहसच्चे वयणे जो जोगो सोदु सच्चवचिजोगो।
तव्विवरीओ मोसो जाणुभयं सच्चमोसोत्ति ॥२२०॥

दशविधसत्ये वचने यो योगः स तु सत्यवचोयोगः।
तद्विपरीतो मृषा जानीहि उभयं सत्यमृषेति ॥ २२० ॥

जी० प्र०--सत्यार्थवाचकं वचनं सत्यवचनं जनपदादिदशविधसत्यार्थविषयवाग्व्यापारजननसमर्थः, स्वरनामकर्मोदयापादितभाषापर्याप्तिजनितभाषावर्गणालंबनात्मप्रदेशशक्तिरूपो यो भाववचनजनितो योगः प्रयत्नविशेषः स सत्यवचोयोगो भवति। तद्विपरीतो मृषा असत्यार्थविषयवाग्व्यापारप्रयत्नः असत्यवचोयोगः असत्यवाग्योगो भवति। कमंडलुनि घट इत्यादिसत्यमृषार्थवाग्व्यापारप्रयत्नतः स उभयवाग्योग इति भव्य! त्वं जानीहि ॥ २२० ॥

मं० प्र०--जनपदादिदशविधसत्यार्थविषयवाग्व्यापारजननसमर्थं स्वरनामकर्मोदयापादितभाषापर्याप्तिजनितभाषावर्गणालंबनात्मप्रदेशशक्तिरूपं यद्भाववचः तेन जनितो यो योगः-प्रयत्नविशेषः स सत्यवचोयोगः। तद्विपरीतो मृषा असत्यार्थविषयो वाग्व्यापारप्रयत्नः असत्यवचोयोगः। कमंडलुनि घटोयमित्यादिसत्यमृषार्थवाग्व्यापारप्रयत्न उभयवचोयोग इति जानीहि ॥ २२० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० च०—सत्य अर्थका कहनहारा सो सत्य वचन है। जनपदनै आदि देकरि दसप्रकार सत्यरूप जो पदार्थ तींहिविषैं वचन प्रवृत्ति करनेकौं समर्थ स्वरनामा नामकर्मके उदयतैं भया भाषा पर्याप्तिकरि निपज्या जो भाषा वर्गणा आलंबन लीएं आत्माके प्रदेशनिविषैं शक्तिरूप भाव वचनकरि उत्पन्न भया जो प्रवृत्तिरूप विशेष सो सत्यवचन योग कहिए। बहुरि तींहिस्यों विपरीत असत्य पदार्थविषैं वचन प्रवृत्तिकौं कारण जो भाव वचन तींहिकरि जो प्रवर्तनरूप योग होइ सो असत्य वचन कहिए। बहुरि कमंडलुविषैं यहु घट है इत्यादिक सत्य असत्य पदार्थविषैं वचन प्रवृत्तिकौं कारण जो भाव वचन तींहिकरि जो प्रवर्तनरूप योग होइ सो उभय वचन योग कहिए ऐसा हे भव्य! तू जानि॥ २२०॥

जो णेव सच्चमोसो सो जाण असच्चमोसवचिजोगो।
अमणाणं जा भासा सण्णीणामंतणी आदी॥ २२१॥

यो नैव सत्यमृषा स जानीहि असत्यमृषावचोयोगः।
अमनसां या भाषा संज्ञिनामामंत्रण्यादिः॥ २२१॥

जी० प्र०----यः सत्यमृषार्थविषयो नैव भवति स असत्यमृषार्थविषयवाग्व्यापारप्रयत्नविशेषः अनुभयवचोयोग इति हे भव्य! त्वं जानीहि। स कः? उत्तरार्धेन तमेवोदाहरति—अमनसां द्वींद्रियाद्यसंज्ञिपंचेंद्रियपर्यंतजीवानां या अनक्षरात्मिका भाषाः संज्ञिनां च आमंत्रण्याद्यक्षरा- त्मिकाभाषास्ताः सर्वाः अनुभयवचोयोग इत्युच्यते॥ २२१॥ अथ जनपदादिदशविधसत्यमुदाहरणपूर्वकं गाथात्रयेणाह—

म० प्र०---यः सत्यमृषार्थविषयो नैव भवति सः असत्यमृषार्थविषयवाग्व्यापारप्रयत्नविशेषः अनुभयवचोयोग इति जानीहि। उत्तरार्धेन तमेवोदाहरति अमनसां--द्वींद्रियादीनामसंज्ञिपंचेंद्रियपर्यंतानां या अनक्षरात्मिका भाषा या च संज्ञिनामामंत्रण्यादिभाषा अक्षरात्मिका स सर्वोऽपि अनुभयवचोयोग इत्युच्यते॥ २२१॥ अथ जनपदादिदशविधसत्यमुदाहरणपूर्वकं गाथात्रयेणाह---

सं० च०—जो सत्य असत्यरूप न होइ ऐसा पदार्थविषैं वचन प्रवृत्तिकौं कारण जो भाव वचन तींहिकरि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जो प्रवर्तनरूप योग होइ सो सत्य असत्य निर्णयरहित अनुभय वचन योग जानना। ताका उदाहरण उत्तर आधा सूत्रकरि कहै हैं—जो बेइंद्रियादिक असैनी पंचेंद्रिय पर्यंत जीवनिकैं केवल अनक्षररूप भाषा है सो अनुभय वचन योग जानना। वा सैनी पंचेंद्रिय जीवनिके आगे कहिए है जो आमंत्रणी आदि अक्षररूप भाषा सो सर्व अनुभय वचन योग जानना ॥ २२१ ॥ आगैं जनपद आदि दशप्रकार सत्यकौं उदाहरण पूर्वक तीनि गाथानि-करि कहै हैं—

जणवदसम्मदिठवणाणामे रूवे पडुच्चववहारे।
संभावणे य भावे उवमाए दसविहं सच्चं ॥ २२२ ॥

जनपदसम्मतिस्थापनानाम्नि रूपे प्रतीत्यव्यवहारयोः।
संभावनायां च भावे उपमायां दशविधं सत्यं ॥ २२२ ॥

जी० प्र०—जनपदे संवृतौ सम्मतौ वा स्थापनायां नाम्नि रूपे प्रतीत्ये व्यवहारे संभावनायां भावे उपमायां चेति दशस्थानेषु सत्यं दशविधं भवति ॥ २२२ ॥

मं० प्र०—जनपदे संवृतौ सम्मतौ वा स्थापनायां नाम्नि रूपे प्रतीत्ये व्यवहारे संभावनायां भावे उपमायां च एषु दशसु विषयेषु रूढं यद् वचः तद्दशविधं सत्यं ॥ २२२ ॥

सं० च०—जनपदविषैं संवृति वा सम्मितिविषैं स्थापनाविषैं नामविषै रूपविषैं प्रतीत्य विषै व्यवहार विषै संभावनाविषै भावविषै उपमाविषै ऐसैं दश स्थाननिविषै दश प्रकार सत्य जानना ॥ २२२ ॥

भत्तं देवी चंदप्पहपडिमा तह य होदि जिणदत्तो।
सेदो दिग्घो रज्झदि कूरोत्ति य जं हवे वयणं ॥ २२३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भक्तं देवी चंद्रप्रभप्रतिमा तथा च भवति जिनदत्तः।
श्वेतो दीर्घो रध्यते कूरमिति च यद्वचनं ॥ २२३ ॥

जी०प्र०–जनपदेषु तत्रतनतत्रतनव्यवहर्तृजनानां रूढं यद्वचनं तज्जनपदसत्यं यथा महाराष्ट्रदेशे भातु भेटु, अंध्रदेशे वंटक मूकुडु, कर्णाटदेशे कूलु, द्रविडदेशे चोरु। तथा संवृत्त्या कल्पनया सम्मत्या वा बहुजनाभ्युपगमेन सर्वदेशसाधारणं यन्नाम रूढं तत् संवृतिसत्यं सम्मतिसत्यं वा, यथा अग्रमहिषीत्वाभावेऽपि कस्याश्चिद्देवीति नाम। अन्यत्रान्यवस्तुनः समारोपः स्थापना तदाश्रितं मुख्यवस्तुनो नाम स्थापनासत्यं यथा चंद्रप्रभप्रतिमा चंद्रप्रभ इति। तथा च यथा भातु इत्यादि नाम देशाद्यपेक्षया सत्यं तथा अन्यनिरपेक्षतयैव संव्यवहारार्थं कस्यचित्प्रयुक्तं संज्ञाकर्म नामसत्यं यथा कश्चित् पुरुषो जिनदत्त इति। अत्र जिनैर्दत्त इति दानक्रियानिरपेक्षमेव प्रयुक्तमिदं। चक्षुर्व्यवहारप्रचुरत्वेन रूपादिपुद्गलगुणेषु रूपप्राधान्येन तदाश्रितं वचनं रूपसत्यं यथा कश्चित् पुरुषः श्वेत इति। अत्र केशादीनां नीलादिवर्णांतररसादिगुणांतरसद्भावेप्यविवक्षितत्वात्। प्रतीत्य विवक्षितादितरदुद्दिश्य विवक्षितस्यैव स्वरूपकथनं प्रतीत्यसत्यं आपेक्षिकसत्यमित्यर्थः। यथा कश्चिद्दीर्घ इति अन्यस्य ह्रस्वत्वमपेक्ष्य प्रकृतस्य दीर्घत्वकथनात्। एवं स्थूलसूक्ष्मादिवचनान्यपि प्रतीत्यसत्यानि ज्ञातव्यानि। नैगमादिनयप्राधान्यमाश्रित्य प्रवृत्तं वचनं व्यवहारसत्यं। अत्र नैगमनयप्राधान्येन यथा रध्यते कूरः पच्यते ओदनः इति। इतिशब्दः संग्रहनयादिव्यवहारप्रकारदर्शनार्थः। नयव्यवहाराश्रितं यद्वचनं-स्यात्सर्वं सत् स्यात् सर्वमसत् इत्यादिवाक्यं व्यवहारसत्यं भवति। चशब्दः सर्वनयसमुच्चयार्थः। पच्यते ओदन इत्यत्र पाकसमाप्त्यनंतरकालभावी ओदनपर्यायः पाककाले यद्यपि नास्ति तथापि तंडुलानामोदनपर्यायप्रत्यासत्तिप्ररूपकनैगमनयविवक्षया ओदनपर्यायपरिणामिद्रव्यापेक्षया तद्वाक्यस्य सत्यत्वसिद्धिः ॥ २२३ ॥

मं० प्र०---अनंतरगाथोक्तदशविधसत्यानां यथासंख्यमुदाहरणानि दश वक्ष्यमाणानि ज्ञातव्यानि तद्यथा--जनपदे-तत्र तत्र देशे व्यवहर्तृजनानां रूढं यद्वचः तज्जनपदसत्यं यथा महाराष्ट्रदेशे भातु, भेटु। अंध्रदेशे वंटक मुकूडु। कर्णाटदेशे कूलु। द्रविडदेशे चोरु इत्यादि। संवृत्या कल्पनया संमत्या वा बहुजनाभ्युपगमेन सर्वदेशसाधारणं यन्नाम रूढं तत्संवृतिसत्यं संमतिसत्यं च। यथा अग्रमाहिषीत्वाभावे सति कस्याश्चिद्देवीति नाम। अन्यत्रान्यवस्तुनः समारोपः स्थापना तदाश्रितं मुख्यवस्तुनाम संस्थापनासत्यं यथा चंद्रप्रभप्रतिमा चंद्रप्रभ इति। तथा च यथा भक्तादिनामदेशाद्यपेक्षया सत्यं भवति तथा पुनरप्यानिरपेक्षतयैव संव्यवहारार्थं कस्यचित्प्रयुक्तं संज्ञाकर्म नाम सत्यं यथा कश्चित्पुरुषो जिनदत्त इति अत्र जिनैर्दत्त इति दानक्रियानिरपेक्षमेव प्रयुक्तमिदं। चक्षुर्व्यवहारस्य प्रचुरत्वात् रूपादिपुद्गलगुणानां मध्ये रूपप्राधान्येन तदाश्रितं वचः रूपसत्यं। यथा कश्चित्पुरुषः श्वेत इति तत्र केशनीलादिवर्णांतराणां रसादिगुणांतराणां च सद्भावेप्यविवक्षितत्वात्। प्रतीत्य- विवक्षितादितरदुद्दिश्य विवक्षितस्यैव स्वरूपकथनं प्रतीत्यसत्यं आपेक्षिकसत्यमित्यर्थः यथा कश्चिद्दीर्घ इति अन्यस्य कस्यचित् ह्रस्वत्वमपेक्ष्य प्रकृतस्य दीर्घत्वाभिधानात् एवं स्थूलसूक्ष्मादिवचनानि प्रतीत्यसत्यानि ज्ञातव्यानि। व्यवहारं नैगमादिनयप्राधान्यमा- ४८१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रित्य प्रवृत्तं यद्वचः तद् व्यवहारसत्यं तत्र नैगमनयप्राधान्येन यथा रध्यते कूरमिति पच्यते ओदन इति । इति शब्दः संग्रहनयादिव्यवहारप्रकारप्रदर्शनार्थः एवंविधनयव्यवहाराश्रितं यद्वचनं स्यात्सर्वं सत्, स्यात्सर्वमसदित्यादिवाक्यं तद्व्यवहारसत्यं भवेत् चशब्दः सर्वनयसमुच्चयार्थः। पच्यते ओदन इत्यत्र पाकसमाप्त्यनंतरकालभावी ओदनपर्यायः पाककाले यद्यपि नास्ति तथापि तंडुलानां ओदनपर्यायप्रत्यासत्तिप्ररूपकनैगमनयविवक्षया ओदनपर्यायपरिणामिद्रव्यापेक्षया तद्वाक्यस्य सत्यत्वसिद्धिः ॥ २२३॥

सं० च०—दश प्रकार सत्य कह्या ताका उदाहरण अनुक्रमतैं कहिए है--देशनिविषै व्यवहारी मनुष्यनिविषै प्रवृत्तिरूप वचन सो ज़नपद सत्य कहिए जैसै ओदनकौं महाराष्ट्रदेशविषै भातू वा भेदू कहिए। अंध्रदेशविषै वंटक वा मुकूडु कहिए । कर्णाटदेशविषै कूलु कहिए । द्रविडदेश विषैं चोरु कहिए इत्यादिक जानना । बहुरि जो संवृति कहिए कल्पना वा सम्मति कहिए बहुत जीवनिकरि तैसै ही मानना सर्व देशनिविषैं समान रूढरूप नाम सो संवृति सत्य कहिए वा इसहीकौं सम्मति सत्य कहिए जैसैं किसीविषैं पटरानीपना न पाइए अर वाकौं देवी कहिए । बहुरि जो अन्यविषैं अन्यका स्थापन करि तिस मुख्य वस्तुका नाम कहना सो स्थापना सत्य कहिए जैसैं रत्नादिककरि निर्मापित चंद्रप्रभ तीर्थंकरकी प्रतिमाकौं चंद्रप्रभ कहिए । बहुरि देशादिककी अपेक्षा भातु इत्यादिक नामसत्य है तैसैं अन्य अपेक्षारहित केवल व्यवहार निमित्त जिसका जो नाम होइ सो कहना सो नामसत्य कहिए । जैसैं किसीका नाम जिनदत्त है सो जिनभगवान करि दीया होइ ताकौं जिनदत्त कहिए सो इहां दानक्रियाकी अपेक्षा विना ही जिनदत्त नाम कहिए । बहुरि जो पुद्गलके अनेक गुण होतसंतैं रूपकी मुख्यता लीएं वचन कहिए सो रूपसत्य कहिए जैसैं यहु पुरुष सुपेद है ऐसा कहिए तहां वाके केशादिक श्याम वा रसादिक अन्य गुण वाकैं पाइए है परि उनकी मुख्यता न करी । बहुरि जो विवक्षित वस्तुतैं अन्य वस्तुकी अपेक्षाकरि तिस विवक्षित वस्तुकौं हीनाधिक मान वचन कहिए सो प्रतीत्यसत्य कहिए याहीका नाम आपेक्षिक सत्य है । जैसैं यहु दीर्घ है ऐसा कहिए सो तहां किसी छोटेकी अपेक्षा याकौं दीर्घ कह्या बहुरि यातैं दीर्घकी अपेक्षा छोटा है परंतु वाकी विवक्षा न लीन्ही । ऐसैं ही स्थूल सूक्ष्मादिक कहना सो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

प्रतीत्य सत्य जानना। बहुरि जो नैगमादि नयकी अपेक्षा प्रधानता लीए वचन कहिए सो व्यवहार सत्य जानना। जैसै नैगम नयकी अपेक्षाकरि ऐसा कहिए कि 'भात पचै है' सो भात तौ पचैं पीछे होगा अब तौ चावल ही हैं तथापि थोरे ही कालमें भात होना है तातैं नैगम नयकी विवक्षाकरि भात पर्याय परिणमने योग्य द्रव्य अपेक्षा सत्य कहिए। इति शब्दकरि संग्रहनयादिकका भी व्यवहार विधान जानना। नयनिका व्यवहार की अपेक्षा जैसे सर्व पदार्थ सत्त्व रूप हैं वा असत्त्व रूप हैं इत्यादिक वचन सो व्यवहार सत्य है। नैगमादि नयतैं संग्रह नयादिकका व्यवहार हो है जातैं याकौं व्यवहार सत्य कहिए॥ २२३॥

सक्को जंबूदीवं पल्लट्टदि पाववज्जवयणं च।
पल्लोवमं च कमसो जणपदसच्चादिदिट्ठंता॥ २२४॥

शक्रो जंबूद्वीपं परिवर्तयति पापवर्जवचनं च।
पल्योपमं च क्रमशो जनपदसत्यादिदृष्टांताः॥ २२४॥

जी० प्र०—संभावनया असंभवपरिहारपूर्वकं वस्तुधर्मविधिलक्षणया यत्प्रवृत्तं वचनं तत्संभावनासत्यं यथा शक्रो जंबूद्वीपं परावर्तयेत् परिवर्तयितुं शक्नोतीत्यर्थः जंबूद्वीपपरिवर्तनशक्त्यसंभवपरिहारेण तच्छक्तिविधानवचनं तत्क्रियानिरपेक्षं सत्यमिति बीजे अंकुरजननादिशक्तिवचनवत्। असंभवपरिहारेण वस्तुधर्मविधिरूपसंभावनाया नियमेन तत्क्रियापेक्षा न घटते। क्रियाया बाह्यकारणकलापव्यापारप्रभवत्वात्। अतींद्रियार्थेषु प्रवचनोक्तविधिनिषेधसंकल्पपरिणामो भावः। तदाश्रितं वचनं भावसत्यं। यथा शुष्कपक्वध्वस्ताम्ललवणसंमिश्रदग्धादिद्रव्यं प्रासुकं ततस्तत्सेवने पापबंधो नास्तीति पापवर्जनवचनं। अत्र सूक्ष्मप्राणिनामिंद्रियागोचरत्वेऽपि प्रवचनप्रामाण्येन प्रासुकाप्रासुकसंकल्परूपभावाश्रितवचनस्य सत्यत्वात्। समस्तातींद्रियार्थज्ञानिप्रणीतप्रवचनस्य सत्यत्वादेव कारणात्। चशब्दः एवंविधानुक्तभावसत्यसमुच्चयार्थः। प्रसिद्धार्थसादृश्यं उपमासत्यं यथा पल्योपमं पल्येन धान्याधारकुशूलेन सह उपमासदृशत्वं रोमखंडाधारतया यस्यास्ति तत्संख्यानं पल्योपममिति असंख्यातासंख्यातरोमखंडाश्रयस्य तत्प्रमाणसमयाश्रयस्य वा संख्यानविशेषस्य यथाकथंचित्पल्यसादृश्यमाश्रित्य प्रवृत्तस्य पल्योपमवचनस्य उपमासत्यत्वसिद्धेः। तथा सागरोपमाद्युपमासत्यविशेषसमुच्चयार्थश्चशब्दः। एवं यथाक्रमं भक्तादयो जनपदसत्यादिदृष्टांता उदाहरणान्युक्तानि॥
२२४॥ अथानुभयवचनभेदान् गाथाद्वयेनाह—

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं० प्र—संभावनया असंभवपरिहारपूर्वकवस्तुधर्मविधिलक्षणया यत्प्रवृत्तं वचस्तत्संभावनासत्यं यथा शक्रो जंबूद्वीपं परावर्तयेत्-परिवर्तयितुं शक्नोतीत्यर्थः। जंबूद्वीपपरिवर्तनशक्त्यसंभवपरिहारेण तच्छक्तिविधानवचनं तत्क्रियानिरपेक्षं सत्यमिति बीजे अंकुरजननादिशक्तिवचनवत्। असंभवपरिहारेण वस्तुधर्मविधिरूपायाः संभावनायाः नियमेन तत्क्रियपेक्षा नहि विद्यते। क्रियाया बाह्यकारणकलापव्यापारप्रभवत्वात्। अतींद्रियार्थेषु प्रवचनोक्तविधिनिषेधसंकल्पपरिणामो भावः तदाश्रितं वचः भावसत्यं यथा शुष्कपक्वध्वस्ताम्ललवणसंमिश्रदग्धादि द्रव्यं प्रासुकं अतस्तत्सेवने पापबंधो नास्तीति पापवर्जवचनं। तत्र सूक्ष्मजंतूनामिंद्रियागोचरत्वेऽपि प्रवचनप्रामाण्यात् प्रासुकाप्रासुकसंकल्परूपभावाश्रितवचनस्य सत्यत्वात्, सकलातींद्रियार्थज्ञानिप्रोक्तप्रवचनस्य सत्यत्वात्। चशब्दः एवंविधानुक्तभावसत्यसमुच्चयार्थः। प्रसिद्धार्थसादृश्यमुपमा तदाश्रितं वच उपमासत्यं यथा पल्योपमं। पल्येन धान्याधारेण कुसूलेन उपमा सादृश्यं, रोमखंडाधारतया यस्यास्ति तत्संख्यानं पल्योपममिति। असंख्यातासंख्यातरोमखंडाश्रयस्य तत्प्रमाणसमयाश्रयस्य वा संख्यातविशेषस्य यथा कथंचित्पल्यसादृश्यमाश्रित्य प्रवृत्तस्य पल्योपमवचनस्य उपमासत्यत्वसिद्धेः। चशब्दः अनुक्तसागरोपमाद्युपमासत्याविशेषसमुच्चयार्थः एवं क्रमशः—यथाक्रमं भक्तादपः जनपदसत्यादिदृष्टांताः—उदाहरणानि दश प्ररूपिताः॥ २२४ ॥ अथानुभयवचनभेदप्ररूपणार्थं गाथाद्वयमाह—

सं० च०---असंभवपरिहार पूर्वक वस्तुके स्वभावका विधानरूप लक्षण धरै जो संभावना तींहिरूप वचन सो संभावना सत्य कहिए जैसे इंद्र जंबूद्वीप पलटावनेकौं समर्थ है ऐसा कहिए तहां जंबूद्वीपकौं पलटावनेकी शक्ति संभवै नाहीं। ताका परिहारकरि केवल वामें ऐसी शक्ति ही पाइए है ऐसा जंबूद्वीप पलटावनेकी क्रियाकी अपेक्षारहित वचन सो सत्य है। जैसे बीजविषै अंकूरा उपजावनेकी शक्ति है सो यहु क्रियाकी अपेक्षा लीएं वचन है। जातैं असंभवका परिहारकरि वस्तु स्वभावका विधानरूप जो संभावना ताके नियमकरि क्रियाकी सापेक्षता नाही है। जातैं क्रिया है सो अनेक बाह्य कारण मिलैं उपजै है। बहुरि अतींद्रिय जो पदार्थ तिनिविषैं सिद्धांतके अनुसारि विधि निषेधका संकल्परूप जो परिणाम सो भाव कहिए तींहिनै लीएं जो वचन सो भाव सत्य कहिए जैसैं जो सूकि गया होइ वा अग्निकरि पच्या होइ वा घरटी कोल्हू इत्यादिक यंत्रकरि छिन्न कीया होइ अथवा खटाई वा लूणकरि मिश्रित हूवा होइ वा भस्मीभूत हूवा होइ वस्तु ताकौं प्रासुक कहिए याके सेवनतैं पापबंध नाहीं इत्यादिक पापवर्जनरूप वचन सो भाव सत्य कहिए। यद्यपि इनि वस्तुनिविषै इंद्रिय अगोचर सूक्ष्म जीव पाइए है तथापि आगम प्रमाणतैं प्रासुक अप्रासुकका संकल्परूप भावके आश्रित ऐसा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वचन सो सत्य है जातै समस्त अतींद्रिय पदार्थके ज्ञानीनिकरि कह्या हूवा वचन सत्य है चकारकरि ऐसा ही और भावसत्य जानना। बहुरि जो किसी प्रसिद्ध पदार्थकी समानता किसी पदार्थकौं कहिए सो उपमा है तींहि रूप वचन सो उपमासत्य कहिए। जैसें उपमा प्रमाणविषैं पल्योपम कह्या तहां धान भरणेका जो खास ताकौं पल्य कहिए ताकी उपमा जाकौं होइ ऐसी संख्याकौं पल्योपम कह्या सो इहां उपम सत्य है असंख्यातासंख्यात रोम खंडनिके आश्रयभूत वा तींहिं प्रमाण समयनिके आश्रयभूत जो संख्या विशेष ताके कोइ प्रकार खाडाविषैं रोम भरने करि पल्यकी समानताका आश्रय करि पल्योपम कहिए है। चकार करि सागर आदि उपमा सत्यके विशेष जानने। ऐसैं अनुक्रमतैं जनपदादिक सत्यके भोजनादिक उदाहरण क्रमतैं कहे॥ २२४॥ आगैं अनुभय वचनके आमंत्रणी आदि भेदनिके निरूपणकें निमित्त दोय गाथा कहैं हैं—

आमंतणि आणवणी याचणि यापुच्छणी य पण्णवणी।
पच्चक्खाणी संसयवयणी इच्छाणुलोमा य॥ २२५॥

आमंत्रणी आज्ञापनी याचनी आपृच्छनी च प्रज्ञापनी।
प्रत्याख्यानी संशयवचनी इच्छानुलोम्नी च॥ २२५॥

जी० प्र०—आगच्छ भो देवदत्त, इत्याद्याह्वानभाषा आमंत्रणी। इदं कुरु इत्यादिकार्यनियोजनभाषा आज्ञापनी। इदं मह्यं देहीति प्रार्थनाभाषा याचनी। किमेतदित्यादिप्रश्नभाषा आपृच्छनी। किं करवाणीत्यादिविज्ञापनभाषा प्रज्ञापनी। इदं वर्जयामीत्यादिपरिहरणभाषा प्रत्याख्यानी। किमिदं बलाका वा पताका वा इत्यादिसंदेहभाषा संशयवचनी। तथैव ममापि भवितव्यमित्यादि इच्छानुवृत्तिभाषा इच्छानुलोमवचनी। एकश्चशब्दः समुच्चयार्थः चरमश्चशब्दोनुक्तसमुच्चयार्थः॥ २२५॥

मं० प्र०—आमंत्रणी आह्वानभाषा आगच्छ भो देवदत्त! इत्यादि। आज्ञापनी—कार्यनियोजनभाषा यथा इदं कुर्याः, इत्यादिः। याचनी—प्रार्थनाभाषा यथा इदं मे देहीत्यादिः। आपृच्छनी—प्रश्नभाषा, किमेतदित्यादिः। प्रज्ञापनी—विज्ञापनभाषा किंकरवाणीत्यादिः। प्रत्याख्यानी—परिहरणभाषा इदं वर्जे:

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यामीत्यादिः। संशयवचनी संदेहभाषा किमिदं बलाका पताका वेत्यादिः। इच्छानुलोमवचनी इच्छानुवृत्तिभाषा यथा तथा भवतीत्यादिः। एकः चशब्दः प्रत्येकचशब्दसमुच्चयार्थः। चरमश्चशब्दः अनुक्तसमुच्चयार्थः॥ २२५॥

सं०च०—'हे देवदत्त! तू आव' इत्यादि बुलावनेरूप जो भाषा सो आमंत्रणी कहिए। बहुरि 'तू इस कार्यकौं करि' इत्यादि कार्य करावनेकी आज्ञारूप जो भाषा सो आज्ञापनी कहिए। तू मोकौं 'यहु वस्तु देहु' इत्यादि मांगनेरूप जो भाषा सो याचनी कहिए। बहुरि 'यहु कहा है?' इत्यादि प्रश्नरूप जो भाषा सो आपृच्छनी कहिए। बहुरि 'हे स्वामी मेरी यहु वीनती है' इत्यादि किंकरकी स्वामीसौं वीनतीरूप जो भाषा सो प्रज्ञापनी कहिए। बहुरि 'मैं इस वस्तुका त्याग कीया' इत्यादि त्यागरूप जो भाषा सो प्रत्याख्यानी कहिए। बहुरि जैसैं यहु बुगलोंकी पंकति है कि ध्वजा है इत्यादि संदेहरूप जो भाषा सो संशयवचनी कहिए। बहुरि जैसैं यहु है तैसैं मोकौं भी होना इत्यादि इच्छानुसारि जो भाषा सो इच्छानुवचनी कहिए॥ २२५॥

णवमी अणक्खरगदा असच्चमोसा हवंति भासाओ।
सोदाराणं जह्मा वत्तावत्तंससंजणया॥ २२६॥

नवमी अनक्षरगता असत्यमृषा भवंति भाषाः।
श्रोतॄणां यस्मात् व्यक्ताव्यक्तांशसंज्ञापिकाः॥ २२६॥

जी० प्र०—अनक्षरगता अनक्षरात्मिका द्वींद्रियाद्यसंज्ञिपंचेंद्रियपर्यंतजीवानां स्वस्वसंकेतप्रदर्शिका भाषा नवमी पूर्वगाथोक्तानुभयभाषाष्टकापेक्षया। एवमामंत्रण्याद्याः असत्यमृषा सत्यासत्यलक्षणरहिता अनुभयभाषा भवंति। अत्र कारणमुच्यते यस्मात्कारणात् श्रोतृजनानां सामान्येन व्यक्तानां विशेषेणाव्यक्तानां अर्थावयवानां संज्ञापिकाः प्रकाशिकाः भाषा भवंति तस्मात्कारणात् सामान्यरूपेण व्यक्तार्थत्वादसत्या इति वक्तुं न शक्यते विशेषस्वरूपेण व्यक्तार्थत्वात्सत्या इत्यपि वक्तुं न शक्यते इत्यनुभयत्वं। एवं यद्यपि पराः अनुभयभाषाः संभवंति (संति) तथापि ता अत्रैव नवस्वेवांतर्भावनीयाः। अथवा एतासामुपलक्षणत्वाद् व्यक्ताव्यक्तार्थांशसंज्ञापिका अपरा अनुभयभाषा पृथगनुसर्तव्याः। अनक्षरात्मकभाषाया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुव्यक्तार्थांशसंज्ञापकत्वाभावात् कथमनुभयत्वमिति चेत्तन्न, द्वींद्रियादिजीवानां तद्भाषावक्तृणां सुखदुःखप्रकरणाद्यवलंबनेन हर्षाद्यभिप्रायस्य ज्ञातुं शक्यत्वेन व्यक्तत्वोपपत्तिभावात् ॥ २२६ ॥ अथ सत्यानुभयासत्योभयमनोवचनयोगानां कारणं कथयति—

मं० प्र०---अनक्षरगता अनक्षरात्मिका द्वींद्रियाद्यसंज्ञिपंचेंद्रियपर्यंतानां जीवानां स्वस्वसंकेतप्रदर्शिका भाषा नवमी अनुभयभाषा पूर्वगाथोक्तानुभयभाषा-ष्टकापेक्षया। एवमेता आमंत्रण्यादयः असत्यमृषा सत्यासत्यलक्षणरहिता अनुभयभाषा भवंति। अत्र कारणमुच्यते--यस्मात्कारणात् श्रोतृणां सामान्येन व्यक्तः, विशेषेण अव्यक्तश्च अंशः वाक्यार्थावयवः तयोः संज्ञापिकाः प्रकाशिका इमा भाषाः तस्मात्कारणात् सामान्यरूपेण व्यक्तार्थत्वादसत्या इति वक्तुं न शक्यते विशेषाकारेणाव्यक्तार्थत्वात् सत्या इति च वक्तुं न शक्यते इत्यनुभयत्वं। यद्यप्यन्या अनुभयभाषाः संभवंति ता अत्रैव नवस्वंतर्भावनीयाः। अथवा एतासा-मुपलक्षणत्वाद् व्यक्ताव्यक्तार्थांशसंज्ञापिका अन्या अप्यनुभयभाषा पृथगनुसर्तव्याः। अनक्षरात्मकभाषाया व्यक्तार्थांशसंज्ञापकत्वाभावात् कथमनुभयत्व-मिति चेत्तन्न, द्वींद्रियादिजीवानां तद्वक्तृणां सुखदुःखप्रकरणाद्यवलंबनेन हर्षाद्यभिप्रायस्य ज्ञातुं शक्यत्वेन व्यक्तत्वोपपत्तेः ॥ २२६ ॥ अथ सत्यानुभया-सत्योभयमनोवचनयोगानां कारणं प्ररूपयति--

सं० च०—आठ भाषा तौ आगैं कहीं अर नवमी अनक्षररूप वेइंद्रियादिक असैनी जीवनिकैं जो भाषा हो है अपने अपने समस्यारूप संकेतकी प्रकट करणहारी सो अनुभय भाषा जाननी। ऐसैं सत्य असत्य लक्षण रहित आमंत्रणी आदि अनुभय भाषा जाननी। इनिविषैं सत्य असत्यका निर्णय नाहीं सो कारण कहैं हैं जातैं ऐसे वचननिका सुननेवालाके सामान्यपनाकरि तौ अर्थका अवयव प्रगट हूवा तातैं असत्य न कही जाइ। ब-हुरि विशेषपनाकरि अर्थका अवयव प्रगट न हूवा तातैं सत्य भी न कह्या जाय तातैं अनुभय कहिए जैसैं कही 'तू आव' सो इहां सभी सुननेवालौंने सामान्यपनैं जान्या कि बुलाया है परंतु वह आवैगा कि न आवैगा ऐसा विशेष निर्णय तौ उस वचनमैं नाहीं तातैं इसकौं अनुभय कहिए। ऐसैं सबका जानना। बहुरि अन्य भी अनु-भय वचनके भेद हैं तथापि इन भेदनिविषैं गर्भित जानने। अथवा ऐसैं ही उपलक्षणतैं ऐसी ही व्यक्त अव्यक्त वस्तुका अंशकी जनावन हारी और भी अनुभय भाषा जुदी जाननी। इहां कोऊ कहैगा कि अनक्षर भाषाका तौ सामान्यपना भी व्यक्त नाही हो है याकौं अनुभय वचन कैसै कहिए? ताकौ उत्तर—कि अनक्षर भाषा वाले जी-वनिका संकेतरूप वचन हो है तिसतैं उनका वचनकरि उनके सुख दुःख आदिका अवलंबनकरि हर्षादिक रूप

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अभिप्राय जानिए है ताते अनक्षर शब्दविषै भी सामान्यपनाकी व्यक्तता संभवै है ॥ २२६ ॥ आगे ए मन वचन योगके भेद कहे तिनिका कारण कहै हैं—

मणवयणाणं मूलणिमित्तं खलु पुण्णदेहउदओ दु ।
मोसुभयाणं मूलणिमित्तं खलु होदि आवरणं ॥२२७॥

मनोवचनयोर्मूलनिमित्तं खलु पूर्णदेहोदयस्तु ।
मृषोभययोर्मूलनिमित्तं खलु भवत्यावरणं ॥ २२७ ॥

जी० प्र०—सत्यमनोयोगस्य सत्यवाग्योगस्य अनुभयमनोयोगस्य अनुभयवचनयोगस्य च पर्याप्तनामकर्मोदयः शरीरनामकर्मोदयश्च खलु स्फुटं मूलनिमित्तं प्रधानकारणं भवति । सामान्यस्य विशेषाविनाभावित्वेन मनोवचनसामान्यग्रहणेन तद्विशेषसत्यानुभयग्रहणं सिद्धमेव । अथवा मोसुभयाणमिति कंठोक्तत्वात् शेषसत्यानुभयमनोवचनयोः पारिशेषिकन्यायाद्ग्रहणं भवति । आवरणस्य मंदोदये विद्यमाने असत्यजनकत्वाभावात् मृषोभयोः असत्यमनोवाग्योगयोः उभयमनोवाग्योगयोश्च आवरणतीव्रानुभागोदय एव मूलकारणं भवति खलु—स्फुटं। अत्रायं विशेषः । स कः ? तीव्रतरानुभागोदयविशिष्टमावरणं असत्यमनोवाग्योगनिमित्तं । तीव्रानुभागोदयविशिष्टमावरणं उभयमनोवाग्योगनिमित्तमिति जानीहि । दर्शनचारित्रमोहोदययोः असत्योभययोगकारणत्वं कुतो नोक्तमिति चेत्तन्न, मिथ्यादृष्टेरिव असंयतसम्यग्दृष्टेः संयतस्यापि तद्योगसद्भावात् । सर्वत्र मिथ्यादृष्ट्यादिषु सत्यासत्ययोगव्यवहारस्यावरणमंदतीव्रानुभागोदय एव कारणमिति प्रवचनप्रसिद्धेः । तु पुनः केवलिनि सत्यानुभययोगव्यवहारः सर्वावरणक्षयजनित इति ज्ञातव्यः । अयोगकेवलिनि शरीरनामकर्मोदयाभावेन योगाभावात् सत्यानुभयव्यवहारोऽपि नास्ति इति सुव्यक्तं । सयोगकेवलिदिव्यध्वनेः कथं सत्यानुभयवाग्योगत्वमिति चेत्तन्न तदुत्पत्तावनक्षरात्मकत्वेन श्रोतृश्रोत्रप्रदेशप्राप्तिसमयपर्यंतमनुभयभाषात्वसिद्धेः । तदनंतरं च श्रोतृजनाभिप्रेतार्थेषु संशयादिनिराकरणेन सम्यग्ज्ञानजनकत्वेन सत्यवाग्योगत्वसिद्धेश्च तस्यापि तदुभयत्वघटनात् ॥ २२७ ॥ अथ सयोगकेवलिनि मनोयोगसंभवप्रकारं गाथाद्वयेनाह—

मं० प्र०—सत्यमनोयोगस्य सत्यवाग्योगस्य अनुभयमनोयोगस्य अनुभयवाग्योगस्य च पर्याप्तनामकर्मोदयः शरीरनामकर्मोदयश्च खलु-स्फुटं, मूलनिमित्तं प्रधानकारणं भवति । सामान्यस्य विशेषाविनाभावित्वेन मनोवचनसामान्यग्रहणेन तद्विशेषसत्यानुभयग्रहणं सिद्धं अनपवादत्वात् । आवरणस्य मंदोदयत्वात् सतोऽप्यसत्यत्वजनकत्वाभावात् मृषोभयोः असत्यमनोवाग्योगयोः उभयमनोवाग्योगयोश्च तीव्रानुभागोदयविशिष्टमावरणं मूलनिमित्तं खलु भवति । अयं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तु विशेषः–तीव्रतरानुभागोदयविशिष्टमावरणमसत्यमनोवाग्योगकारणं । तीव्रानुभागोदयविशिष्टमावरणमुभयमनोवाग्योगकारणमिति । दर्शनचारित्रमोहोदययोरसत्योभययोगकारणत्वं कुतो नोक्तमिति चेतन्न, मिथ्यादृष्टिरिवासंयतसम्यग्दृष्टेः संयतस्यापि तद्योगसद्भावात् । सर्वत्र मिथ्यादृष्ट्यादिषु सत्यासत्ययोगव्यवहारस्य आवरणमंदतीव्रानुभागोदयजनितत्वेन प्रवचनप्रसिद्धत्वात् । केवलिनि तु सत्यानुभययोगव्यवहारः सर्वावरणक्षयजनित इति ज्ञातव्यः । अयोगकेवलिनि शरीरनामकर्मोदयाभावेन योगाभावात् सत्यानुभयव्यवहारो नास्तीति सुव्यक्तं । सयोगकेवलिनां दिव्यध्वनेः कथं सत्यानुभयवाग्योगत्वं ? इति चेत्तन्न उत्पत्तौ अनक्षरात्मकतया श्रोतृश्रोत्रप्रदेशप्राप्तिसमयपर्यंतमनुभयभाषात्वसिद्धेः तदनंतरं श्रोतृणामभिप्रेतार्थेषु संशयादिनिराकरणेन सम्यग्ज्ञानजनकत्वात् सत्यवाग्योगसिद्धेश्च ॥ २२७ ॥ अथ सयोगकेवलिनि मनोयोगसंभवप्रकारं गाथाद्वयेन प्ररूपयति–

सं० च०---सत्यमनोयोग वा अनुभय मनोयोग बहुरि सत्यवचन योग वा अनुभय वचन योग इनिका मुख्य कारण पर्याप्तनामा नामकर्मका उदय अर शरीरनामा नामकर्मका उदय जानना । जातैं सामान्य है सो विशेष विना न हो है तातैं मन वचनका सामान्य ग्रहण हूवा तहां उसहीका विशेष जो है सत्य अर अनुभय ताका ग्रहण सहज ही सिद्ध भया । अथवा असत्य उभयका आगैं निकट ही कथन है तातैं इहां अवशेष रहे सत्य अनुभय तिनिका ही ग्रहण करना । बहुरि आवरणका मंद उदय होतैं असत्यपनाकी उत्पत्ति नाहीं हो है । तातैं असत्य वा उभय मनोयोग अर वचनयोगका मुख्यकारण आवरणका तीव्र अनुभागका उदय जानना । इसहूविषैं इतनां विशेष है जो तीव्रतर आवरणके अनुभागका उदय असत्य मन वचनकौं कारण है अर तीव्र आवरणके अनुभागका उदय उभय मन वचनकौं कारण है । इहां कोऊ कहै कि असत्य वा उभय मन वचनका कारण दर्शन चारित्र मोहका उदय क्यों न कहौ ? ताका समाधान-कि असत्य अर उभय मन वचन योग मिथ्यादृष्टीवत् असंयत सम्यग्दृष्टीकैं वा संयमीकैं भी पाइए तातैं तू कहै सो बनै नाहीं तातैं सर्वत्र मिथ्यादृष्टी आदि जीवनिके सत्य असत्य योगका कारण मंद वा तीव्र आवरणके अनुभागका उदय जानना । केवलीकैं सत्य अनुभय योगका सद्भाव सर्व आवरणके अभावतैं जानना । अयोग केवलीकैं शरीर नामा नाम कर्मका उदय नाहीं तातैं सत्य अर अनुभय योगका भी सद्भाव नाहीं है । इहां प्रश्न उपजै है कि–केवलीकैं दिव्यध्वनि है ताकैं सत्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वचनपनां वा अनुभय वचनपना कैसैं सिद्धि हो है? ताका समाधान-केवलीके दिव्यध्वनि हो है सो होते ही तो अनक्षर हो है सो सुनने वालोंके कर्णप्रदेशकौं यावत् प्राप्त न होइ तावत् कालपर्यंत अनक्षर ही है। तातैं अनुभय वचन कहिए। बहुरि जब सुननेवालोंका कर्णविषैं प्राप्त हो है तब अक्षर रूप होइ यथार्थ वचनका अभिप्राय रूप संशयादिककौं दूर करै है तातैं सत्य वचन कहिए। केवलीका अतिशयकरि पुद्गल वर्गणा तैसैं ही परिणमि जांय हैं ॥ २२७ ॥ आगैं सयोग केवलीकैं मनोयोग कैसैं संभवै है सो दोय गाथानिकरि कहै हैं—

मणसहियाणं वयणं दिट्ठं तप्पुव्वमिदि सजोगम्हि।
उत्तो मणोवयारेणिंदियणाणेण हीणम्मि ॥ २२८ ॥

मनःसहितानां वचनं दृष्टं तत्पूर्वमिति सयोगे।
उक्तो मन उपचारेणेंद्रियज्ञानेन हीने ॥ २२८ ॥

जी० प्र०—इंद्रियज्ञानेन—मतिज्ञानेन, विहीने सयोगिनि मुख्यवृत्त्या मनोयोगाभावेऽपि उपचारेण मनोयोगोऽस्तीति परमागमे कथितः। उपचारो हि निमित्तप्रयोजनवानेव तत्र निमित्तं यथा अस्मदादेः छद्मस्थस्य मनोयुक्तस्य तत्पूर्वकं मनःपूर्वकमेव वचनं वर्णपदवाक्यात्मकवाग्व्यापारो दृष्ट इति कारणात्। अस्मदाद्यनतिशयपुरुषदृष्टो धर्मः सातिशयपुरुषे भगवति केवलिनि कथं कल्पते? इति न च वाच्यं, तत्कारणस्य मुख्यमनोयोगस्य केवलिन्यभावादेव तत्कल्पनारूपोपचारः कथितः। तस्य प्रयोजनमधुना कथयति ॥ २२८ ॥

मं० प्र०——इंद्रियज्ञानेन मतिज्ञानेन हीने सयोगकेवलिनि मुख्यवृत्त्या मनोयोगाभावादुपचारेण मनोयोगोऽस्तीति परमागमे उक्तः। तस्योपचारस्य निमित्तप्रयोजनपूर्वकत्वात्। तत्र तावन्निमित्तमुच्यते-अस्मादृशां छद्मस्थानां मनःसहितानां, तत्पूर्वं—मनःपूर्वमेव, वचनं--वर्णपदवाक्यात्मकवाग्व्यापारो दृष्ट इतिहेतोर्निमित्तात्। इति शब्दस्य हेत्वर्थवृत्तिसंभवात्। अस्मदादिषु अनतिशयपुरुषेषु दृष्टो धर्मः सातिशयपुरुषे भगवति कथं कल्प्यते? इति चेत्तन्न अत एव--तत्र मुख्यस्य मनोयोगस्याभावादेव तत्कल्पनारूप उपचार उक्तः। तस्य प्रयोजनमिदानीमुच्यते ॥ २२८ ॥

सं० च०——इंद्रिय ज्ञान जो मतिज्ञान तींहिकरि रहित ऐसा जु सयोग केवली तींहिविषै मुख्यपनैं तौ मन योग है नाहीं, उपचारतैं है सो उपचारविषै निमित्तका प्रयोजन है सो निमित्त इहां यहु जानना जैसे हम आदि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

छद्मस्थ जीव मनकरि संयुक्त तिनिके मनोयोग पूर्वक अक्षर पद वाक्य स्वरूप वचन व्यापार देखिए है तातै केवलीकैं भी मनयोगपूर्वक वचन योग कह्या। इहां प्रश्न–कि छद्मस्थ हम आदि अतिशय रहित पुरुषनिविषै जो स्वभाव देखिए सो सातिशय भगवान केवलीविषै कैसैं कल्पिए ताका समाधान-साद्दश्यपना नाहीं है इस ही वासतै छद्मस्थकै मनयोग मुख्य कह्या अर केवलीकै कल्पनामात्र उपचाररूप मन योग है ॥ २२८ ॥ सो इस कहनेका भी प्रयोजन कहै हैं–

अंगोवंगुदयादो दव्वमणट्ठं जिणंदचंदह्मि ।
मणवग्गणखंधाणं आगमणादो दु मणजोगो ॥२२९॥

अंगोपांगोदयात् द्रव्यमनोऽर्थं जिनेंद्रचंद्रे ।
मनोवर्गणास्कंधानामागमनात् तु मनोयोगः ॥ २२९ ॥

जी० प्र०—जिनेंद्रचंद्रे–जिनः इंद्रो येषां ते जिनेंद्राः सम्यग्दृष्टयः, तेषां चंद्र इव चंद्रः, भवतापाज्ञानतमोविनाशकत्वात् तस्मिन् जिनेंद्रचंद्रे अंगोपांगनामकर्मोदयेन द्रव्यमनः विकसिताष्टदलपद्माकारेण हृदयांतर्भागे भवति तत्परिणमनकारणमनोवर्गणास्कंधानामागमनात् द्रव्यमनःपरिणमनेन प्राप्तिरूपप्रयोजनात् पूर्वोक्तनिमित्तात् मुख्यभावमनोयोगाभावाच्च उपचारेण मनोयोगोऽस्तीत्युच्यते। अथवा आत्मप्रदेशानां कर्मनोकर्माकर्षणशक्तिरूपो भावमनोयोगः तत्समुद्भूतो मनोवर्गणानां द्रव्यमनःपरिणमनरूपो द्रव्यमनोयोगश्च अनेन गाथासूत्रेण भाषितो जातः। पूर्वोक्तोपचारस्य प्रयोजनं तु सर्वजीवदयातत्त्वार्थदेशनाशुक्लध्यानादिकमिति तुशब्देन सूचितं ॥ २२९ ॥ अथ काययोगं कथयन् प्रथमं औदारिककाययोगं निरुक्तिपूर्वकं कथयति—

मं० प्र०—जिनेंद्रचंद्रे–जिनः इंद्रो येषां ते जिनेंद्राः–सम्यग्दृष्टयः, तेषां चंद्र इव चंद्रः, भवतापाज्ञानतमोविनाशकत्वात्, तस्मिन् सयोगकेवलिनि, अंगोपांगनामकर्मोदयाद् द्रव्यमनः विकसिताष्टदलपद्माकारं हृदंतर्भागे भवति तत्परिणमननिमित्तं मनोवर्गणारूपपुद्गलस्कंधानामागमनात् द्रव्यमनःपरिणमनप्राप्तेः प्रयोजनात् पूर्वोक्तनिमित्तात् मुख्य [भा]वमनोयोगाभावाच्च उपचारेण मनोयोगोऽस्तीत्युच्यते। अथवा आत्मप्रदेशानां कर्मनोकर्माकर्षणशक्तिरूपो भावमनोयोगः, ततः समुत्पन्नो मनोवर्गणानां द्रव्यमनःपरिणमनरूपो द्रव्यमनोयोगश्च अनेन गाथासूत्रेणोक्त इति ज्ञातव्यः। पूर्वोक्तोपचारस्य प्रयोजनं तु सर्वजीवदयातत्त्वार्थदेशनाशुक्लध्यानादिकमिति तु शब्देन सूच्यते ॥ २२९ ॥ अथ काययोगप्ररूपणां प्रक्रममाणस्तावच्चद्भेदमौदारिककाययोगं प्ररूपयति–

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० च०—जिन है इंद्र कहिए स्वामी जिनिका ऐसे जो सम्यग्दृष्टी तिनिके चंद्रमा समान संसार आताप अर अज्ञान अंधकारका नाश करन हारा ऐसा जो सयोगी जिन तींहिविषै अंगोपांग नामा नाम कर्मके उदयतैं द्रव्य-मन फूल्या आठ पांखडीका कमलके आकार हृदयस्थानकके मध्य पाईए है। ताके परिणमनेकौं कारणभूत मन वर्गणाका आगमनतैं द्रव्य मनका परिणमन है तातैं प्राप्तिरूप प्रयोजनतै पूर्वोक्त निमित्ततैं मुख्यपनै भावमनयोगका अभाव है तथापि मन योग उपचार मात्र कह्या है। अथवा पूर्व गाथाविषै कह्या था आत्मप्रदेशनिके कर्म नोकर्मका ग्रहणरूप शक्ति सो भाव मनयोग बहुरि याहीतैं उत्पन्न भया मनोवर्गणारूप पुद्‌गलनिका मनरूप परिणमना सो द्रव्य मनयोग सो इस गाथा सूत्रकरि संभवै है तातैं केवलीके मनयोग कह्या है। तु शब्दकरि केवलीकै पूर्वोक्त उपचार कह्या तिसके प्रयोजनभूत सर्वजीवनिकी दया तत्त्वार्थका उपदेश शुक्लध्यानादि सर्व जानने ॥ २२९ ॥ आगै काययोगका निरूपण प्रारंभै है तहां प्रथम ही काय योगका भेद औदारिक काययोग ताकौं निरुक्तिपूर्वक कहै हैं—

पुरुमहदुदारुरालं एयट्ठो संविजाण तम्हि भवं।
औरालियं तमु(त्तिउ)च्चइ औरालियकायजोगो सो॥२३०॥

पुरुमहदुदारमुरालमेकार्थः संविजानीहि तस्मिन्भवं।
औरालिकं तदुच्यते औरालिककाययोगः सः ॥ २३० ॥

जी० प्र०—उदारं उरालं पुरुमहत् स्थूलमित्यर्थः। स्वार्थे ठण् विधानात् उदारं उरालमेवौदारिकमौरालिकं। उदारे उराले वा भवमौदारिकं औरालिकं वेति भवार्थे ठण्विधानात्। औदारिकमेव उपचितपुद्गलपिंडरूपत्वात् कायः, औदारिकश्चासौ कायश्च औदारिककायः, औदारिकशरीरनामकर्मोदयसंपादितः औदारिकशरीराकारस्थूलपुद्गलस्कंधपरिणामः। वैक्रियिकादिशरीरसूक्ष्मपरिणामादेव महत्त्वसंभवेन औदारिककायः स्यात्। सूक्ष्मपृथ्व्यप्तेजोवायुसाधारणशरीराणां स्थूलत्वाभावात् कथमस्यौदारिकत्वमिति न वाच्यं, ततोऽपि सूक्ष्मतरवैक्रियिकादिशरी ४९२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रापेक्षया अस्य महत्त्वयुक्तत्वात् परमागमरुढ्या वा औदारिकत्वं संभवति। औदारिककायार्थं या आत्मप्रदेशानां कर्मनोकर्माकर्षणशक्तिः सैव औदारिककाययोग इत्युच्यते तदा औदारिकवर्गणास्कंधानां औदारिककायत्वपरिणमनकारणं आत्मप्रदेशपरिस्पंदो वा औदारिककाययोग इति हे भव्य ! त्वं जानीहि इति संबोध्यते। अथवा औदारिककाय एव औदारिककाययोग इति कारणे कार्योपचारात् । अयमुपचारोऽपि निमित्तप्रयोजनवानेव । औदारिककायाद् योगः औदारिककाययोग इति निमित्तस्य तद्योगाकृष्टकर्मनोकर्मपरिणामरूपप्रयोजनस्य च संभवात् ॥ २३० ॥

अथ तन्मिश्रयोगं प्ररूपयति—

मं० प्र०——उदारं पुरु महत् स्थूलमित्येकोऽर्थः उरालशब्दो वा तदेव उदारमेव औदारिकं स्वार्थे ठण्विधानात् तस्मिन् उदारे भवं वा औदारिकं भवार्थे ठण्विधानात् औदारिकश्चासौ कायश्चासौ औदारिककायः—औदारिकशरीरनामकर्मोदयसंपादितः औदारिकशरीराकारः स्थूलपुद्गलस्कंधपरिणामः, वैक्रियिकादिशरारसूक्ष्मपरिणामात् महत्त्वसंभवात् । सूक्ष्मपृथिव्यप्तेजोवायुसाधारणशरीराणां स्थूलत्वाभावात् कथमौदारिकत्वं ? इति चेत्तन्न ततः सूक्ष्मतरवैक्रियिकादिशरीरापेक्षया तेषां महत्त्वेन परमागमरूढ्या वा औदारिकत्वसंभवात्। औदारिककायार्था या आत्मप्रदेशानां कर्मनोकर्माकर्षणशक्तिः स एव औदारिककाययोग इत्युच्यते । औदारिकवर्गणास्कंधानां औदारिककायत्वपरिणमनहेतुः आत्मप्रदेशपरिस्पंदो वा औदारिककाययोग इति हे भव्य ! विजानीहि इति संबोध्यते ॥ २३० ॥ अथ औदारिकायमिश्रयोगं प्ररूपयति----

सं० च०—पुरु वा महत् वा उदार वा उराल वा स्थूल ए एकार्थ हैं सो स्वार्थविषैं ठण् प्रत्ययतैं जो उदार होइ वा उराल होइ सो औदारिक कहिए वा औरालिक भी कहिए। अथवा भव अर्थविषैं ठण् प्रत्ययतैं जो उदारविषै वा उरालविषै उत्पन्न होइ सो औदारिक कहिए वा औरालिक कहिए। बहुरि संचयरूप पुद्गलपिंड सो औदारिक काय कहिए। औदारिक शरीरनामा नामकर्मके उदयतैं निपज्या औदारिक शरीरके आकार स्थूल पुद्गलनिका परिणमन सो औदारिक काय जानना। वैक्रियिक आदि शरीर सूक्ष्म परिणमै है तिनिकी अपेक्षा यहु स्थूल है तातैं औदारिक कहिए है। इहां प्रश्न उपजै है कि सूक्ष्म पृथ्वीकायिकादि जीवनिकै स्थूलपना नाहीं है तिनिकौं औदारिक शरीर कैसै कहिए है ? ताका समाधान—इनहूतै वैक्रियिकादिक शरीर सूक्ष्म परिणमै है तातै तिनकी अपेक्षा स्थूलपना आया। अथवा परमागमविषै ऐसा रूढि है तातै समभिरूढिकरि सूक्ष्म जीवनिकै औदारिक शरीर कह्या सो औदारिक शरीरके निमित्त आत्मप्रदेशनिकै कर्म नोकर्म ग्रहणकी शक्ति सो औ ४९३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दारिक काय योग कहिए है। अथवा औदारिक वर्गणारूप पुद्गल स्कंधनिकौं औदारिक शरीररूप परिणमावनेकौं कारण जो आत्मप्रदेशनिका चंचलपना सो औदारिक काययोग है भव्य ! तू जानि। अथवा औदारिक काय सोई औदारिककाय योग है इहां कारणविषैं कार्यका उपचार जानना। इहां उपचार है सो निमित्त अर प्रयोजन धरै है तहां औदारिक कायतैं जो योग भया सो औदारिक काय योग कहिए सो यहु तौ निमित्त बहुरि तिस योगतै ग्रहे पुद्गलनिका कर्म नोकर्मरूप परिणमन सो प्रयोजन संभवै है। तातैं निमित्त अर प्रयोजनकी अपेक्षा उपचार कह्या है ॥ २३० ॥ आगैं औदारिक मिश्रकाययोगकौं कहैं हैं—

ओरालिय उत्तत्थं विजाण मिस्सं तु अपरिपुण्णं तं।
जो तेण संपजोगो ओरालियमिस्सजोगो सो ॥ २३१ ॥

औरालिकमुक्तार्थं विजानीहि मिश्रं तु अपरिपूर्णं तत्।
यस्तेन संप्रयोगः औरालिकामिश्रयोगः सः ॥ २३० ॥

जी० प्र०—प्रागुक्तलक्षणमौदारिकशरीरं तदेवांतर्मुहूर्तपर्यंतमपूर्णं अपर्याप्तं तावन्मिश्रमित्युच्यते अपर्याप्तकालसंबंधिसमयत्रयसंभविकार्मणकाययोगाकृष्टकार्मणवर्गणासंयुक्तत्वेन परमागमरूढ्या वा अपर्याप्तं—अपर्याप्तशरीरमिश्रमित्यर्थः। ततः कारणादौदारिककायमिश्रेण सह तदर्थं वर्तमानो यः संप्रयोगः आत्मनः कर्मनोकर्मादानशक्तिप्रदेशपरिस्पंदयोगः स शरीरपर्याप्तिनिष्पत्त्यभावेन औदारिकवर्गणास्कंधानां परिपूर्णशरीरपरिणमनासमर्थः औरिककायमिश्रयोग इति विजानीहि ॥ २३१ ॥ अथ वैक्रियिककाययोगं कथयति—

मं० प्र०—उक्तार्थं-प्रागुक्तलक्षणं तदेव औदारिकं शरीरं यावदंतर्मुहूर्तपर्यंतं अपूर्णं-अपर्याप्तं तावन्मिश्रमित्युच्यते। अपर्याप्तकालसंबंधिसमयत्रयसंभविकार्मणयोगाकृष्टकार्मणवर्गणासंयुक्तत्वेन परमागमरूढ्या वा अपर्याप्तं शरीरं मिश्रमित्यर्थः। तेन औदारिककायामिश्रेण सह तदर्थं वर्तमानो यः संप्रयोगः-आत्मनः कर्मनोकर्मादानशक्तिप्रदेशपरिस्पंदसंयोगः स शरीरपर्याप्तिनिष्पत्त्यभावात् औदारिकवर्गणास्कंधानां परिपूर्णशरीरपरिणमनासमर्थः औदारिककायामिश्रयोग इति जानीहि ॥ २३१ ॥ अथ वैक्रियिककाययोगं प्ररूपयति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० च०—पूर्वोक्त लक्षण लीएं जो औदारिक शरीर सो यावत् काल अंतर्मुहूर्त पर्यंत पूर्ण न होइ अपर्याप्त
होइ तावत् काल औदारिक मिश्र कहिए। मिश्र नाम अनेकके मिलनेका है सो इहां अपर्याप्त काल संबंधी तीन
समयनिविषें संभवता जो कार्माण योग ताकी उत्कृष्ट कार्माण वर्गणाकरि संयुक्त है तातैं मिश्र नाम है। अथवा
परमागमविषें ऐसैं ही रूढि है। जो अपर्याप्त शरीरकौं मिश्र कहिए सो तींहि औदारिक मिश्रकरि सहित संप्र-
योग कहिए ताके अर्थि प्रवर्त्या जो आत्माकैं कर्म नोकर्म ग्रहणेकी शक्ति धरै प्रदेशनिका चंचलपना सो योग है
सो शरीर पर्याप्तिकी पूर्णताके अभावतैं औदारिक वर्गणा स्कंधनिकौं संपूर्ण शरीररूप परिणमावनेकौं असमर्थ है
ऐसा औदारिक मिश्र काययोग तू जानि ॥ २३१ ॥ आगैं वैक्रियिक काय योगकौं कहै हैं—

विविहगुणइड्ढिजुत्तं विक्किरियं वा हु होदि वेगुव्वं।
तिस्से भवं च णेयं वेगुव्वियकायजोगो सो ॥ २३२ ॥

विविधगुणर्द्धियुक्तं विक्रियं वा हि भवति विगूर्वं।
तस्मिन् भवं च ज्ञेयं वैगूर्विककाययोगः सः ॥ २३२ ॥

अणिमाद्यतिशयानां ऋद्धिः—महत्त्वं तेन सहितं देवनारकशरीरं
जी० प्र०—विविधगुणर्धियुक्तं—विविधानां—शुभाशुभप्रकाराणां गुणानां—अणिमाद्यतिशयानां ऋद्धिः—महत्त्वं तेन सहितं देवनारकशरीरं वैगूर्विकमिति पाठे विगूर्वः प्रयोजनम-
वैगूर्वं वैक्रियिकं वा भवति। विगूर्वे- विविधगुणोद्योगे भवं वैगूर्वमिति निर्वचनात्। वैक्रियिकमित्यर्थः। वैगूर्विकमिति पाठे विगूर्वः प्रयोजनम-
स्येति वैगूर्विकमिति ठण्प्रत्ययविधानात्। अथवा विविधा क्रिया विक्रिया अनेकोऽणिमादिविकार इत्यर्थः। तस्यां विक्रियायां भवं वैक्रियिकं
सा प्रयोजनमस्येति वा वैक्रियिकं, चशब्दस्य प्रयोजनार्थसमुच्चयार्थत्वात्। यः वैगूर्विककायार्थं तद्रूपपरिणमनयोग्यशरीरवर्गणास्कंधाकर्षण-
शक्तिविशिष्टात्मप्रदेशपरिस्पंदः स वैगूर्विककाययोग इति ज्ञेयः—ज्ञातव्यः। अथ वा वैक्रियिककाय एव वैक्रियिककाययोगः कारणे कार्योपचारात्,
अयमप्युपचारः प्राग्वदेव निमित्तप्रयोजनयुक् 'वैक्रियिककायाद्योगः वैक्रियिककाययोगः इति निमित्तस्य तद्योगात्, कर्मनोकर्मरूपपरिणमनप्रयो-
जनस्य चात्रापि संभवात् ॥ २३२ ॥ अथ वैक्रियिककाययोगसंभवस्थानांतरमाह—
मं० प्र०—विविधगुणर्धियुक्तं—विविधानां—शुभाशुभप्रकाराणां, गुणानां—अणिमाद्यतिशयानां, ऋद्धिः—महत्त्वं, तद्युक्तं देवनारकाणां शरीरं वैगूर्वं। विगूर्वे- ४९५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विविधगुणोद्योगे भवं वैगूर्वमिति निर्वचनात् । वैक्रियिकमित्यर्थः । वैगूर्विकमिति च पाठः । तत्र विगूर्वः प्रयोजनमस्येति वैगूर्विकमिति निरुक्तिः । अथवा विविधा क्रिया-विक्रिया अनेकाणिमादिविकारः तस्यां भवं सा प्रयोजनमस्येति वा वैक्रियिकं । चशब्देन प्रयोजनार्थः समुच्चीयते । य एवंविधवैगूर्विकका-यार्थस्तद्रूपपरिणमनयोग्यशरीरवर्गणास्कंधाकर्षणशक्तिविशिष्टात्मप्रदेशपरिस्पंदः स वैगूर्विककाययोग इति वैक्रियिककाययोग इति ज्ञेयं ॥ २३२ ॥ अथ वैक्रियिककाययोगस्य संभवस्थानांतरं प्ररूपयति-

सं॰ च॰—विविध नानाप्रकार शुभ अशुभरूप अणिमा महिमा आदि गुण तिनकी ऋद्धि जो महंतता तींहिकरि संयुक्त देवनारकीनिका शरीर सो वैगूर्व कहिए वा वैगूर्विक कहिए वा वैक्रियिक कहिए। तहां विगूर्व कहिए नानाप्रकार गुण तिसविषैं भया सो वैगूर्व है अथवा विगूर्व है प्रयोजन जाका सो वैगूर्विक है। इहां ठण् प्रत्यय आया है। अथवा विविध नानाप्रकार जो क्रिया अनेक अणिमा आदि विकार सो विक्रिया तहां भया होइ वा सो विक्रिया जाका प्रयोजन होइ सो वैक्रियिक है। ऐसी निरुक्ति जानना। सो वैगूर्विक शरीरके अर्थि तिस शरीररूप परिणमने योग्य जो आहार वर्गणारूप स्कंधनिके ग्रहण करणेकी शक्ति धरै आत्मप्रदेशनिका चंचलपना सो वैगूर्विक काय योग जानना। अथवा वैक्रियिक काय सोई वैक्रियिक काय योग है इहां कारण-विषै कार्यका उपचार जानना। सो यहु उपचार निमित्त अर प्रयोजन पूर्ववत् धरै है। तहां वैक्रियिक कायतैं जो योग भया सो वैक्रियिक काय योग है। यहु निमित्त अर तिहिं योगतै कर्म नोकर्मका परिणमन होना सो प्रयोजन संभवै है॥ २३२ ॥ आगै देवनारकीकैं तौ कह्या और भी किसी किसीकै वैक्रियिक काययोग संभवै है सो कहै है-

वादरतेऊवाउ,पंचिदियपुण्णगा विगुव्वंति ।
ओरालियं सरीरं विगुव्वणप्पं हवे जेसिं ॥२३३॥

वादरतेजोवायुपंचेंद्रियपूर्णका विगूर्वंति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

औरालिकं शरीरं विगूर्वणात्मकं भवेद्येषां ॥ २३३ ॥

जी॰ प्र॰---बादरा एव स्थूला एव तेजस्कायिकाः वायुकायिकाश्च तथा संज्ञिपंचेंद्रियपर्याप्ततिर्यग्मनुष्याः भोगभूमितिर्यग्मनुष्याश्च स्वस्वौदारिकशरीरं विगूर्वंति--विकुर्वंति वा । ते के ? येषां जीवानां औदारिकशरीरमेव विगूर्वणात्मकं विक्रियात्मकं भवेत् ते जीवाः अपृथग्विक्रियया परिणमंतीत्यर्थः । भोगभूमिजाः चक्रवर्तिनश्च पृथग् विगूर्वंति ॥२३३॥ अथ वैक्रियिककायमिश्रयोगं प्ररूपयति--

मं.प्र.--बादराः--स्थूलाः तेजस्कायिका वायुकायिकाश्च पंचेंद्रियपूर्णकाः संज्ञिपंचेंद्रियपर्याप्ताश्च तिर्यंचो मनुष्याश्च भोगभूमिजादयः, ते विगूर्वंति-विकुर्वंति वा । कथंभूतास्ते ? येषां औदारिकशरीरमेव विगूर्वणात्मकं विक्रियात्मकं भवेत् ते अपृथग्विक्रियया परिणमंतीत्यर्थः । भोगभूमिजाः चक्रवर्तिनश्च पृथगपि विकुर्वंति॥ २३४ ॥ अथ वैक्रियिककायमिश्रयोगं प्ररूपयति--

सं॰ च॰--बादर तेजकायिक बातकायिक जीव बहुरि कर्मभूमिविषैं जे उत्पन्न भए चक्रवर्तिकौं आदि देकरि सैनी पंचेंद्री पर्याप्त तिर्यंच वा मनुष्य बहुरि भोगभूमियां तिर्यंच वा मनुष्य ते औदारिक शरीरकौं विक्रियारूप परिणमावै हैं। जिनिका औदारिक शरीर ही विक्रियालीएं पाइए है ते जीव अपृथक् विक्रिया रूप परिणमै हैं। अर भोगभूमियां चक्रवर्ती पृथक् विक्रिया भी करै है। जो अपने शरीरतैं भिन्न अनेक शरीरादिक विकार रूप करै सो पृथक विक्रिया कहिए। बहुरि जो अपने शरीरहीकौं अनेक विकार रूप करै सो अपृथक् विक्रिया कहिए ॥ २३३ ॥ आगैं वैक्रियिक मिश्रकाय योग कहै हैं--

वेगुव्वियउत्तत्थं विजाण मिस्सं तु अपरिपुण्णं तं ।
जो तेण संपयोगो वेगुव्वियमिस्सजोगो सो ॥ २३४ ॥

वैगूर्विकमुक्तार्थं विजानीहि मिश्रं तु अपरिपूर्णं तत् ।
यस्तेन संप्रयोगो वैगूर्विकमिश्रयोगः सः ॥ २३४ ॥

जी॰ प्र॰--उक्तार्थं प्रागुक्तलक्षणं तत् वैगूर्विकशरीरमेव वैक्रियिकशरीरमेव वा यावदंतर्मुहूर्तमात्रापर्याप्तकालपर्यंतं अपरिपूर्णं शरीरपर्या-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्तिनिष्पत्त्यभावेन वैक्रियिककाययोगजननासमर्थं तावत् तु पुनः औदारिककायमिश्रवन्मिश्रमिति जानीहि तेन वैक्रियिककायमिश्रेण सह यः संप्रयोगः कर्मनोकर्माकर्षणशक्तिसंगतापर्याप्तकालमात्रात्मप्रदेशपरिस्पंदरूपो योगः स वैक्रियिककायमिश्रयोगः अपर्याप्तयोगे मिश्रकाययोग इत्यर्थः ॥ २३४ ॥ अथाहारककाययोगं गाथापंचकेनाह---

मं० प्र०---उक्तार्थं प्रागुक्तलक्षणं, तत्--वैगूर्विकशरीरमेव यावदंतर्मुहूर्तमात्रापर्याप्तकालपर्यंतमपारिपूर्णं शरीरपर्याप्तिनिष्पत्त्यभावात् वैक्रियिककाययोगजननासमर्थं तावत् तु पुनः, औदारिककायमिश्रवत् मिश्रमिति जानीहि। तेन वैक्रियिककायमिश्रेण सह वर्तमानः संप्रयोगः कर्मनोकर्माकर्षणशक्तिसंगतः अपर्याप्तकालप्रमितः आत्मप्रदेशपरिस्पंदरूपो योगः स वैक्रियिककायमिश्रयोगो भवति, अपर्याप्तयोगो मिश्रकाययोग इत्यर्थः ॥ २३४ ॥ अथाहारककाययोगं गाथापंचकेन प्ररूपयति---

सं० च०---पूर्वोक्त लक्षणने लीएं जो वैगूर्विक वा वैक्रियिक शरीर सो यावत् काल अंतर्मुहूर्तपर्यंत पूर्ण न होइ--शरीर पर्याप्तिकी संपूर्णताका अभावकरि वैक्रियिक काययोग उपजावनेकौं असमर्थ होइ तावत काल वैक्रियिक मिश्र कहिए। मिश्रपना इहां भी औदारिक मिश्रवत् जानना। तींहि वैक्रियिक मिश्रकारि सहित संप्रयोग कहिए कर्म नोकर्म ग्रहणकी शक्तिकौं प्राप्त अपर्याप्त कालमात्र आत्माके प्रदेशनिका चंचल होना सो वैक्रियिक मिश्र काययोग कहिए। अपर्याप्त योगका नाम मिश्र योग जानना ॥ २३४ ॥ आगैं आहारक काय योगकौं पांच गाथानिकरि कहै हैं--

आहारस्सुदएण य पमत्तविरदस्स होदि आहारं।
असंजमपरिहरणट्ठं संदेहविणासणट्ठं च ॥ २३५ ॥

आहारस्योदयेन च प्रमत्तविरतस्य भवति आहारकं।
असंयमपरिहरणार्थं संदेहविनाशनार्थं च ॥ २३५ ॥

जी० प्र०---प्रमत्तविरतस्य आहारशरीरनामकर्मोदयेन आहारवर्गणायातपुद्गलस्कंधानां आहारकशरीररूपपरिणमनेनाहारकशरीरं भवति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत् किमर्थं ? सार्धद्वयद्वीपवर्तितीर्थयात्रादिविहारे असंयमपरिहरणार्थं ऋद्धिप्राप्तस्यापि प्रमत्तसंयतस्य श्रुतज्ञानावरणवीर्यांतरायक्षयोपशममांद्ये सति यदा धर्म्यध्यानविरोधी श्रुतार्थसंदेहः स्याचदा तत्संदेहविनाशार्थं च आहारकशरीरमुत्तिष्ठतीत्यर्थः ॥ २३४ ॥

मं० प्र०—प्रमत्तविरतस्य आहारकशरीरनामकर्मणः, उदयेन आहारकं शरीरं शरीरवर्गणायातपुद्गलस्कंधपरिणामरूपं भवति। तत्किमर्थं ? सार्धद्वीपद्वयवर्तितीर्थयात्रादिविहारे असंयमपरिहरणार्थं। ऋद्धिप्राप्तस्यापि प्रमत्तसंयतस्य श्रुतज्ञानावरणवीर्यांतरायक्षयोपशममांद्ये सति यदा धर्मध्यानविरोधिश्रुतार्थसंदेहो जायते तदा तत्संदेहविनाशार्थंच आहारकशरीरमुत्तिष्ठतीत्यर्थः ॥ २३५ ॥

सं०च०—प्रमत्त विरती षष्ठम गुणस्थानवर्ती मुनि ताके आहारक शरीर नामा नाम कर्मके उदयतैं आहार वर्गणारूप पुद्गल स्कंधनिका आहारक शरीररूप परिणमनेकरि आहारक शरीर हो है। सो किसै अर्थि हो है? अढाई द्वीपविषैं तीर्थयात्रादिक निमित्त वा असंयम दूरि करनेके निमित्त वा ऋद्धियुक्त होतैं भी श्रुतज्ञानावरण वीर्यांतरायका क्षयोपशमकी मंदता होतैं कोऊ धर्म्यध्यानका विरोधी शास्त्रका अर्थविषैं संदेह उपजै ताके दूरि करनेके निमित्त आहारक शरीर उपजै है ॥ २३५ ॥

णियखेत्ते केवलिदुगविरहे णिक्कम्मणपहुदिकल्लाणे।
परखेत्ते संवित्ते जिणजिणघरवंदणट्ठं च ॥ २३६ ॥

निजक्षेत्रे केवलिद्विकविरहे निष्क्रमणप्रभृतिकल्याणे।
परक्षेत्रे संवृत्ते जिनजिनगृहवंदनार्थं च ॥ २३६ ॥

जी० प्र०—निजक्षेत्रे स्ववृत्त्याधारदेशे केवलियुगरहिते--केवलिश्रुतकेवलिद्वयाभावे, परक्षेत्रे औदारिकशरीरगमनागोचरे दूरक्षेत्रे केवलिश्रुतकेवलिद्वये तीर्थकरपरिनिष्क्रमणादिकल्याणत्रये च संवृत्ते वर्तमाने सति असंयमपरिहरणार्थं संदेहविनाशनार्थं जिनजिनगृहवंदनार्थं च गंतुं समुद्युक्तस्य प्रमत्तसंयतस्य आहारकशरीरं भवति ॥ २३६ ॥

मं० प्र०—निजक्षेत्रे-स्ववृत्त्याधारदेशे, केवलिद्विकविरहे--केवलिश्रुतकेवल्यभावे, परक्षेत्रे--औदारिकशरीरगमनागोचरे, दूरदेशे केवलिद्विके तीर्थकर-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परिनिष्क्रमणप्रभृतिकल्याणे च संपृचे-वर्तमाने सति असंयमपरिहरणार्थं संदेहविनाशार्थं जिनजिनगृहवंदनार्थं च गंतुमुद्युक्तस्य प्रमत्तसंयतस्य आहारकशरीरं भवति ॥ २३६ ॥

सं० च०—निज क्षेत्र जहां अपनी गमनशक्ति होइ तहां केवली श्रुतकेवली न पाइए । बहुरि परक्षेत्र जहां अपने औदारिक शरीरकी गमन शक्ति न होइ तहां केवली श्रुतकेवली होइ अथवा तहां तप ज्ञान निर्वाण कल्याणक होइ तौ तहां असंयम दूर करनेके निमित्त, वा संदेह दूर करनेके निमित्त, वा जिन अर जिनमंदिर तिनकी वंदना करनेके निमित्त, गमनकरनेकौं उद्यमी भया जो प्रमत्त संयमी ताकैं आहारक शरीर हो है ॥२३६॥

उत्तमअंगम्हि हवे धादुविहीणं सुहं असंहणणं ।
सुहसंठाणं धवलं हत्थपमाणं पसत्थुदयं ॥ २३७ ॥

उत्तमांगे भवेत् धातुविहीनं शुभमसंहननं ।
शुभसंस्थानं धवलं हस्तप्रमाणं प्रशस्तोदयं ॥ २३७ ॥

जी० प्र०—तदाहारकशरीरं कथंभूतं ? धातुविहीनं रसादिसप्तधातुरहितं, शुभं शुभनामकर्मोदयापादितप्रशस्तावयवविशिष्टं, असंहननं—अस्थिबंधनरहितं, शुभसंस्थानं—प्रशस्तसमचतुरस्रसंस्थानांगोपांगविन्यासयुतं, धवलं—चंद्रकांतनिर्मितमिवातिविशदं, हस्तप्रमाणं चतुर्विंशतिव्यवहारांगुलप्रमितं प्रशस्तोदयं अप्रशस्तोदयप्रकृतिषु आहारकशरीरतद्बंधनसंघातांगोपांगादिप्रशस्तप्रकृत्युदययुतं, एवंविधं आहारकशरीरं उत्तमांगे भवेत् जायते ॥ २३७ ॥

मं० प्र०—तदाहारकशरीरं कथमभूतमित्याह--धातुविहीनं--रसादिसप्तधातुरहितं । पुनः कीदृशं ? शुभं--शुभनामकर्मोदयापादितप्रशस्तावयवं । पुनरपि कथंभूतं ? असंहननं--अस्थिबंधनरहितं, पुनरपि किंविशिष्टं ? शुभसंस्थानं--शुभं--प्रशस्तं, समचतुरस्राख्यं संस्थानं--अंगोपांगविन्यासो यस्य तत् शुभसंस्थानं । भूयोऽपि कीदृशं ? धवलं--चंद्रकांतनिर्मितमिवातिविशदं । भूयोपि किंविशिष्टं ? हस्तप्रमाणं चतुर्विंशतिव्यवहारांगुलप्रमितं । पुनरपि कीदृशं ? प्रशस्तोदयं आहारकशरीरबंधनसंघातांगोपांगादिप्रशस्तप्रकृत्युदयसहितं एवंविधमाहारकशरीरमुत्तमांगे भवेत्--जायेत ॥ २३७ ॥

सं० च०—सो आहारक शरीर कैसा हो है रसादिक सप्त धातुकरि रहित हो है । बहुरि शुभ नाम कर्मके

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उदयतैं प्रशस्त अवयवका धारी शुभ हो है। बहुरि संहनन जो हाडोंका बंधान तींहिकरि रहित हो है। बहुरि शुभ जो सम चतुरस्र संस्थान वा अंगोपांगका आकार ताका धारक हो है। बहुरि चंद्रकांतमणि समान श्वेत वर्ण हो है। बहुरि एक हस्त प्रमाण हो है इहां चौवीस व्यवहारांगुल प्रमाण एक हस्त जानना। बहुरि प्रशस्त जो आहारक शरीर बंधनादिक पुण्य रूप प्रकृति तिनिका है उदय जाकैं ऐसा हो है। ऐसा आहारक शरीर उत्तमांग जो है मुनिका मस्तक तहां उत्पन्न हो है ॥ २३७ ॥

अव्वाघादी अंतोमुहुत्तकालट्ठिदी जहण्णिदरे।
पज्जत्तीसंपुण्णे मरणंपि कदाचि संभवई ॥ २३८ ॥

अव्याघाति अंतर्मुहूर्तकालास्थिती जघन्येतरे।
पर्याप्तिसंपूर्णायां मरणमपि कदाचित् संभवति ॥ २३८ ॥

जी० प्र०—तदाहारकशरीरं परेण स्वस्य स्वेन परस्य वा व्याघातरहितं बाधावर्जितं ततः कारणादेव वैक्रियिकशरीरवत् वज्रशिलादिनिर्भेदनसमर्थं जघन्योत्कृष्टेनांतर्मुहूर्तकालस्थितियुतं, तच्छरीरपर्याप्तिपरिपूर्णायां सत्यां कदाचिच्छरी र्धियुक्तस्य प्रमत्तसंयतस्य आहारककाययोगकाले स्वायुःक्षयवशेन मरणमपि संभवति ॥ २३८ ॥

मं० प्र०—तदाहारकशरीरं परेण स्वस्य स्वेन परस्य वा, व्याघातरहितं-बाधावर्जितं अत एव वैक्रियिकशरीरवत् वज्राशिलादिनिर्भेदनसमर्थं, जघन्येन उत्कर्षेण च अंतर्मुहूर्तकालस्थिति। तस्य शरीरपर्याप्तौ संपूर्णायां कदाचित् कस्यचिदाहारकर्धियुक्तस्य प्रमत्तसंयतस्य आहारककाययोगकाले स्वायुःक्षयवशान्मरणं संभवत्यपि ॥ २३८ ॥

सं० च०—सो आहारक शरीर अव्याबाध है वैक्रियिक शरीरकी ज्यों कोई वज्र पर्वतादिककरि रुकि सकै नाहीं आप किसीकौं रोकैं नाहीं। बहुरि जाकी जघन्य वा उत्कृष्ट अंतर्मुहूर्त कालप्रमाण स्थिति है ऐसा है। बहुरि जब आहारक शरीर पर्याप्ति पूर्ण होइ तब कदाचित् कोई आहारक काय योगका धारी प्रमत्त मुनिका आहारक काययोगका कालविषैं अपने आयुके क्षयतैं मरण भी संभवै है ॥ २३८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आहरदि अणेण मुणी सुहमे अत्थे सयस्स संदेहे।
गत्ता केवलिपासं तह्मा आहारगो जोगो ॥ २३९ ॥

आहरत्यनेन मुनिः सूक्ष्मानर्थान् स्वस्य संदेहे।
गत्वा केवलिपार्श्वं तस्मादाहारको योगः ॥ २३९ ॥

जी॰ प्र॰—यतः कारणात् आहारकर्धियुक्तः प्रमत्तमुनीश्वरः स्वस्य प्रवचनपदार्थेषु संशये जाते तद्व्यवच्छेदार्थं अनेनाहारकशरीरेण केवलिश्रीपादपार्श्वं गत्वा सूक्ष्मार्थान् आहरति गृह्णाति इत्याहारः, आहार एव आहारकशरीरं ततः कारणाच्छरीरपर्याप्तिनिष्पत्तौ सत्यां आहारकवर्गणाभिः आहारकशरीरयोग्यपुद्गलस्कंधाकर्षणशक्तिविशिष्टात्मप्रदेशपरिस्पंदः आहारककाययोग इति ज्ञातव्यं ॥ २३९ ॥ अथ तन्मिश्रयोगं प्ररूपयति -

मं॰ प्र॰—मुनिः- आहारकर्धियुक्तः प्रमत्तसंयतः, स्वस्य प्रवचनपदार्थेषु संशये जाते सति तद्व्यच्छेदार्थं अनेन केवलिपार्श्वं गत्वा सूक्ष्मानर्थानाहरति- गृह्णातीत्याहारः आहार एव आहारकं शरीरं यतस्तस्मात् कारणात् शरीरपर्याप्तिनिष्पत्तौ सत्यां आहारकवर्गणापुद्गलस्कंधाकर्षणशक्तिविशिष्टात्मप्रदेशपरिस्पंदः आहारककाययोग इति ज्ञातव्यः ॥ २३९ ॥ आहारककायमिश्रयोगं प्ररूपयति-

सं॰च॰—आहारक ऋद्धिकरि संयुक्त प्रमत्त मुनि सो पदार्थनिविषैं आपके संदेह होतैं ताके दूरि करनेके अर्थि केवलीके चरणके निकट जाइ आपतैं अन्य जो केवली तींहिकरि जो सूक्ष्म यथार्थ अर्थकौं आहरति कहिए ग्रहण करै सो आहारक कहिए। आहारस्वरूप होइ ताकौं आहारक कहिए। सो ताकैं शरीर पर्याप्ति पूर्ण होतैं आहार वर्गणानिकरि आहारक शरीर योग्य पुद्गलस्कंधानिके ग्रहण करनेकी शक्ति धरै आत्मप्रदेशनिका चंचलपना सो आहारक काययोग जानना ॥ २३९ ॥ आगैं आहारक मिश्र काययोगकौं कहै हैं—

आहारयमुत्तत्थं विजाण मिस्सं तु अपरिपुण्णं तं।
जो तेण संपजोगो आहारयमिस्सजोगो सो ॥२४०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आहारकमुक्तार्थं विजनीहि मिश्रं तु अपरिपूर्णं तत्।
यस्तेन संप्रयोगः आहारकामिश्रयोगः सः ॥ २४० ॥

जी०प्र०---यत् उक्तार्थं प्रागुक्तस्वरूपं आहारकशरीरं तदेव यावदपर्याप्तकालांतर्मुहूर्तपर्यंतमपरिपूर्णं आहारकवर्गणायातपुद्गलस्कंधान् आहारकशरीराकारेण परिणमयितुमसमर्थं तावन्मिश्रमित्युच्यते। तत्राकालमाऽयौदारिकशरीरवर्गणामिश्रत्वेन ताभिः सह वर्तमानो यः संप्रयोगः--अपरिपूर्णशक्तियुक्तात्मप्रदेशपरिस्पंदः स आहारककायमिश्रयोग इति भण्यते। तु शब्दः इममर्थं हे भव्य! त्वं जानीहि इति विशेषं कथयति ॥ २४० ॥ अथ कार्मणकाययोगमाह—

मं० प्र०---उक्तार्थं प्रागुक्तस्वरूपं, तदाहारकशरीरमेव यावदपर्याप्तकालांतर्मुहूर्तपर्यंतमपरिपूर्णमाहारकवर्गणायातपुद्गलस्कंधं आहारकशरीराकारेण परिणमयितुमसमर्थं तावन्मिश्रमित्युच्यते तत्राकालमाऽयौदारिकशरीरवर्गणामिश्रत्वात् तेन सह वर्तमानो यः संप्रयोगः अपरिपूर्णशक्तियुक्तात्मप्रदेशपरिस्पंदः स आहारककायमिश्रयोग इति भण्यते। तुशब्दः इममर्थं हे भव्य! जानीहीति विशेषं प्रदर्शयति ॥ २४० ॥ अथ कार्मणकाययोगं प्ररूपयति—

सं० च०---पूर्वोक्त लक्षण लीएं आहारक शरीर सो यावत् काल अंतर्मुहूर्तपर्यंत पूर्ण न होइ आहार वर्गणारूप पुद्गल स्कंधनिका आहारक शरीररूप परिणमावनेकौं असमर्थ होइ तावत् काल आहारक मिश्र कहिए। इहां पूर्वै जो औदारिक शरीररूप वर्गणा है ताके मिलापतैं मिश्रपना जानना। तींहिं आहारक मिश्रकरि सहित जो संप्रयोग कहिए अपूर्ण शक्तियुक्त आत्माके प्रदेशनिका चंचलपना सो आहारक मिश्रकाययोग है भव्य! तू जानि ॥ २४० ॥ आगैं कार्माण काय योगकौं कहैं हैं—

कम्मेव य कम्मभवं कम्मइयं जो दु तेण संजोगो।
कम्मइयकायजोगो इगिविगतिगसमयकालेसु ॥२४१॥

कर्मैव च कर्मभवं कार्मणं यस्तु तेन संयोगः।
कार्मणकाययोगः एकद्विकत्रिकसमयकालेषु ॥ २४१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी० प्र०----कर्मैव--अष्टविधकर्मस्कंध एव, कार्मणं--कार्मणशरीरं, अथवा कर्मभवं--कार्मणशरीरनामकर्मोदयजातं तत् कार्मणं तेन कार्मणस्कंधेन सह वर्तमानो यः संप्रयोगः आत्मनः कर्माकर्षणशक्तिसंगतप्रदेशपरिस्पंदरूपो योगः स कार्मणकाययोग इत्युच्यते। स कार्मणकाययोगः एकद्वित्रिसमयविशिष्टविग्रहगतिकालेषु केवलिसमुद्घातसंबंधिप्रतरद्वयलोकपूरणे समयत्रये च प्रवर्तते शेषकाले नास्तीति विभागः तुशब्देन सूच्यते। अनेन शेषयोगानामव्याघातविषये अंतर्मुहूर्तकालो व्याघातविषये एकसमयादि यथासंभवांतर्मुहूर्तपर्यंतकालश्च एकजीवं प्रति भणितो भवति। नानाजीवापेक्षया उवसमसुहुमेत्याद्यष्टसांतरमार्गणावर्जितशेषनिरंतरमार्गणानां सर्वकाल इति विशेषो ज्ञातव्यः ॥ २४१ ॥ अथ योगप्रवृत्तिप्रकारमाह----

मं० प्र०----कर्मैव--अष्टविधकार्मणस्कंध एव कार्मणशरीरं, वा अथवा कर्मभवं--कार्मणशरीरनामकर्मोदयप्रभवं कार्मणशरीरं खलु--स्फुटं, भवति तेन कार्मणशरीरेण सह वर्तमानो यः संयोगः आत्मनः कर्माकर्षणशक्तिसंगतप्रदेशपरिस्पंदरूपो योगः स कार्मणकाययोग इत्युच्यते। सोऽपि कार्मणकाययोगः एकद्वित्रिसमयाविशिष्टेषु विग्रहगतिकालेषु केवलिसमुद्घातसंबंधिषु प्रतरद्वयलोकपूरणसमयेषु वा त्रिषु प्रवर्तते नान्यकाले इति विभागः तुशब्देन सूचितः। अनेन शेषयोगानामव्याघातविषये अंतर्मुहूर्तः कालः व्याघातविषये एकसमयादियथासंभवांतर्मुहूर्तपर्यंतः एकजीवं प्रति भणितः। नानाजीवान् प्रति अष्ट, उवसमसुहुमेत्यादि सांतरमार्गणाः मुक्त्वा शेषनिरंतरमार्गणानां सर्वकाल इति विशेषो ज्ञातव्यः ॥ २४१ ॥ अथ योगप्रवृत्तिप्रकारं प्ररूपयति--

सं० च०---कर्म कहिए ज्ञानावरणादिरूप पुद्गलस्कंध सोई कार्माण शरीर जानना। अथवा कर्म जो कार्माण शरीर नामा नामकर्म ताके उदयकरि भया सो कार्माण शरीर कहिए तींहि कार्माण स्कंधसहित वर्तमान जो संप्रयोगः कहिए आत्माके कर्मग्रहणशक्ति धरै प्रदेशनिका चंचलपना सो कार्माणकाय योग है सो विग्रह गतिविषैं एक समय वा दोय समय वा तीन समय काल प्रमाण हो है अर केवल समुद्घातविषैं प्रतरद्विक अर लोकपूर्ण इनि तीन समयनिविषैं हो है और कालविषैं कार्माण योग न हो है। याहीतैं यहु जान्या जो कार्माणविना और जे योग कहे ते रुकै नाहीं तौ अंतर्मुहूर्त पर्यंत एक योगका परिणमन उत्कृष्ट रहै पीछैं और योग होइ। बहुरि जो अन्यकरि रुकै तौ समयकौं आदि देकरि अंतर्मुहूर्तपर्यंत एक योगका परिणमन यथासंभव जानना। सो एक जीवकी अपेक्षा तौ ऐसैं है अर नाना जीवकी अपेक्षा 'उपसम सुहुम' इत्यादि गाथानिकरि आठ सांतर मार्गणा विना अन्य मार्गणानिका सर्वकाल सद्भाव कह्या हो है ॥ २४१ ॥ आगे योगनिकी प्रवृत्तिका विधान दिखावै है—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वेगुव्वियआहारयकिरिया ण समं पमत्तविरदह्मि ।
जोगोवि एक्ककाले एक्केव य होदि णियमेण ॥ २४२॥

वैगूर्विकाहारकक्रिया न समं प्रमत्तविरते ।
योगोऽपि एककाले एक एव च भवति नियमेन ॥ २४२ ॥

जी० प्र०----प्रमत्तविरते वैक्रियिकयोगक्रिया आहारकयोगक्रिया च द्वे युगपन्न संभवतः । तद्यथा—कदाचिदाहारकयोगमवलंब्य प्रमत्तसंयतस्य गमनादिक्रिया प्रवर्तते तदा विक्रियर्द्धिबलेन वैक्रियिकयोगमवलंब्य वैक्रियिकक्रिया न घटते । आहारकर्धिविक्रियर्ध्योस्तत्र युगपद्वृत्तिविरोधात् । अनेन गणधरादीनां इतरर्धियुगपद्वृत्तिसंभवः सूचितः । तथा योगोऽपि एककाले स्वयोग्यांतर्मुहूर्ते एक एव नियमेन भवति द्वौ त्रयो वा योगा एकजीवे युगपन्न संभवंति तथा सति एकयोगकाले अन्ययोगकार्यरूपगमनादिक्रियाणां संभवो नामातिक्रांतयोगसंस्कारजनितो न विरुध्यते कुलालदंडप्रयोगाभावेऽपि तत्संस्कारबलेन चक्रभ्रमणवत्संस्कारक्षये वाणपतनवत्क्रियानिवृत्तिदर्शनादेव संस्कारवशेन युगपदनेकक्रियाप्रवृत्तिप्रसंगे सति प्रमत्तविरते वैक्रियिकाहारकशरीरक्रिययोः युगपत्प्रवृत्तिप्रतिषेधः आचार्येण प्ररूपितो जातः ॥ २४२ ॥ अथ योगरहितात्मस्वरूपं प्ररूपयति—

मं० प्र०----प्रमत्तविरते वैक्रियिकयोगक्रिया आहारकयोगक्रिया च समं युगपन्न संभवतः । यदा आहारकयोगमवलंब्य प्रमत्तसंयतस्य गमनादिक्रिया प्रवर्तते तदा विक्रियर्धिबलेन वैक्रियिकयोगमवलंब्य क्रिया तस्य न घटते आहारकर्धिविक्रियर्ध्योर्युगपद्वृत्तिविरोधात् । अनेन गणधरादीनामितरर्धियुगपद्वृत्ति संभवो दर्शितः । तथा योगोऽपि एकस्मिन् काले स्वयोग्यांतर्मुहूर्ते एक एव नियमेन भवति न द्वौ त्रयो वा योगाः, तथापि एकयोगकाले अन्ययोगकार्याणां गमनादिक्रियाणां संभवोऽतिक्रांतयोगसंस्कारजनितो न विरुध्यते, कुलालदंडप्रयोगाभावेऽपि तत्संस्कारबलाच्चक्रभ्रमणवत् । संस्कारक्षये तु वाणपतनवत् क्रियानिवृत्तिर्दृश्यते । अत एव संस्कारवशाद् युगपदनेकक्रियाप्रवृत्तिप्रसंगे प्रमत्तविरते वैक्रियिकाहारकशरीरक्रिययोर्युगपद्वृत्तिप्रतिषेधः आचार्येण प्ररूपितः॥२४२॥ अथ योगरहितात्मस्वरूपं प्ररूपयति--

सं० च०----प्रमत्तविरत षष्ठम गुणस्थानवर्ती मुनिकैं समकालविषैं युगपत् वैक्रियिक काययोगकी क्रिया अर आहारक योगकी क्रिया नाहीं । ऐसा नाहीं कि एकही कालविषैं आहारक शरीरकौं धारि गमनागमनादि कार्यकौं करैं अर विक्रिया ऋद्धिकौं धारि विक्रिया संबंधी कार्यकौं भी करै, दोऊ ऐसैं एकही होइ यातैं यहु जा- ५०५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्या कि गणधरादिकनिकैं और ऋद्धि युगपत् प्रवर्तें तौ विरुद्ध नाहीं । बहुरि तैसैं ही अपने योग्य अंतर्मुहूर्त मात्र एक कालविषैं एक जीवकैं युगपत् एकही योग होइ, दोय वा तीन योग युगपत् न होइ यहु नियम है । जो एक योगका कालविषैं अन्य योग संबंधी गमनादि क्रियाकी प्रवृत्ति देखिए है सो पूर्वें जो योग भया था ताके संस्कारतैं हो है । जैसैं कुंभार पहिले चाक दंडकरि फेन्या था पीछे कुंभार उस चाककौं छांडि अन्य कार्यकौं लाग्या वह चाक संस्कारके बलतैं केतेक काल आप ही फिन्या करै संस्कार मिटि जाय तब फिरै नाहीं तैसैं आत्मा पहिले जिस योगरूप परिणया था सो उसको छांडि अन्य योगरूप परिणया वह योग संस्कारके बलतैं आप ही प्रवर्तें है । संस्कार मिटैं जैसैं छेड्या हूवा वाण गिरै तैसैं प्रवर्तना मिटै है तातैं संस्कारतैं एक कालविषै अनेक योगनिकी प्रवृत्ति जानना । बहुरि प्रमत्तविरतीकैं संस्कारकी अपेक्षा भी एक काल वैक्रियिक वा आहारक योगकी प्रवृत्ति न हो है ऐसैं आचार्यकरि वर्णन कीया है सो जानना ॥ २४२ ॥ आगे योगरहित आत्माके स्वरूपकौं कहै हैं—

जेसिं ण संति जोगा सुहासुहा पुण्णपावसंजणया ।
ते होंति अजोगिजिणा अणोवमाणंतबलकलिया ॥२४३॥

येषां न संति योगाः शुभाशुभाः पुण्यपापसंजनकाः ।
ते भवंति अयोगिजिनाः अनुपमानंतबलकलिताः ॥ २४३ ॥

जी॰ प्र॰—येषामात्मनां पुण्यपापसंजनकाः प्रशस्ताप्रशस्तकर्मबंधहेतवः कायवाङ्मनःकर्मलक्षणाः शुभाशुभयोगाः न संति ते आत्मानः अयोगिजिनाः चरमगुणस्थानवर्त्ययोगिकेवलिनः तदनंतरगुणस्थानातीतसिद्धपर्यायपरिणताश्च भवंति विद्यंते । अत्र योगाभावे सति अयोगिकेवल्यादीनां बलाभावः प्रसज्यते अस्मदादिषु बलस्य योगाश्रितत्वदर्शनात् इत्याशंक्य इदमुच्यते अनुपमानंतबलकलिताः—अनुपमं अस्मदाद्युपमातिक्रांतं, अनंतं अक्षयानंताविभागप्रतिच्छेदसमग्रं बलं वीर्यं शक्तिः कालत्रयगोचरलोकालोकवर्तिसकलद्रव्यगुणपर्याययुगपद्ग्रहणसामर्थ्यं तेन ५०६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कलिताः व्याप्ताः तत्त्वस्वभावपरिणताः इत्यनंतवलकलिताः इत्येवं योगाश्रितवलं प्रतिनियतविषयं भवेत्, परमात्मनो वलं केवलज्ञानादिवदात्म-स्वभावत्वेन अप्रतिनियतविषयमित्यनंतवलकलिता इति भावार्थः ॥ २४३ ॥ अथ शरी स्य कर्मनोकर्मविभागं कथयति—

मं० प्र०---येषामात्मनां पुण्यपापसंजनकाः प्रशस्ताप्रशस्तकर्मबंधहेतवः शुभाशुभा योगाः कायवाग्मनःकर्मलक्षणाः न संति ते आत्मानः अयोगि-जिनाः-चरमगुणस्थानवर्तिनः, अयोगकेवलिनः, तदनंतरगुणस्थानातीतसिद्धत्वपर्यायपरिणताश्च भवंति-विद्यंते । ननु योगाभावे तेषां वलाभावः प्रसज्यते अस्मदादिषु वलस्य योगाश्रितत्वदर्शनादित्याशंक्य इदमुच्यते--अनुपमानंतवलकलिताः--अनुपमं--अस्मादाद्युपमातिक्रांतं, अनंतं--अक्षयानंताविभागप्रतिच्छेद-समग्रं वलं वीर्यं शक्तिः कालत्रयगोचरलोकाकोकवर्तिसकलद्रव्यगुणपर्याययुगपद्ग्रहणसमर्थं तेन कलिताः-व्याप्ताः, तत्स्वभावपरिणता इत्यर्थः योगाश्रितस्य वलस्य प्रतिनियतविषयत्वात् परमात्मनो वलस्य केवलज्ञानादिवदात्मस्वभावत्वेन अप्रतिनियतविषयत्वात् ॥२४३॥ अथ शरीरस्य कर्मनोकर्मविभागं प्ररूपयति--

सं० च०—जिन आत्मनिके पुण्य पापरूप कर्म प्रकृतिके बंधकौ उपजावन हारे शुभरूप वा अशुभरूप मन वचन कायके योग न होंहिं ते अयोगी जिन चौदह्वां अंत गुणस्थानवर्ती वा गुणस्थानतीत सिद्ध भगवान जानने। कोऊ जानेगा कि योगनिके अभावतै उनके वलका अभाव है जैसै हम सारिखे जीवनिकैं योगनिके आश्रयभूत बल देखिए है तहां कहिए है। कैसे हैं-सिद्ध ? 'अनुपमानंतबलकलिताः' कहिए जिनके वलकौं हम सारिखे जीवनिका बलकी उपमा न बनै है। बहुरि केवलज्ञानवत् अक्षयानंत अविभाग प्रतिच्छेद लीएं है ऐसा वल वीर्य जो सर्व द्रव्य गुण पर्यायका युगपत् ग्रहणैकी समर्थता तींहिकरि व्याप्त है। तींहि स्वभाव परिणए हैं। योगनिका बल कर्माधीन है तातै प्रमाण लीएं है अनंत नाहीं। परमात्माका वल केवलज्ञानादिवत् आत्मस्वभावरूप है तातै प्रमाणरहित अनंत है ऐसा जानना ॥२४३॥ आगै शरीरौंका कर्म अर नोकर्म भेद दिखावै हैं—

ओरालियवेगुव्वियआहारयतेजणामकम्मुदये।
चउणोकम्मसरीरा कम्मेव य होदि कम्मइयं ॥२४४॥

औरालिकवैगूर्विकाहारकतेजोनामकर्मोदये।
चतुर्नोकर्मशरीराणि कर्मैव च भवति कार्मणं ॥ २४४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी० प्र०--औदारिकवैक्रियिकाहारकतैजसशरीरनामकर्मोदये सति यथासंख्यं औदारिकवैक्रियिकाहारकतैजसनामानि चत्वारि नोकर्मशरीराणि भवंति । नोशब्दस्य विपर्यये ईषदर्थे च वृत्तेः । तेषां शरीराणां कर्मवदात्मगुणघातित्वगत्यादिपारतंत्र्यहेतुत्वाभावेन कर्मविपर्ययत्वात् कर्मसहकारित्वेन ईषत्कर्मत्वाच्च नोकर्मशरीरत्वसंभवात् । कर्मैव कार्मणशरीरनामकर्मोदयसंजातज्ञानावरणाद्यष्टविधकार्मणस्कंधसमूह एव कार्मणशरीरं भवति तदन्यस्य परमागमे कार्मणशरीरत्वेन कथनाभावात् ॥ २४४ ॥ अथौदारिकादिशरीराणां समयप्रबद्धादिसंख्यां गाथाद्वयेनाह—

मं० प्र०---औदारिकवैक्रियिकाहारकतैजसशरिरनामकर्मणां चतुर्णां उदये सति चत्वारि नोकर्मशरीराणि भवंति । अकर्मशरीराणि, ईषत्कर्मशरीराणीति वा नोकर्मशरीराणि नोशब्दस्य च विवक्षिताविपर्यये ईषदर्थे च वृत्तिसंभवात् नोइंद्रियादिवत् कर्मशरीरस्यैव आत्मगुणघातित्वगत्यादिपारतंत्र्यहेतुत्वाभावात् कर्मविपर्ययत्वं, कर्मशरीरसहकारित्वाच्च ईषत्कर्मशरीरत्वमिति नोकर्मशरीरत्वं युक्तं । कर्मैव कार्मणशरीरनामकर्मणः उदये सति कार्मणं शरीरं भवति ज्ञानावरणाद्यष्टविधकार्मणस्कंधसमूहं विना अन्यस्य कार्मणशरीरस्य परमागमे अनाभिधानात् । अथौदारिकादिशरीराणां समयप्रबद्धादिसंख्यां गाथाद्वयेन प्ररूपयति—

सं० च०---औदारिक वैक्रियिक आहारक तैजसरूप जो नामकर्मकी प्रकृति तिनके उदयतैं जे औदारिक आदि च्यारि शरीर होंइ ते नोकर्म शरीर जानने । नो शब्दका दोय अर्थ है एकतौ निषेधरूप अर एक ईषत् स्तोकरूप सो इहां कार्माणकी ज्यों ए च्यारि शरीर आत्माके गुणकौं घातै नाहीं वा गत्यादिकरूप पराधीन न करि सकै तातैं कर्मतैं विपरीत लक्षण धरनेकरि इनिकौं अकर्म शरीर कहिए वा कर्मशरीरके ए सहकारी है तातै ईषत् कर्म शरीर कहिए ऐसै इनिकौं नोकर्म शरीर कहै जैसै मनका नो इंद्रिय कहिए हैं तैसै नोकर्म जानने बहुरि कार्माण शरीर नामा नामकर्मके उदयतै ज्ञानावरणादिक कर्म स्कंधरूप कर्म सोई कर्म शरीरजानना ॥२४४॥ आगै जे औदारिकादिक शरीर कहे तिनिका समय प्रबद्धादिककी संख्या दोय गाथानिकरि कहिए है—

परमाणूहिं अणंतहिं वग्गणसण्णा हु होदि एक्का हु ।
ताहिं अणंतहिं णियमा समयपबद्धो हवे एक्को ॥ २४५ ॥

परमाणुभिरनंतैर्वर्गणासंज्ञा हि भवत्येका हि ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ताभिरनंतैर्नियमात् समयप्रबद्धो भवेदेकः ॥ २४५ ॥

जी॰ प्र॰--अनंतैः द्विकवारानंतमध्यपतितसिद्धानंतैकभागमात्राभव्यराश्यनंतगुणपरिमाणैरेव परमाणुभिरेका वर्गणा भवति खलु न संख्यातैर्वा असंख्यातैर्वा परमाणुभिरित्यर्थः । यद्यपि पुद्गलद्रव्यस्याणुसंख्यातासंख्यातपरमाणुस्कंधरूपवर्गणाः संति तथाप्यत्रौदारिकादिशरीरप्रकरणे औदारिकवैक्रियिकाहारकतैजसकार्मणवर्गणानामेव ग्रहणात् । ताभिश्च सिद्धानंतैकभागाभव्यराश्यनंतप्रमितानंतवर्गणाभिर्नियमेनैकः समयप्रबद्धो भवति । समये समयेन वा प्रबध्यतेस्म कर्मनोकर्मरूपतया आत्मना संबध्यते स्म यः पुद्गलस्कंधः स समयप्रबद्ध इति निर्वचनात् । आत्मनो मिथ्यादर्शनादिसंक्लेशपरिणामैः प्रतिसमयं कर्मनोकर्मरूपतया परिणममानः तद्योग्यपुद्गलस्कंधः समयप्रबद्ध इति स्याद्वादसिद्धांतप्रसिद्धो बोद्धव्यः । नियमशब्देन वर्गणासमयप्रबद्धशब्दार्थौ द्वावप्येवमुक्तस्वरूपौ स्याद्वादिनामेव गोचरौ, न सर्वथैकांतवादिनामित्ययं विभागो व्यवस्थापितः (व्यवस्थाप्यते) ॥ २४५ ॥

मं॰ प्र॰--अनंतैः द्विकवारानंतमध्यपतितैः सिद्धानंतैकभागमात्रैः, अभव्यानंतगुणप्रमाणैश्च परमाणुभिरेका वर्गणेति संज्ञया भवति खलु स्फुटं, न संख्यातैः नाप्यसंख्यातैः परमाणुभिर्वर्गणा भवति किंतु अनंतैरेव भवतीति निश्चीयत इत्यर्थः । पुद्गलद्रव्यस्य अणुसंख्यातासंख्यातपरमाणुस्कंधरूपवर्गणासद्भावेऽपि अस्मिन्नौदारिकादिशरीरप्रकरणे आहारतैजसकार्मणवर्गणानामेव ग्रहणात् । ताभिर्वर्गणाभिरनंताभिः सिद्धानंतभागाभव्यानंतगुणप्रमिताभिर्नियमादेकः समयप्रबद्धो नाम योग्यपुद्गलस्कंधो भवति । समयेन प्रबध्यतेस्म कर्मनोकर्मरूपतया आत्मना संबध्यते स्म यः पुद्गलस्कंधः स समयप्रबद्धः इति निरुक्तिसिद्धः आत्मनो मिथ्यादर्शनादिसंक्लेशपरिणामैः प्रतिसमयं कर्मनोकर्मरूपतया परिणममानस्तत्तद्योग्यपुद्गलस्कंधः समयप्रबद्ध इति स्याद्वादसिद्धांतप्रसिद्धो बोद्धव्यः । नियमशब्देन वर्गणासमयप्रबद्धशब्दार्थौ एवमुक्तस्वरूपौ स्याद्वादिनामेव गोचरौ न सर्वथैकांतवादिनामिति विभागो व्यवस्थापितः ॥ २४५ ॥

स॰ चं॰—सिद्धराशिके अनंतवे भाग अर अभव्यराशिस्यौं अनंतगुणा ऐसा जो मध्य अनंतानंतका भेद तीहि प्रमाण पुद्गल परमाणूनिकरि जो एक स्कंध होइ सो वर्गणा ऐसा नाम जानना । संख्यात वा असंख्यात परमाणूनिकरि वर्गणा न हो है । जातैं यद्यपि आगैं पुद्गल वर्गणाके तेईस भेद कहैंगे तहां अणु वर्गणा संख्याताणुवर्गणा असंख्याताणुवर्गणा आदि भेद हैं तथापि इहां औदारिक आदि शरीरनिका प्रकरणविषैं आहारवर्गणा वा तैजसवर्गणा वा कार्माणवर्गणाका ही ग्रहण जानना । बहुरि सिद्धनिके अनंतवे भाग वा अभव्यनितैं अनंतगुणी ऐसी मध्य अनंतानंत गुणी प्रमाण वर्गणा तिनिकरि एक समय प्रबद्ध हो है । समयविषैं वा समयकरि यहु जीव कर्म नोकर्मरूप पूर्वोक्त प्रमाण वर्गणानिका समूहरूप स्कंधकरि संबंध करै है तातैं याकौं समय प्र-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बद्ध कहिए है। ऐसा वर्गणाका वा समय प्रबद्धका भेद स्याद्वादमतविषैं है अन्यमतविषैं नाहीं। यहु विशेष नियम शब्दकरि जानना। इहां कोऊ प्रश्न करै कि एक ही प्रमाणकौं सिद्धराशिका अनंतवां भाग वा अभव्यराशितैं अनंतगुणा ऐसैं दोय प्रकार कह्या सो कौन कारण? ताका समाधान-कि सिद्धराशिका अनंतवां भागके अनंत भेद हैं तहां अभव्यराशितैं अनंतगुणा जो सिद्धराशिका अनंतवां भाग होइ सो इहां प्रमाण जानना। ऐसैं अल्प बहुत्वकरि तिस प्रमाणका विशेष जाननेके अर्थि दोय प्रकार कह्या है अन्य किछू प्रयोजन नाहीं॥२४५॥

ताणं समयपबद्धा सेडिअसंखेज्जभागगुणिदकमा।
णंतेण य तेजदुगा परं परं होदि सुहमं खु॥ २४६॥

तेषां समयप्रबद्धाः श्रेण्यसंख्येयभागगुणितक्रमाः।
अनंतेन च तेजोद्विकाः परं परं भवति सूक्ष्मं खलु॥ २४६॥

जी० प्र०—तेषां औदारिकवैक्रियिकाहारकतैजसकार्मणशरीराणां संबंधिनः समयप्रबद्धाः सर्वेऽपि न परस्परं सदृशाः किंतु उत्तरोत्तरेऽधिकपरमाणुसंख्याविशिष्टा भवंति। तद्यथा-सर्वतः स्तोकः औदारिकसमयप्रबद्धः। औ स। ततः श्रेण्यसंख्येयभागगुणितपरमाणुप्रमितो वैक्रियिकशरीरसमयप्रबद्धः। वै स a। ततः श्रेण्यसंख्येयभागगुणितपरमाणुप्रमितः आहारकशरीरसमयप्रबद्धः। आ स $\overline{a}$ $\overline{a}$। श्रेण्यसंख्येयभागगुणितक्रमा इत्यनेन आहारकशरीरसमयप्रबद्धपर्यंतमेव विवक्षितत्वात्। तेन परं तदाहारकशरीरसमयप्रबद्धादग्रे तैजसशरीरसमयप्रबद्धोनंतगुणपरमाणुप्रमितः। तै स $\overline{a}$ $\overline{a}$ ख। ततः कार्मणशरीरसमयप्रबद्धोऽनंतगुणपरमाणुप्रमितः। का स $\overline{a}$ $\overline{a}$ ख ख। अनंतेन च तैजसद्विकमित्यनेन आहारकशरीरसमयप्रबद्धात् परं तैजसकार्मणशरीरसमयप्रबद्धयोरनंतानंतगुणत्वकथनात्। चशब्देन प्रत्येकसमुच्चयः सूचितः। यद्येवं तर्हि वैक्रियिकादिशरीराणां उत्तरोत्तरं प्रदेशाधिक्येन स्थूलत्वं प्रसज्यते इत्याशंक्य परं परं सूक्ष्मं भवतीत्युक्तं। यद्यपि वैक्रियिकाद्युत्तरोत्तरशरीराणां बहुपरमाणुसंचयत्वं तथापि बंधपरिणतिविशेषेण सूक्ष्मसूक्ष्मावगाहनसंभवः कार्पासपिंडायःपिंडवन्न विरुध्यते खल्विति निश्चेतव्यं॥ २४६॥ अथौदारिकादिशरीराणां समयप्रबद्धवर्गणयोरवगाहनभेदानाह—

मं० प्र०——तेषामौदारिकवैक्रियिकाहारकतैजसकार्मणानां शरीराणां संबंधिनः समयप्रबद्धाः सर्वे परस्परसदृशा न भवंति किंतु उत्तरोत्तरमधिकपरमाणु-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संख्याः । तद्यथा–सर्वतस्तोकः औदारिकशरीरसमयप्रबद्धः । औ स । ततः श्रेण्यसंख्येयभागगुणितपरमाणुप्रमितो वैक्रियिकशरीरसमयप्रबद्धः । वै स $\overline{a}$ । ततः श्रेण्यसंख्येयभागगुणितपरमाणुप्रमितः आहारकशरीरसमयप्रबद्धः । आ स $\overline{a}$ $\overline{a}$ । श्रेण्यसंख्येयभागगुणितक्रमा इत्यनेन आहारकशरीरसमयप्रबद्धपर्यंतमेव विवक्षितत्वात् । ततोऽनंतगुणपरमाणुप्रमितस्तैजसशरीरसमयप्रबद्धः । तै. स. $\overline{a}$ $\overline{a}$ ख । ततोऽनंतगुणपरमाणुप्रमितः कार्मणशरीरसमयप्रबद्धः । का स $\overline{a}$ $\overline{a}$ ख ख । अनंतेन च तेजोद्विकमित्यनेन आहारकशरीरसमयप्रबद्धात्तैजसकार्मणशरीरसमयप्रबद्धयोरनंतानंतगुणत्वकथनात् । चशब्देन प्रत्येकसमुच्चयः सूच्यते । यद्येवं तर्हि वैक्रियिकादिशरीराणां उत्तरोत्तरप्रदेशाधिक्येन स्थूलत्वं प्रसज्यत इत्याशंक्य परं परं सूक्ष्मं भवति खल्वित्युच्यते । यद्यपि वैक्रियिकाद्युत्तरोत्तरशरीराणां बहुपरमाणुसंचयत्वं तथापि बंधपरिणामविशेषवशात् सूक्ष्मसूक्ष्मावगाहसंभवः कार्पासपिंडायःपिंडवत् न विरुध्यते इति खलुशब्देन निश्चीयते । अथौदारिकादिशरीराणां समयप्रबद्धवर्गणयोरवगाहनभेदं प्ररूपयति ॥ २४६ ॥

सं० च०–तिन पंच शरीरनिके समय प्रबद्ध सर्व ही समान नाही हैं उत्तरोत्तर अधिक परमाणूनिका समूह लीए हैं सो कहिए है परमाणूनिका प्रमाणकरि औदारिक शरीरका समय प्रबद्ध सर्वतैं स्तोक है यातैं श्रेणीका असंख्यातवां भाग गुणा परमाणू प्रमाण वैक्रियिकका समय प्रबद्ध है। बहुरि यातैं भी श्रेणीका असंख्यातवां भाग गुणा परमाणू प्रमाण आहारकका समय प्रबद्ध है ऐसैं आहारक पर्यंत जगत श्रेणीका असंख्यातवां भागकौं गुणकारकी विवक्षा जाननी । तातैं परैं आहारकके समय प्रबद्धतैं अनंतगुणा परमाणूप्रमाण तैजसका समय प्रबद्ध है । बहुरि यातैं भी अनंतगुणा परमाणू प्रमाण कार्माणका समय प्रबद्ध है । इहां 'अनंतेन तेजोद्विकं' इस करि तैजसकार्माणविषैं अनंतानंत गुणा प्रमाण जानना । बहुरि इहां कोऊ आशंका करै कि जो उत्तरोत्तर अधिके अधिके परमाणू कहे तो उत्तरोत्तर स्थूलता भी होयगी तहां कहिए है–परं परं सूक्ष्मं भवति कहिए उत्तरोत्तर सूक्ष्म है । औदारिकतैं वैक्रियिक सूक्ष्म है वैक्रियिकतैं आहारक सूक्ष्म है आहारकतैं तैजस सूक्ष्म है तैजसतैं कार्माण सूक्ष्म है। यद्यपि परमाणू तौ अधिक अधिक हैं तथापि स्कंधका बंधनमें विशेष है तातैं उत्तरोत्तर सूक्ष्म है जैसैं कपासके पिंडतैं लोहके पिंडमें अधिकपना होतैं भी कपासके पिंडतैं लोहका पिंड क्षेत्र थोरा रोकै तैसैं जानना ॥२४६॥ आगैं औदारिकादिक शरीरनिका समयप्रबद्ध अर वर्गणा ते कितने कितने क्षेत्रविषैं रहै ऐसा अवगाहना भेदनिकौं कहै हैं–

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ओगाहणाणि ताणं समयपबद्धाण वग्गणाणं च।
अंगुलअसंखभागा उबरुबरिमसंखगुणहीणा ॥ २४७ ॥

अवगाहनानि तेषां समयप्रबद्धानां वर्गणानां च।
अंगुलासंख्यभागा उपर्युपरि असंख्यगुणहीनानि ॥ २४७ ॥

जी॰ प्र॰—तेषामौदारिकादिशरीराणां संबंधिनां समयप्रबद्धानां तत्तद्वर्गणानां च अवगाहनानि घनांगुलासंख्यातभागप्रमितानि उपर्युपरि असंख्येयगुणहीनानि भवंति। तद्यथा-औदारिकशरीरसमयप्रबद्धस्यावगाहनक्षेत्रं सूच्यंगुलासंख्येयभागभक्तघनांगुलप्रमितं। औ स ६ । तद्वर्गणावगाहनक्षेत्रं, तदेव पुनरपि सूच्यंगुलासंख्येयभागभक्तं घनांगुलप्रमितं। औ व ६ । एवं वैक्रियिकाद्युत्तरोत्तरशरीरसमयप्रबद्धवर्गणावगाहनक्षेत्रे द्वे अपि पूर्वपूर्वतत्क्षेत्राभ्यां सूच्यंगुलासंख्येयभागमात्रासंख्येयगुणहीने गच्छतः।

वै स $\bar{a}$ । ६ २ २ a a	व । ६ २ २ २ a a a	आ । स । $\bar{a}\,\bar{a}$ । ६ २ २ २ a a a	व । ६ २ २ २ २ a a a a	तै स । $\bar{a}\,\bar{a}$ ख । ६ २ २ २ २ a a a a	व । ६ २ २ २ २ २ a a a a a
का । स । $\bar{a}\,\bar{a}$ ख ख ६ । २ २ २ २ २ a a a a a	व । ६ २ २ २ २ २ २ a a a a a a	॥२४७॥ अमुमेवार्थं श्रीमाधवचंद्रत्रैविद्यदेवा अपि कथयंति—			

मं॰ प्र॰—तेषां-औदारिकादिशरीराणां संबंधिनां समयप्रबद्धानां तत्तद्वर्गणानां चावगाहनानि घनांगुलासंख्यातभागप्रमितानि उपर्युपरि असंख्येयगुण-

१ इस गाथाकी जी॰ प्र॰ और मं॰ प्र॰ दोनो टीका एकसी है इस लिये और एकही जी॰ प्र॰ टीकाकी प्रतिमें पाठ मिला है इसलिये मं॰ प्र॰ टीकाको ही जी॰ प्र॰ में मिला दिया मालूम पड़ता है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हीनानि भवंति। तद्यथा–औदारिकशरीरसमयप्रबद्धस्यावगाहनक्षेत्रं सूच्यंगुलासंख्येयभागभक्तघनांगुलप्रमितं औ स ६
२
३
तद्वर्गणावगाहनक्षेत्रं तदेव पुनरपि सूच्यंगुलासंख्येयभागभक्तं औ व ६
२।२
३।३
एवं वैक्रियिकाद्युत्तरोत्तरशरीरसमयप्रबद्धवर्गणावगाहनक्षेत्रे द्वे अपि पूर्वपूर्वतत्क्षेत्राभ्यां सूच्यंगुलासंख्येयभागमात्रा-संख्येयगुणहीने गच्छतः वै स $\bar{a}$।६ व।६ आ स $\bar{a}$ $\bar{a}$।६ व।६ तै. स· $\bar{a}$ $\bar{a}$ ख ६ व।६

२२ २२२ २२२ २२२२ २२२२ २२२२२
३३ ३३३ ३३३ ३३३३ ३३३३ ३३३३३

का स ३ ३ ख ख।६ व।६
२२२२२ २२२२२२
३३३३३ ३३३३३३

अमुमेवार्थं श्रीमाधवचंद्रत्रैविद्यदेवा अपि कथयंति ॥ २४७ ॥

सं० च०–तिनि औदारिकादिक शरीर संबंधी समयप्रबद्ध वा वर्गणा तिनिका अवगाहनाक्षेत्र घनांगुलके असंख्यातवे भागमात्र है तथापि ऊपरि असंख्यातगुणां घाटि क्रमतै जानना। सोई कहिए है–औदारिक शरीरके समय प्रबद्धनिका अवगाहना क्षेत्र सूच्यंगुलका असंख्यातवां भागका भाग घनांगुलकौं दीएं जो परिमाण आवै तितना जानना। बहुरि याकौं सूच्यंगुलका असंख्यातवां भागका भाग दीजिये तब औदारिक शरीरकी वर्गणाके अवगाहन क्षेत्रका प्रमाण होइ। बहुरि यातैं सूच्यंगुलका असंख्यात भाग प्रमाण जो असंख्यात तिहिं असंख्यातगुणा घटता क्रमतैं वैक्रियिकादि शरीरके समय प्रबद्धकी वा वर्गणाकी अवगाहनाका परिमाण हो है। वैक्रियिक शरीरका समय प्रबद्धकी अवगाहनाकौं सूच्यंगुलका असंख्यातवां भागकरि गुणि औदारिक समयप्रबद्धकी अवगाहना हो है। वैक्रियिक शरीरकी वर्गणाकी अवगाहनाकौं सूच्यंगुलका असंख्यातवां भाग करि गुणैं औदारिककी वर्गणाकी अवगाहना हो है ऐसैं ही वैक्रियिकतैं आहारककी आहारकतैं तैजसकी तैज- ५१३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सतैं कार्माणकी समयप्रबद्ध वर्गणाकी अवगाहना असंख्यात असंख्यातगुणी क्रमतैं घाटि जाननी ॥ २४७ ॥

इस ही अर्थकों श्रीमाधवचंद्र त्रैविद्य देव कहैं हैं—

तस्समयबद्धवग्गणओगाहो सूइअंगुलासंख—

भागहिदबिंदअंगुलमुवरुवरिं तेन भजिदकमा ॥२४८॥

तत्समयबद्धवर्गणावगाहः सूच्यंगुलासंख्य—

भागहितवृदांगुलमुपर्युपरि तेन भजितक्रमाः ॥ २४८ ॥

जी० प्र०—पूर्वोक्तौदारिकादिशरीरसंबंधिसमयप्रबद्धतद्वर्गणानामवगाहनानि घनांगुलासंख्येयभागप्रमितान्यपि उपर्युपर्यसंख्यातगुणहीनक्रमाणि भवंति । तद्यथा—औदारिकशरीरसमयप्रबद्धस्यावगाहनक्षेत्रं सूच्यंगुलासंख्येयभागभाजितघनांगुलप्रमितं औ स ६/२/a तद्वर्गणावगाहनक्षेत्रं तस्यैव सूच्यंगुलासंख्येयभागप्रमाणं । तद्व ६/२ २/a a एवं वैक्रियिकाद्युत्तरोत्तरशरीराणामपि समयप्रबद्धतद्वर्गणावगाहौ पूर्वपूर्वतदवगाहनक्षेत्राभ्यां सूच्यंगुलासंख्येयभागगुणहीनौ गच्छतः ।

वै । स a̅ ६ २ । २ a a	तद्व ६ २ । २ । २ a a a	आ । स a̅ । a̅ । ६ २ । २ । २ a a a	तद्व ६ २ । २ । २ । २ a a a a	तै । स a̅ । a̅ ख ६ २ । २ । २ २ a a a a
तद्व ६ २ । २ । २ । २ । २ a a a a a	का । स a̅ a̅ ख ख ६ २ । २ । २ । २ । २ a a a a a	तद्व ६ २ । २ । २ । २ । २ २ a a a a a a	॥ २४८ ॥ अथ विस्रसोपचयस्वरूपं प्ररूपयति—	

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं० प्र०—तत्समयप्रबद्धवर्गणावगाहाः सूच्यंगुलासंख्येयभागहतवृंदांगुलमात्राः उपर्युपरि तेन सूच्यंगुलासंख्येयभागेन भाजितक्रमा इति । अथ विस्रसोपचयस्वरूपं प्ररूपयति ।। २४८ ॥

सं० च०—तिनि समय प्रबद्ध वा वर्गणाकी अवगाहनाका परिमाण सूच्यंगुलका असंख्यातवां भागका भाग घनागुलकौं दीएं जो परिमाण होइ तितना जानना बहुरि ऊपरि ऊपरि पूर्व पूर्वतैं सूच्यंगुलके असंख्यातवे भाग मात्र जानने गुणहानिका अर भाग देनेका एक अर्थ है। सो वैक्रियिकका समयप्रबद्ध वर्गणाकी अवगाहनाकौं सूच्यंगुलका असंख्यातवां भागकरि गुणै औदारिकका समयप्रबद्ध वर्गणाकी अवगाहना होइ अथवा औदारिकका समयप्रबद्ध वर्गणाकी अवगाहनाकौं सूच्यंगुलका असंख्यातवां भागका भाग दीयें वैक्रियिक शरीरका समयप्रबद्ध वर्गणाका परिमाण होइ दोऊ एकार्थ हैं असैं ही सबका जानना ॥ २४८ ॥ आगे विस्रसोपचयका स्वरूप कहै हैं—

जीवादो णंतगुणा पडिपरमाणुम्हि विस्ससोवचया ।
जीवेण य समवेदा एक्केक्कं पडिसमाणा हु ॥ २४९ ॥

जीवतोऽनंतगुणाः प्रतिपरमाणौ विस्रसोपचयाः ।
जीवेन च समवेता एकैकं प्रति समाना हि ॥ २४९ ॥

जी० प्र०—जीवराशितोऽनंतानंतगुणितविस्रसोपचयाः पूर्वोक्तौदारिकादिकर्मनोकर्मपरमाणुषु एकैकं प्रति समानसंख्यावच्छिन्नाः जीवप्रदेशैः सह समवेताः संबद्धाः संयुक्ताः संति । विस्रसा स्वभावेनैव आत्मपरिणामनिरपेक्षतयैव उपचीयंते—तत्तत्कर्मनोकर्मपरमाणुस्निग्धरूक्षत्वगुणेन स्कंधतां प्रतिपद्यंते इति विस्रसोपचयाः कर्मनोकर्मपरिणतिरहितपरमाणव इति भावः । यद्येकस्मिन् कर्मनोकर्मपरिमाणौ एतावान् विस्रसोपचयः तदा किंचिदूनद्व्यर्धगुणहानिगुणितसमयप्रबद्धमात्रकर्मनोकर्मसत्त्वपरमाणूनां कियान् विस्रसोपचयः ? इति त्रैराशिकं कृत्वा प्र १ । फ १६ ख । इ स ७।१२—इच्छां फलेन संगुण्य प्रमाणेन भक्त्वा ये लब्धा आत्मप्रदेशस्थितसर्वविस्रसोपचयपरमाणवः ते एतावंतः ५१५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स ७ १२—१६ ख । एतेषु पुनः किंचिदूनद्व्यर्धगुणहानिगुणितसमयप्रबद्धप्रमाणकर्मनोकर्मसत्त्वे प्रक्षिप्ते सति विस्रसोपचयसहितकर्मनोकर्मसत्त्वमेतावद्भवति । स ३ १२—। १६ ख । २४९ । अथ कर्मनोकर्मोत्कृष्टसंचयस्वरूपस्थानलक्षणं प्ररूपयति—

मं० प्र०--- एकैकं कर्मनोकर्मपरमाणु प्रति समानाः जीवराशेरनंतगुणसंख्यया सदृशाः, जीवेन आत्मप्रदेशैः सह समवेताः--संबद्धाः, विस्रसोपचयाः, विस्रसा स्वभावेनैव-आत्मपरिणामनिरपेक्षतयैव उपचीयंते तत्परमाणुस्निग्धरूक्षत्वगुणेन स्कंधतां प्रतिपद्यंते इति विस्रसोपचया इति निरुक्तिसिद्धस्वाचलक्षणं पृथग्नोक्तं । ते च कर्मनोकर्मपरिणतिरहितास्तद्योग्याः । अत्रायं विशेषः-एकस्मिन् कर्मनोकर्मपरिमाणौ प्र १ यद्येतावंतो विस्रसोपचयपरमाणवः संति फ १६ ख । तदा एतावत्सु किंचिदूनद्व्यर्धगुणहानिगुणितसमयप्रबद्धमात्रकर्मनोकर्मसत्त्वपरमाणुषु कियंतः स्युरिति । इ । स ३ १२-। त्रैराशिकेन लब्धा आत्मप्रदेशस्थितसर्वविस्रसोपचयपरमाणवः इयंतो भवेयुः । स ३ १२–१६ ख । एतेषु किंचिदूनद्व्यर्धगुणहानिगुणितसमयप्रबद्धमात्रकर्मनोकर्मसत्त्वे प्रक्षिप्ते विस्रसोपचयसहितकर्मनोकर्मसत्त्वमीदृशं भवति । स ३ १२–१६ ख ॥ २४९ ॥ अथ कर्मनोकर्मोत्कृष्टसंचयस्थानं प्ररूपयति—

सं० च०—कर्म वा नोकर्मकी जितनी परमाणु हैं तिनि एक एक परमाणूनि प्रति जीव राशितैं अनंतानंत गुणा विस्रसोपचयरूप परमाणू जीवके प्रदेशनिस्यों एकक्षेत्रावगाही हैं। विस्रसा कहिए अपने हीस्वभावकरि आत्माके परिणाम विनाही उपचीयंते कहिए कर्म नोकर्म रूपविना परिणए ऐसे कर्म नोकर्म रूप स्कंध तीहिं विषैं स्निग्धरूक्ष गुणका विशेष करि मिलि एक स्कंधरूप होंहि ते विश्रसोपचय कहिए ऐसा निरुक्ति ही करि याका लक्षण आया तातैं जुदा लक्षण न कह्या। विस्रसोपचय रूप परमाणू कर्म नोकर्म रूप होनेको योग्य हैं। उनही कर्म नोकर्मके स्कंधविषैं एकक्षेत्रावगाही होइ संबंधरूप परिणमिकरि एक स्कंधरूप हो हैं वर्तमान कर्म नोकर्मरूप परिणए हैं नाहीं ऐसैं विस्रसोपचयरूप परमाणू जानने ते कितने हैं? सो कहिए हैं—

जो एक कर्म वा नोकर्म संबंधी परमाणूके जीवराशितैं अनंत गुणे विस्रसोपचयरूप परमाणू होंइ तौ किछू घाटि ड्योढ गुण हानिका प्रमाण करि गुणित समय प्रबद्ध प्रमाण सर्वसत्त्वरूप कर्म वा नो कर्मके परमाणूनिके केते विस्रसोपचय परमाणू होंहि ऐसैं त्रैराशिक करना। इहां प्रमाण राशि एक, फलराशि अनंतगुणा जीवराशि, इच्छाराशि किंचिदून द्व्यर्धगुणहानिगुणित समयप्रबद्ध तहां इच्छाकौं फलकरि गुणि प्रमाणका भागदीएं लब्धराशिमात्र आत्माके प्रदेशनिविषैं तिष्ठते सर्वविस्रसोपचय परमाणूनिका प्रमाण जानना। बहुरि इस विस्रसो-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पचय परमाणूनिका परिमाणविषै किंचिदून द्व्यर्धगुणहानिगुणित समय प्रबद्धमात्र कर्म नोकर्मरूप परमाणूनिका परिमाणकों मिलाएं विस्रसोपचयसहित कर्म नोकर्मका सत्त्व हो है ॥ २४९ ॥ आगें कर्म नोकर्मनिका उत्कृष्टसंचयका स्वरूप वा स्थान वा लक्षण प्ररूपैं हैं—

उक्कस्सट्ठिदिचरिमे सगसगउक्कस्ससंचओ होदि ।
पणदेहाणं वरजोगादिससामग्गिसहियाणं ॥ २५० ॥

उत्कृष्टस्थितिचरमे स्वकस्वकोत्कृष्टसंचयो भवति ।
पंचदेहानां वरयोगादिस्वसामग्रीसहितानां ॥ २५० ॥

जी० प्र०—उत्कृष्टयोगादिस्वस्वसामग्रीसहितानां जीवानां औदारिकादिपंचशरीराणां स्वस्वोत्कृष्टस्थितिचरमसमये स्वस्वोत्कृष्टकर्मनोकर्मपरमाणुसंचयो भवति । तत्तत्स्थितिप्रथमसमयादारभ्य प्रतिसमयं एकैकसमयप्रबद्धे गलितैकैकनिषेकावशेषमात्रेषु तावत्सु संचीयमानेषु सत्सु तत्स्थितिचरमसमये आयुर्वर्जितकर्मनोकर्मशरीराणां गलितावशेषोत्कृष्टसंचयः किंचिदूनद्व्यर्धगुणहानिगुणितसमयप्रबद्धमात्रः सत्त्वं भवति स ३ १२-॥ २५० ॥ अथ श्रीमाधवचंद्रत्रैविद्यदेवाः उत्कृष्टसंचयसामग्रीविशेषं कथयंति—

मं० प्र०—उत्कृष्टयोगादिस्वसामग्रीसहितानां जीवानां, औदारिकादिपंचशरीराणां स्वस्वोत्कृष्टस्थितिचरमसमये स्वस्वोत्कृष्टकर्मनोकर्मपरमाणुसंचयो भवति । तत्तत्स्थितिप्रथमसमयादारभ्य समयं प्रति एकैकस्मिन् समयप्रबद्धे गलितैकनिषेकावशेषमात्रे संचीयमाने सति तत्स्थितिचरमसमये आयुर्वर्जितकर्मनोकर्मशरीराणां गलितावशेषः उत्कृष्टसंचयः किंचिदूनद्व्यर्धगुणहानिगुणितसमयप्रबद्धमात्रो भवति ॥ २५० ॥ अथ श्रीमाधवचंद्रत्रैविद्यदेवाः उत्कृष्टसंचयसामग्रीविशेषं प्रदर्शयंति—

सं० च०—उत्कृष्ट योग आदि अपने अपने उत्कृष्ट बंध होनेकी सामग्री करि सहित जे जीव तिनिकैं औदारिकादिक पंच शरीरनिका उत्कृष्टसंचय जो उत्कृष्टपनैं परमाणूनिका संबंध सो अपनी अपनी उत्कृष्ट स्थितिका अंत समयविषैं हो है । तहां स्थितिके पहले समयतैं लगाइ एक एक समयविषैं एक एक समय प्रबद्ध बंधै बहुरि आगैं कहिए है तिसप्रकार एक एक समयप्रबद्धका एक एक निषेककी निर्जरा होइ अवशेष संचयरूप होते संतै

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अंतसमयविषैं किछू घाटि ड्योढगुणहानिकरि समयप्रबद्धकौं गुणैं जो परिमाण होइ तितना उत्कृष्टपनैं सत्त्व हो है ॥ २५० ॥ आगैं श्रीमाधवचंद्रत्रैविद्यदेव उत्कृष्ट संचय होनेकी सामग्री कहैं है—

आवासया हु भवअद्धाउस्सं जोगसंकिलेसो य ।
ओकट्टुक्कट्टणया छच्चेदे गुणिदकम्मंसे ॥ २५१ ॥

आवश्यकानि हि भवाद्धा आयुष्यं योगसंक्लेशौ च ।
अपकर्षणोत्कर्षणके षट् चैते गुणितकर्मांशे ॥ २५१ ॥

जी० प्र०—भवाद्धा आयुष्यं योगः संक्लेशः अपकर्षणं उत्कर्षणकं चेति षट् उत्कृष्टकर्मसंचयकर्तुर्जीवस्य आवश्यकानि इत्युच्यंते । गुणितकर्मांशे उत्कृष्टकर्मसंचययुते जीवे तेषामवश्यंभावात् अग्रे तानि विस्तरेण वक्ष्यंति खलु स्फुटं ॥ २५१ ॥ अथौदारिकादिपंचशरीराणामुत्कृष्टस्थितिप्रमाणमाह—

मं० प्र०—गुणितकर्मांशे उत्कृष्टकर्मसंचयवति जीवे एतान्यत्रोच्यमानानि षडावश्यकानि अवश्यंभवानि उत्कृष्टसंचयकारणानि भवंति । तानि कानि ? इति चेत् भवाद्धा, आयुष्यं, योगः, संक्लेशः, अपकर्षणं, उत्कर्षणं, इत्येतानि अग्रे विस्तरतो वक्ष्यमाणलक्षणानि ॥ २५१ ॥ अथौदारिकादिपंचशरीराणामुत्कृष्टस्थितिप्रमाणं कथयति—

सं०च०—गुणितकर्मांश कहिए उत्कृष्ट संचय जाकैं होइ ऐसा जो जीव तींहि विषैं उत्कृष्ट संचयकौं कारण ए छह अवश्य होंइ तातैं उत्कृष्ट संचय करनेवाले जीवकैं ए छह आवश्यक कहिए। भवाद्धा १ आयुर्बल २ योग ३ संक्लेश ४ अपकर्षण ५ उत्कर्षण ६ ए छह जानने इनिका स्वरूप विस्तार लीएं आगैं कहिएगा। अब पंचशरीरनिका बंध उदय सत्त्वादिकविषैं परमाणूनिका प्रमाणका विशेष जाननेकौं स्थिति आदि कहिए है तहां औदारिकादिक पंच शरीरनिकी उत्कृष्ट स्थितिका परिमाण कहै हैं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पल्लतियं उवहीणं तेत्तीसंतोमुहुत्त उवहीणं।
छावट्ठी कम्मट्ठिदि बंधुक्कस्सट्ठिदी ताणं ॥ २५२ ॥

पल्यत्रयमुदधीनां त्रयस्त्रिंशदंतर्मुहूर्तं उदधीनां।
षट्षष्टिः कर्मस्थितिर्बंधोत्कृष्टस्थितिस्तेषां ॥ २५२ ॥

जी॰ प्र॰----तेषां औदारिकादिपंचशरीराणां यथासंख्यं बंधोत्कृष्टस्थितयः त्रिपल्यं त्रयस्त्रिंशत्सागरोपमं अंतर्मुहूर्तः षट्षष्टिसागरोपमं उत्कृष्टकर्मस्थितिः, सा च सामान्येन सप्ततिकोटीकोटिसागरोपमाणि विशेषेण तु ज्ञानावरणदर्शनावरणवेदनीयांतरायाणां त्रिंशत्कोटीकोटिसागरोपमाणि मोहनीयस्य सप्ततिकोटीकोटिसागरोपमाणि, नामगोत्रयोः विंशतिकोटीकोटिसागरोपमाणि आयुषस्त्रयस्त्रिंशत्सागरोपमाणि भवंति। बंधप्रकरणे प्ररूपिता सर्वोत्कृष्टस्थितिर्ग्राह्या ॥ २५२ ॥ अथौदारिकादिपंचशरीरोत्कृष्टस्थितीनां गुणहान्यायामं प्रमाणयति—

मं॰ प्र॰—तेषां पंचशरीराणां मध्ये औदारिकशरीरोत्कृष्टस्थितिः पल्यत्रयप्रमिता। वैक्रियिकशरीरस्योदधीनां सागरोपमाणां त्रयस्त्रिंशत्। आहारकशरीरस्यांतर्मुहूर्तमात्री। तैजसशरीरस्य षट्षष्टिसागरोपमप्रमाणा। कार्मणशरीरस्य कर्मबंधोत्कृष्टस्थितिरेव। आयुर्वर्जितानां ज्ञानावरणादिसप्तमूलप्रकृतीनामुत्तरप्रकृतीनां च त्रिंशत्कोटिकोटिसागरोपमादिसप्ततिकोटिकोटिसागरोपमपर्यंतप्रमिता स्थितिः। बंधप्रकरणे प्ररूपिता सर्वोत्कृष्टस्थितिर्ग्राह्या॥२५२॥अथ पंचशरीरोत्कृष्टस्थितिषु गुणहानिप्रमाणं प्ररूपयति—

सं॰ च॰—तिनि औदारिक आदि पंच शरीरनिकी बंधरूप उत्कृष्टस्थितिविषै औदारिक शरीरकी उत्कृष्टस्थिति तीनपल्य है। वैक्रियिक शरीरकी तेतीस सागर है। आहारक शरीरकी अंतर्मुहूर्त है। तैजस शरीरकी छ्यासठि सागर है कार्मणकी स्थितिबंधविषै जो उत्कृष्ट कर्मकी स्थिति सो जाननी। सो सामान्यपनै सत्तर कोडाकोडी सागर है विशेषपनैं ज्ञानावरण दर्शनावरण वेदनीय अंतरायकी तीस कोडाकोडी, मोहनीयकी सत्तर कोडाकोडी, नाम गोत्रकी वीस कोडाकोडी, आयुकी तेतीस सागर प्रमाण जाननी। ऐसैं पंच शरीरनिकी उत्कृष्टस्थिति कही। अब इहां यथार्थ ज्ञानके निमित्त अंक संदृष्टिकरि दृष्टांत कहिए है—

जैसैं समय प्रबद्धका परिमाण तरेसठिसै ६३०० परमाणू स्थिति अडतालीस समय होइ तैसैं इहां पंचशरीर-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निकी समय प्रबद्धके परमाणूनिका परिमाण अर स्थितिके जेते समय होहिं तिनिका परमाणूका परिमाण पूर्वोक्त जानना ॥ २५२ ॥ आगैं इनि पंचशरीरनिकी उत्कृष्ट स्थितिनिविषैं गुणहानि आयामका परिमाण कहै हैं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सेलट्ठिकट्ठवेत्ते णियभेएणणुहरंतओ माणो।
णारयतिरियणरामरगईसु उप्पायओ कमसो॥ २८५॥

शैलास्थिकाष्ठवेत्रान् निजभेदेनानुहरन् मानः।
नारकतिर्यग्नरामरगतिषूत्पादकः क्रमशः॥ २८५॥

जी० प्र०—शैलास्थिकाष्ठवेत्रान् निजोत्कृष्टादिशक्तिभेदेनानुहरन् उपमीयमानो मानकषायः क्रमशः–क्रमेण नारकतिर्यग्नरामरगतिषु जीवमुत्पादयति। तद्यथा—शिलास्तंभसमानोत्कृष्टशक्तियुक्तमानकषायः जीवं नारकगतावुत्पादयति। अस्थिसमानानुत्कृष्टशक्तियुक्तमानकषायः जीवं तिर्यग्गतावुत्पादयति। काष्ठसमानाजघन्यशक्तियुक्तमानकषायः मनुष्यगतौ जीवमुत्पादयति। वेत्रसमानजघन्यशक्तियुक्तमानकषायः जीवं देवगतावुत्पादयति। यथा हि चिरतरादिकालैर्विना शैलास्थिकाष्ठवेत्राः नामयितुं न शक्यंते तथोत्कृष्टादिशक्तियुक्तमानपरिणतो जीवोऽपि तथाविधकालैर्विना मानं परिहृत्य विनयरूपनमनं कर्तुं न शक्नोतीति सादृश्यसंभवोऽत्र ज्ञातव्यः। तत्तच्छक्तियुक्तमानकषायपरिणतो जीवः तत्तद्गत्युत्पत्तिहेतुतत्तदायुर्गत्यानुपूर्वीनामादिकर्म बध्नातीति तात्पर्यं॥ २८५॥

मं० प्र०—शैलास्थिकाष्ठवेत्रान्निजोत्कृष्टादिशक्तिभेदेन अनुहरन्नुपमीयमानो मानः–अभिमानः कषायः क्रमशः नारकतिर्यग्नरामरगतिषु जीवस्योत्पादको भवेत्। तथाहि शैलसमानोत्कृष्टशक्तियुक्तो मानो नरकगतौ जीवमुत्पादयति। अस्थिसमानानुत्कृष्टशक्तियुक्तो मानस्तिर्यग्गतौ जीवमुत्पादयति। काष्ठसमानाजघन्यशक्तियुक्तो मानो मनुष्यगतौ जीवमुत्पादयति। वेत्रसमानजघन्यशक्तियुक्तो मानो देवगतौ जीवमुत्पादयति। यथा चिरतरादिकालैर्विना शैलास्थिकाष्ठवेत्रा नामयितुं न शक्यंते तथा उत्कृष्टादिशक्तियुक्तमानपरिणतो जीवोऽपि तथाविधकालैर्विना मानमपाकृत्य विनयरूपनामं प्रापयितुं न शक्यते इति सादृश्यसंभवः। तत्तच्छक्तियुक्तमानपरिणतो जीवस्तत्तद्गत्युत्पत्तिहेतुतत्तदायुर्गत्यानुपूर्वीनामादिकर्मबंधको भवतीति तात्पर्यार्थः॥ २८५॥

स० चं०—शैल १ अस्थि २ काष्ठ ३ वैंत ४ समान जो अपने भेदनिकरि उपमीयमान च्यारि प्रकार मान कषाय सो क्रमतें नारक तिर्यंच मनुष्य देवगतिविषैं जीवकौं उपजावै है। सो कहिए है–जैसैं शैल जो पाषाण सो बहुत घने काल विना नमावने योग्य न होइ तैसैं बहुत घने काल विना जो विनयरूप नमनकौं प्राप्त न होइ ऐसा जो उत्कृष्टशक्तिलीएं मान सो जीवनिकौं नरक गतिविषैं उपजावै है। बहुरि जैसैं अस्थि जो हाड सो घने काल

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विना नमावने योग्य न होइ तैसें घने काल विना जो विनयरूप नमनकौं प्राप्त न होइ ऐसा जो अनुत्कृष्टशक्ति लीएं मान सो जीवकौं तिर्यंच गतिविषैं उपजावै है। बहुरि जैसें काठ थोरा कालविषैं नमावने योग्य न होइ तैसें थोरा काल विना जो विनयरूप नमनकौं प्राप्त न होइ ऐसा जो अजघन्यशक्ति लीएं मान सो जीवकौं मनुष्यगतिविषैं उपजावै है। बहुरि जैसें वेंतकी लकडी बहुत थोरे काल विना नमावने योग्य न होइ तैसें बहुत थोरा काल विना जो विनयरूप नमनकौं प्राप्त न होइ ऐसा जो जघन्यशक्ति लीएं मान सो जीवकौं देवगतिविषैं उपजावै है। इहां भी पूर्वोक्त प्रकार प्रकृतिबंध होना वा उपमा उपमेयका समानपना जानना ॥ २८५ ॥

वेणूवमूलोरब्भयसिंगे गोमुत्तए य खोरप्पे।
सरिसी माया णारयतिरियणरामरगईसु खिवदि जियं॥२८६॥

वेणूपमूलोरभ्रकशृंगेण गोमूत्रेण च क्षुरप्रेण।
सदृशी माया नारकतिर्यग्नरामरगतिषु क्षिपति जीवं ॥ २८६ ॥

जी० प्र०—वेणूपमूलोरभ्रकशृंगगोमूत्रक्षुरप्रसदृशोत्कृष्टादिशक्तियुक्ता माया—वंचना यथाक्रमं नारकतिर्यग्नरामरगतिषु जीवं निक्षिपति। तद्यथा—वेणूपमूलं वेणुमूलग्रंथिः तेन समानोत्कृष्टशक्तियुक्तमायाकषायः जीवं नरकगतौ निक्षिपति। उरभ्रकः—मेष, तच्छृंगसदृशानुत्कृष्टशक्तियुक्तमायाकषायः जीवं तिर्यग्गतौ निक्षिपति। गोमूत्रसमानजघन्यशक्तियुक्तमायाकषायः जीवं मनुष्यगतौ निक्षिपति। यथा वेणूपमूलादयः चिरतरादिकालं विना स्वस्ववक्रतां परिहृत्य ऋजुत्वं न प्राप्नुवंति तथा जीवोऽपि उत्कृष्टादिशक्तियुक्तमायाकषायपरिणतः तथाविधकालैर्विना स्वस्ववक्रतां परिहृत्य ऋजुपरिणामो न स्यात् इति सादृश्यं युक्तं। "तत्तदुत्कृष्टादिशक्तियुक्तमायाकषायपरिणतजीवः तत्तद्गतिक्षेपकारणं तत्तदायुर्गत्यानुपूर्व्यादिकर्म बध्नाति।" इति तात्पर्यार्थः ॥ २८६ ॥

मं० प्र०—वेणूपमूलोरभ्रकशृंगगोमूत्रक्षुरप्रसदृशोत्कृष्टादिशक्तियुक्ता माया—वंचना, यथाक्रमं नारकतिर्यग्नरामरगतिषु जीवं क्षिपति। तद्यथा—वेणूपमूलं वेणुमूलग्रंथिः, तेन सदृशोत्कृष्टशक्तियुक्ता माया नारकगतौ जीवं क्षिपति पातयति। उरभ्रकः—मेषः तच्छृंगसदृशानुत्कृष्टशक्तियुक्ता माया तिर्यग्गतौ जीवं क्षिपति। गोमूत्रसदृशाऽजघन्यशक्तियुक्ता माया मनुष्यगतौ जीवं क्षिपति। क्षुरप्रसमानजघन्यशक्तियुक्ता माया देवगतौ जीवं क्षिपति। यथा वेणूपमूला-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दयश्चिरतरादिकालैर्विना स्वस्ववक्रतां त्यक्त्वा ऋजुत्वं न गच्छंति तथा उत्कृष्टादिशक्तियुक्तमायापरिणतो जीवोऽपि तथाविधकालैर्विना मायां त्यक्त्वा ऋजुपरिणामो न भवति इति सादृश्यं युक्तं । तत्तदुत्कृष्टादिशक्तियुक्तमायापरिणतो जीवः तत्तद्गतिक्षेपकारणात्तत्तदायुर्गत्यानुपूर्वीनामादिकर्मबंधको भवतीति तात्पर्यार्थः ॥ २८६ ॥

स० चं०—वेणूपमूल १ उरभ्रकशृंग २ गोमूत्र ३ क्षुर समान माया ठिगनेरूप परिणति सो क्रमतैं नारक तिर्यंच मनुष्य देवगतिविषैं जीवकौं उपजावै है। सोई कहिए हैं-जैसैं वेणूपमूल जो वांसकी लकडीकी जड सो बहुत घने काल विना सरल न होइ तैसैं बहुत घने काल विना जो सरल न होइ ऐसा जो उत्कृष्ट शक्तिकौं लीएं माया सो जीवकौं नरकगतिविषैं उपजावै है। बहुरि जैसैं उरभ्रकशृंग जो मींढेका सींग सो घने काल विना सरल न होइ तैसैं घने काल विना जो सरल न होइ ऐसा जो अनुत्कृष्ट शक्ति लीएं माया सो जीवकौं तिर्यंच गतिविषैं उपजावै है। बहुरि जैसैं गोमूत्र जो गायमूत्रकी धारा सो थोरा कालविना सरल न होइ तैसैं थोरा कालविना सरल न होइ ऐसा अजघन्य शक्तिलीएं माया सो जीवकौं मनुष्यगतिविषैं उपजावै है। बहुरि जैसैं खुर जो पृथ्वी ऊपरि वृषभादिकका खोज सो बहुत थोरा कालविना सरल न होइ तैसैं बहुत थोरा काल विना जो सरल न होइ ऐसी जो जघन्यशक्ति लीएं माया सो जीवकौं देवगतिविषैं उपजावै है। इहां भी पूर्वोक्तप्रकार प्रकृतिबंध होना वा उपमा उपमेयका समानपना जानना ॥ २८६ ॥

किमिरायचक्कतणुमलहरिद्दराएण सरिसओ लोहो ।
णारयतिरिक्खमाणुसदेवेसुप्पायओ कमसो ॥ २८७ ॥

क्रिमिरागचक्रतनुमलहरिद्रारागेण सदृशो लोभः ।
नारकतिर्यग्मानुषदेवेषु उत्पादकः क्रमशः ॥ २८७ ॥

जी० प्र०—क्रिमिरागचक्रमलतनुमलहरिद्रारागवंधसमानोत्कृष्टादिशक्तियुक्तो लोभकषायो विषयाभिलाषरूपः क्रमशो-यथासंख्यं नार-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कतिर्यग्मानुषदेवगतिषु जीवमुत्पादयति । तद्यथा-क्रिमिरागेण कंबलादिरंजनेन समानोत्कृष्टशक्तियुक्तलोभकषायः जीवं नारकगतौ उत्पादयति । चक्रमलः-रथांगमलः, तेन समानानुत्कृष्टशक्तियुक्तलोभकषायः जीवं तिर्यग्गतौ उत्पादयति । तनुमलः शरीरमलः बहिर्गतः जल्लमल्लः, तद्बंधसदृशाजघन्यशक्तियुक्तलोभकषायः जीवं मनुष्यगतावुत्पादयति । हरिद्रारागः, अंगवस्त्रादिरंजनद्रव्यरागः-तद्बंधसदृशजघन्यशक्तियुक्तलोभकषायः जीवं देवगतावुत्पादयति । क्रिमिरागादिसदृशतच्चतुरुत्कृष्टादिशक्तियुक्तलोभपरिणामेन परिणतो जीवः तन्नारकादिभवोत्पत्तिकारणतत्तदायुर्गत्यानुपूर्व्यादि कर्म बध्नातीति भावार्थः ॥ २८७ ॥

मं० प्र०---क्रिमिरागचक्रमलतनुमलहरिद्रारागबंधसमानोत्कृष्टादिशक्तियुक्तो लोभः-विषयाभिलाषरूपः, क्रमशः-यथासंख्यं नारकतिर्यग्मानुषदेवगतिषु जीवस्योत्पादको भवति। तद्यथा क्रिमिरागेण-कंबलादिरंजनेन सदृशोत्कृष्टशक्तियुक्तो लोभो नारकगतौ जीवमुत्पादयति । चक्रस्य-रथांगस्य मलं-अक्षम्रक्षणस्नेहः, तत्सदृशानुत्कृष्टशक्तियुक्तो लोभस्तिर्यग्गतौ जीवमुत्पादयति । तनोः-शरीरस्य, मलं--बहिर्गतं जल्लमलं, तद्बंधसदृशाजघन्यशक्तियुक्तो लोभो मानुषगतौ जीवमुत्पादयति । हरिद्रारागः--अंगवस्त्रादिरंजनद्रव्यरागस्तद्बंधसदृशजघन्यशक्तियुक्तो लोभो देवगतौ जीवमुत्पादयति । क्रिमिरागादिसदृशतच्चतुरुत्कृष्टादिशक्तियुक्तलोभपरिणतो जीवस्तत्तन्नारकादिभवोत्पत्तिकारणतत्तदायुर्गत्यानुपूर्वीनामादिकर्मबंधको भवतीति तात्पर्यार्थः ॥ २८७ ॥

स० चं०----क्रिमिराग १ चक्रमल २ तनुमल ३ हरिद्राराग ४ समान जो लोभ विषयाभिलाषरूप परिणाम सो क्रमतैं नरक तिर्यंच मनुष्य देवगतिविषैं उपजावै है। सोई कहिए है--जैसैं क्रिमिराग कहिए किरमिची रंग सो बहुत घने काल गये विना नष्ट न होइ तैसैं जो बहुत घने काल विना नष्ट न होइ ऐसा जो उत्कृष्ट शक्तिलीएं लोभ सो जीवकौं नरकगतिविषैं उपजावै है। बहुरि जैसैं चक्रमल जो पहेका मैल सो घने काल विना नष्ट न होइ तैसैं घने काल विना नष्ट न होइ ऐसा जो अनुत्कृष्ट शक्तिलीएं लोभ सो जीवकौं तिर्यंच गतिविषैं उपजावै है। बहुरि जैसैं तनुमल जो शरीरका मैल सो थोरा कालविना नष्ट न होइ तैसैं थोरा काल विना नष्ट न होइ ऐसा जो अजघन्य शक्तिलीएं लोभ सो जीवकौं मनुष्यगतिविषैं उपजावै है बहुरि जैसैं हरिद्राराग कहिए हलदका रंग सो बहुत थोरा काल विना नष्ट न होइ तैसैं बहुत थोरे काल विना नष्ट न होइ ऐसा जो जघन्य शक्ति लीएं लोभ सो जीवकौं देवगतिविषैं उपजावै है। ऐसैं जिन जिन कषायनितैं जो जो गतिका उपजना कह्या तिन तिन कषायनितैं तिस ही तिस गति संबंधी आयु वा आनुपूर्वी इत्यादिकका बंध जानना ॥ २८७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णारयतिरिक्खणरसुरगईसु उप्पण्णपढमकालम्हि ।
कोहो माया माणो लोहुदओ अणियमो वापि ॥२८८॥

नारकतिर्यग्नरसुरगतिषूत्पन्नप्रथमकाले ।
क्रोधो माया मानः लोभोदयः अनियमो वापि ॥ २८८ ॥

जी० प्र०—नारकतिर्यग्नरसुरगत्युत्पन्नजीवस्य तद्भवप्रथमकाले-प्रथमसमये यथासंख्यं क्रोधमायामानलोभकषायाणामुदयः स्यादिति नियमवचनं कषायप्राभृतद्वितीयसिद्धांतव्याख्यातुर्यतिवृषभाचार्यस्य अभिप्रायमाश्रित्योक्तं । वा-अथवा महाकर्मप्रकृतिप्राभृतप्रथमसिद्धांतकर्तुः भूतबल्याचार्यस्य अभिप्रायेणाऽनियमो ज्ञातव्यः। प्रागुक्तनियमं विना यथासंभवं कषायोदयोऽस्तीत्यर्थः। अपिशब्दः समुच्चयार्थः, ततः कारणादुभयसंप्रदायोऽपि अस्माकं संशयाविरूढ एवास्ति एकतरावधारणे शक्तिरहितत्वात् अस्मिन् भरतक्षेत्रे केवलिद्वयाभावात् । आरातीयाचार्याणां सिद्धांतद्वयकर्तृभ्यो ज्ञानातिशयवत्त्वाभावात् । यद्यपि विदेहे गत्वा तीर्थकरादिसन्निधौ कस्यचिदाचार्यस्य सकलश्रुतार्थेषु संशयविपर्यासानध्यवसायव्यवच्छेदेन वस्तुनिर्णयो भवेत् तदा सिद्धांतद्वयकर्तृवेप्रतिपत्तिस्तथैवास्तीति तत्प्रेक्षावान् कः श्रद्धीते ॥ २८८ ॥

मं० प्र०— नारकतिर्यग्नरसुरगतिषूत्पन्नस्य जीवस्य तद्भवप्रथमसमये यथासंख्यं क्रो मानमायालोभानां कषायाणामुदयो भवति । इदं नियमवचनं कषायप्राभृतस्य द्वितीयसिद्धांतस्य व्याख्यातणां यतिवृषभाचार्याणामभिप्रायमाश्रित्योक्तं । वा--अथवा महाकर्मप्रकृतिप्राभृतस्य प्रथमसिद्धांतस्य कर्तृणां भूतबल्याचार्याणामभिप्रायेण अनियमः--प्रागुक्तनियमं विना यथासंभवं कषायोदयो भवतीत्यर्थः । अपिशब्दः समुच्चयार्थः । तेनोभयसंप्रदायोऽप्यस्माकं संशयाधिरूढो नैकतरावधारणे शक्तिरस्ति । अस्मिन् भरते तीर्थकरश्रुतकेवल्यभावात् । आरातीयाचार्याणां सिद्धांतद्वयकर्तृभ्यो ज्ञानातिशयवतामभावाच्च । यद्यपि विदेहे गत्वा तीर्थकरादिसन्निधौ कस्यचिदाचार्यस्य सकलश्रुतार्थेषु संशयविपर्यासानध्यवसायव्यवच्छेदेन वस्तुनिर्णयो भवेत् तदा सिद्धांतद्वयकर्तृविप्रतिपत्तिस्तथैवास्तीति कः प्रेक्षावान् श्र[illegible]ीत ॥ २८८ ॥

स० चं०---नरक तिर्यंच मनुष्य देवविषैं उत्पन्न भया जीवकैं पहिला समयविषैं क्रमतैं क्रोध मान माया लोभका उदय हो है। नारकी उपजे तहां उपजते ही पहले समय क्रोध कषायका उदय होइ । ऐसैं तिर्यंचकैं मायाका, मनुष्यकैं मानका, देवकैं लोभका उदय जानना । सो ऐसा नियम कषायप्राभृत दूसरा सिद्धांतका कर्ता यतिवृषभ नामा आचार्य ताके अभिप्रायकरि जानना । बहुरि महाकर्म प्रकृति प्राभृत प्रथमसिद्धांतका कर्ता ६१६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भूतवलि नामा आचार्य ताके अभिप्रायकरि पूर्वोक्त नियम नाही। जिस तिस कोई एक कषायका उदय हो है। ऐसैं दोऊ आचार्यनिका अभिप्रायविषैं हमारैं संदेह है सो इस भरतक्षेत्रविषैं केवली श्रुतकेवली नाही वा समीपवर्ती आचार्यनिकैं उन आचार्यनितैं अधिक ज्ञान नाहीं तातैं जो विदेहविषैं गये तीर्थंकरादिकके निकटि शास्त्रार्थविषैं संशय विपर्यय अनध्यवसायका दूर होनेकरि निर्णय होइ तब एक अर्थका निश्चय होइ तातैं हमोने दोऊ कथन कीए हैं ॥ २८८ ॥

अप्परोभयबाधणबंधासंजमणिमित्तकोहादी।
जेसिं णत्थि कसाया अमला अकसाइणो जीवा ॥२८९॥

आत्मपरोभयबाधनबंधासंयमनिमित्तक्रोधादयः।
येषां न संति कषाया अमला अकषायिणो जीवाः ॥ २८९ ॥

जी० प्र०—स्वस्मिन् परस्मिन् उभयस्मिन् इति स्थानत्रयेऽपि प्रत्येकं बंधनबाधनासंयमानां त्रयाणामपि निमित्तभूताः क्रोधादयः कषायाः, पुंवेदादयो नोकषायश्च येषां जीवानां न संति ते अकषायाः, अमलाः द्रव्यभावनोकर्ममलरहिताः सिद्धपरमेष्ठिनः संतीति ज्ञातव्यं। यद्यपि उपशांतकषायादिचतुर्गुणस्थानवर्तिनोऽपि अकषाया अमलाश्च यथासंभवं द्रव्यभावमलरहिताः संति तथापि तेषां गुणस्थानप्ररूपणयैव अकषायत्वसिद्धिरस्तीति ज्ञातव्यं। तद्यथा—कस्यचिज्जीवस्य क्रोधादिकषायः स्वस्यैव बंधनहेतुः स्वशिरोऽभिघातादिबाधाहेतुः हिंसाद्यसंयमहेतुश्च भवति। कस्यचिज्जीवस्य क्रोधादिकषायः परस्य स्वशत्र्वादेर्बाधनबंधनासंयमहेतुर्भवति। कस्यचित्कामुकादिजीवस्य क्रोधादिकषायः स्वपरयोरपि यथासंभवं बाधनबंधनासंयमहेतुर्भवति इति विभागः लोकानुसारेण आगमानुसारेण च द्रष्टव्यः ॥ २८९ ॥

मं० प्र०—आत्मपरोभयबंधनबाधासंयमनिमित्तानि क्रोधादयः कषायाः येषां जीवानां न संति ते अकषायाः, अमलाः–द्रव्यभावनोकर्मरूपमलरहिताः सिद्धपरमेष्ठिनः संतीति ज्ञातव्यं। यद्यप्युपशांतकषायादिचतुर्गुणस्थानवर्तिनोऽप्यकाषायाः अमलाश्च यथासंभवद्रव्यभावमलरहिताः, तथापि तेषां गुणस्थानप्ररूपणयैवाकषायत्वसिद्धेः। तद्यथा-कस्यचिज्जीवस्य क्रोधादिकषायः आत्मन एव स्वस्यैव, बंधनहेतुः–शिरोऽभिघातादिबाधाहेतुः हिंसाद्यसंयमहेतुश्च भवति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कस्यचित् क्रोधादिः परस्य शब्वादेर्बंधनादिहेतुः, कस्यचित्तु कामुकादेः क्रोधादिः--उभयस्य--स्वपरद्वयस्य यथासंभवं बंधनादिहेतुर्भवतीति विभागो लोकानुसारेण आगमानुसारेण च द्रष्टव्यः ॥ २८९ ॥

स० चं०—आपकौं वा परकौं वा दोऊकौं बंधनके वा बाधाके वा असंयमके कारणभूत ऐसे क्रोधादिक कषाय वा पुरुष वेदादिरूप नोकषाय ते जिनके न पाइये ते द्रव्यकर्म भावकर्म नोकर्ममलकरि रहित सिद्ध भगवान अकषाय जानने। उपशांत कषायसे लेकर च्यारि गुणस्थानवर्ती जीव भी अकषाय निर्मल हैं तिनकैं गुणस्थान प्ररूपणा ही करि अकषायपनाकी सिद्धि जाननी। तहां कोऊ जीवकैं तौ क्रोधादि कषाय ऐसें हो हैं जिनतैं आपतैं आपको बांधै आप ही आपके मस्तकादिकका घात करै आपही आपकैं हिंसादि रूप असंयम परिणाम करै। बहुरि कोई जीवकैं क्रोधादि कषाय ऐसैं हो हैं जिनतैं और जीवनिकौं बांधै मारै उनके असंयम परिणाम करावै। बहुरि कोई जीवकैं क्रोधादि कषाय ऐसे हो हैं जिनतैं आपका वा और जीवनिका बांधना घात करना असंयम होना होइ सो ऐसे ए कषाय अनर्थके मूल हैं॥ २८९॥

कोहादिकसायाणं चउचउदसवीस होंति पदसंखा।
सत्तीलेस्साआउगबंधाबंधगदभेदेहिं ॥ २९० ॥

क्रोधादिकषायाणां चत्वारः चतुर्दश विंशतिः भवंति पदसंख्याः।
शक्तिलेश्यायुष्कबंधाबंधगतभेदैः ॥ २९० ॥

जी० प्र०—क्रोधादिकषायाणां शक्तिलेश्यायुर्बंधाबंधगतभेदैर्यथाक्रमं चतुश्चतुर्दशविंशतिप्रमितपदानां स्थानानां संख्या भवति। तद्यथा शक्तिस्थानानि चत्वारि ४ लेश्यास्थानानि चतुर्दश १४ आयुर्बंधस्थानानि विंशतिः २० इत्यर्थः ॥ २९० ॥ तानि स्थानान्याह—

मं० प्र०—क्रोधादीनां-क्रोधमानमायालोभानां कषायाणां शक्तिलेश्यायुर्बंधाबंधगतभेदैः, यथाक्रमं चतुश्चतुर्दशविंशतिप्रमिताः पदानां स्थानानां संख्या भवति। तद्यथा--शक्तिस्थानानि चत्वारि, लेश्यास्थानानि चतुर्दश, आयुर्बंधाबंधस्थानानि विंशतिरित्यर्थः ॥ २९० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सं० च०—क्रोध मान माया लोभ कषाय तिनकी शक्तिस्थानके भेदकरि च्यारि संख्या हैं। लेश्या स्थानके भेदकरि चौदह है। आयुर्वलके बंधनेके अबंधनेके स्थान भेदकरि बीस संख्या हैं॥२९०॥ ते स्थान आगैं कहिए है

सिलसेलवेणुमूलक्किमिरायादी कमेण चत्तारि।
कोहादिकसायाणं सत्तिं पडि होंति णियमेण ॥ २९१ ॥

शिलाशैलवेणुमूलक्रिमिरागादीनि क्रमेण चत्वारि।
क्रोधादिकषायाणां शक्तिं प्रति भवंति नियमेन ॥ २९१ ॥

जी० प्र०—क्रोधादिचतुःकषायाणां शक्तिं प्रति स्वफलदानसामर्थ्यमुद्दिश्य तीव्रतरतीव्रमंदमदतरानुभागरूपाणि उत्कृष्टानुत्कृष्टाजघन्यजघन्यानुभागरूपाणि वा स्थानानि चत्वारि नियमेन, शिलाभेदशैलवेणुमूलक्रिमिरागा· तीव्रतरानुभागोदाहरणानि आदयो येषां पृथ्वीभेदादीनां तीव्रानुभागाद्युदाहरणानां तानि शिलाशैलवेणुमूलक्रिमिरागादीनि भवंति इति शिलाभेदादिदृष्टांता स्फुटं व्यवहारावधारणेन भवंति। परमागमव्यवहारिभिराचार्यैः अव्युत्पन्नमंदप्रज्ञशिष्यप्रतिबोधनार्थं व्यवहर्तव्यानि भवंति। दृष्टांतप्रदर्शनबलेनैव हि अव्युत्पन्नमंदप्रज्ञाः शिष्याः प्रतिबोधयितुं शक्यंते। अतो दृष्टांतनामान्येव शिलाभेदादिशक्तीनां नामानीति रूढानि ॥ २९१ ॥

मं० प्र०—क्रोधादीनां चतुर्णां कषायाणां शक्तिं प्रति स्वफलदानसामर्थ्यमुद्दिश्य तीव्रतरतीव्रमंदमंदतरानुभागरूपाणि उत्कृष्टानुत्कृष्टाजघन्यजघन्यानुभागरूपाणि वा स्थानानि चत्वारि नियमेन, शिलाभेदशैलवेणुमूलक्रिमिरागाः तीव्रतरानुभागोदाहरणानि आदयो येषां पृथ्वीभेदादीनां तीव्रानुभागाद्युदाहरणानां तानि तथोक्तानि इति शिलाभेदादिदृष्टांता नाभव्यवहारावधारणेन भवंति–परमागमव्यवहारिभिराचार्यैरव्युत्पन्नमंदप्रज्ञस्वशिष्यप्रतिबोधनार्थं व्यवहर्तव्यानि भवंति। दृष्टांतप्रदर्शनबलेनैव हि अव्युत्पन्नमंदप्रज्ञाः शिष्याः प्रतिपादयितुं शक्यंते अतो दृष्टांतनामान्येव शिलाभेदादीनि शक्तीनां नामानीति वा रूढानि ॥ २९१ ॥

सं० च०—क्रोधादिक जे कषाय तिनिकैं शक्ति कहिए अपना फल देनेकी सामर्थ्य ताकी अपेक्षातैं निश्चय करि च्यारि स्थान हैं। ते अनुक्रमतैं तीव्रतर, तीव्र, मंद, मंदतर, अनुभागरूप वा उत्कृष्ट अनुत्कृष्ट अजघन्य जघन्य अनुभाग रूप जानने। तहां शिलाभेद, शैल, वेणुमूल, क्रिमिराग ए तौ उत्कृष्ट शक्तिके उदाहरण जानने। ६१९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आदि शब्दतैं पूर्वोक्त अनुत्कृष्टादि शक्तिके उदाहरण जो दृष्टांतमात्र कहे हैं ते सर्व जानने । ए दृष्टांत प्रगट व्यवहारका अवधारण करि हैं अर परमागमका व्यवहारी आचार्यनिकरि मंदबुद्धी शिष्य समझावनेके अर्थि व्यवहार रूप कीएं हैं जातैं दृष्टांतके बलकरि ही मंदबुद्धी समझै हैं तातैं दृष्टांतकी मुख्यताकरि जे दृष्टांतके नाम तेई शक्तिनिके नाम प्रसिद्ध कीएं हैं ॥ २११ ॥

किण्हं सिलासमाणे किण्हादी छक्कमेण भूमिम्हि ।
छक्कादी सुक्कोत्ति य धूलिम्मि जलम्मि सुक्केक्का ॥२९२॥

कृष्णा शिलासमाने कृष्णादयः षट् क्रमेण भूमौ ।
षट्कादिः शुक्लेति च धूलौ जले शुक्लैका ॥ २९२ ॥

जी० प्र०—शिलाभेदसमाने क्रोधोत्कृष्टशक्तिस्थाने एकैव कृष्णलेश्या भवति । यद्यपि तत्र असंख्यातलोकमात्राणि षट्स्थानपतितसंक्लेशहानिविशिष्टानि कषायोदयस्थानानि संति तथापि तानि सर्वाण्यपि कृष्णलेश्याया एव संक्लेशहानिस्थानानि नान्यलेश्याया इत्यभिप्रायेण शिलाभेदसमानोत्कृष्टस्थाने कृष्णलेश्यैव इत्याचार्येण कथितं । नियमेन इत्यनुवर्तमानेन नियमशब्देन अत्राप्यवधारणार्थः सूच्यते । स कः ? तच्चरमस्थाने उत्कृष्टशक्तिर्व्युच्छिद्यते इति भूमिभेदसमाने क्रोधानुत्कृष्टशक्तिस्थाने क्रमेण कृष्णादयः षडपि लेश्या भवंति । तद्यथा—तत्र स्वयोग्यमध्यमकृष्णलेश्यास्थानं भूभेदसमानक्रोधानुत्कृष्टशक्तिप्रथमोदयस्थानमादिं कृत्वा षट्स्थानपतितसंक्लेशहानिस्थानेषु असंख्येयलोकमात्रेष्वपि कृष्णैव लेश्या भवति नीलाद्यन्यलेश्यालक्षणस्य तत्रासंभवात् । ततः षट्स्थानपतितसंक्लेशहानिस्थानेषु असंख्येयलोकमात्रेषु उदयस्थानेषु मध्यमकृष्णलेश्या उत्कृष्टनीललेश्या च वर्तते तत्र तल्लेश्याद्वयलक्षणस्यैव संभवात् । तत उपरि षट्स्थानपतितसंक्लेशहानिस्थानेषु असंख्यातलोकमात्रेष्वपि कषायोदयस्थानेषु मध्यमकृष्णलेश्या मध्यमनीललेश्या उत्कृष्टकपोतलेश्याश्च वर्तते । तत्र तल्लेश्यात्रयलक्षणसंभवात् । ततः उपरि षट्स्थानपतितसंक्लेशहानिस्थानेषु असंख्यातलोकमात्रेष्वपि कषायोदयस्थानेषु मध्यमकृष्णलेश्या मध्यमनीललेश्या मध्यमकपोतलेश्या जघन्यतेजोलेश्या च वर्तते । तत्र तल्लेश्याचतुष्टयलक्षणसद्भावात् । तत उपरि षट्स्थानपतितसंक्लेशहानियुक्तस्थानेषु असंख्यातलोकमात्रेष्वपि कषायोदयस्थानेषु मध्यमकृष्णनीलकपोततेजोलेश्याः जघन्यपद्मलेश्या च वर्तते । तत्र तल्लेश्यापंचकलक्षणसद्भावात् । तत उपरि षट्स्थानपतित-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संक्लेशहानिस्थानेषु असंख्यातलोकमात्रेषु अपि कषायोदयस्थानेषु मध्यमकृष्णनीलकपोततेजःपद्मलेश्या जघन्यशुक्ललेश्या च वर्तंते। तत्र तल्लेश्याषट्कलक्षणसद्भावात्। तत्रैव तच्चरमस्थाने अनुत्कृष्टशक्तिर्व्युच्छिद्यते। ततः उपरि धूलीरेखासमानक्रोधाजघन्यशक्तिस्थाने यथाक्रमं लेश्याषट्कादयः शुक्ललेश्यापर्यंताः एकैकहीना भूत्वा गच्छंति। तद्यथा–धूलीरेखासमानक्रोधाजघन्यशक्तियुक्तप्रथमस्थानमादिं कृत्वा षट्स्थानपतितसंक्लेशहानियुक्तेषु असंख्यातलोकमात्रेष्वपि कषायोदयस्थानेषु जघन्यकृष्णलेश्या मध्यमनीलकपोततेजःपद्मशुक्ललेश्याश्च वर्तंते। तत्र तल्लेश्याषट्कलक्षणसद्भावात्। तत्रैव तच्चरमोदयस्थाने कृष्णलेश्या व्युच्छिद्यते तदनंतरोदयस्थाने तल्लेश्यालक्षणाभावात्। तत उपरि षट्स्थानपतितसंक्लेशहानियुक्तेषु असंख्यातलोकमात्रेष्वपि कषायोदयस्थानेषु जघन्यनीललेश्या मध्यमाः कपोततेजःपद्मशुक्ललेश्याश्च वर्तंते। तत्र तल्लेश्यापंचकलक्षणसद्भावात्। तत्रैव तच्चरमोदयस्थाने नीललेश्या व्युच्छिद्यते। तदनंतरोदयस्थाने तल्लेश्यालक्षणाभावात्। तत उपरि षट्स्थानपतितसंक्लेशहानियुक्तेषु असंख्यातलोकमात्रेष्वपि कषायोदयस्थानेषु जघन्यकपोतलेश्या मध्यमाः तेजःपद्मशुक्ललेश्याश्च वर्तंते तत्र तल्लेश्याचतुष्टयलक्षणसद्भावात्। तत्रैव चरमस्थाने कपोतलेश्या व्युच्छिद्यते। तदनंतरोदयस्थाने तल्लेश्यालक्षणाभावात्। तत उपरि षट्स्थानपतितविशुद्धिवृद्धियुक्तेषु असंख्यातलोकमात्रेष्वपि कषायोदयस्थानेषु उत्कृष्टा तेजोलेश्या मध्यमे पद्मशुक्ललेश्ये च वर्तंते। तत्र तल्लेश्यात्रयलक्षणसद्भावात्। तत्रैव तच्चरमोदयस्थाने उत्कृष्टतेजोलेश्या व्युच्छिद्यते। तदनंतरोदयस्थाने तल्लेश्यालक्षणाभावात्। तत उपरि षट्स्थानपतितविशुद्धिवृद्धियुक्तेषु असंख्यातलोकमात्रेष्वपि कषायोदयस्थानेषूत्कृष्टपद्मलेश्या जघन्यशुक्ललेश्या च वर्तेते। तत्र तद्द्वयलेश्यालक्षणसद्भावात्। तत्रैव चरमोदयस्थाने एव उत्कृष्टपद्मलेश्या व्युच्छिद्यते तदनंतरोदयस्थाने तल्लेश्यालक्षणाभावात्। तत उपरि षट्स्थानपतितविशुद्धिवृद्धियुक्तेषु असंख्यातलोकमात्रेष्वपि कषायोदयस्थानेषु मध्यमा शुक्ललेश्यैव वर्तते तत्र तल्लेश्यालक्षणसद्भावात्। तत्रैव तच्चरमोदयस्थाने अजघन्यशक्तिर्व्युच्छिद्यते। तत उपरि जलरेखासमानक्रोधजघन्यशक्तियुक्तेषु षट्स्थानपतितविशुद्धिवृद्धिविशिष्टेषु असंख्यातलोकमात्रेष्वपि कषायोदयस्थानेषु मध्यमा शुक्ललेश्यैव वर्तते तत्रैव तच्चरमोदयस्थाने उत्कृष्टा शुक्ललेश्यैव स्यात्। एवं चतुःशक्तियुक्तानि क्रोधस्य लेश्याश्रयेण चतुर्दशस्थानान्युक्तानि। अनेनैव क्रमेण मानादीनामपि चतुर्दशलेश्याश्रितस्थानानि नेतव्यानि॥ २९२॥

मं० प्र०—शिलाभेदसमाने क्रोधोत्कृष्टशक्तिस्थाने एकैव कृष्णलेश्या। यद्यपि तत्र असंख्येयलोकमात्राणि षट्स्थानपतितसंक्लेशहानिविशिष्टानि कषायोदयस्थानानि संति तथापि तानि सर्वाण्यपि कृष्णलेश्याया एव संक्लेशहानिस्थानानि नान्यलेश्याया इत्यभिप्रायेण शिलाभेदसमाने उत्कृष्टस्थाने कृष्णैवेत्याचार्येणोक्तं। नियमेनेत्यनुवर्तमानेन नियमशब्देनात्रावधारणार्थः सूच्यते। तत्र तच्चरमस्थाने उत्कृष्टशक्तिर्व्युच्छिद्यते। भूमिभेदसमाने क्रोधानुत्कृष्टशक्तिस्थाने क्रमेण कृष्णलेश्यादयः षडपि लेश्या भवंति। तद्यथा—तत्र स्वयोग्यमध्यमकृष्णलेश्यास्थानं भूमिभेदसमानक्रोधानुत्कृष्टशक्तिप्रथमोदयस्थानमादिं कृत्वा षट्स्थानपतितसंक्लेशहानिस्थानेष्वसंख्येयलोकमात्रेषु अपि कृष्णैव लेश्या, नीलाद्यन्यतमलेश्यालक्षणस्य तत्रासंभवात्। ततः षट्स्थानपतितसंक्लेशहानिस्थानेषु असंख्येयलोकमात्रेषु उदयस्थानेषु मध्यमकृष्णलेश्या च उत्कृष्टनीललेश्या च वर्तेते। तत्स्थानानां लेश्याद्वयलक्षणसंभवात्। ततः षट्स्थानपतितसंक्लेशहानि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थानेष्वसंख्येयलोकमात्रेषु उदयस्थानेष्वपि मध्यमकृष्णलेश्या मध्यमनीललेश्या उत्कृष्टकपोतलेश्या च वर्तते तत्र तल्लेश्यात्रयलक्षणसद्भावात्, ततः षट्स्थानपतितसंक्लेशहानिस्थानेष्वसंख्येयलोकमात्रेषूदयस्थानेष्वपि मध्यमकृष्णलेश्या मध्यमनीललेश्या मध्यमकपोतलेश्या जघन्यतेजोलेश्या च वर्तते । तत्र तल्लेश्याचतुष्टयलक्षणसद्भावात् । ततः षट्स्थानपतितसंक्लेशहानियुक्तेषु असंख्येयलोकमात्रेषूदयस्थानेष्वपि मध्यमाः कृष्णनीलकपोततेजोलेश्याः जघन्यपद्मलेश्या च वर्तते तत्र तल्लेश्यापंचकलक्षणसद्भावात् । ततः षट्स्थानपतितसंक्लेशहानियुक्तेषु असंख्येयलोकमात्रेषूदयस्थानेष्वपि मध्यमाः कृष्णनीलकपोततेजःपद्मलेश्याः जघन्यशुक्ललेश्या च वर्तते तत्र तल्लेश्याषट्कलक्षणसद्भावात् । तत्रैव चरमस्थाने अनुत्कृष्टशक्तिर्व्युच्छिद्यते ततः धूलीरेखासमानक्रोधाजघन्यशक्तिस्थाने क्रमेण लेश्याषट्कादयः शुक्ललेश्यापर्यंता एकैकहीना भवंति । तद्यथा—धूलीरेखासमानक्रोधाजघन्यशक्तियुक्तप्रथमस्थानमादिं कृत्वा षट्स्थानपतितसंक्लेशहानियुक्तेष्वसंख्येयलोकमात्रेषूदयस्थानेष्वपि जघन्यकृष्णलेश्या मध्यमा नीलकपोततेजःपद्मशुक्ललेश्याश्च वर्तते तत्र तल्लेश्याषट्कलक्षणसद्भावात् । तत्रैव चरमोदयस्थाने कृष्णलेश्या व्युच्छिद्यते तदनंतरस्थानेषु तल्लेश्यालक्षणाभावात् । ततः षट्स्थानपतितसंक्लेशहानियुक्तेष्वसंख्येयलोकमात्रेषूदयस्थानेष्वपि जघन्यनीललेश्या, मध्यमा कपोततेजःपद्मशुक्ललेश्याश्च वर्तते तत्र तल्लेश्यापंचकलक्षणसद्भावात् । तत्रैव चरमस्थाने नीललेश्या व्युच्छिद्यते तदनंतरस्थाने तल्लक्षणाभावात्, ततः षट्स्थानपतितसंक्लेशहानियुक्तेष्वसंख्येयलोकमात्रेषूदयस्थानेष्वपि जघन्यकपोतलेश्या मध्यमाः तेजःपद्मशुक्ललेश्याश्च वर्तते तत्र तल्लेश्याचतुष्टयलक्षणसद्भावात् । तत्रैव चरमस्थाने कपोतलेश्या व्युच्छिद्यते । तदनंतरस्थाने तल्लेश्यालक्षणाभावात् । ततः षट्स्थानपतितविशुद्धिवृद्धियुक्तेष्वसंख्येयलोकमात्रेषूदयस्थानेष्वपि उत्कृष्टा तेजोलेश्या, मध्यमे पद्मशुक्ललेश्ये च वर्तते तत्र तल्लेश्यात्रयलक्षणसंभवात् । तत्रैव चरमस्थाने तेजोलेश्या व्युच्छिद्यते तदनंतरस्थाने तल्लक्षणाभावात् । ततः षट्स्थानपतितविशुद्धिवृद्धियुक्तेष्वसंख्येयलोकमात्रेषूदयस्थानेष्वपि उत्कृष्टा पद्मलेश्या, मध्यमा शुक्ललेश्या च वर्तते तत्र तल्लेश्याद्वयलक्षणसद्भावात्, तत्रैव चरमस्थाने पद्मलेश्या व्युच्छिद्यते तदनंतरस्थाने तल्लक्षणाभावात् । ततः षट्स्थानपतितविशुद्धिवृद्धियुक्तेष्वसंख्येयलोकमात्रेषूदयस्थानेष्वपि मध्यमा शुक्ललेश्या वर्तते तत्र तल्लक्षणसद्भावात् । तत्रैव चरमस्थाने अजघन्यशक्तिर्व्युच्छिद्यते ततः जलरेखासमानजघन्यशक्तियुक्तेषु षट्स्थानपतितविशुद्धिविशिष्टेष्वसंख्येयलोकमात्रेषूदयस्थानेष्वपि मध्यमा शुक्ललेश्या एकैव वर्तते तत्रैव चरमस्थाने उत्कृष्टा शुक्ललेश्या भवति एवं लेश्याश्रयेण क्रोधस्य चतुःशक्तियुक्तानि चतुर्दशस्थानानि भवंति । अनेनैव क्रमेण मानादीनामपि चतुर्दशलेश्याश्रितस्थानानि आनेतव्यानि ॥ २९२ ॥

स० चं०—शिला भेद समान जो क्रोधका उत्कृष्टशक्ति स्थान तींहिविषैं एक कृष्णलेश्या ही है। यद्यपि इस उत्कृष्टशक्तिस्थानविषैं षट्स्थानपतित संक्लेशहानि लीएं असंख्यातलोक प्रमाण कषायनिके उदयस्थान हैं बहुरि तथापि ते सर्वस्थान कृष्णलेश्याहीके हैं कृष्णलेश्याहीके उत्कृष्ट मध्यम भेदरूप जानने। षट्स्थानपतित संक्लेशहानिका स्वरूप ऐसा जानना। जेते कषायनिके अविभाग प्रतिच्छेद पहिलैं थे तिनसौं घाटि होनेलगे ते अनंतभागहानि असंख्यातभागहानि संख्यातभागहानि संख्यातगुणहानि असंख्यातगुणहानि अनंतगुणहानिरूप

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षटे औसैं तीव्र कषाय घटनेका नाम षट्स्थानपतितसंक्लेशहानि कहिए। कषायनिके अविभाग प्रतिच्छेद अनंत हैं तिनकी अपेक्षा षट्स्थानपतित हानि संभवै है अर स्थानभेद असंख्यातलोक प्रमाण ही हैं। नियम शब्दकरि ताका अंतस्थानविषैं उत्कृष्ट शक्तिकी व्युच्छित्ति हो है। बहुरि भूमिभेद समान क्रोधका अनुत्कृष्टशक्तिस्थान तीहिंविषैं अनुक्रमतैं छहो लेश्या पाइए है। सो कहिए है--भूमिभेद समान क्रोधका अनुत्कृष्ट शक्तिस्थानका पहिला उदयस्थानतैं लगाइ षट्स्थानपतित संक्लेशहानि लीएं असंख्यात लोक प्रमाण उदयस्थानकनिविषैं तौ केवल कृष्णलेश्या ही है, कृष्णलेश्याहीका मध्यभेद पाइए है जातैं अन्य लेश्याका लक्षण तहां नाहीं। बहुरि इहांतैं आगैं षट्स्थानपतित संक्लेशहानि लीएं असंख्यातलोक प्रमाण स्थानकनिविषैं मध्यम कृष्णलेश्या उत्कृष्ट नील लेश्या पाइए है जातैं इहां तिनि दोऊ लेश्यानिका लक्षण संभवै है। बहुरि इनितैं आगैं षट्स्थानपतित संक्लेशहानि लीएं असंख्यात लोक प्रमाण उदयस्थानकनिविषैं मध्यम कृष्णलेश्या मध्यम नील लेश्या उत्कृष्ट कपोत लेश्या पाइए है जातैं इहां तिनि तीनों लेश्यानिके लक्षण संभवै हैं। बहुरि इनितैं षट्स्थानपतित संक्लेश हानि लीएं असंख्यात लोक प्रमाण उदयस्थानकनिविषैं मध्यम कृष्णलेश्या मध्यम नील लेश्या मध्यम कपोत लेश्या जघन्य पीतलेश्या पाइए है तातैं इहां तिनि च्यारयो लेश्यानिके लक्षण संभवै है। इनितैं बहुरि षट्स्थानपतित संक्लेश हानि लीएं असंख्यातलोक प्रमाण उदयस्थानकनिविषैं मध्यम कृष्ण नील कपोत पीत लेश्या अर जघन्य पद्मलेश्या पाइए है जातैं इहां तिनि पंच लेश्यानिका लक्षण संभवै है। बहुरि इनितैं षट्स्थानपतित संक्लेशहानि लीएं असंख्यात लोक प्रमाण स्थानकनिविषैं मध्य कृष्ण नील कपोत पीत पद्म लेश्या अर जघन्य शुक्ललेश्या पाइए है जातैं इहां तिनि छहौ लेश्यानिका लक्षण संभवै है। औसैं क्रोधका अनुत्कृष्ट शक्तिस्थानका जे स्थान भेद तिनिविषैं क्रमतैं छहौ लेश्याके स्थानक जानने। इहां अंतस्थानविषैं अनुत्कृष्टशक्तिकी व्युच्छित्ति हुई। बहुरि धूलीरेखा समान क्रोधका अजघन्यशक्तिस्थान ताके स्थानकनिविषैं छह लेश्यातैं एक एक घाटि शुक्ल लेश्या पर्यंत लेश्या पाइए है। सोई कहिए है-धूली रेखा समान क्रोधका प्रथम स्थानतैं लगाइ षट्स्थानपतित संक्लेशहानि लीएं असंख्यात-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोक प्रमाण स्थानकनिविषैं जघन्य कृष्ण लेश्या मध्यम नील कपोत पीत पद्म शुक्ल लेश्या पाइए हैं जातै इहां छहो लेश्यानिके लक्षण संभवै है। इहां अंतस्थानविषैं कृष्णलेश्याका विच्छेद हुवा। बहुरि इहांतैं आगैं इसही शक्तिका षट्स्थानपतित संक्लेशहानि लीएं असंख्यातलोक प्रमाण स्थानकनिविषैं जघन्य नील लेश्या मध्यम कपोत पीत पद्म शुक्ललेश्या पाइए है जातैं इहां तिनि पंच लेश्यानिका लक्षण संभवै है। इहां अंतस्थानकनिविषैं नील लेश्याका विच्छेद हुवा। बहुरि इहांतैं आगैं षट्स्थानपतित संक्लेशहानि लीएं असंख्यातलोक प्रमाण स्थानकनिविषैं जघन्य कपोत लेश्या मध्यम पीत पद्म शुक्ल लेश्या पाइए है जातैं इहां तिनि च्यारि लेश्यानिके लक्षण संभवै है इहां अंतस्थानविषैं कपोत लेश्याका विच्छेद हुवा ऐसैं संक्लेश परिणामनिकी हानि होते संते जो मंदकषायरूप परिणाम भया ताकौं विशुद्ध परिणाम कहिए ताके अनंते अविभाग प्रतिच्छेद हैं सो तिनकी अनंत भागवृद्धि असंख्यात भागवृद्धि संख्यात भागवृद्धि संख्यात गुणवृद्धि असंख्यात गुणवृद्धि अनंतगुण वृद्धिरूप जो वृद्धि सो षट्स्थानपतित विशुद्धवृद्धि कहिए सो उस च्यारि लेश्याका स्थानतैं आगैं षट्स्थानपतित विशुद्धवृद्धिलीयें असंख्यातलोक प्रमाण स्थानकनिविषैं उत्कृष्ट पीत लेश्या मध्यम पद्म शुक्ललेश्या पाइए है जातैं इहां तीन तिनि लेश्यानिहीका लक्षण संभवै है। इहां अंतस्थानकनिविषैं पीतलेश्याका विच्छेद हुवा। बहुरि इहांतैं षट्स्थानपतित विशुद्ध वृद्धि लीएं असंख्यातलोक प्रमाण स्थानकनिविषैं उत्कृष्ट पद्मलेश्या मध्यम शुक्ललेश्या ही पाइए है। जातैं इहां तिनि दोय ही लेश्यानिके लक्षण संभवै हैं। इहां अंतस्थानविषैं पद्मलेश्याका विच्छेद हुवा। बहुरि इहांतैं षट्स्थानपतित विशुद्धि वृद्धि लीएं असंख्यातलोक प्रमाण स्थानकनिविषैं मध्यम शुक्ललेश्या ही पाइए है जातैं इहां तिस ही लेश्याके लक्षण पाइए है। ऐसैं धूली रेखा समान क्रोधका अजघन्यशक्तिस्थानके जे उदयरूप स्थानक तिनिविषैं लेश्या कही, इहां अंतस्थानविषैं अजघन्यशक्तिकी व्युच्छित्ति भई। बहुरि इहांतैं आगैं जल रेखा समान क्रोधका जघन्य शक्तिस्थान ताके षट्स्थानपतित विशुद्धि वृद्धिलीएं असंख्यातलोक प्रमाण स्थानकनिविषैं मध्यम शुक्ललेश्या पाइए है। बहुरि याहीके अंतस्थानविषैं उत्कृष्ट शुक्ल

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लेश्या पाइए है ऐसैं च्यारिप्रकार शक्तियुक्त क्रोधविषैं लेश्या अपेक्षा चौदह स्थानक कहे। उत्कृष्टशक्तिस्थानविषैं एक, अनुत्कृष्ट शक्तिस्थानकविषैं छह, अजघन्य शक्तिस्थानकविषैं छह, जघन्यशक्तिस्थानकविषैं एक ऐसैं चौदह कहे। इहां किसीकै भ्रम होइगा कि ए च्यारि शक्तिस्थान कहे इनहीका अनंतानुबंधी आदि नाम हैं? सो नाहीं, जो तैसैं कहिए तौ षष्ठगुणस्थानविषैं संज्वलन नाही है तहां एक शुक्ललेश्या ही संभवै जातैं इहां जघन्यशक्तिस्थानविषैं एक शुक्ललेश्या ही कही है सो षष्ठ गुणस्थानविषैं तौ लेश्या तीन हैं तातैं अनंतानुबंधी इत्यादि भेद सम्यक्त्वादि घातनेकी अपेक्षा हैं ते अन्य जानने। बहुरि ये शक्तिस्थानके भेद तीव्र मंद अपेक्षा हैं ते अन्य जानने। सो जैसैं ए क्रोधके चौदह स्थान लेश्या अपेक्षा कहे तैसैं ही उत्कृष्टादिक शक्तिस्थानकनिविषैं मानके वा मायाके वा लोभके भी जानने ॥ २९२ ॥

सेलगकिण्हे सुण्णं णिरयं च य भूगएगबिट्ठाणे।
णिरयं इगिबितिआऊ तिट्ठाणे चारि सेसपदे ॥ २९३ ॥

शैलगकृष्णे शून्ये निरयं च च भूगैकद्विस्थाने।
निरयमेकद्वित्र्यायुस्त्रिस्थाने चत्वारि शेषपदे ॥ २९३ ॥

जी० प्र०--शिलाभेदगतकृष्णलेश्यास्थानेषु असंख्यातलोकमात्रेषु केषुचित् किमप्यायुर्न बध्यते इति शून्यं लिखितं तीव्रतमसंक्लेशस्थानेषु आयुर्बंधाभावात्। पुनस्तत्रैव अग्रतनेषु केषुचित् हीनसंक्लेशस्थानेषु च नरकायुरेकमेव बध्यते इत्येकांको लिखितः। ततोऽनंतगुणहीनसंक्लेशेषु भूभेदगतकृष्णलेश्यास्थानेषु कृष्णनीललेश्याद्वयस्थानेषु च नरकायुरेकमेव बध्यत इति तत्स्थानद्वये एकैकांको लिखितः। पुनः तद्भूभेदगत कृष्णनीलकपोतलेश्यात्रयस्थानेषु केषुचिन्नरकायुरेकमेव बध्यते, अग्रे तत्रैव केषुचित्स्थानेषु नरकतिर्यगायुर्द्वयमेव बध्यते। तत्रैव अग्रे केषु चित्स्थानेषु नरकतिर्यग्मनुष्यायुस्त्रयं बध्यते। इति तद्भूभेदगतत्रिलेश्यास्थानेषु एकद्वित्र्यंका लिखिताः। पुनस्तद्भूभेदगतकृष्णनीलकपोततेजोलेश्याचतुष्टयस्थानेषु पद्मलेश्यासहितलेश्यापंचकस्थानेषु शुक्ललेश्यासहितलेश्याषट्कस्थानेषु च नरकतिर्यग्मनुष्यदेवायूंषि चत्वार्यपि बध्यंते। इति शेषस्थानत्रयेऽपि प्रत्येकं चतुरंको लिखितः ॥ २९३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

म० प्र०—शिलाभेदगतकृष्णलेश्यास्थानेष्वसंख्यातलोकमात्रेषु केषुचित्किमप्यायुर्न बध्यते इति शून्यं लिखितं, तीव्रतमसंक्लेशस्थाने आयुर्बंधाभावात् तत्रैव केषुचित् हीनसंक्लेशस्थानेषु नरकायुरेकमेव बध्यते इत्येकांको लिखितः, ततोऽनंतगुणहीनसंक्लेशेषु भूभेदगतकृष्णलेश्यास्थानेषु कृष्णनीललेश्याद्वयस्थानेषु च नरकायुरेकमेव बध्यते इत्येकांकौ लिखितौ । तत्रैव कृष्णनीलकपोतलेश्यात्रयस्थानेषु केषुचित् नरकायुरेकमेव बध्यते, केषुचित् नरकतिर्यगायुर्द्वयं बध्यते, केषुचिन्नरकतिर्यग्मनुष्यायुस्त्रयं बध्यते, इति एकद्वित्र्यंका लिखिताः । तत्रैव कृष्णनीलकपोततेजोलेश्याचतुष्टयस्थानेषु पद्मलेश्यासहितलेश्यापंचकस्थानेषु शुक्ललेश्यासहितलेश्याषट्कस्थानेषु च नारकतिर्यग्मानुषदेवायूंषि चत्वार्यपि बध्यंते इति शेषपदेषु त्रिषु चतुरंका लिखिताः ॥ २९३॥

स० चं०—शिला भेद समान उत्कृष्ट क्रोधका शक्तिस्थानविषैं असंख्यातलोक प्रमाण उदयस्थान कहे तिनिविषैं केई स्थान ऐसे हैं जिनिविषैं कोऊ आयु बंधै नाहीं । सो यंत्रविषैं तहां शून्य लिखना । जातैं जहां अति तीव्र कषाय होइ तहां आयुका बंध होइ नाहीं । बहुरि तहां ही ऊपरिके कहे स्थान थोरे कषाय लीएं हैं तिनिविषैं एक नरकायु ही बंधै है सो इहां एकका अंक लिखना । बहुरि तातैं अनंतगुण घटता संक्लेश लीएं पृथ्वी भेद समान कषायविषैं जे कृष्णलेश्याके स्थान हैं वा कृष्ण वा नील दोय लेश्याके जे स्थान हैं तिनिविषैं एक नरक आयु ही बंधै है । सो तिनि दोय स्थाननिविषैं एक एकका अंक लिखना । बहुरि तिसही विषैं केइ अगले स्थान कृष्ण नील कपोत तीन लेश्याके हैं सो तिनिविषैं केई स्थाननिविषैं तौ एक नरकायुहीका बंध हो है । बहुरि केई अगले स्थाननिविषैं नरक वा तिर्यंच दोय आयु बंधै हैं । बहुरि केई अगले स्थाननिविषैं नरक तिर्यंच मनुष्य तीन आयु बंधै हैं । सो तीन लेश्याके स्थानविषैं एक दोय तीनका अंक लिखना । बहुरि तिस ही पृथ्वीके भेद समान शक्तिस्थानविषैं केई कृष्ण नील कपोत पीत इनि च्यारि लेश्याके स्थान हैं केइक कृष्णादि पद्मलेश्यापर्यंत पंच लेश्याके स्थान है । केइक कृष्णादिक शुक्ललेश्या पर्यंत षट्लेश्याके स्थान हैं । सो इन तीनूही जायगा नरक तिर्यंच मनुष्य देव संबंधी च्यारयो ही आयु बंधै हैं सो तीनों जायगा च्यारि च्यारिका अंक लिखना॥२९३॥

धूलिगछक्कट्ठाणे चउराऊतिगदुगं च उवरिल्लं ।
पणचदुठाणे देवं देवं सुण्णं च तिट्ठाणे ॥ २९४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi.

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धूलिगषट्कस्थाने चतुरायूंषि त्रिकद्विकं चोपरितनं ।
पंचचतुर्थस्थाने देवं देवं शून्यं च तृतीयस्थाने ॥ २९४ ॥

जी० प्र०— धूलीरेखासदृशशक्तियुक्तेषु लेश्याषट्कस्थानेषु केषुचित् प्रभेदगतलेश्याषट्कस्थानचरमस्थानशक्तितोऽनंतगुणहीनसंक्लेशयुक्तेषु चत्वार्यायूंषि बध्यंते । तत्रैव नरकायुर्व्युच्छिद्यते । तत्रैव अग्रे केषु चित्स्थानेषु नरकायुर्वर्जितशेषायुस्त्रयं बध्यते । तत्रैव तिर्यगायुर्व्युच्छिद्यते । तत्रैव अग्रे लेश्याषट्कस्थानेषु केषुचित् शेषमनुष्यदेवायुषी बध्येते । तत्रैव मनुष्यायुर्व्युच्छिद्यते इति चतुस्त्रिद्व्यंका लिखिताः । पुनस्तत्रैव कृष्णलेश्यारहितलेश्यापंचकस्थानेषु कृष्णनीललेश्याद्वयरहितलेश्याचतुष्कस्थानेषु च देवायुरेकमेव बध्यते । इत्येकैकौंको लिखितः । पुनस्तत्रैव कृष्णनीलकपोतलेश्यात्रयरहितशुभलेश्यात्रयस्थानेषु केषुचिद्देवायुरेकमेव बध्यते इत्येकांको लिखितः । तत्रैव देवायुर्व्युच्छिद्यते पुनस्तच्छुभलेश्यात्रयस्थानेषु अग्रे केषुचित्तीव्रविशुद्धियुक्तेषु किमप्यायुर्न बध्यते इति शून्यं लिखितं । शुभलेश्यात्रयतीव्रतरविशुद्धिविशिष्टपरिणामस्य आयुर्बंधहेतुत्वासंभवात् ॥ २९४ ॥

म० प्र०—ततोऽनंतगुणहीनसंक्लेशेषु धूलिरेखासदृशशक्तिगतेषु लेश्याषट्कस्थानेषु केषुचित् चत्वार्यायूंषि बध्यंते । तत्रैव नरकायुर्विच्छिन्नं । तत्रैव केषुचिदुपरितनशेषायुस्त्रयं बध्यते । तत्रैव तिर्यगायुर्विच्छिन्नं । तत्रैव लेश्याषट्कस्थानेषु केषुचित् उपरितनं शेषायुर्द्वयं बध्यते । तत्रैव मनुष्यायुर्विच्छिन्नं इति चतुस्त्रिद्व्यंका लिखिताः । तत्रैव कृष्णलेश्यारहितलेश्यापंचकस्थानेषु कृष्णनीललेश्यारहितलेश्याचतुष्कस्थानेषु च देवायुरेकमेव बध्यते इत्येकांकौ लिखितौ । तत्रैव कृष्णनीलकपोतलेश्यारहितशुभलेश्यात्रयस्थानेषु केषुचिद्देवायुरेकमेव बध्यते इत्येकांको लिखितः । तत्रैव देवायुर्बंधो व्युच्छिन्नः । पुनस्तत्रैव केषुचित् तीव्रविशुद्धियुक्तेषु किमप्यायुर्न बध्यते इति शून्यं लिखितं । शुभलेश्यात्रयपरिणामस्यापि तीव्रतरविशुद्धिविशिष्टस्य आयुर्बंधहेतुत्वासंभवात् ॥ २९४ ॥

स० चं०—बहुरि पूर्वोक्तस्थानतैं अनंतानंतगुणा घाटि संक्लेश लीएं धूलिरेखा समान शक्तिस्थानविषैं केई कृष्णादि शुक्ललेश्या पर्यंत षटलेश्याके स्थान हैं । तिनविषैं केई स्थाननिविषैं तौ नरकादिक च्यार्‌यो आयु बंधै हैं । केई अगले स्थाननिविषैं नरकायु विना तीन आयु ही बंधैं हैं । केई अगले स्थाननिविषैं मनुष्य देव दोय ही आयु बंधै हैं सो तहां च्यारि तीन दोयके अंक लिखने । बहुरि तिसही धूलिरेखा समान शक्तिस्थानविषैं केई कृष्णलेश्या विना पंच लेश्याके स्थान हैं । केई कृष्ण नील विना च्यारि लेश्याके स्थान हैं । इनि दोऊ जायगा एक देवायु ही बंधै हैं सो दोऊ जायगा एक एकका अंक लिखना । बहुरि तिस ही धूलिरेखा समान शक्तिस्थानविषैं केई पीतादि तीन शुभलेश्या संबंधी स्थान हैं । तिनिविषैं केई स्थाननिविषैं तौ एक देवायु ही

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बंधे हैं सो तहां एकको अंक लिखना। बहुरि केई अगले स्थान तीव्र विशुद्धता लीएं हैं तहां किसी ही आयुका बंध न हो है सो तहां शून्य लिखना॥ ३४॥

सुण्णं दुगइगिठा[णे] जलम्हिं सुण्णं असंखभाजिदकमा।
चउचोद्दसवीसप[दा] असंखलोगा हु पत्तेयं॥ २९५॥

शून्यं द्विकै[क]स्थाने जले शून्यमसंख्यभाजितक्रमाः।
चतुश्चतुर्दश[वि]शतिपदा असंख्यलोका हि प्रत्येकं॥ २९५॥

जी० प्र०-तत्रैव धूलिरेखासदृशशक्तियुक्तस्था[ने]केषुचित् तेजोलेश्यारहितशुभलेश्याद्वययुक्तेषु केवलशुक्ललेश्यायुक्तेषु च किमप्यायुर्न बध्यते इति स्थानद्वये शून्यं लिखितं। ततोनंतगुणविशुद्धिवृद्धि[युक्त]जलरेखासदृशशक्तिविशिष्टशुक्ललेश्योत्कृष्टस्थानेऽपि किमप्यायुर्न बध्यते इति शून्यं लिखितं। तीव्रतमविशुद्धिविशिष्टशुक्ललेश्योत्कृष्टस्थानेषु [संक्ले]शयेन आयुर्बंधहेतुत्वाभावात्। एवं कथितानि कषायाणां चत्वारि शक्तिस्थानानि चतुर्दशलेश्यास्थानानि विंशतिरायुर्बंधाबंधगतस्थानानि च [प्रत्येक]मपि असंख्यातलोकमात्राणि भवंति तथापि उत्कृष्टस्थानमादिं कृत्वा तज्जघन्यस्थानपर्यंतमसंख्यातगुणहीनानि भवंति। तद्यथा सर्वकषायोदयस्थानप्रमाणमेतावत् ≡ a। तद्योग्यासंख्यातलोकेन खंडयित्वा तद्बहुभागमात्राणि शिलाभेदसमानोत्कृष्टशक्तियुक्तोदयस्थानानि भवंति इति [लि]खित्वा ≡ a। ८ पुनस्तच्छेषैकभागो ऽप्यसंख्यातलोकमात्रः। तमपि तद्भागहारेण
९
भक्त्वा तद्बहुभागमात्राणि भूमेदसमानानुत्कृष्टशक्तियुक्तोदयस्थानानि भवंतीति लिखित्वा— ≡ a। ८ पुनस्तच्छेषैकभागमसंख्यातलोकेन
९। ९
भक्त्वा तद्बहुभागमात्राणि धूलिरेखासमानाजघन्यशक्तियुक्तोदयस्थानानि भवंतीति लिखित्वा ≡ a। ८ पुनस्तच्छेषैकभागमात्रासंख्यात-
९। ९। ९
लोकस्थानानि जलरेखासमानजघन्यशक्तियुक्तोदयस्थानानीति लेखितव्यानि— ≡ a। १। अत्र भागहारभूतासंख्यातलोकस्यांकसंदृष्टिर्न-
९। ९। ९
वांकः ९। पुनस्तथा चतुर्दशपदेषु प्रथमे कृष्णलेश्यापदे यावंति शिलाभेदसदृशोत्कृष्टशक्तिस्थानानि तावंत्येव तच्छक्तिगतानि कृष्णलेश्यास-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वोंत्कृष्टस्थानमादिं कृत्वा तद्योग्यमध्यमस्थानपर्यंतानि असंख्यातलोकमात्राणि षट्स्थानपतितसंक्लेशहानियुक्तस्थानानि भवंति। ≡ a।८ एभ्यः भूमे-
९
दसमानशक्तियुक्तकेवलकृष्णलेश्यास्थानानि असंख्यातगुणहीनानि असंख्यातलोकमात्राणि– ≡ a।८।८ कुतः? भूमेदसमानशक्तियुक्तकेवल
९।९।९।१
सर्वस्थानेषु असंख्यातलोकभक्तबहुभागमात्रत्वात्। तदेकभागमात्रेष्वेव कृष्णनीललेश्याद्वयस्थानानि असंख्यातगुणहीनानि असंख्यातलोकमात्राणि-
≡ a।८।८–तेभ्यस्तत्रैव कृष्णनीलकपोतलेश्यात्रयस्थानानि तदेकभागबहुभागमात्राणि असंख्यातगुणहीनानि असंख्यातलोकमात्राणि–
९।९।९।२
≡ a।८।८–पुनस्तदेकभागबहुभागमात्राणि कृष्णनीलकपोततेजोलेश्याचतुष्टयस्थानानि असंख्यातगुणहीनानि असंख्यातलोकमात्राणि–
९।९।९।३
≡ a।८।८–पुनस्तदेकभागासंख्यातलोकबहुभागमात्राणि कृष्णनीलकपोततेजःपद्मलेश्यापंचकस्थानानि असंख्यातगुणहीनानि असं-
९।९।९।४
ख्यातलोकमात्राणि–– ≡ a।८।८ पुनस्तदेकभागासंख्यातलोकभागमात्राणि कृष्णनीलकपोततेजःपद्मशुक्ललेश्याषट्कस्थानान्यसंख्यात
९।९।९।५
लोकहीनानि ≡ a।८।१ कुतः बहुभागरूपासंख्यातलोकगुणकाररहितत्वात्। पुनस्तेभ्योऽसंख्यातगुणहीनान्यपि धूलिरेखासमानश-
९।९।९।५
क्तियुक्तसर्वस्थानानि तद्योग्यासंख्यातलोकभक्तबहुभागमात्राणि षट्लेश्यास्थानानि असंख्यातलोकमात्राणि। ≡ a।८।८ पुनस्त-
९।९।९।९।१
त्रैव तदेकभागबहुभागमात्राणि कृष्णलेश्यारहितशेषपंचलेश्यास्थानानि असंख्यातलोकमात्राणि ≡ a।८।८ पुनस्तत्रैव तदेकभागासं-
९।९।९।९।२
ख्यातलोकभक्तबहुभागमात्राणि कृष्णनीलरहितशेषचतुर्लेश्यास्थानानि असंख्यातलोकमात्राणि ≡ a।८।८ पुनस्तदेकभागासंख्यात
९।९।९।९।३
लोकभक्तबहुभागमात्राणि शुभलेश्यात्रयस्थानानि असंख्यातलोकमात्राणि ≡ a।८।८ पुनस्तत्रैव तदेकभागासंख्यातलोकभक्तबहु-
९।९।९।९।४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भागमात्राणि तेजोलेश्यारहितशुक्लेश्याद्वयस्थानानि असंख्यातलोकमात्राणि ≡ a।८।८ पुनस्तत्रैव तदेकभागमात्राणि केवलशुक्ल-
९।९।९।९।५

लेश्यास्थानानि असंख्यातलोकमात्राण्यपि पूर्वस्मादसंख्यातगुणहीनानि ≡ a।८।१। कुतः ? बहुभागरूपासंख्यातलोकगुणकाररहि-
९।९।९।९।५

तत्वात्। पुनस्तेभ्योऽसंख्यातगुणहीनान्यपि जलरेखासमानशक्तियुक्तानि केवलशुक्ललेश्यास्थानानि असंख्यातलोकमात्राणि ≡ a।१। कुतः
९।९।९

धूलिरेखासमानशक्तिसर्वस्थानेषु केवलशुक्ललेश्यास्थानेषु प्रविष्टभागहाराणां गुणकारभूतासंख्यातलोकबहुभागादसंख्यातगुणकारहीनत्वात्। पुनस्तथायुर्बंधाबंधगतविंशतिपदेषु प्रथमशिलाभेदसमानोत्कृष्टशक्तिगतकृष्णलेश्यास्थाने, आयुर्बंधस्थानानि कृष्णलेश्योत्कृष्टस्थानमादिं कृत्वा असंख्यातलोकभक्तबहुभागमात्राण्यसंख्यातलोकप्रमितस्थानानि ≡ a।८।८ एभ्यस्तत्रैव नरकायुर्बंधहेतुस्थानानि असंख्यातलोकमा-
९।९।

त्राणि असंख्यातगुणहीनानि ≡ a।८।१ कुतः ? तदेकभागमात्रत्वात्। पुनस्तेभ्यो भूमेदसमानानुत्कृष्टशक्तिगतकृष्णलेश्यास्थानानि
९।९।

नरकायुर्बंधकारणानि असंख्यातलोकमात्राणि असंख्यातगुणहीनानि ≡ a।८।८ एभ्यस्तत्रैव कृष्णनीललेश्याद्वयस्थानानि नर-
९।९।९।१

कायुर्बंधकारणानि असंख्यातलोकमात्राणि असंख्यातगुणहीनानि। ≡ a।८।८ एभ्यस्तत्रैव कृष्णनीलकपोतलेश्यात्रयस्थानानि केवलनर-
९।९।९।२

कायुर्बंधकारणानि असंख्यातलोकमात्राणि असंख्यातगुणहीनानि ≡ a।८।८।८ एभ्यस्तत्रैव कृष्णनीलकपोतलेश्यात्रयस्थानानि
९।९।९।३।९।?

नरकतिर्यगायुर्द्वयबंधकारणानिअसंख्यातलोकमात्राणि असंख्यातगुणहीनानि ≡ a।८।८।८ एभ्यस्तत्रैव कृष्णनीलकपोतलेश्यात्रयस्थानानि
९।९।९।३।९।२

नरकतिर्यग्मनुष्यायुस्त्रयबंधकारणानि असंख्यातलोकमात्राणि असंख्यातगुणहीनानि— ≡ a।८।८।१ एभ्यस्तत्रैव कृष्णनीलकपोततेजोलेश्याचतु-
९।९।५।३।९।२

ष्टयस्थानानि नरकतिर्यग्मनुष्यदेवायुर्बंधकारणानि असंख्यातलोकमात्राणि असंख्यातगुणहीनानि ≡ a।८।८ एभ्यस्तत्रैव कृष्णनीलकपोततेजःपद्मले-
९।९।९।४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्यापंचकस्थानानि चतुर्गत्यायुर्बंधकारणानि असंख्यातलोकमात्राणि असंख्यातगुणहीनानि ≡ ३।८।८ एभ्यस्तत्रैव षड्लेश्यास्थानानि
९।९।९।५

चतुरायुर्बंधकारणानि असंख्यातलोकमात्राणि असंख्यातगुणहीनानि ≡ ३।८।१ कुतः ? गुणकारभूतासंख्यातलोकबहुभागरहितत्वात्। पु-
९।९।९।५

नस्तेभ्यः धूलिरेखासमानशक्तिगतसर्वस्थानेषु असंख्यातलोकभक्तबहुभागमात्राणि षड्लेश्यास्थानानि चतुरायुर्बंधकारणानि असंख्यातगुणही-
नानि असंख्यातलोकमात्राणि ≡ ३।८।८।८ पुनस्तत्रैव षड्लेश्यास्थानानि नारकायुर्वर्जितशेषायुस्त्रयबंधकारणानि तदेकभागासं-
९।९।९।९।९।१

ख्यातबहुभागमात्राणि असंख्यातगुणहीनानि असंख्यातलोकमात्राणि ≡ ३।८।८।८ पुनस्तत्रैव षड्लेश्यास्थानानि मनुष्यदेवा-
९।९।९।९।९।२

युर्बंधकारणानि असंख्यातगुणहीनानि तदेकभागासंख्यातलोकभक्तैकभागत्वादसंख्यातलोकमात्राणि ≡ ३।८।८।१ पुनस्तत्रैव कृ-
९।९।९।९।९।२

ष्णलेश्यावर्जितशेषपंचलेश्यास्थानानि देवायुर्बंधकारणानि असंख्यातगुणहीनानि असंख्यातलोकमात्राणि ≡ ३।८।८। एभ्यस्तत्रैव
९।९।९।९।९।२

कृष्णनीलरहितचतुर्लेश्यास्थानानि केवलदेवायुर्बंधकारणानि असंख्यातगुणहीनानि असंख्यातलोकमात्राणि ≡ ३।८।८। एभ्यस्त-
९।९।९।९।९।३

त्रैव कृष्णनीलकपोतलेश्यारहितशेषशुभलेश्यात्रयस्थानेषु देवायुर्बंधकारणानि यथायोग्यासंख्यातलोकभक्तबहुभागमात्राणि असंख्यातगुण-
हीनानि असंख्यातलोकमात्राणि। ≡ ३।८।८।८। तदेकभागगतशुभलेश्यात्रयस्थानानि आयुर्बंधरहितानि असंख्यातलोकमाणि
९।९।९।९।४।९

असंख्यातगुणहीनानि ≡ ३।८।८।१। पुनस्तत्रैव पद्मशुक्ललेश्याद्वयस्थानानि आयुर्बंधकारणानि असंख्यातगुणहीनानि असंख्यात-
९।९।९।९।४।९

लोकमात्राणि ≡ ३।८।८। कुतः प्राक्तनशुभलेश्यात्रयस्थानेषु आयुर्बंधरहितस्थानेषु प्रविष्टभागहारस्य असंख्यातगुणहीनत्वात्।
९।९।९।९।५

पुनस्तेभ्यस्तत्रैव शुक्ललेश्यास्थानेषु आयुर्बंधाकारणविशुद्धिपरिणामस्थानानि असंख्यातलोकमात्राणि असंख्यातगुणहीनानि ≡ ३।८।१
९।९।९।९।५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कथं ? इति चेत् गुणकारभूतासंख्यातबहुभागरहितत्वात् । पुनस्तेभ्यो जलरेखासमानशक्तिगतशुक्ललेश्यास्थानानि आयुर्बंधशून्यानि असंख्यातलोकमात्राणि असंख्यातगुणहीनानि ≡ a । १ । कथं ? धूलिरेखासमानशक्तियुक्तस्थानेषु केवलचरमशुक्ललेश्यास्थाने प्रविष्टपंचवारासं-
६ । ६ । ६ ।
ख्यातलोकभागहारेभ्यः तद्गुणकारभूतासंख्यातबहुभागस्य असंख्यातगुणितत्वात् । एवं चत्वारि पदानि, चतुर्दशपदानि, विंशतिः पदानि च प्रत्येकमसंख्यातगुणहीनक्रमाणि ज्ञातव्यानि ॥ २९५ ॥ अथ श्रीमाधवचंद्रत्रैविद्यदेवाः कषायमार्गणायां जीवसंख्यां गाथात्रयेण कथयंति—

म० प्र०—तत्रैव धूलिरेखासदृशशक्तिस्थानेषु केषुचित् तेजोलेश्यारहितशुभलेश्याद्वययुक्तेषु केवलशुक्ललेश्यायुक्तेषु च किमप्यायुर्न बध्यते इति शून्यं लिखितं । ततोऽनंतगुणविशुद्धिवृद्धियुक्तेषु जलरेखासदृशशक्तिविशिष्टशुक्ललेश्यास्थानेषु च किमप्यायुर्न बध्यते इति शून्यं लिखितं । तीव्रतमविशुद्धिविशिष्टशुक्ललेश्योत्कृष्टस्थानेषु नितरामायुर्बंधहेतुत्वाभावात् । एवमुक्तानि कषायाणां चत्वारि शक्तिस्थानानि, चतुर्दशलेश्यास्थानानि, विंशतिरायुर्बंधकाबंधस्थानानि सर्वाण्यसंख्यातलोकमात्राणि भवंति तथापि उत्कृष्टस्थानादारभ्य जघन्यस्थानपर्यंतमसंख्यातगुणहीनानि भवंति । तद्यथा—सर्वकषायोदयस्थानप्रमाणमिदं । ≡ a । तद्योग्यासंख्यातलोकेन भक्त्वा तद्बहुभागमात्राणि शिलाभेदसमानोत्कृष्टशक्तियुक्तानि उदयस्थानानि लिखितव्यानि भवंति । शिलाभेदः ≡ a । ८ । पुन-
९
स्तदेकभागमसंख्यातलोकेन भक्त्वा तद्बहुभागमात्राणि भूभेदसमानानुत्कृष्टशक्तियुक्तोदयस्थानानि लिखितव्यानि । ≡ a । ८ । पुनस्तदेकभागमसंख्यातलो-
९ । ९
केन भक्त्वा तद्बहुभागमात्राणि धूलिरेखासमानाजघन्यशक्तियुक्तान्युदयस्थानानि लिखितव्यानि । ≡ a ८ । पुनस्तदेकभागमात्राणि जलरेखासमानजघन्यश-
९ ९ ९
क्तियुक्तान्युदयस्थानानि लिखितव्यानि । ≡ a १ । अत्र भागहारभूतासंख्यातलोकस्य संदृष्टिर्नवांकः । तथा चतुर्दशपदेषु प्रथमे कृष्णलेश्यापदे यावंति शिला-
६ ९ ९
भेदसदृशोत्कृष्टशक्तिस्थानानि तावंत्येव तच्छक्तिगतानि कृष्णलेश्याया उत्कृष्टस्थानादारभ्य तद्योग्यमध्यमस्थानपर्यंतानि संक्लेशस्थानानि असंख्येयलोकमात्राणि षट्स्थानपतितसंक्लेशहानियुक्तानि भवंति । ≡ a ८ । ततो भूभेदसमानशक्तियुक्तकेवलकृष्णलेश्यास्थानान्यसंख्येयगुणहीनान्यसंख्येयलोकमात्राणि ≡ a ८ ।
९ ९ ९
ततस्तत्रैवासंख्येयगुणहीनान्यसंख्येयलोकमात्राणि कृष्णनीललेश्याद्वयस्थानानि । ≡ a ८ । ततस्तत्रैवासंख्येयगुणहीनान्यसंख्येयलोकमात्राणि कृष्णनीलकपोत-
९ ९ ९
लेश्यात्रयस्थानानि । ≡ a ८ । ततस्तत्रैवासंख्येयगुणहीनान्यसंख्येयलोकमात्राणि कृष्णनीलकपोततेजोलेश्याचतुष्टयस्थानानि । ≡ a ८ । ततस्तत्रैवासंख्ये-
९ ९ ९ ९ ९ । ५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यगुणहीनान्यसंख्येयलोकमात्राणि कृष्णनीलकपोततेजःपद्मलेश्यापंचकस्थानानि । ≡ a ८ / ९।६ । ततस्तत्रैवासंख्येयगुणहीनान्यसंख्येयलोकमात्राणि लेश्याषट्कस्थानानि । ≡ a।१ / ९।६ । ततो यथायोग्यासंख्येयगुणहीनान्यसंख्येयलोकमात्राणि धूलिरेखासमानशक्तिगतलेश्याषट्कस्थानानि । ≡ a।८ / ९।६।९ । ततस्तत्रैवासंख्येयगुणहीनान्यसंख्येयलोकमात्राणि कृष्णलेश्यारहितशेषलेश्यापंचकस्थानानि । ≡ a।८ / ९।६।९९ । ततस्तत्रैवासंख्येयगुणहीनान्यसंख्येयलोकमात्राणि कृष्णनीललेश्यारहित। शेषलेश्याचतुष्टयस्थानानि । ≡ a ८ / ९।६।९९९ ततस्तत्रैवासंख्येयगुणहीनान्यसंख्येयलोकमात्राणि कृष्णनीलकपोतलेश्यारहितशुभलेश्यात्रयस्थानानानि । ≡ a ८ / ९।६।९९९६ । ततस्तत्रैवासंख्येयगुणहीनान्यसंख्येयलोकमात्राणि पद्मशुक्ललेश्याद्वयस्थानानि ≡ a ८ / ९।६।९९९९९ ततस्तत्रैवासंख्येयगुणहीनान्यसंख्येयलोकमात्राणि शुक्ललेश्यास्थानानि ≡ a।१ / ९।६।९।९।९।९।९ ततोऽसंख्यगुणहीनानि असंख्येयलोकमात्राणि जलरेखासदृशशक्तिगतशुक्ललेश्यास्थानानि– ≡ a / ९।६।९९९९९९९ तथा आयुर्बंधाबंधपदेषु विंशतौ प्रथमं शिलाभेदसमानोत्कृष्टशक्तिगतकृष्णलेश्यास्थानेषु आयुरबंधकस्थानानि कृष्णलेश्योत्कृष्टस्थानादारभ्य असंख्यातलोकमात्राणि तदसंख्यातबहुभागमात्राणि भवंति ≡ a।८।८ / ९।९। तत्रैव नारकायुर्बंधहेतुस्थानानि ततोऽसंख्येयगुणहीनान्यसंख्येयलोकमात्राणि तदेकभागमात्रत्वात् ≡ a ८ / ९। ९ ततो भूभेदसमानानुत्कृष्टशक्तिगतकृष्णलेश्यास्थानानि नारकायुर्बंधकारणान्यसंख्येयगुणहीनान्यसंख्येयलोकमात्राणि ≡ a ८ / ९ ९ ९ ततस्तत्रैव कृष्णनीललेश्याद्वयस्थानानि नारकायुर्बंधकारणान्यसंख्येयगुणहीनान्यसंख्येयलोकमात्राणि ≡ a ८ / ९।९।२ ततस्तत्रैव कृष्णनीलकपोतलेश्यात्रयस्थानानि केवलनारकायुर्बंधकारणान्यसंख्येयगुणहीनान्यसंख्यातलोकमात्राणि ≡ a ८ / ९ : ९।४ ततस्तत्रैव कृष्णनीलकपोतलेश्यात्रयस्थानानि नारकतिर्यगायुर्बंधकारणान्यसंख्येयगुणहीनान्यसंख्येयलोकमात्राणि ≡ a ८ / ९।९।५ ततस्तत्रैवाशुभलेश्यात्रयस्थानानि नारकतिर्यग्मनुष्यायुर्बंधकारणान्यसंख्येयगुणहीनान्यसं-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ख्येयलोकमात्राणि ≡ ə ८ ततस्तत्रैव कृष्णनीलकपोततेजोलेश्यास्थानानि नारकतिर्यग्मनुष्यदेवायुर्बंधकारणान्यसंख्येयगुणहीनान्यसंख्येयलोकमात्राणि
९ । ९ । ६

≡ ə ८ ततस्तत्रैव कृष्णनीलकपोततेजःपद्मलेश्यास्थानानि चतुरायुर्बंधकारणान्यसंख्येयगुणहीनान्यसंख्येयलोकमात्राणि ≡ ə ८ ततस्तत्रैव षट्लेश्या-
९ । ९ । ७ ९ । ९ । ८

स्थानानि चतुरायुर्बंधकारणान्यसंख्येयगुणहीनान्यसंख्येयलोकमात्राणि ≡ ə ८ ततो धूलिरेखासदृशशक्तिगतानि लेश्याषट्कस्थानान्यसंख्येयगुणहीनान्यसं-
९ । ९ । ९

ख्येयलोकमात्राणि चतुरायुर्बंधकारणानि ≡ ə ८ ततस्तत्रैवलेश्याषट्कस्थानानि नरकायुर्वर्जितशेषायुस्त्रयबंधकारणान्यसंख्येयगुणहीनान्यसं-
९ । ९ । ९ । ९ । १

ख्यातलोकमात्राणि ≡ ə । ८ ततस्तत्रैव लेश्याषट्कस्थानानि मनुष्यदेवायुर्बंधकारणान्यसंख्येयगुणहीनान्यसंख्येयलोकमात्राणि
९ । ९ । ९ । ९ । २

≡ ə । ८ ततस्तत्रैव कृष्णलेश्याहीनशेषलेश्यापंचकस्थानानि केवलदेवायुर्बंधकारणान्यसंख्येयगुणहीनान्यसंख्येयलोकमात्राणि ≡ ə ८ ।
९ । ९ । ९ । ९ । ३ ९।९।९।९। ४

ततस्तत्रैव कृष्णनीललेश्यारहितशेषलेश्याचतुष्कस्थानानि केवलदेवायुर्बंधकारणान्यसंख्येयगुणहीनान्यसंख्यातलोकमात्राणि ≡ ə ८ ततस्तत्रैव त-
९ । ९ । ९ । ९ । ५

जःपद्मशुक्ललेश्यास्थानानि केवलदेवायुर्बंधकारणान्यसंख्येयगुणहीनान्यसंख्यातलोकमात्राणि ≡ ə ८ । ततस्तत्रैव शुभलेश्यात्रयस्थानान्यायुर्बंध-
९ । ९ । ९ । ९ , ६

शून्यान्यसंख्येयगुणहीनान्यसंख्यातलोकमात्राणि ≡ ə ८ । ततस्तत्रैव पद्मशुक्ललेश्यास्थानान्यायुर्बंधशून्यान्यसंख्येयगुणहीनान्यसंख्येयलोकमा-
९ । ९ । ९ । ९ । ७

त्राणि ≡ ə । ततस्तत्रैव केवलशुक्ललेश्यास्थानान्यायुर्बंधशून्यान्यसंख्येयगुणहीनाम्यसंख्येयलोकमात्राणि ≡ ə ८ ततो जल-
९ । ९ । ९ । ९ । ८ ९ । ९ । । ९ । ९ । ९

रेखासदृशशक्तिगतकेवलशुक्ललेश्यास्थानान्यायुर्बंधशून्यान्यसंख्येयगुणहीनान्यसंख्येयलोकमात्राणि ≡ ə ८ । एवमेतानि पदानि प्रत्येकमसंख्या-
९ । ९ । ९ । ९ । १०

तभाजितक्रमाण्यसंख्यातलोकमात्राणि ज्ञातव्यानि ॥ २९५ ॥ अथ श्रीमाधवचंद्रत्रैविद्यदेवाः कषायमार्गणायां गाथात्रयेण संख्यां प्ररूपयंति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०—बहुरि तिस ही धूलिरेखा समान शक्तिस्थानविषैं केई स्थान पद्म शुक्ल दोय लेश्या संबंधी हैं। केई स्थान एक शुक्ललेश्या संबंधी हैं सो इनि दोऊ ही जायगा किसी ही आयुका बंध नाहीं सो दोऊ जायगा शून्य लिखना। बहुरि तातैं अनंतगुणी बधती विशुद्धता लीएं जलरेखा समान शक्तिस्थानके सर्वस्थान केवल शुक्ललेश्या संबंधी हैं। तिनिविषैं किसी ही आयुका बंध नाही है। सो तहां शून्य लिखना। जातैं अति तीव्र विशुद्धता आयुके बंधका कारण नाहीं हैं ऐसैं कषायनिके शक्ति स्थान च्यारि कहे अर लेश्या स्थान चौदह कहे अर आयुके बंधनेके वा न बंधनेके स्थान वीस कहे ते सर्व ही स्थान असंख्यातलोक प्रमाण असंख्यात लोक प्रमाण जानने। परंतु उत्कृष्ट स्थानतैं लगाइ जघन्य स्थान पर्यंत असंख्यात गुणे घाटि जानने। असंख्यातके भेद घने हैं तातैं सामान्यपनैं सर्व ही असंख्यात लोक प्रमाण कहे। सोई कहिए है-सर्व कषायनिके उदयस्थान असंख्यातलोक प्रमाण हैं तिनिकौं यथा योग्य असंख्यात लोकका भाग दीजिए तिनिविषैं एक भाग विना अवशेष बहुभाग प्रमाण शिला भेद समान उत्कृष्टशक्ति संबंधी उदयस्थान हैं ते भी असंख्यातलोक प्रमाण हैं। बहुरि वह जो एक भाग अवशेष रह्या ताकौं असंख्यात लोकका भाग दीएं एक भाग विना अवशेष बहुभाग प्रमाण पृथ्वी भेद समान अनुत्कृष्टशक्तिसंबंधी उदयस्थान हैं ते भी असंख्यातलोक प्रमाण हैं। बहुरि जो एक भाग अवशेष रह्या ताकौं असंख्यातलोकका भाग दीएं एकका भाग विना अवशेष भाग प्रमाण धूलिरेखा समान अजघन्यशक्तिस्थानसंबंधी उदयस्थान हैं। ते भी असंख्यातलोक प्रमाण हैं। बहुरि अवशेष एक भाग रह्या तींहि प्रमाण जलरेखा समान जघन्यशक्तिसंबंधी उदयस्थान हैं त भी असंख्यातलोक प्रमाण हैं।

ऐसैं च्यारिशक्ति स्थाननिमें उदयस्थानका प्रमाण कह्या। अब चौदह लेश्यास्थाननिविषैं उदयस्थाननिका प्रमाण कहिए है—पहिलैं कृष्णलेश्या स्थाननिविषैं जेते शिलाभेद समान उत्कृष्टशक्तिस्थानविषैं उदयस्थान हैं ते ते सर्व तिस उत्कृष्टशक्तिकौं प्राप्त कृष्णलेश्याका उत्कृष्टस्थानतैं लगाइ यथायोग्य कृष्णलेश्याके मध्यस्थानपर्यंत षट्स्थानपतित संक्लेशहानि लीएं असंख्यातलोकमात्रस्थान हैं ते उत्कृष्टशक्तिकेस्थान समान जानने।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बहुरि इनितैं असंख्यातगुणे घाटि पृथ्वी भेद समान शक्तिस्थानविषैं प्राप्त कृष्णलेश्याके स्थान असंख्यातलोक प्रमाण हैं। जातैं ते स्थान पृथ्वीभेद समान शक्तिस्थानविषैं जेते उदयस्थान हैं तिनिकौं योग्य असंख्यातलोकका भाग दीएं एकभाग विना बहुभाग मात्र हैं। बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही कृष्ण नील दोय लेश्याके स्थान असंख्यातलोक प्रमाण ते तिस अवशेष एक भागकौं योग्य असंख्यातलोकका भाग दीएं बहुभागमात्र हैं एकभाग विना अवशेष भागमात्र प्रमाणकी बहुभाग संज्ञा जाननीं। बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही कृष्ण नील कपोत तीन लेश्याके स्थान असंख्यातलोक प्रमाण हैं ते तिस अवशेष एक भागकौं योग्य असंख्यातलोकका भाग दीएं बहुभागमात्र हैं बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही कृष्णादि च्यारि लेश्याके स्थान असंख्यातलोक प्रमाण हैं ते अवशेष एक भागकौं योग्य असंख्यातलोकका भाग दीयैं बहुभाग मात्र हैं। बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही कृष्णादि पंच लेश्याके स्थान असंख्यातलोक प्रमाण हैं ते अवशेष एक भागकौं योग्य असंख्यातलोकका भाग दीएं बहुभागमात्र हैं। बहुरि तिनितैं असंख्यातलोक गुणे घाटि तहां ही कृष्णादि छह लेश्याके स्थान असंख्यातलोक प्रमाण हैं ते तिस अवशेष एकभाग मात्र हैं इहां पूर्व स्थान तैं बहुभागरूप असंख्यातलोकमात्र गुणकार घट्या तातैं असंख्यातगुणा घाटि कह्या है। बहुरि तिनितैं असंख्यात गुणे घाटि धूलिरेखा समान शक्तिस्थानविषैं प्राप्त कृष्णादि छह लेश्याकेस्थान ते असंख्यातलोक प्रमाण हैं ते धूलिरेखासमान शक्तिस्थानसंबंधी सर्वस्थाननिके प्रमाणकौं योग्य असंख्यातलोकका भाग दीएं एकभाग विना बहुभागमात्र हैं। बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही कृष्णरहित पंचलेश्याके स्थान असंख्यातलोक प्रमाण हैं ते तिस अवशेष एकभागकौं योग्य असंख्यातलोकका भाग दीएं बहुभागमात्र हैं। बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही कृष्ण नील रहित च्यारि लेश्याके स्थान असंख्यातलोक प्रमाण हैं ते तिस अवशेष एकभागकौं योग्य असंख्यातलोकका भाग दीएं बहुभागमात्र हैं। बहुरि तिनितैं असंख्यातगुणे घाटि तहां ही तीन शुभ लेश्याके स्थान असंख्यातलोकमात्र हैं ते अवशेष

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकभागकौं योग्य असंख्यातलोकका भाग दीएं बहुभागमात्र हैं। बहुरि तिनितैं असंख्यात गुणे घाटि पीतरहित दोय शुभलेश्याके स्थान असंख्यातलोक प्रमाण हैं ते तिस एकभागको योग्य असंख्यातलोकका भाग दीएं बहुभाग-मात्र है। बहुरि तिनतैं असंख्यातगुणे घाटि तहां ही केवल शुक्ललेश्याके स्थान असंख्यातलोक प्रमाण हैं ते तिस अवशेष एकभागमात्र जानने। इहां बहुभागरूप असंख्याततलोकमात्र गुणकार घट्या तातैं असंख्यातगुणा घाटि कह्या है। बहुरि तिनितैं असंख्यात गुणे घाटि जलरेखा समान शक्तिविषैं प्राप्त सर्व शुक्ललेश्याके स्थान असंख्यातलोक प्रमाण हैं ते जलरेखाशक्तिविषै प्राप्त स्थाननिका प्रमाणमात्र है। इहां धूलिरेखासमान शक्तिके सर्वस्थाननिविषैं जे केवल शुक्ललेश्याके स्थान कहे तहां भागहार अधिक हैं परंतु गुणकारभूत असंख्यात लोकका तहां बहुभाग है इहां एकभाग है तातैं असंख्यात गुणा घाटि कह्या है। अब आयुके बंध अबंधके वीस स्थान तिनिविषैं उदयस्थाननिका प्रमाण कहिए है—

प्रथम शिला भेद समान उत्कृष्ट शक्तिविषैं प्राप्त कृष्णलेश्याके स्थान तिनि कृष्णलेश्याका उत्कृष्ट स्थान-तैं लगाइ असंख्याततलोकप्रमाण आयुके अबंध स्थान हैं ते उत्कृष्ट शक्तिविषैं प्राप्त सर्वस्थाननिका प्रमाणकौं असंख्याततलोकका भागदीएं बहुभाग मात्र हैं। बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही नरकायु बंधनेकौं कारण असंख्यातलोक प्रमाण स्थान हैं ते तिस अवशेष एक भाग मात्र हैं। पूर्वै बहुभाग इहां एक भाग तातैं असंख्यातगुणा घाटि कह्या है। बहुरि तिनितैं असंख्यात गुणे घाटि पृथ्वीभेदसमान अनुत्कृष्ट शक्तिविषैं प्राप्त कृष्णलेश्याके पूर्वोक्त सर्वस्थान ते नरकायुबंधकौं कारण असंख्यात लोकप्रमाण हैं। बहुरि तिनितैं असंख्यात गुणे घाटि तहांही कृष्णनीललेश्याके पूर्वोक्त सर्वस्थान ते नरकायुबंधकौं कारण असंख्यातलोक प्रमाण हैं बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही कृष्णादि तीनि लेश्याके स्थाननिविषैं नरकायु बंधकौं कारण स्थान ते तिन कृष्णादि तीन लेश्यास्थाननिके प्रमाणकौं योग्य असंख्यात लोकका भागदीएं बहुभागमात्र असंख्यात लोकप्रमाण हैं। बहुरि तिनतैं असंख्यात गुणे घाटि तहांही कृष्णादि तीन लेश्याके स्थाननिविषैं नरक तिर्यंच आयुके बंधकौं कारण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थान ते तिस अवशेष एक भागकौं योग्य असंख्यात लोकका भाग दीएं बहुभाग मात्र असंख्यात लोक प्रमाण हैं। बहुरि तिनितैं असंख्यात गुणे घाटि तहां कृष्णादि तीन लेश्याके स्थाननिविषैं नरक तिर्यंच मनुष्य आयुबंधके कारण स्थान ते अवशेष एक भाग मात्र असंख्यात लोक प्रमाण हैं। बहुरि तिनितैं असंख्यातगुणे घाटि तहांही पूर्वोक्त कृष्णादि च्यारि लेश्याके स्थान सर्व ही च्यार्यो आयुबंधके कारण ते असंख्यातलोक प्रमाण हैं बहुरि तिनितैं असंख्यातगुणे घाटि तहां ही पूर्वोक्त कृष्णादि पंच लेश्याके स्थान सर्व ही च्यार्यो आयुबंधके कारण ते असंख्यातलोक प्रमाण हैं। बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही पूर्वोक्त कृष्णादि छहौ लेश्याके स्थान सर्व ही च्यार्यो आयुबंधके कारण ते असंख्यात लोक प्रमाण हैं। पूर्व स्थानविषैं गुणकार बहुभाग था इहां एक भाग रह्या तातैं असंख्यातगुणा घाटि कह्या है। बहुरि तिनतैं असंख्यात गुणे घाटि धूलिरेखा समान शक्तिविषैं प्राप्त षट्लेश्या स्थाननिविषैं च्यार्यौ आयुबंधके कारण स्थान ते तिन अजघन्य शक्तिविषैं प्राप्त षट्लेश्या स्थाननिके प्रमाणकौं असंख्यातलोकका भाग दीएं बहुभाग मात्र असंख्यातलोक प्रमाण हैं। बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही षट्लेश्याके स्थाननिविषैं नरक विना तीन आयुबंधके कारण स्थान ते तिस अवशेष एकभागकौं असंख्यातका भाग दीएं बहुभागमात्र असंख्यात लोक प्रमाण हैं बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही षट्लेश्याके स्थानविषैं मनुष्य देवायुबंधके कारण स्थान ते तिस अवशेष एकभागमात्र असंख्यातलोक प्रमाण हैं इहां पूर्वै बहुभाग थे इहां एक भाग है तातैं असंख्यात गुणा घाटि कह्या। बहुरि तिनितैं असंख्यातगुणे घाटि तहां ही पूर्वोक्त कृष्ण विना पंचलेश्याके स्थान सर्व ही देवायुके बंधके कारण हैं ते असंख्यात लोक प्रमाण जानने। बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही पूर्वोक्त कृष्ण नील रहित च्यारि लेश्याके स्थान सर्व ही देवायुबंधकौं कारण हैं ते असंख्यातलोक प्रमाण जानने। बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही शुभ तीन लेश्याके स्थाननिविषैं देवायु बंधकौं कारण स्थान ते तिस अजघन्य शक्तिविषैं प्राप्त त्रिलेश्या स्थाननिका प्रमाणकौं योग्य असंख्यात लोकका भाग दीएं बहुभाग मात्र असंख्यात लोक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रमाण हैं । बहुरि तिनितैं असंख्यात गुणे घाटि तहां ही शुभ तीनलेश्याके स्थाननिविषैं किसी ही आयुबंधकौं कारण नाहीं ऐसे स्थान तिस अवशेष एक भागमात्र असंख्यात लोक प्रमाण जानने । बहुरि तिनितैं असंख्यात गुणे घाटि तहांही पूर्वोक्त पद्मलेश्याके स्थान सर्व ही आयु बंधकौं कारण नाहीं ते असंख्यातलोक प्रमाण हैं । यातैं पूर्वस्थानविषैं भागहार असंख्यात गुणा घटता है तातैं असंख्यात गुणा घाटि कह्या है बहुरि तिनितैं असंख्यात गुणे घाटि तहांही पूर्वोक्त शुक्ललेश्याके स्थान सर्वही आयुबंधकौं कारण नाही ते असंख्यात लोक प्रमा-

काषायनिके शक्तिस्थान च्यारि, लेश्यास्थान चौदह, आयुबंध बंधस्थान बीस, तिनिका यंत्र ।

शक्तिस्थान ४	शिलाभेद समान १		पृथ्वीभेद समान १								धूलिरेखासमान १									जलरेखासमान १
लेश्यास्थान १४	१ कृष्ण		१ कृष्ण	२ कृष्णादि	३ कृष्णादि			४ कृष्णादि	५ कृष्णादि	६ कृष्णादि	६ कृष्णादि			५ कृष्ण विना	४ कृष्ण नील विना	३ पीतादि		२ पद्म शुक्ल	१ शुक्ल	१ शुक्ल
आयुबंधाबंधस्थान २०	० अबंध	१ नरकायु	१ नरकायु	१ नरकायु	१ नरकायु	२ नरकतिर्यंचायु	३ नरकतिर्यंचमनुष्यायु	४ सर्व	४ सर्व	४ सर्व	४ सर्व सर्व	३ मनुष्यदेवायुतिर्यंचायु	२ मनुष्यदेवायु	१ देवायु	१ देवायु	१ देवायु	० अबंध	० अबंध	० अबंध	० अबंध

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ण हैं पूर्वें बहुभागका गुणकार था इहां एक भागका गुणकार भया तातैं असंख्यातगुणा घटता कह्या है। बहुरि ति-नितैं असंख्यात गुणे घाटि पूर्वोक्त जलरेखा समान शक्तिविषैं प्राप्त शुक्ललेश्याके स्थान सर्वही किसी ही आयुबंध कौं कारण नाहीं ते असंख्यातलोक प्रमाण हैं। पूर्व स्थानविषैं जे भागहार कहे तिनतैं तिस ही भागहारका गुण-कार असंख्यात गुणा है तातैं असंख्यात गुणा घाटि कह्या है। ऐसैं च्यारि चौदह बीस पद क्रमतैं असंख्यात गुणे घाटि कहे तथापि असंख्यातके बहुभेद हैं तातैं सामान्यपनैं सबनिकौं असंख्यात लोक प्रमाण कहे विशे-षपनैं यथासंभव असंख्यातका प्रमाण जानना ऐसै ही भागहारविषैं भी यथासंभव असंख्यातलोकका प्रमाण जानना ॥२९५॥ आगैं श्रीमाधवचंद्र त्रैविद्यदेव तीनि गाथनिकरि कषायमार्गणाविषैं जीवनिकी संख्या कहै हैं—

पुह पुह कसायकालो णिरये अंतोमुहुत्तपरिमाणो।
लोहादी संखगुणो देवेसु य कोहपहुदीदो ॥ २९६ ॥

पृथक् पृथक् कषायकालः निरये अंतर्मुहूर्तपरिमाणः।
लोभादिः संख्यगुणः देवेषु च क्रोधप्रभृतितः ॥ २९६ ॥

जी० प्र०—नरकगतौ नारकाणां लोभादिकषायाणां उदयकालः पृथक् पृथक् प्रत्येकमंतर्मुहूर्तपरिमाणो भवति। तथापि पूर्वपूर्वकषायो-दयकालादुत्तरोत्तरकषायोदयकालः संख्यातगुणो ज्ञातव्यः। तद्यथा—तत्र लोभकषायोदयकालः सर्वतः स्तोकांतर्मुहूर्तमात्रः २७ ततो मायाकषा-योदयकालः संख्यातगुणः २ ७ ४ ततो मानकषायोदयकालः संख्यातगुणः २ ७ । १६ ततः क्रोधकषायोदयकालः संख्यातगुणः २७ ६४ देवगतौ देवानां क्रोधादिकषायोदयकालाः पृथक् पृथक् प्रत्येकमंतर्मुहूर्तमात्राः तथापि उत्तरोत्तरमानादिलोभपर्यंतं संख्यातगुणक्रमा भवंति। तद्यथा-तत्र क्रोधकषायोदयकालः अंतर्मुहूर्तः सर्वतः स्तोकः २ ७ । १ । ततो मानकषायोदयकालः संख्यातगुणः २ ७ । ४ ततो मायाकषा-योदयकालः संख्यातगुणः २ ७ । १६ ततो लोभकषायोदयकालः संख्यातगुणः २ ७ । ६४ ॥ २९६ ॥

मं० प्र०—णिरये--नरकगतौ लोभादीनां कषायाणां कालः पृथक् पृथक् प्रत्येकमंतर्मुहूर्तमात्रोऽपि पूर्वपूर्वकषायकालादुत्तरोत्तरकषायकालः संख्येयगुणः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तद्यथा–तत्र सर्वतः स्तोकांतर्मुहूर्तमात्रो लोभकालः । २ ०१ । १ । ततः संख्येयगुणो मायाकालः । २ ०१ , ४ , ततः संख्येयगुणो मानकालः , २ , ०१ , १६ , ततः संख्येयगुणः क्रोधकालः , २०१ , ६४ । देवेषु च क्रोधप्रभृतीनां कषायाणां कालः प्रत्येकमंतर्मुहूर्तमात्रोऽपि पूर्वपूर्वकषायकालादुत्तरोत्तरमानादिकालः संख्येयगुणः । तथाहि-सर्वतः स्तोकांतर्मुहूर्तमात्रः क्रोधकालः , २०१,१ , ततः संख्येयगुणो मानकालः , २०१ , ४, ततः संख्येयगुणो मायाकालः , २०१ १६ ततः संख्येयगुणो लोभकालः , २०१ , ६४ ॥ २९६ ॥

स० चं०—नरकगतिविषैं नारकीनिकैं लोभादि कषायनिका उदय काल अंतर्मुहूर्त मात्र है तथापि पूर्व पूर्व कषायतैं पिछले पिछले कषायका काल संख्यात गुणा है अंतर्मुहूर्तके भेद घने तातैं हीनाधिक होतैं भी अंतर्मुहूर्त ही कहिए सोई कहिए हैं–सर्वतैं स्तोक अंतर्मुहूर्त प्रमाण लोभ कषायका काल है। तातैं संख्यात गुणा मायाकषायका काल है। यातैं संख्यातगुणा मानकषायका काल है। यातैं संख्यातगुणा क्रोधकषायका काल है। बहुरि देवगतिविषैं क्रोधादि कषायनिका काल प्रत्येक अंतर्मुहूर्तमात्र है तथापि उत्तरोत्तर संख्यात गुणा है सोई कहिए है–स्तोक अंतर्मुहूर्त प्रमाण तौ क्रोध कषायका काल है। तातैं संख्यातगुणा मानकषायका काल है। तातैं संख्यातगुणा मायाकषायका काल है। तातैं संख्यातगुणा लोभकषायका काल है। भावार्थ–नरकगतिविषैं क्रोध कषायरूप परिणति बहुतर हो है और कषायनिरूप क्रमतैं स्तोक स्तोक रहै है। देवगतिविषैं लोभकषायरूप परिणति बहुतर रहै है और कषायनिरूप क्रमतैं स्तोक स्तोक रहै है ॥ २९६ ॥

सव्वसमासेणवहिदसगसगरासी पुणोवि संगुणिदे ।
सगसगगुणगारेहिं य सगसगरासीण परिमाणं ॥२९७॥

सर्वसमासेनावहितस्वकस्वकराशौ पुनरपि संगुणिते ।
स्वकस्वकगुणकारैश्च स्वकस्वकराशीनां परिमाणं ॥ २९७ ॥

जी० प्र०—पुनर्नारकदेवगत्योः सर्वकषायोदयकालानां समासेन युत्या भक्ते स्वस्वगतिसंभविजीवराशौ स्वस्वकषायोदयकालगुणकारेण गुणिते सति स्वस्वकषायोदयविशिष्टजीवराशीनां परिमाणं भवति । अपिचशब्दौ गतिद्वयसमुच्चयार्थौ नरकगतौ देवगतौ चैवं कर्तव्यमिति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्र एतावता कालेन यद्येतावंतो जीवा लभ्यंते तदैतावता कालेन कियंतो जीवा लभ्यंते इति त्रैराशिकं कृत्वा प्र २१।८५। फ–२ । इ २१ ६४ अपवर्तितलब्धप्रमिते नरकगतौ क्रोधकषायोदययुक्तनारकजीवराशिप्रमाणं भवति । —।२।६४। एवं मानादिकषायोदयकालान् इच्छाराशीन् कृत्वा ८५ त्रैराशिकविधानेन लब्धप्रमाणं मानादिकषायोदयपरिणतनारकजीवप्रमाणं भवति । नारकमानकषायिणः –२।१६ नारकमायाकषायिणः – २।४ ८५ ८५

नारकलोभकषायिणः —, २, १ तथा देवगतौ लोभकषायिणः = १— ॥ ७, ६४ / ४, ६५=७, ८५ देवमायाकषायिणः = १— ॥ ७, १६ / ४, ६५ = ७, ८५ देवमा-
८५

नकषायिणः = १— ॥ ७, ४ / ४, ६५=७, ८५ देवक्रोधकषायिणः = १— ॥ ७, १ / ४, ६५=७, ८५ ॥ २९७ ॥

मं० प्र०—पुनर्नारकदेवगत्योः सर्वकषायकालानां समासेन २१। ८५ संयोगेन अपहृते-भक्ते, स्वस्वगतिसंभविजीवराशौ स्वस्वकषायकालगुणकारैः संगुणिते सति स्वस्वकषायविशिष्टजीवराशीनां परिमाणं भवति । अपिचशब्दौ गतिद्वयसमुच्चयार्थौ नरकगतौ च देवगतावपि च एवं कर्तव्यमिति । एतावति काले । प्र २१ । ८५ । यद्येतावंतो जीवा लभ्यंते । फ–२ । तदा एतावति काले । इ २१ । ६४ । कियंतो जीवा लभ्यंते इति त्रैराशिकेन लब्धमपवर्तितं नरकगतौ क्रोधकषायपरिणतजीवराशिप्रमाणं—२ । ६४ एवं मानादिकालानिच्छराशीन् कृत्वा त्रैराशिकविधानलब्धप्रमाणा मानादिकषायपरिणतजीवराशयो ८५ भवंति । एवमेव देवगतावपि तत्र फलराशिस्तु देवराशिः कर्तव्यः । प्र २१ । ८५ । फ = ॥ ७ / ४ । ६५=७ इ २१ । ६४ लब्धलोभवज्जीवाः— = ॥ ७ / ४, ६५=७, ८५ । ६४ एवं मायादिजीवराशयोऽप्यानेतव्याः ॥ २९७ ॥

स० चं०—सर्व च्यारयौं कषायनिका जो काल कह्या ताके जेते समय होंहि तिनिका समास कहिए जोड दीएं जो परिमाण आवै ताका भाग अपनी अपनी गतिसंबंधी जीवनिके प्रमाणकौं दीएं जो एक भागविषै प्र- ६४२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

माण होइ ताहि अपना अपना कषायके कालका समयनिके प्रमाणरूप गुणकारकरि गुणै जो जो परिमाण होइ सोई अपना अपना क्रोधादिक कषायसंयुक्त जीवनिका परिमाण जानना। अपि शब्द समुच्चय वाचक है तातैं नरकगति वा देवगतिविषै ऐसैं ही करना। सोई दिखाइए है--च्यारयौ कषायनिका कालके समयनिका जोड दीएं जो परिमाण होइ तितने कालविषैं जो नरकगतिविषैं जीवनिका जो परिमाण कह्या तितने सर्व जीव पाइए तौ लोभकषायके कालका समयनिका जो परिमाण होइ है तितने कालविषैं केते जीव पाइए ऐसैं त्रैराशिक कीएं प्रमाणराशि सर्वकषायनिका काल, फलराशि सर्व नारक राशि, इच्छाराशि लोभकषायका काल तहां प्रमाणराशिका भाग फलराशिकौं देइ इच्छाराशिकरि गुणैं जो लब्धराशिका परिमाण आवै तितने जीव लोभकषायवाले नरकगतिविषैं जानने। बहुरि ऐसैं ही प्रमाणराशि फलराशि पूर्वोक्त इच्छाराशि मायादिकषायनिका काल कीएं लब्धराशिमात्र अनुक्रमतैं मायावाले मानवाले क्रोधवाले जीवनिका परिमाण नरकगतिविषैं जानना। इहां दृष्टांत--जैसैं लोभका कालका प्रमाण एक १ मायाका च्यारि ४ मानका सोलह १६ क्रोधका चौसठि ६४ सबका जोड दीएं पिच्यासी भए। नारकी जीवनिका परिमाण सतरासै १७०० ताहि पिच्यासीका भागदीएं पाए बीस २० ताकौं एककरि गुणैं बीस हुवा सो लोभकषायवालोंका परिमाण है। च्यारिकरि गुणैं असी ८० भए सो मायावालोंका परिमाण है। सोलाकरि गुणैं तीनसौ बीस भए ३२० सो मानवालोंका परिमाण है चौसठिकरि गुणैं बारासै असी भए १२८० भए सो क्रोधवालोंका परिमाण है ऐसैं दृष्टांतकरि यथोक्त नरकगतिविषैं जीव कहे ऐसैं ही देवगतिविषैं जेता जीवनिका परिमाण है ताहि सर्वकषायनिके कालका जोड्या हुवा समयनिका परिमाणका भाग दीएं जो परिमाण आवै ताहि अनुक्रमतैं क्रोध मान माया लोभका कालका परिमाणकरि गुणैं अनुक्रमतैं क्रोधवाले मानवाले मायावाले लोभवाले जीवनिका परिमाण देवगतिविषैं जानना॥ २९७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णरतिरियलोहमायाकोहो माणो विइंदियादिव्व ।
आवलिअसंखभज्जा सगकालं वा समासेज्ज ॥ २९८ ॥

नरतिरश्चोः लोभमायाक्रोधो मानो द्वींद्रियादिवत् ।
आवल्यसंख्यभाज्याः स्वककालं वा समासाद्य ॥ २९८ ॥

जी० प्र०—मनुष्यतिर्यग्गत्योर्लोभमायाक्रोधमानकषायपरिणतजीवसंख्या द्वींद्रियत्रींद्रियचतुरिंद्रियपंचेंद्रियजीवसंख्यानयनप्रकारेणानेतव्या, तत्र मनुष्यगतौ अकषायसंख्योनमनुष्यजीवराशिं संस्थाप्य बहुभागे समभागो चउण्हमित्यादिसूत्रोक्तविधानेनैव लोभादिपरिणतजीवसंख्या आनेतव्या, तथा तिर्यग्गतौ देवनारकमनुष्यसंख्योनसंसारराशिं संस्थाप्य बहुभागे समभागो चउण्हमित्यादिसूत्रोक्तविधानेन च लोभादिकषायोदयपरिणतजीवसंख्यानेतव्या, अथ वा अंतर्मुहूर्तमात्रात् सामान्यकषायोदयकालात् द्वींद्रियादिविधानानीतं स्वस्वलोभादिकषायोदयकालमाश्रित्य लोभादिकषायोदयपरिणतजीवसंख्यानेतव्या। तद्यथा—एतावति काले यद्येतावंतो जीवा लभ्यंते तदा एतावति काले कियंतो

जीवा लभ्यंते इति त्रैराशिकं कृत्वा—प्र २ ७, फ १ । ३ (ऊपर १ ⌢, नीचे ४), इ २ ७, ८४२४ (नीचे ६५६१) अपवर्तिते लब्धं लोभकषायोदयपरिणतमनुष्यजीवराशिप्रमाणं

भवति । १ । ३, ८४२४ (ऊपर १ ⌢, नीचे ४, ६५६१) तथा मायाकषायोदयपरिणतमनुष्यजीवराशिप्रमाणं १ । ३, ६१२० (ऊपर १ ⌢, नीचे ४, ६५६१) क्रोधकषायोदयपरिणतमनुष्यराशिप्रमाणं

१ । ३, ५८६४ (ऊपर १ ⌢, नीचे ४, ६५६१) मानकषायोदयपरिणतमनुष्यजीवराशिः १ । ३, ५८३६ (ऊपर १ ⌢, नीचे ४, ६५६१) तथा तिर्यग्गतावपि किंचिदूनसंसारराशिं फलराशिं कृत्वा तत्कषायपरिणतजीवराशिप्रमाणमानेतव्यं । तत्र तिर्यग्लोभकषायिणः १३— ८४२४ (नीचे ४, ६५६१) तिर्यग्मायाकषायवंतः १३— । ६१२० (नीचे ४ । ६५६१) तिर्यक्क्रोधकषायिणः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain, Digitized by Sarayu Trust/eGangotri

१३ — , ५८६४ तिर्यग्मानकषायिणः १३—, ५८३६ द्वींद्रियादिविधानेन यथा आवल्यसंख्यातभागमात्रो भागहारः तथा अत्रापि
४ , ६५६१ ४ , ६५६१

जीवसंख्यानयने कालप्रमाणानयने च आवल्यसंख्येयभागमात्रो भागहारः इति सुव्यक्तार्थमाचार्यैः आवलि असंखभज्जेत्युक्तं ॥२९८॥

इत्याचार्यश्रीनेमिचंद्रविरचितायां गोम्मटसारापरनामपंचसंग्रहवृत्तौ तत्त्वप्रदीपिकाख्यायां जीवकांडे विंशतिप्ररूपणासु कषायमार्गणाप्ररूपणा नाम एकादशोऽधिकारः ॥ ११ ॥

मं० प्र०——मनुष्यतिर्यग्गत्योः लोभमायाक्रोधमानकषायपरिणतजीवसंख्या द्वींद्रियादिवत् द्वित्रिचतुःपंचेंद्रियजीवसंख्यानयनप्रकारेणानतव्या । मनुष्यगतौ तज्जीवराशिं संस्थाप्य 'बहुभागे समभागो चउण्हं' इत्यादिसूत्रोक्तविधानेन तिर्यग्गतावपि अकषायजीवप्रमाणसंख्यातरूपहीनसंसारिराशिं संस्थाप्य 'बहुभाग' इत्यादि सूत्रविधानेनैव लोभादिपरिणतजीवसंख्या आनेतव्याः । वा अथवा स्वस्वकालं द्वींद्रियादिविधानानीताल्पबहुत्वमंतर्मुहूर्तमात्रं लोभादिकषायकालमाश्रित्य लोभादिपरिणतजीवसंख्या आनेतव्याः । तत्र एतावति काले प्र २ १ यद्येतावंतो जीवा लभ्यंते फ [illegible] तदा एतावति काले—
[illegible] १ । ३

इ । २ १ । ८४२४ कियंतो जीवा लभ्यंत इति त्रैराशिकेन लब्धलोभपरिणतजीवसंख्या १ । ३ । ८४२४ एवं मायाक्रोधमानकालानिच्छाराशिं
४ । ६५६१ ४ । ६५६१

कृत्वा तत्तज्जीवसंख्या आनेतव्या । तिर्यग्गतौ तु किंचिदूनसंसारिराशिं फलराशिं कृत्वा तत्तत्कषायपरिणतजीवसंख्या आनेतव्या । द्वींद्रियादिविधाने यथावल्यसंख्यातभागमात्रो भागहारः तथा अत्रापि जीवसंख्यानयने कालप्रमाणानयने च आवल्यसंख्येयभागमात्रो भागहार इति सुव्यक्तयर्थमाचार्यैः आवलिअसंखभज्जेत्युक्तं

इति श्रीमदभयचंद्रसूरिसिद्धांतचक्रवर्तिकृता गोम्मटसारपंचसंग्रहवृत्तौ कषायमार्गणाप्ररूपणो नामैकादशोऽधिकारः ॥११॥

स० चं०——मनुष्य तिर्यंचगतिविषैं लोभ माया क्रोध मानवाले जीवनिकी संख्या पूर्वै इंद्रियमार्गणाका अधिकारविषैं जैसैं वेंद्री तेंद्री चौइंद्री पंचेंद्रीविषैं जीवनिकी संख्या 'बहुभागे समभागो' इत्यादि गाथाकरि कही थी तैसैं इहां भी संख्याका साधन करना । सोई कहिए है--मनुष्यगतिविषैं जो जीवनिका परिमाण है तामैं कषायरहित मनुष्यनिका प्रमाण घटाएं जो अवशेष रहे ताकौं आवलीका असंख्यातवां भागका भाग दीएं तहां एक ६५५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भाग जुदा राखि अवशेष बहुभागका प्रमाण रह्या ताके च्यारि भागकरि च्यारयौ कषायनिके स्थाननिविषैं समान देने। बहुरि जो एक भाग रह्या ताकौं आवलीका असंख्यातवां भागका भाग दीजिए तहां एक भागकौं जुदा राखि अवशेष बहुभाग रहे तिनिकौं लोभकषायके स्थान समान भागविषैं जो प्रमाण था तामैं जोडे जो परिमाण होइ तितने लोभकषायवाले मनुष्य जानने। बहुरि तिस अवशेष एक भागकौं आवलीका असंख्यातवां भागका भाग दीजिए तहां एकभागकौं जुदा राखि अवशेष बहुभाग रहे तिनिकौं मायाकषायके स्थान समान भागविषैं जो परिमाण था तामैं मिलाएं जो परिमाण होइ तितने मायाकषायवाले मनुष्य जानने। बहुरि तिस अवशेष एक भागकौं आवलीका असंख्यातवां भागका भाग दीजिए तहां एक भागकौं जुदा राखि अवशेष बहुभाग रहे तिनिकौं क्रोधकषायके स्थान समान भागविषैं जो परिमाण था तिसविषैं मिलाएं क्रोधकषायवाले मनुष्यनिका परिमाण होइ। बहुरि तिस अवशेष एक भागका जेता परिमाण होइ ताकौं मानकषायके स्थान समान भागविषैं जो परिमाण था तामैं मिलाएं मानकषायवाले मनुष्यनिका परिमाण होइ ऐसैं ही तिर्यंच गतिविषैं जानना। विशेष इतना जो इहां मनुष्य गतिके जीवनिका परिमाणविषैं भाग दीया था। इहां तिर्यंच गतिके जीवनिका जो देव नारक मनुष्यराशिकरि हीन सर्वसंसारी जीवराशिमात्र परिमाण ताकौं भाग देना अन्य सर्व विधान तैसैं ही जानना। ऐसैं कषायनिविषैं तिर्यंच जीवनिका परिमाण जानिए। अथवा अपना अपना कषायनिका कालकी अपेक्षा जीवनिकी संख्या जानिए सो दिखाइए है च्यारयौ कषायनिका कालके समयनिका जो अंतर्मुहूर्तमात्र परिमाण है ताकौं आवलीका असंख्यातवां भागका भाग दीजिये तहां एक भागकौं जुदा राखि अवशेषके च्यारि भागकरि च्यारौ जायगा समान दीजिए। बहुरि अवशेष एक भागकौं आवलीका असंख्यातवां भागका भाग देइ एक भागकौं जुदा राखि अवशेष बहुभाग रहे तिनिकौं समान भागविषैं जो परिमाण था तामैं मिलाएं लोभकषायके कालका परिमाण होइ। बहुरि तिस अवशेष एक भागकौं तैसैं भाग देइ एक भाग विना अवशेष बहुभाग समान भागका प्रमाणविषैं मिलाएं मायाका काल होइ। बहुरि तिस अवशेष एकभागकौं ६४६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तैसैं भाग देइ एक भागकौं जुदा राखि अवशेष बहुभाग समान भागसंबंधी परिमाणविषैं मिलाएं क्रोधका काल होइ। बहुरि जो अवशेष एक भाग रह्या ताकौं समान भागसंबंधी परिमाणविषैं मिलाएं मानकषायका काल होइ अब इहां त्रैराशिक करना। जो च्यारि कषायनिके कालका परिमाणविषैं सर्व मनुष्य पाइए तौ लोभकषायका कालविषैं केते मनुष्य पाइए? इहां प्रमाणराशि च्यारयौं कषायनिका समुच्चयरूप कालका परिमाण अर फलराशि मनुष्य गतिके जीवनिका परिमाण अर इच्छाराशि लोभ कषायके कालका परिमाण। तहां फलराशिकौं इच्छाराशिकरि गुणि प्रमाण राशिका भाग दीएं जो लब्धराशिका प्रमाण आवै तितने लोभकषायवाले मनुष्य जानने। असैं ही प्रमाण फलराशि पूर्वोक्त कीए माया क्रोध मानकालकौं इच्छाराशि कीएं लब्धराशि मात्र मायावाले वा क्रोधवाले वा मानवाले मनुष्यनिकी संख्या जाननी। बहुरि याही प्रकार तिर्यंच गतिविषैं भी लोभवाले मायावाले क्रोधवाले मानवाले जीवनिकी संख्याका साधन करना। विशेष इतना जो उहां फलराशि मनुष्यनिका परिमाण था इहां फलराशि तिर्यंच जीवनिका परिमाण जानना। अन्य विधान तैसैं ही करना। असैं कषाय मार्गणा विषैं जीवनिकी संख्या है॥ २९८॥

इति आचार्य श्रीनेमिचंद्र सिद्धांतचक्रवर्तिविरचित गोम्मटसार द्वितीय नाम पंचसंग्रह ग्रंथकी जीवतत्त्वप्रदीपिका नामा संस्कृत टीकाके अनुसारि सम्यग्ज्ञानचंद्रिका नाम भाषाटीका विषैं जीवकांडविषै प्ररूपित जे बीस प्ररूपणा तिनिविषैं कषायमार्गणा प्ररूपणा नाम ग्यारमा अधिकार संपूर्ण भया॥ ११॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ ज्ञानमार्गणाधिकार ॥ १२ ॥

जी० प्र०——

वासवैः पूज्यपादाब्जं समवसृतिसंस्कृतं ।
द्वादशं तीर्थकर्तारं वासुपूज्यं जिनं स्तुवे ॥ १२ ॥

अथ श्रीनेमिचंद्रसैद्धांतचक्रवर्ती ज्ञानमार्गणामुपक्रममाणो निरुक्तिपूर्वकंज्ञानसामान्यलक्षणमाह——

मं० प्र०——

वासवादिसुपूज्यांघ्रिं वासुपूज्यं जिनेश्वरं ।
वंदे गर्भादिकल्याणैरत्नवसुपूजितं ॥ १२ ॥

अथ श्रीनेमिचंद्रसिद्धांतचक्रवर्ती ज्ञानमार्गणां प्रारभमाणो निरुक्तिपूर्वकं ज्ञानसामान्यलक्षणमाह——

सं० चं०—

वंदौ वासव पूज्यपद वास पूज्य जिन सोय ।
गर्भादिकमैं पूज्य जो रत्न द्रव्यतैं होय ॥

आगैं श्रीनेमिचंद्र सिद्धांतचक्रवर्ती ज्ञानमार्गणाका प्रारंभ करैं हैं तहां प्रथमही निरुक्ति लीएं ज्ञानका सामान्य लक्षण कहैं हैं—

जाणइ तिकालविषए दव्वगुणे पज्जए य बहुभेदे ।
पच्चक्खं च परोक्खं अणेण णाणेत्ति णं वेंति ॥ २९९ ॥

जानाति त्रिकालविषयान् द्रव्यगुणान् पर्यायांश्च बहुभेदान् ।
प्रत्यक्षं च परोक्षमनेन ज्ञानमिति इदं ब्रुवंति ॥ २९९ ॥

जी० प्र०—त्रिकालविषयान् भूतभवत्स्यद्वर्तमानकालगोचरान् बहुभेदान्—जीवादिज्ञानादिस्थावरादिनानाप्रकारान् द्रव्याणि जीवपुद्गलधर्माधर्माकाशकालाख्यानि, गुणान् ज्ञानदर्शनसम्यक्त्वसुखवीर्यादीन् स्पर्शरसगंधवर्णादीन् गतिस्थित्यवगाहनवर्तनाहेतुत्वादींश्च पर्यायांश्च स्थावरत्रसत्वादीन् अणुत्वस्कंधत्वादीन् अर्थव्यंजनभेदानन्यांश्च आत्मप्रत्यक्षं स्पष्टं परोक्षं च अस्पष्टं अनेन जानातीति ज्ञानमितीदं करणभूतं स्वार्थ- ६४८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्यवसायात्मकं जीवगुणं ब्रुवंति–कथयंति अर्हदादयः। एतज्ज्ञानमेव प्रत्यक्षं परोक्षं चेति द्विविधं प्रमाणं भवति। तत्स्वरूपसंख्याविषयफललक्षणानि तद्विप्रतिपत्तिनिराकरणं स्याद्वादमतप्रमाणस्थापनं च सविस्तरं मार्तंडादितर्कशास्त्रेषु द्रष्टव्यं, अत्राहेतुवादरूपे आगमे हेतुवादस्यानधिकारात् ॥ २९९ ॥ अथ ज्ञानभेदानाह–

मं० प्र०–त्रिकालविषयान्–वृत्तवर्त्स्यद्वर्तमानकालगोचरान्, बहुभेदान्–जीवादिज्ञानादिस्थावरादिनानाप्रकारान्, द्रव्याणि–जीवपुद्गलधर्माधर्माकाशकालाख्यानि, गुणान्–ज्ञानदर्शनसम्यक्त्वसुखवीर्यादीन्, स्पर्शरसगंधवर्णादीन् गतिस्थित्यवगाहनवर्तनाहेतुत्वादीन्, पर्यायांश्च–स्थावरत्वत्रसत्वादीन्, अणुत्वस्कंधत्वादीन् अर्थव्यंजनभेदानन्यांश्च आत्मा प्रत्यक्षं–स्पष्टं, परोक्षं अस्पष्टं च अनेन जानाति इति ज्ञानमितीदं करणभूतं स्वार्थव्यवसायात्मकमात्मनो गुण ब्रुवंति कथयंति अर्हदादयः। एतद् ज्ञानमेव प्रत्यक्षं परोक्षमिति द्विविधं प्रमाणं भवति तत्स्वरूपसंख्याविषयफललक्षणं तद्विप्रतिपत्तिनिराकरणं स्याद्वादमतप्रमाणस्थापनं च सविस्तरं तर्कशास्त्रेषु द्रष्टव्यं। हेतुवादस्यात्राहेतुवादरूपे आगमे अनधिकारात् ॥२९९॥ अथ ज्ञानभेदं प्ररूपयति—

सं० च०–त्रिकाल संबंधी हुए हों है होंहिगे ऐसे जीवादि द्रव्य वा ज्ञानादि गुण वा स्थावरादि पर्याय नाना प्रकार हैं तहां जीव पुद्गल धर्म अधर्म आकाश काल ए द्रव्य हैं बहुरि ज्ञान दर्शन सम्यक्त्व सुख वीर्य आदि वा स्पर्श रस गंध वर्ण आदि वा गतिहेतुत्व स्थितिहेतुत्व अवगाहनहेतुत्व वर्तनाहेतुत्व आदि गुण हैं। बहुरि स्थावर त्रस आदि वा अणु स्कंधपना आदि वा अन्य अर्थ व्यंजन आदि भेद लीएं अनेक पर्याय हैं तिनकौं प्रत्यक्ष वा परोक्ष जीव नामा पदार्थ इसकरि जानैं है तातैं याकौं ज्ञान कहिए। 'ज्ञायते अनेनेति ज्ञानं' ऐसी ज्ञान शब्दकी निरुक्ति जाननी। इहां जाननरूप क्रियाका आत्मा कर्ता तहां करणस्वरूप ज्ञान अपने विषयभूत अर्थनिका जाननहारा जीवका गुण है ऐसैं अरहंतादिक कहैं हैं। असाधारण कारणका नाम करण है बहुरि यहु सम्यग्ज्ञान है सोई प्रत्यक्ष वा परोक्षरूप प्रमाण है। जो ज्ञान अपने विषयकौं स्पष्ट विशद जानैं ताकौं प्रत्यक्ष कहिए। जो अपने विषयकौं अस्पष्ट अविशद जानैं ताकौं परोक्ष कहिए। सो इस प्रमाणका स्वरूप वा संख्या वा विषय वा फल वा लक्षण बहुरि ताके अन्यथा वादका निराकरण वा स्याद्वाद मतके प्रमाणका स्थापन विशेषपनैं जैनके तर्क शास्त्र हैं तिनिविषैं विचारना। इहां अहेतुवादरूप आगमविषैं हेतुवादका अधिकार नाहीं तातैं सविशेष न कह्या। हेतुकरि जहां अर्थकौं दृढ कीजिए ताका नाम हेतुवाद है सो न्याय शास्त्रनिविषैं हेतुवाद है इहां तो जिनागम अनुसारि वस्तुका स्वरूप कहनेका अधिकार जानना ॥२९९॥ आगैं ज्ञानके भेद कहैं हैं–

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri.

पंचेव होंति णाणा मदिसुदओहीमणं च केवलयं।
खयउवसमिया चउरो केवलणाणं हवे खइयं ॥ ३०० ॥

पंचैव भवंति ज्ञानानि मतिश्रुतावधिमनश्च केवलं।
क्षायोपशमिकानि चत्वारि केवलज्ञानं भवेत् क्षायिकं ॥ ३०० ॥

जी० प्र०—मतिश्रुतावधिमनःपर्ययकेवलनामानि सम्यग्ज्ञानानि पंचैव नोनाधिकानि। यद्यपि सामान्यापेक्षया संग्रहरूपद्रव्यार्थिकनयमाश्रित्य ज्ञानमेकमेव कथितं, तथापि विशेषापेक्षया पर्यायार्थिकनयमाश्रित्य ज्ञानानि पंचेत्युक्तानि इत्यर्थः। तेषु मतिश्रुतावधिमनःपर्ययाख्यानि चत्वारि ज्ञानानि क्षायोपशमिकानि भवंति मतिज्ञानाद्यावरणवीर्यांतरायकर्मद्रव्याणां अनुभागस्य सर्वघातिस्पर्धकानामुदयाभावरूपः क्षयः, तेषामेव अनुदयप्राप्तानां सदवस्थारूप उपशमः। क्षयश्चासावुपशमश्च क्षयोपशमः क्षयोपशमे भवानि क्षायोपशमिकानि। अथवा क्षयोपशमः प्रयोजनमेषामिति क्षायोपशमिकानि। तत्तदावरणदेशघातिस्पर्धकानामुदयस्य विद्यमानत्वेऽपि ज्ञानोत्पत्तिप्रतिघातित्वाभावात् अविवक्षा ज्ञातव्या। केवलज्ञानं पुनः क्षायिकमेव भवति केवलज्ञानावरणवीर्यांतरायनिरवशेषक्षयेण प्रादुर्भूतत्वात्। क्षये भवं, क्षयः प्रयोजनमस्येति वा क्षायिकं। यद्यप्यात्मनः केवलज्ञानं प्रतिबंधकावस्थायां शक्तिरूपेण विद्यमानं तथापि प्रतिबंधकक्षयेणैव तद्व्यक्तिः स्यात् इति व्यक्त्यपेक्षया कार्यत्वसंभवात् क्षायिकमित्युक्तं। आवरणक्षये सति प्रादुर्भवति इति निरुक्तेः तद्व्यक्त्यपेक्षत्वात् ॥ ३०० ॥ अथ मिथ्याज्ञानोत्पत्तिकारणस्वरूपस्वामिभेदानाह—

मं० प्र०—मतिः श्रुतमवधिर्मनःपर्ययः केवलं चेति ज्ञानानि-सम्यग्ज्ञानानि पंचैव भवंति नोनाधिकानि। यद्यपि सामान्यापेक्षया संग्रहरूपद्रव्यार्थिकनयमाश्रित्य ज्ञानमेकमेवेत्युक्तं तथापि विशेषापेक्षया पर्यायार्थिकनयमाश्रित्य ज्ञानानि पंचैवेत्युच्यंते इत्यर्थः। तेषु चत्वारि मतिश्रुतावधिमनःपर्ययाख्यानि ज्ञानानि क्षायोपशमिकानि—मतिज्ञानाद्यावरणवीर्यांतरायकर्मद्रव्याणामनुभागस्य सर्वघातिस्पर्धकानामुदयाभावः क्षयः, तेषामेवानुदयप्राप्तानां सदवस्था उपशमः, क्षयश्चासौ उपशमश्चासौ क्षयोपशमः तत्र भवानि तत्प्रयोजनानि वा क्षायोपशमिकानि तत्तदावरणदेशघातिस्पर्धकानामुदयस्य विद्यमानस्यापि ज्ञानोत्पत्तिप्रतिघातित्वाभावादविवक्षा, केवलज्ञानं पुनः क्षायिकमेव भवेत् केवलज्ञानावरणवीर्यांतरायनिरवशेषक्षये प्रादुर्भूतत्वात्। क्षये भवं तत्प्रयोजनं वा क्षायिकं। यद्यप्यात्मनः केवलज्ञानं प्रतिबंधकावस्थायां शक्त्या विद्यते तथापि प्रतिबंधकक्षयादेव तद्व्यक्तिर्भवतीति व्यक्त्यपेक्षया कार्यत्वसंभवात् क्षायिकमित्युच्यते। आवरणक्षये सति भवति प्रादुर्भवतीति निरुक्तेस्तद्व्यक्त्यपेक्षत्वात् ॥ ३०० ॥ अथ मिथ्याज्ञानोत्पत्तिकारणस्वरूपस्वामिभेदानाह—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०–मति १ श्रुति २ अवधि ३ मनःपर्यय ४ केवल ५ ए सम्यग्ज्ञान पंच ही हैं। हीन अधिक नाहीं। यद्यपि संग्रहनयरूप द्रव्यार्थिक नय करि सामान्यपनैं ज्ञान एकही है तथापि पर्यायार्थिक नयकरि विशेष कीएं पंचभेद हो हैं तिनिविषैं मति श्रुति अवधि मनःपर्यय ए च्यारि ज्ञान क्षायोपशमिक हैं जातैं मतिज्ञानावरणादिक कर्म वा वीर्यांतराय कर्म ताके अनुभागके जे सर्व घातिया स्पर्धक हैं तिनिका उदय नाही सोई क्षय जानना। बहुरि जे उदय अवस्थाकौं न प्राप्त भए ते सत्तारूप तिष्ठैं हैं सोई उपशम जानना। उपशम वा क्षयकरि उपजै ताकौं क्षायोपशम कहिए अथवा क्षयोपशम है प्रयोजन जिनिका ते क्षायोपशमिक कहिए। यद्यपि क्षायोपशमिक विषैं तिस आवरणके देशघातिया स्पर्धकनिका उदय पाइए है तथापि वह तिस ज्ञानका घात करनेकौं समर्थ नाही है तातैं ताकी मुख्यता न करी। याका उदाहरण कहिए है–अवधिज्ञानावरण कर्म सामान्यपनैं देशघाती है तथापि अनुभागका विशेष कीएं याके केई स्पर्धक सर्वघाती हैं केई स्पर्धक देशघाती हैं तहां जिनिकैं अवधिज्ञान किछू भी नाहीं तिनिकैं सर्वघाती स्पर्धकनिका उदय जानना। बहुरि जिनिके अवधिज्ञान पाइए है अर आवरण उदय पाइए है तहां देश घाती स्पर्धकनिका उदय जानना। बहुरि केवलज्ञान क्षायिक ही है जातैं केवलज्ञानावरण वीर्यांतरायका सर्वथा नाशकरि केवलज्ञान प्रकट हो है। क्षय होतैं उपज्या वा क्षय है प्रयोजन जाका ताकौं क्षायिक कहिए। यद्यपि सावरण अवस्थाविषैं आत्माकैं शक्तिरूप केवल ज्ञान है तथापि व्यक्तरूप आवरणके नाश करि हो है तातैं व्यक्तताकी अपेक्षा केवलज्ञान क्षायिक कह्या जातैं व्यक्त भएं ही कार्य सिद्धि संभवे है ॥ ३०० ॥ आगैं मिथ्याज्ञान उपजनेका कारण वा स्वरूप वा स्वामित्व वा भेद कहैं हैं–

अण्णाणतियं होदि हु सण्णाणतियं खु मिच्छअणउदये।
णवरि विभागं णाणं पंचिंदियसण्णिपुण्णेव ॥ ३०१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अज्ञानत्रिकं भवति सज्ज्ञानत्रिकं खलु मिथ्यात्वानोदये ।
नवरि विभंगं ज्ञानं पंचेंद्रियसंज्ञिपूर्णे एव ॥ ३०१ ॥

जी० प्र०—यत्सम्यग्दर्शनपरिणतजीवसंबंधिमतिश्रुतावधिसंज्ञं सम्यग्ज्ञानत्रयं संज्ञिपंचेंद्रियपर्याप्तजीवस्य विशेषग्रहणरूपाकारसहितोपयोगलक्षणं तदेव मिथ्यादर्शनानंतानुबंधिकषायान्यतमोदये सति अतत्त्वार्थश्रद्धानपरिणतजीवसंबंधिमिथ्याज्ञानत्रयं खलु—स्फुटं भवति । नवरीति विशेषोऽस्ति यदवधिज्ञानविपर्ययरूपं विभंगनामकं मिथ्याज्ञानं तत् संज्ञिपंचेंद्रियपर्याप्त एव भवति, नान्यस्मिन् जीवे इति अनेन इतरत् मत्यज्ञानं श्रुताज्ञानमिति द्वयं एकेंद्रियादिषु पर्याप्तापर्याप्तेषु सर्वेषु मिथ्यादृष्टिसासादनेषु संभवति इति कथितं भवति । द्वितीयः खलुशब्दः अतिशयेन स्पष्टत्वार्थे स्फुटं ॥ ३०१ ॥ अथ सम्यग्मिथ्यादृष्टिगुणस्थाने ज्ञानस्वरूपं निरूपयति—

मं० प्र०—यन्मतिश्रुतावधिसंज्ञं सम्यग्ज्ञानदर्शनपरिणतजीवसंबंधिसम्यग्ज्ञानत्रयं संज्ञिपंचेंद्रियपर्याप्तजीवस्य विशेषग्रहणरूपाकारसहितोपयोगलक्षणं तदेव मिथ्यादर्शनानंतानुबंधिकषायान्यतमोदये सति अतत्त्वार्थश्रद्धानपरिणतजीवसंबंधिमिथ्याज्ञानत्रयं, अज्ञानत्रय खलु—स्फुटं भवति । णवरीति प्राकृतभाषायामव्ययं विशेषार्थे । यदवधिज्ञानविपर्ययरूपं विभंगाख्यं अज्ञानं तत्संज्ञिपंचेंद्रियपर्याप्तके एव भवति नान्यस्मिन् जीवे । अनेन इतरत् मत्यज्ञानं श्रुताज्ञानमित्यज्ञानद्वयं एकेंद्रियादिषु पर्याप्तापर्याप्तेषु सर्वेषु मिथ्यादृष्टिसासादनेषु संभवति इत्युक्तं भवति । द्वितीयः खलुशब्दः अतिशयेन स्पष्टत्वार्थे ॥ ३०१ ॥ अथ सम्यग्मिथ्यादृष्टिगुणस्थाने ज्ञानस्वरूपमाह—

स० चं०—जे सम्यग्दृष्टीकैं मति श्रुति अवधि ए तीन सम्यग्ज्ञान हैं, संज्ञी पंचेंद्री पर्याप्त वा निर्वृत्ति अपर्याप्त जीवकैं विशेष ग्रहणरूप ज्ञेयाकार सहित उपयोग रूप है लक्षण जिनिका ऐसे हैं तेई तीनों मिथ्यात्व वा अनंतानुबंधी कोई कषायके उदय होतें तत्त्वार्थका अश्रद्धानरूप परिणया जीवकैं तीनों मिथ्याज्ञान हो हैं। कुमति कुश्रुति विभंग ए नाम हो हैं। णवरि ऐसा प्राकृतभाषाविषैं विशेष अर्थकौं लीएं अव्यय जानना। सो विशेष यहु जो अवधि ज्ञानका विपर्ययरूप होना सोई विभंग कहिए सो विभंग अज्ञान सैनी पंचेंद्री पर्याप्त हीकैं हो है याहीतैं कुमति कुश्रुति एकेंद्रिय आदि पर्याप्त अपर्याप्त सर्व मिथ्यादृष्टी जीवनिकैं अर सासादन गुणस्थानवर्ती सर्व जीवनिकैं संभवै है ॥ ३०१ ॥ आगैं सम्यग्दृष्टि नामा तीसरा गुणस्थानविषैं ज्ञानका स्वरूप कहै हैं—

मिस्सुदये संमिस्सं अण्णाणतियेण णाणतियमेव ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संजमविसेससहिए मणपज्जवणाणमुद्दिट्ठं ॥ ३०२ ॥

मिश्रोदये संमिश्रं अज्ञानत्रयेण ज्ञानत्रयमेव ।
संयमविशेषसहिते मनःपर्ययज्ञानमुद्दिष्टं ॥ ३०२ ॥

जी० प्र०—मिश्रोदये-सम्यक्मिथ्यात्वकर्मोदये सति अज्ञानत्रयेण सह सम्यग्ज्ञानत्रयमेव संमिश्रं भवति अशक्यविवेचनत्वेन सम्यग्मिथ्यामतिज्ञानं सम्यग्मिथ्याश्रुतज्ञानं सम्यग्मिथ्यावधिज्ञानमिति व्यपदेशभाग्भवति । सम्यग्मिथ्यादृष्टौ वर्तमानं ज्ञानत्रयं न केवलं सम्यग्ज्ञानं, न केवलं मिथ्याज्ञानं, अपि किंतु उभयात्मकश्रद्धानवत् उभयात्मकत्वेन मिथ्याज्ञानसंमिश्रं सम्यग्ज्ञानं भवति इत्याचार्यैः कथितं ज्ञातव्यं । मनःपर्ययज्ञानं तु संयमविशेषसहितेष्वेव प्रमत्तसंयतादिक्षीणकषायपर्यंतेषु सप्तगुणस्थानेषु तपोविशेषोपबृंहितविशुद्धिपरिणामविशिष्टेषु संभवति नेतरदेशसंयतादिषु गुणस्थानेषु तथाविधतपोविशेषाभावात् ॥ ३०२ ॥ अथ मिथ्याज्ञानविशेषलक्षणं गाथात्रयेणाह—

मं० प्र०—मिश्रस्य-सम्यग्मिथ्यात्वकर्मणः, उदये सति अज्ञानत्रयेण संमिश्रमेव सज्ज्ञानत्रयं सम्यग्मिथ्यामतिज्ञानं सम्यग्मिथ्याश्रुतज्ञानं सम्यग्मिथ्यावधिज्ञानमिति व्यपदेशार्हं भवति । सम्यग्मिथ्यादृष्टौ वर्तमानं ज्ञानत्रयं न केवलं सम्यग्ज्ञानमेव नापि केवलं मिथ्याज्ञानमेव किंतु उभयात्मकश्रद्धानवत् उभयात्मकत्वेन ज्ञानमपि संमिश्रमिति युक्तमुक्तमाचार्यैः । मनःपर्ययज्ञानं पुनः संयमविशेषसहिते प्रमत्तसंयतादिक्षीणकषायपर्यंततपोविशेषोपबृंहितविशुद्धिपरिणामे संभवति नेतरस्मिन् देशसंयतादौ तत्र तादृशतपोविशेषाभावादिति पूर्वाचार्यैरुद्दिष्टं ॥ ३०२ ॥ अथ मिथ्याज्ञानविशेषलक्षणं गाथात्रयेण प्ररूपयति—

स० चं०—मिश्र कहिए सम्यग्मिथ्यात्व नामा मोहनीय कर्मकी प्रकृति ताके उदय होतैं तीनौं अज्ञानकरि मिल्या तीनौं सम्यग्ज्ञान इहां हो हैं जातैं जुदा कीया जाता नाहीं तातैं सम्यग्मिथ्यामति १ सम्यग्मिथ्याश्रुत २ सम्यग्मिथ्या अवधि ३ ऐसैं इहां नाम हो है। जैसैं इहां एक कालविषैं सम्यग्रूप वा मिथ्यारूप मिल्या हूवा श्रद्धान पाइए है तैसैं ही ज्ञानरूप वा अज्ञानरूप मिल्या हूवा ज्ञान पाइए है । इहां न तौ केवल सम्यग्ज्ञान ही है न केवल मिथ्याज्ञान है, मिथ्याज्ञान करि मिल्या सम्यग्ज्ञानरूप मिश्र जानने । बहुरि मनःपर्यय ज्ञान विशेष संयमका धारक छठा गुणस्थानतैं बारह्वां गुणस्थान पर्यंत सात गुणस्थानवर्ती तप विशेष करि वृद्धिरूप विशुद्धताके धारी महामुनि तिनहीकैं पाइए है जातैं अन्य देश संयतादिविषैं तैसा तपका विशेष न संभवै है ॥३०२॥
आगैं मिथ्याज्ञानका विशेष लक्षण तीनि गाथानिकरि कहैं हैं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विसजंतकूडपंजरबंधादिसु विणुवएसकरणेण ।
जा खलु पवट्टए मइ मइ अण्णाणंतिणं वेंति ॥ ३०३ ॥

विषयंत्रकूटपंजरबंधादिषु विनोपदेशकरणेन ।
या खलु प्रवर्तते मतिः मत्यज्ञानमितीदं ब्रुवंति ॥ ३०३ ॥

जी० प्र०—विषयंत्रकूटपंजरबंधादिषु जीवमारणबंधनहेतुषु या मतिः परोपदेशकरणेन विना प्रवर्तते तदिदं मत्यज्ञानमित्यर्हदादयो ब्रुवंति । तत्र परस्परसंयोगजनितमारणशक्तिविशिष्टं तैलकर्पूरादिद्रव्यं विषं, सिंहव्याघ्रादिक्रूरमृगधारणार्थमभ्यंतरीकृतछागादिजीवं काष्ठादिरचितं तत्पादनिक्षेपमात्रकवाटसंपुटीकरणदक्षं सूत्रकीलितं यंत्रं, मत्स्यकच्छपमूषकादिग्रहणार्थमवष्टब्धं काष्ठादिमयं कूटं, तित्तिरलावकहरिणादिधारणार्थविरचितं ग्रंथिविशेषकलितरज्जुमयं जालं पंजरः, गजोष्ट्रादिधारणार्थमवष्टब्धो गर्तमुखकीलितग्रंथिविशिष्टवारी रज्जुरचनाविशेषो बंधः । आदिशब्देन पक्षिपक्षलगनार्थं दीर्घदंडाग्रप्रक्षिप्तपिप्पलनिर्यासादिचिक्कणबंधग्रहहरिणादिशृंगाग्रलग्नसूत्रग्रंथिविशेषादिश्च गृह्यते । उपदेशपूर्वकत्वे श्रुतज्ञानत्वप्रसंगात् । उपदेशक्रियां विना यदीदृशमूहापोहविकल्पात्मकं हिंसानृतस्तेयाब्रह्मपरिग्रहकारणं आर्तरौद्रध्यानकारणं शल्यदंडगारवसंज्ञाद्यप्रशस्तपरिणामकरणं च इंद्रियमनोजनितविशेषग्रहणरूपं मिथ्याज्ञानं तन्मत्यज्ञानमिति निश्चेतव्यं ॥ ३०३ ॥

मं० प्र०—विषयंत्रकूटपंजरबंधादिषु जीवमारणबंधनहेतुषु या मतिः परोपदेशकरणेन विना प्रवर्तते तदिदं मत्यज्ञानमित्यर्हदादयो ब्रुवंति । तत्र परस्परसंयोगजनितमारणशक्तिविशिष्टतैलकर्पूरादि द्रव्यं विषं । सिंहव्याघ्रादिधरणार्थमभ्यंतरीकृतछागादिजीवं काष्ठादिरचितं, तत्पादनिक्षेपमात्रकवाटसंपुटीकरण दक्षसूत्रकीलितं यंत्रं । मत्स्यकच्छपमूषकादिग्रहणार्थमवष्टब्धं काष्ठादिमयं कूटं । तित्तिरलावकहरिणादिधरणार्थं विरचितं ग्रंथिविशेषकलितरज्जुमयं जाल पंजरः । उष्ट्रगजादिधरणार्थमवष्टब्धगर्तमुखकीलितग्रंथिविशिष्टवारी रज्जुरचनाविशेषो बंधः । आदिशब्देन पक्षिपक्षलगनार्थं दीर्घदंडाग्रप्रक्षितापिप्पलनिर्यासादिबंधग्रहहरिणादिशृंगलग्नसूत्रग्रंथिविशेषादिश्च गृह्यते । उपदेशपूर्वकत्वे श्रुताज्ञानत्वप्रसंगात् । उपदेशक्रियां विना यदीदृशं ऊहापोहविकल्पात्मकं हिंसानृतस्तेयाब्रह्मपरिग्रहकारणमार्तरौद्रध्यानकारणं, शल्यदंडगारवसंज्ञाद्यप्रशस्तपरिणामकारणं च इंद्रियमनोजनितविशेषग्रहणरूप मिथ्याज्ञानं तन्मत्यज्ञानं निश्चेतव्यं ॥ ३०३ ॥

स० चं०—परस्पर वस्तुका संयोगकरि मारनेकी शक्ति जिस विषैं होइ ऐसा तैल कर्पूरादिक वस्तु सो विष कहिए । बहुरि सिंह व्याघ्रादि क्रूर जीवनिके धारनके अर्थि जाकैं अभ्यंतर छैला आदि रखिए अर तिसविषैं तिस क्रूर जीवकौं पाव धरत ही किवाड़ जुडि जाय ऐसा सूत्रकी कलकरि संयुक्त होइ काष्ठादिक करि रच्या

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हूवा हो है सो यंत्र कहिए। बहुरि माछला काछिवा मूसा कोल इत्यादिक जीवनिकै पकड़नेके निमित्त काष्ठादिकमय बने सो कूट कहिए। बहुरि तीतर लवा हिरण इत्यादि जीवनिकै पकड़नेके निमित्त फंदकौं लीएं जो जेरिका जाल बनै सो पींजर कहिए। बहुरि हाथी ऊंट आदिकै पकड़ने निमित्त खाडाकै ऊपरि गांठिका विशेष लीएं जेवराकी रचनारूप विशेष सो बंध कहिए। आदि शब्दकरि पंखीनिका पांख लगने निमित्त ऊंचे दडकै ऊपरि चिगटास लगावना सो बंध वा हरिणादिकका सींगकै अग्रभाग सूत्रकी गांठि देना इत्यादि विशेष जानने ऐसैं जीवनिकै मारणे बांधनेके कारणरूप कार्यनिविषैं अन्यके उपदेश विना ही स्वयमेव बुद्धि प्रवर्तै सो कुमतिज्ञान कहिए। उपदेशतैं प्रवर्तै तो कुश्रुतज्ञान हो जाइ। तातैं विना ही उपदेश ऐसा विचाररूप विकल्प लीएं हिंसा अनृत स्तेय अब्रह्म परिग्रहकौं कारण आर्त रौद्रध्यानकौं कारण शल्य दंड गारव आदि अशुभोपयोगौंका कारण जो मन इंद्रियकरि विशेष ग्रहणरूप मिथ्याज्ञान प्रवर्तै सो मति अज्ञान सर्वज्ञदेव कहैं हैं॥ ३०३॥

आभीयमासुरक्खं भारहरामायणादिउवएसा।
तुच्छा असाहणीया सुयअण्णाणंतिणं बेंति॥ ३०४॥

आभीतमासुरक्षं भारतरामायणाद्युपदेशाः।
तुच्छाः असाधनीयाः श्रुताज्ञानमिति इदं ब्रुवंति॥ ३०४॥

जी० प्र०—तुच्छाः परमार्थशून्याः, असाधनीयाः अत एव सत्पुरुषाणामनादरणीयाः परमार्थशून्यत्वात् आभीतासुरक्षभारतरामायणाद्युपदेशाः तत्प्रबंधाः तेषां श्रवणादुत्पन्नं यज्ज्ञानं तदिदं श्रुताज्ञानमिति ब्रुवंत्याचार्याः। आसमंताद्भीताः आभीताः चोराः तच्छास्त्रमप्याभीतं। असवः प्राणाः तेषां रक्षा येभ्यः ते असुरक्षाः तलवराः तेषां शास्त्रमासुरक्षं। कौरवपांडवीयपंचभर्तृकैकभार्यावृत्तांतयुद्धव्यतिकरादिचर्चाव्याकुलं भारतं, सीताहरणरामरावणीयजातिवानरराक्षसयुद्धव्यतिकरादिस्वेच्छाकल्पनारचितं रामायणं। आदिशब्दाद्यदन्यन्मिथ्यादर्शनदूषितसर्वथैकांतवादिस्वेच्छाकल्पितकथाप्रबंधभुवनकोशहिंसायागादिगृहस्थकर्मत्रिदंडजटाधारदितपःकर्मषोडशपदार्थषट्पदार्थभावनाविधिनियोगभूतचतुष्ट-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यपंचविंशतितत्त्वब्रह्माद्वैतचतुरार्यसत्यविज्ञानाद्वैतसर्वशून्यत्वादिप्रतिपादकागमाभासजनितं श्रुतज्ञानाभासं तत्तत्सर्वं श्रुताज्ञानमिति निश्चेतव्यं, दृष्टेष्टविरुद्धार्थविषयत्वात् ॥ ३०४ ॥

मं० प्र०—तुच्छाः–परमार्थशून्याः, असाधनीयाः–अत एव सतामनादरणीयाः आभीतासुरक्षभारतरामायणाद्युपदेशास्तत्प्रबंधाः तेषां श्रवणादुत्पन्नं यज्ज्ञानं तदिदं श्रुताज्ञानमिति ब्रुवंत्याचार्याः । आ–समंताद् भीता आभीताः–चोराः, तच्छास्त्रमप्याभीतं, असुरक्षाः–चोराद्यपायेभ्यो जीवरक्षाः–तलवराः तेषां शास्त्रमासुरक्षं, कौरवपांडवीयपंचभर्तृकैकभार्यावृत्तांतयुद्धव्यतिकरादिचर्चाव्याकुलं भारतं, सीताहरणरामरावणीयजातिवानरराक्षसयुद्धव्यतिकरादिस्वेच्छाकल्पनाराचितं रामायणं । आदिशब्देन यद्यन्मिथ्यादर्शनदूषितसर्वथैकांतवादिस्वेच्छाकल्पितकथाप्रबंधशुनकोशहिंसायागादिगृहस्थकर्मत्रिदंडजटाधारणादितपष्कर्मषोडशपदार्थषट्पदार्थभावनाविधिनियोगभूतचतुष्टयपंचविंशतितत्त्वब्रह्माद्वैतचतुरार्यसत्यविज्ञानाद्वैतसर्वशून्यत्वादिप्रतिपादकागमाभासजनितं श्रुतज्ञानाभासं तत्तत्सर्वं श्रुताज्ञानमिति निश्चेतव्यं दृष्टेष्टविरुद्धार्थविषयत्वात् ॥ ३०४ ॥

स० चं०—आभीताः कहिए समस्तपनैं भयवान जे चौरादिक तिनिका शास्त्र सो आभीत हैं। बहुरि असु जे प्राण तिनिकी चौरादिकतैं रक्षा जिनितैं होइ असे कोटपाल राजादिक तिनिका जो शास्त्र सो असुरक्ष है। बहुरि कौरव पांडवोंका युद्धादिक वा एक भार्याके पंचभर्ता इत्यादिक विपरीत कथन जिसविषैं पाइए असा शास्त्र सो भारत है। बहुरि रामचंद्रकैं बानरोंकी सेना रावण राक्षस है तिनिका परस्पर युद्ध होना इत्यादिक अपनी इच्छाकरि रच्या हूवा शास्त्र सो रामायण है आदि शब्दतैं जो एकांत वादकरि दूषित अपनी इच्छाके अनुसारि रच्या हूवा शास्त्र जिनिविषैं हिंसारूप यज्ञादिक गृहस्थका कर्म है जटा धारण त्रिदंडधारणादिरूप तपस्वीका कर्म है सोलह पदार्थ हैं वा छह पदार्थ हैं वा भावनाविधि नियोग भूत ए च्यारि हैं वा पचीस तत्त्व है वा अद्वैत ब्रह्मका स्वरूप है वा सर्व शून्य है इत्यादि वर्णन पाइए है ते शास्त्र 'तुच्छाः' कहिए परमार्थतैं रहित हैं बहुरि 'असाधनीयाः' कहिए प्रमाण करने योग्य नाहीं याहीतैं संत पुरुषनिकौं आदरने योग्य नाहीं असैं शास्त्राभ्यासनित भया जो श्रुतज्ञानकीसी आभासा लीएं कुज्ञान सो श्रुत अज्ञान कहिए। जातैं प्रमाणीक इष्ट अर्थतैं विपरीत अर्थ याका विषय हो है। इहां मति श्रुत अज्ञानका वर्णन उपदेश लीएं किया है अर सामान्यपनैं तौ स्वपर भेद विज्ञानरहित इंद्रिय मन जनित जानना सो सर्व कुमति कुश्रुत है॥ ३०४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विवरीयमोहिणाणं खओवसमियं च कम्मबीजं च ।
वेभंगोत्ति पउच्चइ समत्तणाणीण समयम्हि ॥ ३०५ ॥

विपरीतमवधिज्ञानं क्षायोपशमिकं च कर्मबीजं च ।
विभंग इति प्रोच्यते समाप्तज्ञानिनां समये ॥ ३०५ ॥

जी० प्र०—मिथ्यादर्शनकलंकितस्य जीवस्य अवधिज्ञानावरणीयवीर्यांतरायक्षयोपशमजनितं द्रव्यक्षेत्रकालभावसीमाश्रितं रूपिद्रव्यविषयं विपरीतं आप्तागमपदार्थेषु विपरीतग्राहकं तिर्यग्मनुष्यगत्योः तीव्रकायक्लेशद्रव्यसंयमरूपगुणप्रत्ययं, चशब्दाद्देवनारकगत्योर्भवप्रत्ययं च मिथ्यात्वादिकर्मबंधबीजं, चशब्दात् कदाचिन्नारकादिगतौ पूर्वभवदुराचारसंचितदुष्कर्मफलतीव्रदुःखवेदनाभिभवजनितसम्यग्दर्शनज्ञानरूपधर्मबीजं वा अवधिज्ञानं विभंग इति समाप्तज्ञानिनां केवलज्ञानिनां समये स्याद्वादशास्त्रे प्रोच्यते कथ्यते । नारकाणां विभंगज्ञानेन वेदनाभिभवतत्कारणदर्शनस्मरणानुसंधानप्रत्ययबलात् सम्यग्दर्शनोत्पत्तिप्रतीतेः । विशिष्टस्य अवधिज्ञानस्य भंगः—विपर्ययः विभंग इति निरुक्तिसिद्धार्थस्यैव अनेन प्ररूपितत्वात् ॥ ३०५ ॥ अथ नवभिर्गाथाभिः स्वरूपोत्पत्तिकारणभेदविषयान् आश्रित्य मतिज्ञानं प्ररूपयति—[1]

मं० प्र०—मिथ्यादर्शनकलंकितस्य जीवस्य अवधिज्ञानावरणवीर्यांतरायक्षयोपशमादुत्पन्नं द्रव्यक्षेत्रकालभावसीमाश्रितं रूपिद्रव्यविषयं विपरीतं आप्तागमपदार्थेषु विपरीतग्राहकं तिर्यग्मनुष्यगत्योः तीव्रकायक्लेशद्रव्यसंयमरूपगुणप्रत्ययं, चशब्दाद्देवनारकगत्योर्भवप्रत्ययं च मिथ्यात्वादिकर्मबंधबीजं, चशब्दात् कचित् नारकादौ पूर्वभवदुराचारसंचितदुष्कर्मफलतीव्रदुःखवेदनाभिभवजनितसम्यग्दर्शनज्ञानरूपधर्मबीजं चावधिज्ञानं विभंगं इति समाप्तज्ञानिनां—केवलज्ञानिनां समये प्रोच्यते नारकाणां विभंगज्ञानेन वेदनाभिभवतत्कारणदर्शनस्मरणानुसंधानप्रत्ययबलात्सम्यग्दर्शनोत्पत्तिप्रतीतेः । विशिष्टस्य अवधिज्ञानस्य भंगः—विपर्ययः, विभंग इति निरुक्तिसिद्धार्थस्यैव अनेन प्ररूपितत्वात् ॥ ३०५ ॥ अथ नवभिर्गाथाभिः स्वरूपोत्पत्तिकारणभेदविषयानाश्रित्य मतिज्ञानं प्ररूपयति—

स० चं०—मिथ्यादृष्टी जीवनिकैं अवधिज्ञानावरण वीर्यांतरायके क्षयोपशमतैं उत्पन्न भया ऐसा द्रव्य-क्षेत्र काल भावकी मर्यादा लीएं रूपी पदार्थ है विषय जाका ऐसा आप्त आगम पदार्थनिविषैं विपरीतका ग्राहक सो विभंग नाम पावै है । वि कहिए विशिष्ट जो अवधिज्ञान ताका भंग कहिए विपरीत भाव सो वि- ६५७

१ 'अथ स्वरूपोत्पत्तिकारणभेदविषयान् आश्रित्य गाथानवकेन मतिज्ञानमाह ।' इति पपुस्तके पाठः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भंग कहिए सो तिर्यंच मनुष्य गतिविषैं तौ तीव्र काय क्लेशरूप द्रव्य संयमादिककरि उपजै है सो गुण प्रत्यय हो है। बहुरि देव नरकगतिविषैं भव प्रत्यय हो हैं सो सब ही विभंगज्ञान मिथ्यात्वादि कर्मबंधका बीज कहिए कारण है चकारतैं कदाचित् नारकादिक गतिविषैं पूर्वभवसंबंधी दुराचारके दुःख फलकौं जानि कहीं सम्यग्दर्शन ज्ञानरूप धर्मका भी बीज हो है ऐसा विभंगज्ञान समासज्ञानी जो संपूर्ण ज्ञानी केवली तिनिके मतविषैं कह्या है॥ ३०५॥ आगैं स्वरूप वा उपजनेका कारण वा भेद वा विषय इनिका आश्रयकरि मतिज्ञानका निरूपण नव गाथानिकरि कहैं हैं—

अहिमुहणियमियबोहणमाभिणिबोहियमणिंदिइंदियजं।
अवगहईहावायाधारणगा होंति पत्तेयं॥ ३०६॥

अभिमुखनियमितबोधनमाभिनिबोधिकमनिंद्रियेंद्रियजं।
अवग्रहेहावायधारणका भवंति प्रत्येकं॥ ३०६॥

जी० प्र०-स्थूलवर्तमानयोग्यदेशावस्थितोऽर्थः अभिमुखः, अस्येंद्रियस्य अयमेवार्थः इत्यवधारितो नियमितः। अभिमुखश्चासौ नियमितश्चासौ अभिमुखनियमितः। तस्यार्थस्य बोधनं ज्ञानं आभिनिबोधिकं मतिज्ञानमित्यर्थः। अभिनिबोध एव आभिनिबोधिकमिति स्वार्थिकेन ठण्प्रत्ययेन सिद्धं भवति। स्पर्शनादींद्रियाणां स्थूलादिष्वेव स्पर्शादिषु स्वार्थेषु ज्ञानजननशक्तिसंभवात्। सूक्ष्मांतरितदूरार्थेषु परमाणुशंखचक्रवर्तिमेर्वादिषु तेषां ज्ञानजननशक्तिर्न संभवतीत्यर्थः। अनेन मतिज्ञानस्य स्वरूपमुक्तं। कथंभूतं तत्? अनिंद्रियेंद्रियजं—अनिंद्रियं मनः, इंद्रियाणि स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि। तेभ्यः जातमुत्पन्नं अनिंद्रियेंद्रियजं, अनेन इंद्रियमनसोर्मतिज्ञानोत्पत्तिकारणत्वं दर्शितं। एवं च कारणभेदात्कार्यभेद इति मतिज्ञानं षट्प्रकारमुक्तं। पुनः प्रत्येकमेकैकस्य मतिज्ञानस्य अवग्रहः ईहा अवायः धारणा चेति चत्वारो भेदा भवंति। तद्यथा—मानसोऽवग्रहः मानसीहा मानसोवायः मानसी धारणा इति चत्वारः। स्पर्शनजोऽवग्रहः, स्पर्शनजा ईहा स्पर्शनजोवायः स्पर्शनजा धारणा। रसनजोऽवग्रहः रसनजा ईहा रसनजोऽवायः रसनजा धारणा। घ्राणजोऽवग्रहः घ्राणजा ईहा घ्राणजोवायः घ्राणजा धारणा ४। चाक्षुषोऽवग्रहः चाक्षुषीहा चाक्षुषोवायः चाक्षुषी धारणा ४। श्रोत्रजोऽवग्रहः श्रोत्रजा ईहा श्रोत्रजोऽवायः श्रोत्रजा धारणा। एवं मतिज्ञानं चतुर्विंशतिविकल्पं भवति अवग्रहादीनां लक्षणं उत्तरत्र ग्रंथकारः स्वयमेव वक्ष्यति॥ ३०६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं० प्र०—स्थूलवर्तमानयोग्यदेशावस्थितोऽर्थः अभिमुखः । अस्येंद्रियस्यायमर्थ इत्यवधारितो नियमितः । अभिमुखश्चासौ नियमितश्चासौ अभिमुखनियमितः । तस्यार्थस्य बोधनं–ज्ञानं, आभिनिबोधिकं मतिज्ञानमित्यर्थः । अभिनिबोध एव आभिनिबोधिकमिति स्वार्थिकेन ठण्प्रत्ययेन सिद्धं । स्पर्शनादींद्रियाणां स्थूलादिष्वेव स्पर्शादिषु स्वार्थेषु ज्ञानजननशक्तिसंभवात् । सूक्ष्मांतरितदूरार्थेषु परमाणुशंखचक्रवर्तिमेर्वादिषु तेषां ज्ञानजननशक्त्यसंभवात् । अनेन मतिज्ञानस्य स्वरूपमुक्तं । कथंभूतं तत् ? अनिंद्रियेंद्रियजं–अनिंद्रियं–मनः, इंद्रियाणि स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि तेभ्यो जातं–उत्पन्नं । अनेन इंद्रियमनसोर्मतिज्ञानोत्पत्तिकारणत्वं दर्शितं । एवं च कारणभेदात्कार्यभेद इति मतिज्ञानं षट्प्रकारमुक्तं । पुनः प्रत्येकमेकैकस्य मतिज्ञानस्य अवग्रहः, ईहा अवायः धारणा चेति चत्वारो भेदा भवंति । तद्यथा—मानसोऽवग्रहः मानसीहा मानसोऽवायः मानसी धारणा । ४ । स्पर्शनजोवग्रहः स्पर्शनजा ईहा स्पर्शनजोऽवायः स्पर्शनजा धारणा । ४ । रसनजोऽवग्रहः रसनजा ईहा रसनजोऽवायः रसनजा धारणा । ४ । घ्राणजोऽवग्रहः घ्राणजा ईहा घ्राणजोऽवायः घ्राणजा धारणा । ४ । चाक्षुषोऽवग्रहः चाक्षुषी ईहा चाक्षुषोऽवायः चाक्षुषी धारणा । ४ । श्रोत्रजोऽवग्रहः श्रोत्रजा ईहा श्रोत्रजोऽवायः श्रोत्रजा धारणा ।४। एवं मतिज्ञानं चतुर्विंशतिविकल्पं भवति अवग्रहादीनां लक्षणमुत्तरत्र ग्रंथकारः स्वयमेव वक्ष्यति ॥ ३०६ ॥

स० चं०—स्थूलवर्तमान जिस क्षेत्रविषैं इंद्रियमनकी प्रवृत्ति होइ तहां तिष्ठता ऐसा जो इंद्रिय मनके ग्रहण योग्य पदार्थ सो अभिमुख कहिए बहुरि इस इंद्रियका यहु ही विषय है ऐसा नियमरूप जो पदार्थ सो नियमित कहिए ऐसैं पदार्थका जो जानना सो अभिनिबोध कहिए । अभि कहिए अभिमुख अर 'नि' कहिए नियमित जो अर्थ ताका निबोध कहिए जानना ऐसा आभिनिबोध सोई आभिनिबोधिक है इहां स्वार्थविषैं ठण् प्रत्यय आया है सो यह आभिनिबोधिक मतिज्ञानका नाम जानना । इंद्रियनिकैं स्थूल रूप स्पर्शादिक अपने विषयके ज्ञान उपजावनेकी शक्ति है बहुरि सूक्ष्म अंतरित दूर पदार्थके ज्ञान उपजावनेकी शक्ति नाहीं है । तहां सूक्ष्म पदार्थ तौ परमाणु आदिक, अंतरित पदार्थ अतीत अनागत काल संबंधी, दूर पदार्थ मेरु गिरि स्वर्ग नरक पटल आदि दूर क्षेत्रवर्ती जानने ऐसैं मतिज्ञानका स्वरूप कह्या है । सो मतिज्ञान कैसा है ? अनिंद्रिय जो मन अर इंद्रिय स्पर्शन रसन घ्राण चक्षु श्रोत्र इनिकरि उपजै है । मतिज्ञान उपजनेके कारण इंद्रिय अरु मन हैं । कारणके भेदतैं कार्यविषैं भी भेद कहिए तातैं मतिज्ञान छह प्रकार है तहां एक एकके च्यारि च्यारि भेद हैं अवग्रह ईहा अवाय धारणा । सो मनतैं वा स्पर्शनतैं वा रसनातैं वा घ्राणतैं वा चक्षुतैं वा श्रोत्रतैं ए अवग्रहादि च्यारि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

च्यारि उत्पन्न होंइ तातैं चौबीस भेद भए। अवग्रह ईहा अवाय धारणाका लक्षण शास्त्र कर्ता आगैं स्वयमेव कहैगा।

वेंजणअत्थअवग्गहभेदा हु हवंति पत्तपत्तत्थे।
कमसो ते बावरिदा पढमं ण हि चक्खुमणसाणं ॥३०७॥

व्यंजनार्थावग्रहभेदौ हि भवतः प्राप्ताप्राप्तार्थे।
क्रमशस्तौ व्यापृतौ प्रथमो नहि चक्षुर्मनसोः ॥ ३०७ ॥

जी० प्र०—मतिज्ञानविषयो द्विविधः व्यंजनं अर्थश्चेति। तत्र इंद्रियैः प्राप्तो विषयः व्यंजनं तैरप्राप्तः अर्थः। तयोः प्राप्ताप्राप्तयोरर्थयोः क्रमशः यथासंख्यं व्यंजनार्थावग्रहभेदौ तौ व्यापृतौ प्रवृत्तौ भवतः। इंद्रियैः प्राप्तार्थविशेषग्रहणं व्यंजनावग्रहः। तैरप्राप्तार्थविशेषग्रहणं अर्थावग्रह इत्यर्थः। व्यंजनं—अव्यक्तं शब्दादिजातं इति तत्त्वार्थविवरणेषु प्रोक्तं कथमनेन व्याख्यानेन सह संगतमिति चेदुच्यते विगतं—अंजनं—अभिव्यक्तिर्यस्य तद्व्यंजनं। व्यज्यते म्रक्ष्यते प्राप्यते इति व्यंजनं अंजु गतिव्यक्तिम्रक्षणेष्विति व्यक्तिम्रक्षणार्थयोर्ग्रहणात्। शब्दाद्यर्थः श्रोत्रादींद्रियेण प्राप्तोऽपि यावन्नाभिव्यक्तस्तावद् व्यंजनमित्युच्यते एकवारजलकणसिक्तनूतनशराववत्। पुनरभिव्यक्तौ सत्यां स एवार्थो भवति। यथा पुनः पुनर्जलकणसिच्यमाननूतनशरावः अभिव्यक्तसेको भवति। अतः कारणात् चक्षुर्मनसोऽप्राप्ते विषये प्रथमो व्यंजनावग्रहो नास्ति। चक्षुर्मनसी स्वविषयमर्थं प्राप्यैव तत्र ज्ञानं जनयतः, इति नैयायिकादीनां मतं स्याद्वादतर्कग्रंथेषु बहुधा निराकृतमित्यत्राहेतुवादे आगमांशे नोपक्रम्यते। व्यंजनरूपे विषये स्पर्शनरसनघ्राणश्रोत्रैः चतुर्भिरिंद्रियैः अवग्रह एक एवोत्पद्यते नेहादयः। ईहादीनां ज्ञानानां देशसर्वाभिव्यक्तौ सत्यामेव उत्पत्तिसंभवात्। तदा तद्विषयस्य अव्यक्तरूपव्यंजनत्वाभावात्। इति व्यंजनावग्रहाश्चत्वार एव ॥ ३०७ ॥

मं० प्र०—मतिज्ञानविषयो द्विविधः—व्यंजनमर्थश्चेति। तत्र इंद्रियैः प्राप्तो विषयो व्यंजनं। तैरप्राप्तोऽर्थः। तयोः प्राप्ताप्राप्तयोरर्थयोः क्रमशः—यथासंख्यं व्यंजनार्थावग्रहभेदौ तौ व्यापृतौ प्रवृत्तौ भवतः। इंद्रियैः प्राप्तार्थविशेषग्रहणं व्यंजनावग्रहः। तैरप्राप्तार्थविशेषग्रहणमर्थावग्रहः इत्यर्थः। व्यंजनमव्यक्तं शब्दादिजातं इति तत्त्वार्थविवरणेषु प्रोक्तं कथमनेन व्याख्यानेन सह संगतमिति चेदुच्यते—विगतमंजनं—अभिव्यक्तिर्यस्य तद् व्यंजनं। व्यज्यते—म्रक्ष्यते प्राप्यते इति व्यंजनं इति च व्यक्तिम्रक्षणयोर्ग्रहणात्। शब्दादिकं श्रोत्रादिना इंद्रियेण प्राप्तमपि यावत् नाभिव्यक्तं तावदेव व्यंजनमित्युच्यते एकवारजलकणसिक्तनूतनशराववत्। पुनरभिव्यक्तौ सत्यां तदेवार्थो भवति यथा पुनः पुनर्जलकणसिच्यमाननूतनशरावोऽभिव्यक्तसेको भवति अतः कारणात् चक्षुर्मनसोरप्राप्ते विषये प्रथमो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्यंजनावग्रहो नास्ति । चक्षुर्मनश्च स्वविषयमर्थं प्राप्यैव तत्र ज्ञानं जनयत इति नैयायिकादीनां मतं स्याद्वादतर्कशास्त्रेषु बहुधा निराकृतमित्यत्राहेतुवादे आगमांशे न प्रकम्प्यते । व्यंजने विषये स्पर्शनरसनघ्राणचक्षुःश्रोत्रैश्चतुर्भिरिंद्रियैरवग्रह एक एवोत्पद्यते नेहादयः, ईहादीनां ज्ञानानां देशसर्वाभिव्यक्तौ सत्यामेवोत्पत्तिसंभवात् तत्काले तद्विषयस्य अव्यक्तरूपव्यंजनत्वाभावात् इति व्यंजनावग्रहाश्चत्वार एव ॥ २०७ ॥

स० चं०—मतिज्ञानका विषय दोय प्रकार एक व्यंजन एक अर्थ । तहां जो विषय इंद्रियनिकरि प्राप्त होइ स्पर्शित होइ सो व्यंजन कहिए । जो प्राप्त न होइ सो अर्थ कहिए । तिनिका विशेष ग्रहणरूप व्यंजनावग्रह अर अर्थावग्रह भेद प्रवर्तें हैं । इहां प्रश्न–जो तत्त्वार्थ सूत्रकी टीकाविषैं तौ अर्थ ऐसा कीया है जो व्यंजन नाम अव्यक्त शब्दादिकका है इहां प्राप्त अर्थकौं व्यंजन कह्या सो कैसैं है? ताका समाधान–व्यंजन शब्दके दोऊ अर्थ हो हैं 'विगतं अंजनं व्यंजनं' दूरि भया है अंजन कहिए व्यक्तभाव जाकैं सो व्यंजन कहिए । सो तत्त्वार्थ सूत्रकी टीकाविषैं तौ इस अर्थका मुख्य ग्रहण कीया है 'अर व्यज्यते म्रक्ष्यते प्राप्यते इति व्यंजनं' जो प्राप्त होइ ताकौं व्यंजन कहिए सो इहां यहु अर्थ मुख्य ग्रहण कीया है जातैं अंजु धातु गति व्यक्ति म्रक्षण अर्थविषैं प्रवर्तें है तातैं व्यक्ति अर्थका अर म्रक्षण अर्थका ग्रहण करनेतैं कर्णादिक इंद्रियनिकरि शब्दादिक अर्थ प्राप्त हूवे भी यावत् व्यक्त न होंइ तावत् व्यंजनावग्रह है व्यक्त भएं अर्थावग्रह हो है जैसैं नवा माटीका शरावा जलकी बूंदनिकरि सींचिए तहां एक दोय बार आदि जलकी बूंद परैं व्यक्त न होइ शोषित होइ जाय बहुतवार जलकी बूंद परैं व्यक्त होइ तैसैं कर्णादिककरि प्राप्त हूवा जो शब्दादिक तिनिका यावत् व्यक्तरूप ज्ञान न होइ जो मैंने शब्द सुन्या ऐसा व्यक्त ज्ञान न होइ तावत् व्यंजनावग्रह कहिए । बहुरि बहुत समय पर्यंत इंद्रिय अर विषयका संयोग रहैं व्यक्तरूपज्ञान भएं अर्थावग्रह कहिए बहुरि नेत्र इंद्रिय अर मन ए दूरहीतैं पदार्थकौं जानैं हैं तातैं इनि दोऊनिकैं व्यंजनावग्रह नाहीं अर्थावग्रह ही है । इहां प्रश्न–जैसैं कर्णादिककरि दूरितैं शब्दादिक जानिए है तैसैं ही नेत्रकरि वर्ण जानिए है, वाकौं प्राप्त कह्या अर याकौं अप्राप्त कह्या सो कैसैं हैं ? ताका समाधान-दूरि जो शब्द हो है ताकौं यहु नाहीं जानै है जो दूरि भया शब्द ताके निमित्ततैं आकाशविषैं जे अनेक स्कंध तिष्ठै हैं ते शब्दरूप परिणए हैं तहां कर्ण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इंद्रियके समीपवर्ती भी स्कंध शब्दरूप परिणए हैं सो तिनिका कर्ण इंद्रियकरि स्पर्श भया है तब शब्दका ज्ञान हो है। ऐसें ही दूरि तिष्ठता सुगंध दुर्गंध वस्तुके निमित्ततैं पुद्गल स्कंध तत्काल तद्रूप परिणवै हैं तहां जो नासिका इंद्रियके समीपवर्ती स्कंध परिणए हैं तिनिके स्पर्शतैं गंधका ज्ञान हो है ऐसें ही अग्न्यादिकके निमित्ततैं पुद्गल स्कंध उष्णादिरूप परिणवै हैं तहां जो स्पर्शन इंद्रियके समीपवर्ती स्कंध परिणए हैं तिनिके स्पर्शतैं स्पर्श ज्ञान हो है ऐसें ही आम्लादि वस्तुके निमित्ततैं स्कंध तद्रूप परिणवै है तहां रसना इंद्रियके समीपवर्ती जो स्कंध परिणए तिनिके संयोगतैं रसका ज्ञान हो है। बहुरि यहु श्रुतज्ञानके बलकरि जाके निमित्ततैं शब्द आदि भए ताकौं जानि ऐसा मानैं है कि मैं दूर वर्ती वस्तुकौं जान्या ऐसैं दूरवर्ती वस्तुके जाननेविषैं भी प्राप्त होना सिद्ध भया अर समीपवर्तीकौं तो प्राप्त होकर जानैं ही है। इहां शब्दादिक परमाणु अर कर्णादिक इंद्रिय परस्पर प्राप्त होइ अर यावत् जीवकैं व्यक्त ज्ञान न होइ तावत् व्यंजनावग्रह है व्यक्तज्ञान भएं अर्थावग्रह हो है। बहुरि मन अर नेत्र दूरिहीतैं जानै हैं ऐसा नाहीं जो शब्दादिककी ज्यों जानैं तातैं पदार्थ तौ दूरि तिष्ठै है ही जब इनर्नैं ग्रहे तब व्यक्त ही ग्रहे तातैं व्यंजनावग्रह इनि दोऊनिकैं नाहीं अर्थावग्रह ही है। उक्तं च—

पुट्ठं सुणेदि सद्दं अपुट्ठं पुण पस्सदे रूवं।
गंधं रसं च फासं बद्धं पुट्ठं वियाणादि ॥ १ ॥

बहुरि नैयायिकमतवाले ऐसा कहैं हैं--मन अर नेत्र भी प्राप्त होइकरि ही वस्तुकौं जानै हैं ताका निराकरण जैन न्यायके शास्त्रनिविषैं अनेक प्रकार कीया है। बहुरि व्यंजन जो अव्यक्त शब्दादिक तिनिविषैं स्पर्शन रसन घ्राण श्रोत्र इंद्रियनिकरि केवल अवग्रह हो है ईहादिक न हो हैं जातैं ईहादिक तौ एकदेश वा सर्वदेश व्यक्त भएं ही हो हैं। व्यंजन नाम अव्यक्तका है तातैं च्यारि इंद्रियनिकरि व्यंजनावग्रहके च्यारि भेद हैं ॥ ३०७ ॥

विसयाणं विसईणं संजोगाणंतरं हवे णियमा।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अवगहणाणं गहिदे विसेसकंखा हवे ईहा ॥ ३०८ ॥

विषयाणां विषयिणां संयोगानंतरं भवेन्नियमात् ।
अवग्रहज्ञानं गृहीते विशेषाकाङ्क्षा भवेदीहा ॥ ३०८ ॥

जी० प्र०—विषयाणां-अर्थानां, विषयिणां इंद्रियाणां च संयोगः-योग्यदेशावस्थानरूपसंबंधः तस्मिन् जाते सति अनंतरं-तदनंतरमेव वस्तुसत्तामात्रलक्षणसामान्यस्य निर्विकल्पग्रहणमिदमिति प्रकाशरूपं दर्शनं नियमादुत्पद्यते-नियमाज्जायते। अनंतरं तदनंतरं दृष्टस्यार्थस्य वर्णसंस्थानादिविशेषग्रहणरूपं अवग्रहाख्यं आद्यं ज्ञानं भवेत् उत्पद्यते। 'अक्षार्थयोगे सत्तालोकोऽर्थाकारविकल्पधीः अवग्रहः' इति श्रीमद्भट्टाकलंकपादैः, 'दर्शनपूर्वकं ज्ञानं छद्मस्थानां' इति श्रीनेमिचंद्रसैद्धांतचक्रवर्तिभिरपि प्रोक्तत्वात्, इंद्रियार्थसंबंधानंतरं दर्शनमुत्पद्यते इत्येतस्मिन् गाथासूत्रे अनुक्तमपि पूर्वाचार्यवचनानुसारेण व्याख्यानं ग्राह्यं। गृहीते-अवग्रहेण इदं श्वेतमिति ज्ञाते अर्थविशेषस्य बलाकारूपस्य पताकारूपस्य वा यथावस्थितस्य आकांक्षा बलाकया भवितव्यमिति भवितव्यताप्रत्ययरूपा बलाकायामेव संजायमाना ईहाख्यं द्वितीयं ज्ञानं भवेत्। अथवा पताकारूपं विषयमालंब्य उत्पद्यमाना अनया पताकया भवितव्यमिति भवितव्यताप्रत्ययरूपा पताकायामेव संजायमाना आकांक्षा ईहेति द्वितीयं ज्ञानं भवेत्। एवं इंद्रियांतरविषयेषु मनोविषये च अवग्रहगृहीते यथावस्थितस्य विशेषस्य आकांक्षारूपा ईहेति निश्चेतव्यं। मतिज्ञानावरणक्षयोपशमस्य तारतम्यभेदेन अवग्रहेहाज्ञानयोर्भेदसंभवात्। अस्मिन् सम्यग्ज्ञानप्रकरणे बलाका वा पताका इति संशयस्य, बलाकायां पताकया भवितव्यमिति विपर्ययस्य च मिथ्याज्ञानस्यानवतारात् ॥ ३०८ ॥

मं० प्र०—विषयाणां,अर्थानां, विषयिणां इंद्रियाणां च संयोगः-योग्यदेशावस्थानरूपः संबंधः। तस्मिन् सति तदनंतरमेव वस्तुसत्तामात्रलक्षणसामान्यस्य निर्विकल्पग्रहणमिदमिति प्रकाशरूपं दर्शनं नियमादुत्पद्यते, तदनंतरं दृष्टस्यार्थस्य वर्णसंस्थानादिविशेषग्रहणरूपमवग्रहाख्यमाद्यं ज्ञानं भवेत्—उत्पद्यते। अक्षार्थयोगे सत्तालोकोऽर्थाकारविकल्पधीः अवग्रह इति श्रीमद्भट्टाकलंकपादैः 'दर्शनपूर्वकं ज्ञानं छद्मस्थानामिति' श्रीनेमिचंद्रसैद्धांतचक्रवर्तिभिरपि प्रोक्तत्वात् इंद्रियार्थसंबंधानंतरं दर्शनमुत्पद्यते इत्येतस्मिन् गाथासूत्रे अनुक्तमपि पूर्वाचार्यवचनानुसारेण व्याख्यानं ग्राह्यं। गृहीते अवग्रहेण इदं श्वेतमिति ज्ञाते अर्थे विशेषस्य बलाकारूपस्य पताकारूपस्य वा यथावस्थितस्य आकांक्षा बलाकया भवितव्यमिति भवितव्यताप्रत्ययरूपा बलाकायामेव संजायमाना ईहाख्यं द्वितीयं ज्ञानं भवेत्। अथवा पताकारूपविषयमालंब्य उत्पद्यमाना अनया पताकया भवितव्यमिति भवितव्यताप्रत्ययरूपा आकांक्षा ईहानाम द्वितीयं ज्ञानं भवेत् एवमिंद्रियांतरविषयेषु मनोविषये च अवग्रहगृहीते यथावस्थितस्य विशेषस्य आकांक्षारूपा ईहेति निश्चेतव्यं। मतिज्ञानावरणक्षयोपशमस्य तारतम्यभेदेन अवग्रहेहाज्ञानयोर्भेदसंभवात्, अस्मिन् सम्यग्ज्ञानप्रकरणे बलाका वा पताका वा इति संशयस्य बलाकायां पताकया भवितव्यमिति विपर्ययस्य च मिथ्याज्ञानस्यानवतारात् ॥ ३०८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०----विषय जो शब्दादिक पदार्थ अर विषयी जे कर्णादिक इंद्रियां इनिका जो संयोग कहिये योग्य क्षेत्रविषैं तिष्ठनेरूप संबंध ताकौं होतैं संतैं ताके अनंतर ही वस्तुका सत्तामात्र निर्विकल्प ग्रहण जो यहु है इतना प्रकाशरूप सो दर्शन नियमकरि हो है। ताके अनंतर पीछै ही देख्या जो पदार्थ ताके वर्ण संस्थानादि विशेष ग्रहण-रूप अवग्रह नामा ज्ञान हो है। इहां प्रश्न--जो गाथाविषैं तौ पहिलैं दर्शन न कह्या तुम कैसैं कहो हो? ताका समाधान--जो अन्य ग्रंथनिमें कह्या है--'अक्षार्थयोगे सत्तालोकोर्थाकारविकल्पधीरवग्रहः' इंद्रिय अर विषयकै संयोग होतैं प्रथम सत्तावलोकनमात्र दर्शन हो है पीछैं पदार्थका आकार विशेष जाननेरूप अवग्रह हो है ऐसा अकलंकाचार्यकरि कह्या है बहुरि "दंसणपुव्वं णाणं छद्मत्थाणं हवेदि णियमेण" छद्मस्थ जीवनिकै नियमतैं दर्शन पूर्वक ही ज्ञान हो है ऐसा नेमिचंद्राचार्यने द्रव्यसहनामा ग्रंथमें कह्या है। बहुरि तत्त्वार्थ सूत्रकी टीकावालेनैं ऐसा कह्या है तातैं इहां ज्ञानाधिकारविषैं दर्शनका कथन न कीया तौ भी अन्यग्रंथनितैं ऐसैं ही जानना। सो अवग्रहकरि तौ इतना ग्रहण भया जो यहु श्वेत वस्तु है बहुरि श्वेत तौ बुगलनिकी पंक्ति भी हो है अर ध्वजा भी हो है परि बुगलेनिकी पंकतिरूप विषयकौं अवलंबि यहु बुगलेनिकी पंकति ही होसी वा ध्वजारूप विषयकौं अवलंबि यहु ध्वजा होसी ऐसा विशेष वांछारूप जो ज्ञान ताकौं ईहा कहिए। बहुरि बुगलनिकी यहु पंकति होसी कि ध्वजा होसी ऐसा संशयरूप ज्ञानका नाम ईहा नाही है। वा बुगलनिकी पंकतिविषैं यहु ध्वजा होसी ऐसा विपर्यय ज्ञानका नाम ईहा नाही है जातैं इहां सम्यग्ज्ञानका अधिकार है सम्यग्ज्ञान प्रमाण है अर संशय विपर्यय है सो मिथ्याज्ञान है तातैं संशय विपर्ययका नाम ईहा नाही। जो वस्तु है ताका यथार्थरूप ऐसा ज्ञान करना कि यहु अमुक ही वस्तु होसी ऐसैं होसीरूप जो प्रतीति ताका नाम ईहा है। अवग्रहतैं ईहाविषैं विशेष ग्रहण भया तातैं याके वाकेविषैं मतिज्ञानवरणके क्षयोपशमका तारतम्यकरि भेद जानना॥ ३०८॥

ईहणकरणेण जदा सुणिण्णओ होदि सो अवाओ दु। ३०९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कालांतरेवि णिण्णिदवत्थुसमरणस्स कारणं तुरियं ॥ ३०९

ईहनकरणेन यदा सुनिर्णयो भवति स अवायस्तु ।
कालांतरेऽपि निर्णीतवस्तुस्मरणस्य कारणं तुर्यं ॥ ३०९ ॥

जी० प्र०—ईहनकारणेन-विशेषाकांक्षाक्रियायाः पश्चात् यदा ईहितविशेषार्थस्य सुनिर्णयः उत्पतनपतनपक्षविक्षेपादिभिश्चिन्हैः इयं बलाकैवेति बलाकात्वस्य यः सुनिश्चयो भवेत् तदा स अवाय इति व्यपदिश्यते । तुशब्दः प्रागाकांक्षितविशेषस्यैव सुनिर्णयोऽवाय इत्यवधारणार्थः । अनेन विपर्यासेन निर्णयो मिथ्याज्ञानतया अवायो न भवतीति ग्राह्यं ततः स एवावायः पुनः पुनः प्रवृत्तिरूपाभ्यासजनितसंस्कारात्मको भूत्वा कालांतरेऽपि निर्णीतवस्तुस्मरणकारणत्वेन तुर्यं चतुर्थं धारणाख्यं ज्ञानं भवति ॥ ३०९ ॥

मं० प्र०—ईहनकरणात्-विशेषाकांक्षाक्रियायाः, पश्चात् यदा ईहितविशेषस्य सुनिर्णयः उत्पतनपतनपक्षविक्षेपादिभिश्चिह्नैरियं बलाकैवेति बलाकात्वस्य यः सुनिश्चयो भवेत् तदा स अवाय इति व्यपदिश्यते । तुशब्दः प्रागाकांक्षितविशेषस्यैव सुनिर्णयोऽवाय इत्यवधारणार्थः । अनेन विपर्यासेन निर्णयो मिथ्याज्ञानतया अवायो न भवतीति ग्राह्यं । ततः स एव अवायः पुनः पुनः प्रवृत्तिरूपाभ्यासजनितसंस्कारात्मकः सन् कालांतरेऽपि निर्णीतवस्तुस्मरणकारणत्वेन तुर्यं धारणाख्यं चतुर्थज्ञानं भवति ॥ ३०९ ॥

स० चं०—ईहाके करनेकरि ताके पीछैं जिस वस्तुकी ईहा भई थी ताका भलेप्रकार निर्णय रूप जो ज्ञान ताकौं अवाय कहिए । जैसैं पांखनिका हलावना आदि चिह्नकरि यहु निश्चय कीया जो बुगलनिकी पंकतिही है निश्चयकरि और किछू नाही ऐसा निर्णयका नाम अवाय है । तुशब्दकरि पूर्वें जो ईहाविषैं वांछित वस्तु था ताहीका भले प्रकार निर्णय सो अवाय है । बहुरि जो वस्तु किछू और है अर और ही वस्तुका निश्चयकरि लीया है तो वाका नाम अवाय नाही वह मिथ्याज्ञान है । बहुरि वहां पीछैं बार बार निश्चयरूप अभ्यासतैं उपज्या जो संस्कार तींहि स्वरूप होइ केते इक कालकौं व्यतीत भएं भी यादि आवनेकौं कारणभूत जो ज्ञान सो धारणा नाम चौथा ज्ञानका भेद हो है ऐसैं ही सर्व इंद्रिय वा मन संबंधी अवग्रह ईहा अवाय धारणा भेद जानने ॥ ३०९ ॥

बहु बहुविहं च खिप्पाणिस्सिदणुत्तं धुवं च इदरं च ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्थेक्केक्के जादे छत्तीसं तिसयभेदं तु ॥ ३१० ॥

बहु बहुविधं च क्षिप्रानिःसृदनुक्तं ध्रुवं च इतरच्च ।
तत्रैकैकस्मिन् जाते षट्त्रिंशत्त्रिशतभेदं तु ॥ ३१० ॥

जी० प्र०——अर्थो व्यंजनं वा मतिज्ञानविषयः बहुः बहुविधः क्षिप्रः अनिसृतः अनुक्तः ध्रुवश्चेति षोढा । तथा इतरोऽपि एकः एकविधः अक्षिप्रः निसृतः उक्तः अध्रुवश्चेति षोढा एवं द्वादशधा भवति । तत्र द्वादशस्वपि एकैकस्मिन् विषये प्रागुक्ताष्टाविंशतिप्रकारे मतिज्ञाने जाते-उत्पन्ने सति मतिज्ञानं तु पुनः षट्त्रिंशदुत्तरत्रिशतभेदं भवति ३३६ । तद्यथा--बहुविषये अर्थात्मके अनिन्द्रियेंद्रियभेदेन मतिज्ञानस्य भेदाः षट्, त एव पुनः अवग्रहेहावायधारणाभेदेन प्रत्येकं चत्वारश्चत्वारो भूत्वा चतुर्विंशतिः । तथा व्यंजनात्मके तु स्पर्शनरसनघ्राण-चक्षुःश्रोत्रैश्चत्वारोऽवग्रहा एव । एवमर्थव्यंजनात्मके बहुविषये मिलित्वा मतिज्ञानभेदा अष्टाविंशतिर्भवंति । अनेन प्रकारेण अर्थव्यंजना मक-बहुविधादिष्वपि प्रत्येकमष्टाविंशत्यष्टाविंशतिज्ञानभेदेषु जातेषु द्वादशविषयेषु मतिज्ञानभेदाः षट्त्रिंशदुत्तरत्रिशतीप्रमिता भवंति । यद्येकस्मिन्विषये अष्टाविंशतिर्मतिज्ञानभेदा भवंति तदा द्वादशसु विषयेषु कियंतो मतिज्ञानभेदा भवंतीति प्र १ । फ १८ । इ १२ त्रैराशिकं कृत्वा इच्छां फलेन संगुण्य प्रमाणेन भक्त्वा लब्धस्य तत्प्रमाणत्वात् ॥ ३१० ॥

मं० प्र०——अर्थस्य व्यंजनस्य च मतिज्ञानविषयस्य द्वादश भेदा भवंति—बहुर्बहुविधः क्षिप्रः अनिसृतः अनुक्तः ध्रुवश्चेति षट् । तदितरे च एकः एक-विधः अक्षिप्रः निसृतः उक्तः अध्रुवश्चेति षट् । तत्र—तेषु बह्वादिषु विषयेषु एकैकस्मिन् विषये प्रागुक्ताष्टाविंशतिप्रकारे मतिज्ञाने जाते—उत्पन्ने सति म-तिज्ञानं तु—पुनः षट्त्रिंशदुत्तरत्रिशतभेदं भवति । तद्यथा—बहौ विषये अर्थात्मके पंचभ्य इंद्रियेभ्यः मनसश्च प्रत्येकमवग्रहेहावायधारणाख्या मतिज्ञानभेदा-श्चत्वारः, इतींद्रियानिंद्रियेभ्यः संपिंडिताश्चतुर्विंशतिरुत्पद्यंते । तथा व्यंजनात्मके बहौ विषये स्पर्शनरसनघ्राणश्रोत्राख्येंद्रियचतुष्कात् चत्वारोऽवग्रहा एव जायंते इति बहौ विषये मिलित्वा मतिज्ञानभेदाः अष्टाविंशतिर्भवंति । एवं बहुविधादिषु पंचसु तदितरेषु च षट्सु विषयेषु प्रत्येकमष्टाविंशतिमतिज्ञानभेदा जायंते इत्यष्टाविंशत्या द्वादशसु विषयभेदेषु गुणितेषु सर्वे मतिज्ञानभेदाः षट्त्रिंशदुत्तरात्रिशतीप्रमिता भवंति । ३३६ । यद्येकस्मिन् विषये प्र १, अष्टाविंश-तिमतिज्ञानभेदा भवंति फ २८ । तदा द्वादसु विषयेषु इ १२ कियंतो भवंतीति त्रैराशिकेन लब्धा मतिज्ञानभेदाः ॥ ३१० ॥

स० चं०—अर्थरूप वा व्यंजनरूप जो मतिज्ञानका विषय ताके बारह भेद हैं--बहु १ बहुविध १ क्षिप्र १ अ-निसृत १ अनुक्त १ ध्रुव १ ए छह बहुरि इतर जे छहौं इनके प्रतिपक्षी एक एकविध अक्षिप्र निसृत उक्त अध्रुव ए छह ऐसैं बारह भेद जानने सो व्यंजनावग्रहके च्यारि इंद्रियनिं करि च्यारि भेद भए अर अर्थके अवग्रह ईहा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अवाय धारणातैं पंच इंद्रिय छठा मन करि चौवीस भेद भए मिलाएं ते अठाईस भेद भए सो व्यंजन रूप बहु विषयका च्यारि इंद्रियनिकरि अवग्रह हो है सो च्यारि भेद तौ ए भए अर अर्थ रूप बहुविषयका पंच इंद्रिय छठा मनकरि गुणैं अवग्रह ईहा अवाय धारणा हो हैं तातैं चौवीस भए। ऐसैं एक बहुविषय संबंधी अठाईस भेद भए। ऐसैं ही बहुविध आदि भेदनिविषैं अठाईस अठाईस भेद हो हैं। सबकौं मिलाएं बारह विषयनिविषैं मतिज्ञान के तीनसै छत्तीस भेद हो हैं जो एक विषयविषैं अठाईस भेद होइ तौ बारह विषयनिविषैं केते होंहि ऐसैं त्रैराशिक कीएं लब्धराशिमात्र तीनसै छत्तीस मतिज्ञानके भेद हो हैं ॥ ३१० ॥

बहुवत्तिजादिगहणे बहुबहुविहमियरमियरगहणम्हि ।
सगणामादो सिद्धा खिप्पादी सेदरा य तहा ॥ ३११ ॥

बहुव्यक्तिजातिग्रहणे बहुबहुविधमितरदितरग्रहणे ।
स्वकनामतः सिद्धाः क्षिप्रादयः सेतराश्च तथा ॥ ३११ ॥

जी० प्र०—बहुव्यक्तीनां ग्रहणे मतिज्ञाने तद्विषयो बहुरित्युच्यते यथा खंडमुंडशवलादिवहुगोव्यक्तयः। बहुजातीनां ग्रहणे मतिज्ञाने तद्विषयो बहुविध इत्युच्यते यथा गोमहिषाश्वादिबहुजातयः इति। इतरग्रहणे एकव्यक्तिग्रहणे मतिज्ञाने तद्विषय एकः यथा खंडोयमिति । एकजातिग्रहणे मतिज्ञाने तद्विषय एकविधः यथा खंडो वा मुंडो वा गौरिति। क्षिप्रादयः क्षिप्रानिसृतानुक्तध्रुवाः स्वेतरे च अक्षिप्रनिसृतोक्ताध्रुवाश्च स्वस्वनामत एव सिद्धाः। तथाहि क्षिप्रः शीघ्रपतज्जलधाराप्रवाहादिः। अनिसृतः गूढः जलमग्नहस्त्यादिः। अनुक्तः-अकथितः अभिप्रायगतः । ध्रुवः स्थिरः चिरकालावस्थायी पर्वतादिः। अक्षिप्रः मंदं गच्छन्नश्वादिः। निसृतः व्यक्तनिष्क्रांतः जलनिर्गतहस्त्यादिः । उक्तः अयं घटः इति कथितो दृश्यमानः । अध्रुवः क्षणस्थायी विद्युदादिः। तथाचेतिशब्दौ समुच्चयार्थौ ॥ ३११ ॥

मं० प्र०—बहुव्यक्तीनां ग्रहणे मतिज्ञाने तद्विषयो बहुरित्युच्यते यथा खंडमुंडशवलादिवहुगोव्यक्तयः। बहुजातीनां ग्रहणे मतिज्ञाने तद्विषयो बहुविध इत्युच्यते यथा गोमहिषाश्वादयो बहुजातयः इति। इतरग्रहणे एकव्यक्तिग्रहणे मतिज्ञाने तद्विषय एकः यथा खंडोऽयमिति। एकजातिग्रहणे मतिज्ञाने तद्विषय एकविधः खंडो वा मुंडो गौरिति। क्षिप्रादयः क्षिप्रानिसृतानुक्तध्रुवाः स्वेतरे च अक्षिप्रनिसृतोक्तध्रुवाः स्वस्वनामत एव सिद्धाः। तथाहि–क्षिप्रः–

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शीघ्रपतज्जलधाराप्रवाहादिः । अनिसृतः--गूढः--जलमग्नहस्त्यादिः । अनुक्तः--अकथितः अभिप्रायगतः, ध्रुवः--स्थिरः चिरकालावस्थायी पर्वतादिः । अक्षिप्रः मंदं गच्छन्नश्वादिः । निसृतः--व्यक्तनिष्क्रांतः जलनिर्गतहस्त्यादिः । उक्तः--अयं घट इति कथितो दृश्यमानः, अध्रुवः क्षणस्थायी विद्युदादिः तथाचेति समुच्चयार्थौ ॥ ३११ ॥

स० चं०--जहां बहुत व्यक्तिका ग्रहणरूप मतिज्ञान होइ ताके विषयकौं बहु कहिए । बहुरि जहां बहुजातिका ग्रहणरूप मतिज्ञान होइ ताके विषयकौं बहुविध कहिए । बहुरि ऐसैं ही इतरका ग्रहणविषैं जहां एक व्यक्तिका ग्रहण रूप मतिज्ञान होइ ताके विषयकौं एक कहिए । बहुरि जहां एक जातिका ग्रहणरूप मतिज्ञान होइ ताके विषयकौं एकविध कहिए । इहां उदाहरण दिखाइए हैं जैसैं खाड़ी गऊ सावली गऊ मूड़ी गऊ इत्यादिक अनेक गऊनिकी व्यक्तिकौं बहु कहिए । बहुरि गऊ भैंस घोड़े इत्यादि अनेक जातिकौं बहुविध कहिए । बहुरि एक खाडी गऊ ऐसी गऊकी एक व्यक्तिकौं एक कहिए । बहुरि खाड़ी मूडी सावली गऊ है ऐसी एक जातिकौं एकविध कहिए । एक जातिविषैं अनेक व्यक्ति पाइए हैं । ऐसैं बारह भेदनिविषैं च्यारि तौ कहे । बहुरि अवशेष क्षिप्रादिक च्यारि अर इनिके प्रतिपक्षी च्यारि ते अपने नामहीतैं प्रसिद्ध हैं । सोही कहिए है--क्षिप्र शीघ्रकौं कहिए जैसैं शीघ्र पडती जल धारा वा जल प्रवाह । बहुरि अनिसृत गूढकौं कहिए जैसैं जलविषैं मगन हूवा हाथी । बहुरि अनुक्त विना कहेकौं कहिए जैसैं विनाही कहे किछू अभिप्रायहीतैं जाननेमें आवै । बहुरि ध्रुव अचलकौं वा बहुत काल स्थायीकौं कहिए जैसैं पर्वतादिक । बहुरि अक्षिप्र ढीलेकौं कहिए जैसैं मंद चालता घोटकादिक । बहुरि निसृत प्रगटकौं कहिए जैसैं जलतैं निकस्या हूवा हाथी । बहुरि उक्त कहेको कहिए जैसैं काहूनैं कह्या यहु घट है । बहुरि अध्रुव चंचल वा विनाशीककौं कहिए जैसैं क्षणस्थायी विजुरी आदि । ऐसैं बारह प्रकार मतिज्ञानके विषय हैं । भावार्थ--जाकौं जानिए यहु शीघ्र प्रवर्तै है सो क्षिप्र कहिए । बहुरि जाकौं जानिए यह गूढ है सो अनिसृत कहिए । बहुरि जाकौं विना कहैं जानिए सो अनुक्त कहिए । बहुरि जाकौं जानिए यहु ध्रुव है सो ध्रुव कहिए इत्यादिक मतिज्ञानके विषय हैं । इनिकौं मतिज्ञानकरि जानिए है ॥ ३११ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वत्थुस्स पदेसादो वत्थुग्गहणं तु वत्थुदेसं वा ।
सयलं वा अवलंबिय अणिस्सिदं अण्णवत्थुगई ॥ ३१२ ॥

वस्तुनः प्रदेशात् वस्तुग्रहणं तु वस्तुदेशं वा ।
सकलं वा अवलंब्य अनिसृतमन्यवस्तुगतिः ॥ ३१२ ॥

जी० प्र०—कस्यचिद्वस्तुनः, प्रदेशाद्-एकदेशाद् व्यक्तात् तदविनाभाविनोऽव्यक्तस्य वस्तुनो ग्रहणं अनिसृतज्ञानं । अथवा एकस्य वस्तुनः एकदेशं वा सकलं वस्तु वा अवलंब्य गृहीत्वा पुनरन्यस्य वस्तुनः गतिः—ज्ञानं यत्, तदप्यनिसृतज्ञानं भवति ॥ ३१२ ॥ तदुदाहरति—

मं० प्र०—कस्यचिद्वस्तुनः, प्रदेशात्—एकदेशात् व्यक्तात् तदविनाभाविनोऽव्यक्तस्य वस्तुनो ग्रहणमनिसृतज्ञानं । अथवा एकस्य वस्तुनः एकदेशं वा सकलवस्तु वा अवलंब्य—गृहीत्वा पुनरन्यस्य वस्तुनो गतिः—ज्ञानं यत्, तदप्यानिसृतज्ञानं भवति ॥ ३१२ ॥

स० चं०—किसी वस्तुका प्रदेश कहिए एकोदेश अंश प्रगट है तातैं जो वह एकोदेश अंश जिस वस्तु बिना न होइ असे अप्रगट वस्तुका ग्रहण कीजिए सो अनिःसृतज्ञान है अथवा एक किसी वस्तुका एकोदेश अंशकौं वा सर्वांग वस्तुहीकौं अवलंबिकरि ग्रहण करि अन्य कोई अप्रकट वस्तुका ग्रहण करना सो भी अनिःसृत ज्ञान है इनिके उदाहरण आगैं कहैं हैं ॥ ३१२ ॥

पुक्खरगहणे काले हत्थिस्स य वदणगवयगहणे वा ।
वत्थंतरचंदस्स य धेणुस्स य बोहणं च हवे ॥ ३१३ ॥

पुष्करग्रहणे काले हस्तिनश्च वदनगवयग्रहणे वा ।
वस्त्वंतरचंद्रस्य च धेनोश्च बोधनं च भवेत् ॥ ३१३ ॥

जी० प्र०—पुष्करस्य जलाद्बहिर्दृश्यमानस्य जलमग्नहस्तिकराग्रस्य ग्रहणकाले दर्शनकाले एव तदविनाभाविजलमग्नहस्तिग्रहणं जले ह-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्ती मग्नोऽस्तीति प्रतीतिः । वा इव यथा अनेन अस्मात् साध्याविनाभावनियमनिश्चयात् साधनात् साध्यस्य ज्ञानमनुमानमिति अनुमानप्रमाणं संगृहीतं भवति। अथवा कस्याश्चित् युवतेर्वदनग्रहणकाले वस्त्वंतरस्य चंद्रस्य ग्रहणं। मुखसादृश्याच्चंद्रस्य स्मरणं चंद्रसदृशं मुखमिति प्रत्यभिज्ञानं वा। अरण्ये गवयग्रहणकाले गवयदर्शनकाल एव धेनोर्बोधनं स्मरणं गोसदृशो गवय इति प्रत्यभिज्ञानं वा भवेत् । वा इव यथा अत्र इवार्थद्योतको वाशब्दः उदाहरणप्रदर्शने प्रयुक्तः अनंतरगाथोक्तानिसृतार्थज्ञानस्य एतावंत्युदाहरणानि। पक्षांतरसूचको वा । यथा महानसे अग्नौ सत्येव धूम उपपन्नो दृष्टः। ह्रदे अग्न्यभावे धूमोऽनुपपन्नो निश्चितः। तथा सर्वदेशकालसंबंधितया अग्निधूमयोरन्यथानुपपत्तिरूपस्य अविनाभावसंबंधस्य ज्ञानं तर्कः सोपि च मतिज्ञानं भवति । एवमनुमानस्मृतिप्रत्यभिज्ञानतर्काख्यानि चत्वारि मतिज्ञानानि अनिसृतार्थविषयाणि केवलपरोक्षाणि एकदेशतोऽपि वैशद्याभावात् । शेषाणि स्पर्शनादींद्रियानिंद्रियव्यापारप्रभवानि बह्वाद्यर्थविषयाणि मतिज्ञानानि सांव्यवहारिकप्रत्यक्षाणि एकदेशतो वैशद्यसंभवात् । प्रत्यक्षं विशदं ज्ञानमिति पूर्वाचार्यैः प्रत्यक्षलक्षणस्योक्तत्वात् । तानि सर्वाणि मतिज्ञानानि प्रमाणानि सम्यग्ज्ञानत्वात् । सम्यग्ज्ञानं प्रमाणं, इति प्रवचने (प्रोक्तत्वात्) प्रतिपादनात् ॥ ३१२ ॥

मं० प्र०--पुष्करस्य जलाद्बहिर्दृश्यमानस्य जलमग्नहस्तिकराग्रस्य ग्रहणकाले--दर्शनकाल एव तदविनाभाविजलमग्नहास्तिग्रहणं-जले हस्ती मग्नोऽस्तीति प्रतीतिः वा इव यथा अनेन साध्याविनाभावनियमनिश्चयतः साधनात्साध्यस्य विज्ञानमनुमानमित्यनुमानप्रमाणं संगृहीतं । अथवा कस्याश्चिद् युवतेः, वदनग्रहणे-काले एव वस्त्वंतरस्य चंद्रस्य ग्रहणं मुखसादृश्याच्चंद्रस्य स्मरणं चंद्रसदृशं मुखमिति प्रत्यभिज्ञानं, वा अरण्ये गवयग्रहणकाले एव धेनोर्बोधनं स्मरणं गोसदृशो गवय इति प्रत्यभिज्ञानं वा भवेत् वा-इव यथा । अत्र इवार्थद्योतको वाशब्दः उदाहरणप्रदर्शने प्रयुक्तः, अनंतरगाथोक्तानिसृतार्थज्ञानस्य एतान्युदाहरणानि । पक्षांतरसूचको वा । यथा महानसे अग्नौ सत्येव धूम उपपन्नो दृष्टः, ह्रदे अग्न्यभावे धूमोऽनुपपन्नो निश्चितः, तथा सर्वदेशकालसंबंधितया अग्निधूमयोरन्यथानुपपत्तिरूपस्याविनाभावसंबंधस्य ज्ञानं तर्काख्यं च मतिज्ञानं भवति । एवमनुमानस्मृतिप्रत्यभिज्ञानतर्काख्यानि चत्वारि मतिज्ञानानि अनिसृतविषयाणि केवलपरोक्षाणि एकदेशतोऽपि वैशद्याभावात् । शेषाणि स्पर्शनादींद्रियानिंद्रियव्यापारप्रभवानि मतिज्ञानानि बह्वादिविषयाणि सांव्यवहारिकप्रत्यक्षाणि एकदेशतो वैशद्यसंभवात्, प्रत्यक्षं विशदं ज्ञानमिति पूर्वाचार्यैः प्रत्यक्षलक्षणस्योक्तत्वात्। तानि सर्वाणि मतिज्ञानानि प्रमाणानि सम्यग्ज्ञानत्वात् । सम्यग्ज्ञानं प्रमाणमिति प्रवचने प्रोक्तत्वात् ॥ ३१३ ॥

स० चं०–पुष्कर कहिए जलतैं बाहिर प्रगट दीसती ऐसी जलविषैं डूब्या हूवा हस्तीकी सूंडि ताकौं जाननेतैं ऐसी प्रतीति हो है कि इस जलविषैं हस्ती मगन है जातैं हस्ती बिना सूंडि न हो है। जिस बिना जो न होइ ताकौं तिसका साधन कहिए जैसैं अग्नि बिना धूम नाहीं तातैं अग्नि साध्य है धूम साधन है। सो साधनतैं साध्यका जानना सो अनुमान प्रमाण है। इहां सूंडि साधन, हस्ती साध्य है। सूंडितैं हस्तीका ज्ञान भया तातैं इहां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुमान प्रमाण आया। बहुरि किसी स्त्रीका मुख देखा सो मुखका ग्रहण समयविषैं चंद्रमाका स्मरण भया आगैं चंद्रमा देख्या था स्त्रीके मुखकी अर चंद्रमाकी सदृशता है सो स्त्रीका मुख देखिनैही चंद्रमा यादि आया सो चंद्रमा तिस काल विषैं प्रकट न था ताका ज्ञान भया सो यहु स्मृति प्रमाण है। अथवा चंद्रमासमान स्त्रीका मुख है सो स्त्रीका मुख देखतैं चंद्रमाका ज्ञान भया तातैं याकौं प्रत्यभिज्ञान प्रमाण भी कहिये। ऐसैं ही वनविषैं गवय नामा तिर्यंच- कौं देख्या तहां ऐसा यादि आया कि गऊके सदृश गवय होहै तातैं यहु स्मृति प्रमाण है अथवा गऊ समान गवय हो है सो गऊका ज्ञान गवयकौं देखते ही भया तातैं याकौं प्रत्यभिज्ञान भी कहिए। वा कहिए जैसैं ए उ- दाहरण कहे तैसैं और भी जानने। जैसैं रसोईविषैं अग्नि होते संतै धूवा हो है अर द्रहविषैं अग्नि नाही तातैं धूवां भी नाहीं तातैं सर्व देश कालविषैं अग्नि अर धूवांकैं अन्यथा अनुपपत्ति भाव है। अन्यथा कहिए अग्नि न होइ तौ अनुपपत्ति कहिए धूवां भी न होइ सो ऐसा अन्यथा अनुपपत्तिका ज्ञान सो तर्क नामा प्रमाण भी मतिज्ञान है। या प्रकार अनुमान स्मृति प्रत्यभिज्ञान तर्क ए च्यार्यो परोक्ष प्रमाण अनिःसृत है विषय जाका ऐसा मतिज्ञानके भेद जानने। पांचवां आगम नामा परोक्ष प्रमाण श्रुतज्ञानका भेद जानना। एकोदेशपनैं भी विशदता स्पष्टता इनिके जाननेविषैं नाहीं तातैं इनिकौं परोक्ष प्रमाण कहे और इनके बिना जो पांच इंद्रियनिकरि बहु बहुविध आदि जानिए है ते सांव्यवहारिक प्रत्यक्ष जानने जातैं इनिके जाननेमें एकोदेश विशदता निर्मलता स्पष्टता पाइए है व्यवहारविषैं भी ऐसैं कहिए है जो मैं नेत्रनिस्यौं प्रत्यक्ष देख्या बहुरि इस मतिज्ञान विषैं पारमार्थिक प्रत्यक्षपना है नाहीं जातैं अपने विषयकौं तारतम्य रूप संपूर्ण स्पष्ट न जानैं। पूर्वै आचार्यनिकरि प्रत्यक्षका ल- क्षण विशद वा स्पष्ट ही कह्या है ऐसैं ए सर्व मतिज्ञानके भेद जानने ते भेद प्रमाण हैं जातैं ए सर्व सम्यग्ज्ञान हैं बहुरि "सम्यग्ज्ञानं प्रमाणं" ऐसा सिद्धांतविषैं कह्या है॥ ३१३॥

एक्कचउक्कं चउवीसट्ठावीसं च तिप्पडिं किच्चा।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इगिछव्वारसगुणिदे मदिणाणे होंति ठाणाणि ॥ ३१४ ॥

एकचतुष्कं चतुर्विंशत्यष्टाविंशतिश्च त्रिःप्रतिं कृत्वा ।
एकषड्द्वादशगुणिते मतिज्ञाने भवंति स्थानानि ॥ ३१४ ॥

जी०प्र०—मतिज्ञानं सामान्येन एकं १ । अवग्रहेहावायधारणापेक्षया चत्वारि ४ । इंद्रियानिंद्रियजनितार्थावग्रहेहावायधारणापेक्षया चतुर्विंशतिः २४ । अर्थव्यंजनोभयावग्रहापेक्षया अष्टाविंशतिः २८ । एतानि चत्वारि स्थानानि त्रिःप्रतिकानि—

२८ । १	२८ । ६	२८ । १२
२४ । १	२४ । ६	२४ । १२
४ । १	४ । ६	४ । १२
१ । १	१ । ६	१ । १२

कृत्वा यथाक्रमं प्रथमं स्थानचतुष्टयं विषयसामान्येनैकेन गुणयेत्। द्वितीयं स्थानचतुष्टयं बह्वादिविषयषट्केन गुणयेत्। तृतीयं स्थानचतुष्टयं बह्वादिभिर्द्वादशविषयैर्गुणयेत् । एवं गुणिते सति मतिज्ञाने सामान्यविषयार्धविषयसर्वविषयापेक्षया स्थानानि भवंति ॥ ३१४ ॥ अथ श्रुतज्ञानप्ररूपणां प्रारभमाणः प्रथमस्तावत्तत्सामान्यलक्षणमाह—

मं० प्र०—मतिज्ञानसामान्यापेक्षया एकोंकः । १ । अवग्रहेहावायधारणापेक्षया चतुरंकः । इंद्रियानिंद्रियजनितार्थावग्रहेहावायधारणापेक्षया चतुर्विंशत्यंकः । अर्थव्यंजनोभयावग्रहाद्यपेक्षया अष्टाविंशत्यंकः । २८ । एवं चत्वरि स्थानानि त्रिःप्रतिकं कृत्वा यथाक्रमं प्रथमं स्थानचतुष्टयं विषयसामान्येनैकेन गुणयेत्, द्वितीयं स्थानचतुष्टयं बह्वादिविषयषट्केन गुणयेत् । तृतीयं स्थानचतुष्टयं बह्वादिभिर्विषयैः द्वादशभिर्गुणयेत् एवं गुणिते सति मतिज्ञाने विषयसामान्यार्धविषयसर्वविषयापेक्षाणि स्थानानि भवंति ॥ ३३४ ॥ अथ श्रुतज्ञानप्ररूपणां प्रारभमाणस्तावत्तत्सामान्यलक्षणमाह—

स० चं०—मतिज्ञान सामान्य अपेक्षा करि तौ एक है अर अवग्रह ईहा अवाय धारणाकी अपेक्षा च्यारि है बहुरि पांच इंद्रिय छठा मनकरि अर अवग्रह ईहा अवाय धारणाकी अपेक्षा चौबीस है। बहुरि व्यंजन अर अर्थका भेद कीएं अठाईस है सो एक च्यारि चौबीस अठाईस १ । ४ । २४ । २८ । ज्ञान च्यार्‍योंको जुदे जुदे तीन जायगा माडिए। तहां एक जायगा तौ सामान्यपनें अपने अपने विषयकौं जानैं हैं असा विषय संबंधी एक भेद

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

करि गुणिए तब तो एक च्यारि चौबीस अठाईसभेद भए। बहुरि दूसरी जायगा बहु बहुविध क्षिप्र अनिःसृत अनुक्त ध्रुव ए छह प्रकार विषयके भेद करि गुणिए तब छह ६ चौबीस २४ के एकसौ चवालीस १४४ एकसौ अडसठि १६८ अैसैं मतिज्ञानके विषय भेदनिकी अपेक्षा भेद भए। बहुरि तीसरी जायगा उनके प्रतिपक्षी सहित वारह विषय भेदनिकरि गुणिए तहां बारह १२ अडतालीस ४८ दोयसै अठ्यासी २८८ तीनसै छत्तीस ३३६ सर्व विषय भेदनिकी अपेक्षा मतिज्ञानके भेद भए। अैसैं विवक्षा भेदकरि मतिज्ञानक स्थान दिखाए॥३१४॥ आगैं श्रुतज्ञानकी प्ररूपणाका आरंभ करता संता प्रथमही श्रुतज्ञानका सामान्य लक्षण कहै हैं—

अत्थादो अत्थंतरमुवलंभंतं भणंति सुदणाणं।
आभिणिबोहियपुव्वं णियमेणिह सद्दजं पमुहं॥ ३१५॥

अर्थादर्थांतरमुपलभमानं भणंति श्रुतज्ञानं।
आभिनिबोधिकपूर्वं नियमेनेह शब्दजं प्रमुखं॥ ३१५॥

जी० प्र०—मतिज्ञानेन निश्चितमर्थमवलंब्य अर्थांतरं तत्संबद्धमन्यार्थमुपलभ्यमानं--अवबुध्यमानं श्रुतज्ञानावरणवीर्यांतरायक्षयोपशमोत्पन्नं जीवस्य ज्ञानपर्यायं श्रुतज्ञानमिति मुनीश्वरा भणंति। तत्कथं भवेत्? आभिनिबोधिकपूर्वं--नियमेन आभिनिबोधिकं मतिज्ञानं पूर्वं कारणं यस्य तत् तथोक्तं आभिनिबोधिकपूर्वं, मतिज्ञानावरणक्षयोपशमेन मतिज्ञानमेव पूर्वं प्रथममुत्पद्यते पुनः--पश्चात् तद्गृहीतार्थमवलंब्य तद्बलादर्थांतरविषयं श्रुतज्ञानमुत्पद्यते नान्यप्रकारेणेति नियमशब्देन मतिज्ञानप्रवृत्त्यभावे श्रुतज्ञानाभाव इत्यवधार्यते। इह—अस्मिन् श्रुतज्ञानप्रकरणे अक्षरानक्षरात्मकयोः शब्दजलिंगजयोः श्रुतज्ञानभेदयोः मध्ये शब्दजं-वर्णपदवाक्यात्मकशब्दजनितं श्रुतज्ञानं प्रमुखं प्रधानं दत्तग्रहणशास्त्राध्ययनादिसकलव्यवहाराणां तन्मूलत्वात्। अनक्षरात्मकं तु लिंगजं श्रुतज्ञानं एकेंद्रियादिपंचेंद्रियपर्यंतेषु जीवेषु विद्यमानमपि व्यवहारानुपयोगित्वादप्रधानं भवति। श्रूयते-श्रोत्रेंद्रियेण गृह्यते इति श्रुतः शब्दः, तस्मादुत्पन्नमर्थज्ञानं श्रुतज्ञानमिति व्युत्पत्त्यापि अक्षरात्मकप्राधान्याश्रयणात्। अथ वा श्रुतमिति रूढिशब्दोयं मतिज्ञानपूर्वकस्य अर्थांतरज्ञानस्य प्रतिपादकः परमागमे रूढः। यथाकथंचिन्निरुक्तिसंभवः रूढिशब्दे अजहत्स्वार्थवृत्तिके कुशं लातीति कुशल इति कुशलादिशब्देषु निपुणाद्यर्थेषु रूढेषु तन्निरुक्तिवत्। तत्र जीवोऽस्तीत्युक्ते जीवोऽस्तीति शब्दज्ञानं श्रोत्रेंद्रियप्रभवं मतिज्ञानं भवति। ज्ञानेन ६७३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जीवोऽस्तीति शब्दवाच्यरूपे आत्मास्तित्वे वाच्यवाचकसंबंधसंकेतसंकलनपूर्वकं यत् ज्ञानमुत्पद्यते तदक्षरात्मकं श्रुतज्ञानं भवति, अक्षरात्मकशब्दसमुत्पन्नत्वेन कार्ये कारणोपचारात्। वातशीतस्पर्शज्ञानेन वातप्रकृतिकस्य तत्स्पर्शे अमनोज्ञज्ञानमक्षरात्मकं लिंगजं श्रुतज्ञानं भवति, शब्दपूर्वकत्वाभावात् ॥ ३१५ ॥ अथ श्रुतज्ञानस्य अक्षरानक्षरात्मकभेदौ प्ररूपयति—

मं० प्र०—मतिज्ञानेन निश्चितादर्थात् तमर्थमालंब्य, अर्थांतरं--तत्संबद्धमन्यमर्थमुपलभमानं--अवबुध्यमानं श्रुतज्ञानावरणवीर्यांतरायक्षयोपशमोत्पन्नं जीवस्य ज्ञानपर्यायं श्रुतज्ञानमिति मुनीश्वरा भणंति। तत्कीदृशं ? आभिनिबोधिकपूर्वं नियमेन--आभिनिबोधिकं--मतिज्ञानं पूर्वं--कारणं, यस्य तत्तथोक्तं। मतिज्ञानावरणक्षयोपशमात् मतिज्ञानमेव प्रथममुत्पद्यते। पुनस्तद्गृहीतार्थमवलंब्य तद्बलादर्थांतरविषयं श्रुतज्ञानमुत्पद्यते नान्यथेति नियमशब्देन मतिज्ञानप्रवृत्त्यभावे श्रुतज्ञानाभाव इत्यवधार्यते। इह-श्रुतज्ञानप्रकरणे, अक्षरानक्षरात्मकयोः श्रुतज्ञानभेदयोः, शब्दजं--वर्णपदवाक्यात्मकशब्दप्रभवं श्रुतज्ञानं प्रमुखं--प्रधानं दत्तग्रहशास्त्राध्ययनादिसकलव्यवहाराणां तन्मूलत्वात्। अनक्षरात्मकं तु श्रुतज्ञानं एकेंद्रियादिपंचेंद्रियपर्यंतजीवेषु विद्यमानमपि व्यवहारानुपयोगात् अप्रधानं। श्रूयते--श्रोत्रेंद्रियेण गृह्यते इति श्रुतः शब्दः, तस्मादुत्पन्नमर्थज्ञानं श्रुतज्ञानमिति व्युत्पत्तेरप्यक्षरात्मकप्राधान्याश्रयात्। अथवा श्रुतमिति रूढिशब्दोयं मतिज्ञानपूर्वस्यार्थोत्तरज्ञानस्य प्रतिपादकः परमागमे रूढः। यथा कथंचिन्निरुक्तिसंभवः रूढिशब्दे अजहत्स्वार्थवृत्तिके कुशं लातीति कुशल इति कुशलादिशब्देषु निपुणाद्यर्थेषु रूढेषु तन्निरुक्तिवत्। तत्र जीवोऽस्तीत्युक्ते जीवोऽस्तीति शब्दज्ञानं श्रोत्रेंद्रियप्रभवं मतिज्ञानं। तस्माज्जीवोऽस्तीति शब्दवाच्ये आत्मास्तित्वे वाच्यवाचकसंबंधसंकेतसंकलनपूर्वकं यत् ज्ञानमुत्पद्यते तदक्षरात्मकश्रुतज्ञानं, अक्षरात्मकाच्छब्दादुत्पन्नत्वात्। कार्ये कारणोपचारात्। वातशीतस्पर्शज्ञानात् वातप्रकृतेस्तत्स्पर्शे अमनोज्ञज्ञानमनक्षरात्मकं श्रुतं शब्दपूर्वकत्वाभावात् ॥ ३१५ ॥ अथ श्रुतज्ञानस्य अक्षरानक्षरात्मकभेदौ प्ररूपयति—

स० चं०—मतिज्ञानकरि निश्चय कीया जो पदार्थ तिसकौं अवलंबि करि तिसही पदार्थके संबंधकौं लीएं अन्य कोई पदार्थ, ताकौं जो जानैं सो श्रुतज्ञान है सो श्रुतज्ञानावरण वीर्यांतराय कर्मके क्षयोपशमतैं उपजै है ऐसैं मुनीश्वर कहै हैं। कैसा है श्रुतज्ञान ? आभिनिबोधिक जो मतिज्ञान सो है पहिलैं जाके, पहिलैं मतिज्ञानावरणके क्षयोपशमतैं मतिज्ञान होइ पीछैं मतिज्ञानकरि जो पदार्थ जान्या ताका अवलंबनकरि अन्य कोई पदार्थका जानना होइ सोई श्रुतज्ञान है। ऐसा नियम जानना—पहिलैं मतिज्ञान भएं बिना सर्वथा श्रुतज्ञान न होइ। तीहि श्रुतज्ञानके दोय भेद हैं एक अक्षरात्मक। एक अनक्षरात्मक, इनिविषैं शब्दजं कहिए अक्षर पद छंदादिरूप शब्दतैं उत्पन्न भया जो अक्षरात्मक श्रुतज्ञान सो प्रमुख कहिए मुख्य प्रधान है जातैं देना लेना शास्त्र पढना इत्यादिक सर्व व्यवहारनिका मूल अक्षरात्मक श्रुतज्ञान है। बहुरि लिंग जो चिह्न तातैं उत्पन्न भया ऐसा अनक्षरात्मक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रुतज्ञान सो एकेंद्रियतैं लगाइ पंचेंद्रिय पर्यंत सर्व जीवनिकैं है तथापि यातैं किछू व्यवहार प्रवृत्ति नाहीं तातैं प्रधान नाहीं। बहुरि 'श्रूयते इति श्रुतः शब्दः तदुत्पन्नमर्थज्ञानं श्रुतं' सुणिए ताकौं शब्द कहिए, शब्दतैं भया जो अर्थज्ञान ताकौं श्रुतज्ञान कहिए इस भी अर्थविषैं अक्षरात्मक श्रुतज्ञान ही प्रधान आया अथवा श्रुत असा रूढि शब्द है सो मतिज्ञानपूर्वक अर्थांतरका जानने रूप ज्ञानका विशेष, तींहिं अर्थविषैं प्रवर्तै है जैसैं कुशल शब्दका अर्थ तौ यहु जो कुश कहिए डाभ ताकौं लाति कहिये दे सो कुशल परंतु रूढितैं प्रवीण पुरुषका नाम कुशल है तैसैं यहु श्रुतशब्द जानना। तहां 'जीवः अस्ति' असा शब्द कह्या तहां कर्णरूप इंद्रिय मतिज्ञानकरि जीवः अस्ति असे शब्दकौं ग्रह्या। बहुरि तींहिं ज्ञानकरि 'जीवनामा पदार्थ है' असा जो ज्ञान भया सो श्रुतज्ञान है शब्द अर अर्थके वाच्य वाचक संबंध है। अर्थ वाच्य है शब्द वाचक है। अर्थ है सो उस शब्दकरि कहने योग्य है, शब्द उस अर्थका कहन हारा है असा जो ज्ञान भया सो श्रुतज्ञान है। सो इहां 'जीवः आस्ति' असैं शब्दका जानना तौ मतिज्ञान है अर उसके निमित्ततैं जीव नामा पदार्थका अस्तित्व जानना सो श्रुतज्ञान है। असैं ही सर्व अक्षरात्मक श्रुतज्ञानका स्वरूप जानना। अक्षरात्मक जो शब्द तातैं उत्पन्न भया जो ज्ञान ताकौं भी अक्षरात्मक कह्या। इहां कार्यविषैं कारणका उपचार कीया है परमार्थतैं ज्ञान कोई अक्षररूप है नाहीं। बहुरि जैसैं शीतल पवनका स्पर्श भया तहां शीतल पवनका जानना तौ मतिज्ञान है बहुरि तिसका ज्ञानकरि वायुकी प्रकृति वालेकौं यहु शीतल पवन अनिष्ट है असा जानना सो श्रुतज्ञान है सो यहु अनक्षरात्मक श्रुतज्ञान है। अक्षरके निमित्ततैं भया नाहीं। असैं ही सर्व अनक्षरात्मक श्रुतज्ञानका स्वरूप जानना ॥३१५॥ आगैं श्रुतज्ञानके अक्षरात्मक अनक्षरात्मक भेदनिकौं दिखावैं हैं—

लोगाणमसंखमिदा अणक्खरप्पे हवंति छट्ठाणा।
वेरूवछट्ठवग्गपमाणं रूऊणमक्खरगं ॥ ३१६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोकानामसंख्यमितानि अनक्षरात्मके भवंति षट्स्थानानि।
द्विरूपषष्ठवर्गप्रमाणं रूपोनमक्षरगं॥ ३१६॥

जी० प्र०—श्रुतज्ञानस्य अनक्षरात्मकाक्षरात्मकौ द्वौ भेदौ, तत्र अनक्षरात्मके श्रुतज्ञाने पर्यायपर्यायसमासलक्षणे सर्वजघन्यज्ञानमादिं कृत्वा स्वोत्कृष्टपर्यंतं असंख्येयलोकमात्रा ज्ञानविकल्पा भवंति। ते च असंख्येयलोकमात्रवारषट्स्थानवृद्ध्या संवर्धिता भवंति। अक्षरात्मकं श्रुतज्ञानं द्विरूपवर्गधारोत्पन्नषष्ठवर्गस्य एकट्ठनाम्नो यावंति रूपाणि एकरूपोनानि संति तावंति अक्षराणि अपुनरुक्ताक्षराण्याश्रित्य संख्यातविकल्पं भवति। विवक्षितार्थाभिव्यक्तिनिमित्तं पुनरुक्ताक्षरग्रहणे ततोधिकप्रमाणं भवतीत्यर्थः॥ ३१६॥ अथ श्रुतज्ञानस्य प्रकारांतरेण भेदान् गाथाद्वयेनाह—

मं० प्र०—अनक्षरात्मके श्रुतभेदे—पर्यायपर्यायसमासलक्षणे सर्वजघन्यज्ञानादारभ्य स्वोत्कृष्टपर्यंतमसंख्यातलोकमात्रा ज्ञानविकल्पा भवंति। ते च असंख्येयलोकमात्रवारषट्स्थानवृद्ध्या संवृद्धाः। अक्षरात्मकं श्रुतज्ञानं द्विरूपवर्गधारोत्पन्नषष्ठवर्गस्य एकट्ठनाम्नो यावंति रूपाणि एकरूपहीनानि संति तावदपुनरुक्ताक्षराण्याश्रित्य संख्यातविकल्पं भवति। विवक्षितार्थाभिव्यक्तिनिमित्तपुनरुक्ताक्षरग्रहणे ततोऽधिकप्रमाणमपि भवतीत्यर्थः॥ ३१६॥ अथ श्रुतज्ञानस्य प्रकारांतरेण भेदप्ररूपणार्थं गाथाद्वयमाह—

स० चं०—अनक्षरात्मक श्रुतज्ञानके भेद पर्याय अर पर्यायसमास, तीहिं विषैं जघन्यसौं लगाइ उत्कृष्ट पर्यंत असंख्यातलोक प्रमाण ज्ञानके भेद हो हैं ते भेद असंख्यात लोक बार षट्स्थानपतित वृद्धिकौं लीए हैं। बहुरि अक्षरात्मक श्रुतज्ञान है सो द्विरूप वर्गधाराविषैं जो एकट्ठी नामा छठा स्थानक कह्या तामैं एक घटाएं जो प्रमाण रहै तितने अपुनरुक्त अक्षर हैं तिनकी अपेक्षा संख्यात भेद लीएं है। विवक्षित अर्थकौं प्रकट करने निमित्त बार बार जिन अक्षरनिकौं कहिए ऐसे पुनरुक्त अक्षरनिका प्रमाण अधिक संभवै है सो कथन आगैं होइगा ॥३१६॥ आगैं श्रुतज्ञानका अन्य प्रकार करि भेद कहनेके निमित्त दोय गाथा कहैं हैं—

पज्जायक्खरपदसंघादं पडिवत्तियाणिजोगं च।
दुगवारपाहुडं च य पाहुडयं वत्थुपुव्वं च॥ ३१७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेसिं च समासेहि य वीसविहं वा हु होदि सुदणाणं।
आवरणस्स वि भेदा तत्तियमेत्ता हवंतित्ति ॥ ३१८ ॥

पर्यायाक्षरपदसंघातं प्रतिपत्तिकानुयोगं च।
द्विकवारप्राभृतं च च प्राभृनकं वस्तु पूर्वं च ॥ ३१७ ॥
तेषां च समासैश्च विंशविधं वा हि भवति श्रुतज्ञानं।
आवरणस्यापि भेदाः तावन्मात्रा भवंति इति ॥ ३१८ ॥

जी० प्र०—वा–अथवा, पर्यायाक्षरपदसंघातं पर्यायश्च अक्षरं च पदं च संघातश्चेति द्वंद्वैकत्वं। प्रतिपत्तिकानुयोगं–प्रतिपत्तिकश्च अनुयोगश्चेति द्वंद्वैकत्वं। द्विकवारप्राभृतकं च प्राभृतकप्राभृतकमित्यर्थः। प्राभृतकं च वस्तु च पूर्वं च इति दशभेदा भवंति। तेषां पूर्वोक्तानां पर्यायादीनां दशभिः समासैः मिलित्वा श्रुतज्ञानं विंशतिविधं भवति। अत्राक्षरादिविषयार्थज्ञानस्य भावश्रुतस्य विवक्षितत्वेन तेषां विंशतिविधत्वनियमे हेतुमाह–श्रुतज्ञानावरणस्य भेदा अपि तावन्मात्रा एव विंशतिविधा एव भवंति, इति इतिशब्दस्य हेत्वर्थवृत्तिसिद्धेः। तद्यथा–पर्यायः पर्यायसमासश्च, अक्षरं, अक्षरसमासश्च, पदं, पदसमासश्च, संघातः, संघातसमासश्च, प्रतिपत्तिकः, प्रतिपत्तिकसमासश्च, अनुयोगः, अनुयोगसमासश्च, प्राभृतकप्राभृतकं, प्राभृतकप्राभृतकसमासश्च, प्राभृतकं, प्राभृतकसमासश्च, वस्तु वस्तुसमासश्च, पूर्वं, पूर्वसमासश्चेति तदालापक्रमो भवति ॥ ३१७–३१८ ॥ अथ पर्यायनाम्नः प्रथमश्रुतज्ञानस्य स्वरूपं गाथाचतुष्टयेनाह—

मं० प्र०—वा- अथवा पर्यायाक्षरपदसंघातं–पर्यायश्च अक्षरं च पदं च संघातश्चेति द्वंद्वैकत्वं। प्रतिपत्तिकश्च अनुयोगश्च प्रतिपत्तिकानुयोगं, अत्रापि तथा। चशब्दः समुच्चयार्थः। द्विकवारप्राभृतं च प्राभृतकप्राभृतकमित्यर्थः। चशब्दः समुच्चयार्थः। द्वितीयश्चशब्दः छंदःपूरणार्थः। तदभावपाठे वा। प्राभृतकं वस्तु पूर्वं च। चशब्दः समुच्चयार्थः। इति दशभेदाः ॥ ३१७ ॥

मं० प्र०—तेषां पूर्वोक्तानां पर्यायादीनां दशभिः समासैः सह श्रुतज्ञानं विंशतिविधं भवति। अत्राक्षरादिविषयार्थज्ञानस्य भावश्रुतस्य विवक्षितत्वात्। तेषां विंशतिविधत्वनियमे हेतुमाह–श्रुतज्ञानावरणस्य भेदा अपि तावन्मात्रा एव–विंशतिविधा एव भवंति, इति–हेतोः, इतिशब्दस्य हेत्वर्थवृत्तेः प्रसिद्धत्वात्। तद्यथा–पर्यायः पर्यायसमासश्च, अक्षरं अक्षरसमासश्च, पदं पदसमासश्च, संघातः संघातसमासश्च, प्रतिपत्तिकः, प्रतिपत्तिकसमासश्च, अनुयोगः अनुयोगसमासश्च, प्राभृतकप्राभृतकं प्राभृतकप्राभृतकसमासश्च, प्राभृतकं प्राभृतकसमासश्च, वस्तु वस्तुसमासश्च, पूर्वं पूर्वसमासश्चेति तदालापक्रमोयं ॥ ३१८ ॥ अथ पर्यायनाम्नः प्रथमश्रुतज्ञानभेदस्य स्वरूपप्ररूपणार्थं गाथाचतुष्टयमाह—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०–पर्याय १ अक्षर २ पद ३ संघात ४ प्रतिपत्तिक ५ अनुयोग ६ प्राभृत प्राभृत ७ प्राभृत ८ वस्तु ९ पूर्व १० दश तौ ए कहे ॥ ३१७ ॥

स० चं०–ते पर्याय आदिक दश भेद कहे तिनके समासनिकरि दश भेद भए मिलिकरि श्रुतज्ञानके बीस भेद भए। ते कहिए है–पर्याय १ पर्याय समास २ अक्षर ३ अक्षरसमास ४ पद ५ पदसमास ६ संघात ७ संघात समास ८ प्रतिपत्तिक ९ प्रतिपत्तिक समास १० अनुयोग ११ अनुयोग समास १२ प्राभृतक प्राभृतक १३ प्राभृतक प्राभृतक समास १४ प्राभृत १५ प्राभृत समास १६ वस्तु १७ वस्तु समास १८ पूर्व १९ पूर्वसमास २० ऐसैं बीस भेद हैं। इहां अक्षरादि गोचर जो अर्थ ताके जाननेरूप जो भाव श्रुतज्ञान ताकी मुख्यता जाननी। बहुरि जातैं श्रुतज्ञानावरणके भी तितने ही बीस भेद हैं तातैं श्रुतज्ञानके भी बीस भेद ही कहे हैं ॥३१८॥ आगैं पर्याय नामा प्रथम श्रुतज्ञानका भेद ताका निरूपणके अर्थि च्यारि गाथा कहैं हैं–

णवरि विसेसं जाणे सुहमजहण्णं तु पज्जयं णाणं।
पज्जायावरणं पुण तदणंतरणाणभेदम्हि ॥ ३१९ ॥

नवरि विशेषं जानीहि सूक्ष्मजघन्यं तु पर्यायं ज्ञानं।
पर्यायावरणं पुनः तदनंतरज्ञानभेदे ॥ ३१९ ॥

जी० प्र०—नवीनं विशेषं जानीहि, सः कः ? पर्यायज्ञानं–पर्यायाख्यं प्रथमं श्रुतज्ञानं, तु–पुनः, सूक्ष्मनिगोदलब्ध्यपर्याप्तकस्य संबंधि सर्वजघन्यं श्रुतज्ञानं भवति। पुनः–पश्चात् पर्यायज्ञानस्य आवरणं तदनंतरज्ञानभेदे अनंतभागवृद्धियुक्ते पर्यायसमासज्ञानप्रथमभेदे भवति, तद्यथा–उदयागतपर्यायज्ञानावरणसमयप्रबद्धोदयनिषेकस्यानुभागानां सर्वघातिस्पर्धकानामुदयाभावलक्षणः क्षयः, तेषामेव सदवस्थालक्षण उपशमः, देशघातिस्पर्धकानामुदये सति तदावरणोदयेन पर्यायसमासप्रथमज्ञानमेव आव्रियते न तु पर्यायज्ञानं। तदावरणे जीवगुणस्य ज्ञानस्याभावे गुणिनो जीवस्याप्यभावप्रसंगात्। अनुभागरचनायां विन्यस्ते सिद्धानंतैकभागमात्रे द्रव्यानुभागक्रमहानिवृद्धियुक्ते नानागुणहानिस्पर्धकवर्गणा- ६७८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्मके श्रुतज्ञानावरणद्रव्ये सर्वतःस्तोकस्य सर्वपश्चिममक्षीणोदयानुभागसर्वघातिस्पर्धकद्रव्यस्यैव पर्यायज्ञानावरणत्वात् । तावतः आवरणद्रव्यस्य सर्वकालेऽप्युदयाभावात् ॥ ३१९ ॥

सं० प्र०—पर्यायज्ञानं-पर्यायाख्यं प्रथमं श्रुतज्ञानं तु-पुनः, सूक्ष्मनिगोदलब्ध्यपर्याप्तकस्य संबंधि सर्वजघन्यं श्रुतज्ञानं भवति । पुनः पर्यायज्ञानस्यावरणं तदनंतरज्ञानभेदे अनंतभागवृद्धियुक्ते पर्यायसमासज्ञानप्रथमभेदे भवति । तद्यथा—उदयागतपर्यायज्ञानावरणसमयप्रबद्धस्योदयनिषेकस्यानुभागानां सर्वघातिस्पर्धकानां उदयाभावः क्षयः, तेषामेव सदवस्था उपशमः, देशघातिस्पर्धकानामुदये सति तेन पर्यायसमासप्रथमज्ञानमेवाव्रियते, न तु पर्यायज्ञानं, तदावरणे ज्ञानस्य जीवगुणस्याभावे गुणिनो जीवस्याप्यभावप्रसंगात् । अनुभागरचनायां विन्यस्ते सिद्धानंतैकभागमात्रद्रव्यानुभागक्रमहानिवृद्धियुक्ते नानागुणहानिस्पर्धकवर्गणात्मके श्रुतज्ञानावरणद्रव्ये सर्वतः स्तोकस्य सर्वपश्चिमप्रक्षीणोदयानुभागसर्वघातिस्पर्धकद्रव्यस्यैव पर्यायज्ञानावरणत्वात् तावदावरणद्रव्यस्य सर्वकालेप्युदयाभावात् ॥ ३१९ ॥

स० चं०--यहु नवीन विशेष जानहु जो पर्याय नामा प्रथम श्रुतज्ञानका भेद सो सूक्ष्म निगोदिया लब्धि अपर्याप्त संबंधी सर्वतैं जघन्य श्रुतज्ञान जानना । बहुरि पर्याय श्रुतज्ञानका आवरण सो पर्याय श्रुतज्ञानकौं नाहीं आवरै है । वाके अनंतरि जो पर्याय ज्ञानतैं अनंत भागवृद्धि लीएं पर्यायसमास ज्ञानका प्रथम भेद तीहिं विषै पर्याय ज्ञानका आवरण है जातैं उदय आया जो पर्याय ज्ञान आवरणके समय प्रबद्धका उदयरूप निषेक ताकैं सर्वघाती स्पर्धकनिका उदय नाहीं सो क्षय है अर तेई सर्वघाती स्पर्धक जे अगिले निषेकसंबंधी सत्तामें तिष्ठै हैं तिनिका उपशम है अर देशघाती स्पर्धकनिका उदय है सो असा पर्याय ज्ञानावरणका क्षयोपशम सदा पाइए तातैं पर्याय ज्ञानका आवरणकरि पर्याय ज्ञान आवरै नाहीं । पर्यायसमासज्ञानका प्रथमभेद ही आवरै है । जो पर्याय ज्ञान भी आवरै तौ ज्ञानका अभाव होइ, ज्ञान गुणका अभाव भए गुणी जीव द्रव्यका भी अभाव होइ, सो असैं होइ नाही तातैं पर्यायज्ञान निरावरण ही है । अनुभाग रचनाविषैं भी स्थापित कीया जो सिद्धराशिका अनंतवां भागमात्र श्रुतज्ञानावरणका द्रव्य जो परमाणूनिका समूह सो द्रव्यके अनुभागकी क्रमतैं हानि वृद्धि करि संयुक्त है बहुरि नानागुणहानि स्पर्धक वर्गणारूप भेद लीएं हैं तिस द्रव्यविषैं सर्वतैं थोरा उदय रूप अनुभाग जाका क्षीण भया असा जो सर्वघाती स्पर्धक तिसहीकौं पर्याय ज्ञानका आवरण कह्या है तितने आवरणका सदा काल उदय न होइ तातैं भी पर्याय ज्ञान निरावरण ही है ॥ ३१९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुहमणिगोदअपज्जत्तयस्स जादस्स पढमसमयम्हि ।
हवदि हु सव्वजहण्णं णिच्चुग्घाडं णिरावरणं ॥ ३२० ॥

सूक्ष्मनिगोदापर्याप्तकस्य जातस्य प्रथमसमये ।
भवति हि सर्वजघन्यं नित्योद्घाटं निरावरणं ॥ ३२० ॥

जी० प्र०—सूक्ष्मनिगोदलब्ध्यपर्याप्तकस्य जातं–जननं तस्य प्रथमसमये निरावरणं–प्रच्छादनरहितं नित्योद्घाटं अत एव सर्वदा प्रकाशमानं सर्वजघन्यं–सर्वनिकृष्टशक्तिकं पर्यायाख्यं श्रुतज्ञानं भवति खलु एतद्गाथासूत्रं पूर्वाचार्यप्रसिद्धं–स्वोक्तार्थसंप्रतिपत्तिप्रदर्शनार्थं उदाहरणत्वेन लिखितं ॥ ३२० ॥

मं० प्र०—सूक्ष्मनिगोदलब्ध्यपर्याप्तकस्य जातं–जननं, तस्य प्रथमसमये निरावरणं–प्रच्छादनरहितं नित्योद्घाटं अत एव सर्वदा प्रकाशमानं, सर्वजघन्यं सर्वनिकृष्टशक्तिकं पर्यायाख्यं श्रुतज्ञानं भवति, खलु एतद्गाथासूत्रं पूर्वाचार्यप्रसिद्धं स्वोक्तार्थसंप्रतिपत्तिप्रदर्शनार्थमुदाहरणत्वेन लिखितं ॥ ३२० ॥

स० चं०–सूक्ष्म निगोद लब्धि अपर्याप्तक जीवका जन्म होतैं पहिला समयविषैं सर्वतैं जघन्य शक्तिकौं लीएं पर्याय नामा श्रुतज्ञान हो है सो निरावरण है इतने ज्ञानका कबहू आच्छादन न होइ, याहीतैं नित्योद्घाट कहिए सदाकाल प्रकट प्रकाशमान है। सो यहु गाथा पूर्वाचार्यनिकरि प्रसिद्ध है इहां अपना कह्या व्याख्यानकी दृढताके निमित्त उदाहरणरूप लिखी है ॥ ३२० ॥

सुहमणिगोदअपज्जत्तगेसु सगसंभवेसु भमिऊण ।
चरिमापुण्णतिवक्काणादिमवक्कट्ठियेव हवे ॥ ३२१ ॥

सूक्ष्मनिगोदापर्याप्तगेषु स्वकसंभवेषु भ्रमित्वा ।
चरमापूर्णत्रिवक्राणां आदिमवक्रस्थिते एव भवेत् ॥ ३२१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी० प्र०—सूक्ष्मनिगोदलब्ध्यपर्याप्तकेषु स्वसंभवेषु द्वादशोत्तरषट्सहस्रप्रमितेषु भवेषु भ्रमित्वा चरमापूर्णभवस्य त्रिवक्रविग्रहगत्या उत्पन्नस्य जीवस्य प्रथमवक्रसमये स्थितस्यैव पूर्वोक्तस्यैव पूर्वोक्तं सर्वजघन्यं पर्यायाख्यं श्रुतज्ञानं भवति तत्रैव तस्य जीवस्य स्पर्शनेंद्रियप्रभवं सर्वजघन्यं मतिज्ञानं, अचक्षुर्दर्शनावरणक्षयोपशमसंभूतं अचक्षुर्दर्शनमपि भवति। बहुपर्याप्तभवभ्रमणसंभूतबहुतमसंक्लेशवृद्ध्या आवरणस्य तीव्रतमानुभागोदयसंभवात्, द्वितीयादिसमयेषु ज्ञानदर्शनवृद्धिसंभवात्। 'त्रिवक्रप्रथमवक्रसमये एव पर्यायज्ञानसंभवो ज्ञातव्यः' ॥ ३२१ ॥

मं० प्र०—सूक्ष्मनिगोदलब्ध्यपर्याप्तकगतेषु स्वसंभवेषु द्वादशोत्तरषट्सहस्रप्रमितेषु भवेषु भ्रमित्वा चरमापूर्णभवे त्रिवक्रविग्रहगत्या उत्पन्नस्य जीवस्य प्रथमवक्रसमये स्थितस्यैव पूर्वोक्तं सर्वजघन्यं पर्यायाख्यं श्रुतज्ञानं भवति। तत्रैव तस्य जीवस्य स्पर्शनेंद्रियप्रभवं सर्वजघन्यं मतिज्ञानं, अचक्षुर्दर्शनावरणक्षयोपशमसंभूतमचक्षुर्दर्शनमपि भवति। बहुपर्याप्तभवभ्रमणसंभूतबहुतमसंक्लेशवृद्ध्या आवरणस्य तीव्रतमानुभागोदयसंभवात्। द्वितीयादिसमयेषु ज्ञानदर्शनवृद्धिसंभवात् ॥ ३२१ ॥

स० चं०—सूक्ष्म निगोद लब्धि अपर्याप्तक जीव सो अपनेविषैं संभवते जे छह हजार बारह बार क्षुद्रभव तिनिविषैं भ्रमण करि अंतका लब्धि अपर्याप्तकरूप क्षुद्रभवविषैं तीन वक्रता लीएं जो विग्रहगति ताकरि जन्म धन्या होइ ताके विग्रहगतिमें पहिली वक्रता संबंधी समयविषैं तिष्ठता जीवहीकैं सर्वतैं जघन्य पर्याय नामा श्रुतज्ञान हो है। बहुरि तिसहीकैं स्पर्शन इंद्रियसंबंधी जघन्य मतिज्ञान हो है। बहुरि तिसहीकैं अचक्षुर्दर्शनावरणके क्षयोपशमतैं उपज्या जघन्य अचक्षुदर्शन भी हो है। सो इहां बहुत क्षुद्रभवरूप पर्यायके धरनेतैं उत्पन्न भया बहुत संक्लेश ताके बंधनेकरि आवरणका अतितीव्र अनुभागका उदय हो है तातैं क्षुद्रभवनिका अंत क्षुद्रभवनिविषैं पर्यायज्ञान कह्या है। बहुरि द्वितीयादि समयनिविषैं ज्ञान बंधता संभवै है तातैं तीनि वक्रविषैं प्रथम वक्रका समयही विषैं पर्यायज्ञान कह्या है ॥ ३२१ ॥

सुहमणिगोदअपज्जत्तयस्स जादस्स पढमसमयम्हि।
फासिंदियमदिपुव्वं सुदणाणं लद्धिअक्खरयं ॥ ३२२ ॥ ६८१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सूक्ष्मनिगोदापर्याप्तकस्य जातस्य प्रथमसमये ।
स्पर्शनेंद्रियमतिपूर्वं श्रुतज्ञानं लब्ध्यक्षरकं ॥ ३२२ ॥

जी० प्र०—सूक्ष्मनिगोदलब्ध्यपर्याप्तकस्य जननप्रथमसमये सर्वजघन्यस्पर्शनेंद्रियमतिज्ञानपूर्वकं लब्ध्यक्षरापरनामधेयं 'पूर्वोक्तचरमभवत्रिवक्रप्रथमसमयादिविशेषणविशिष्टं' सर्वजघन्यं पर्यायश्रुतज्ञानं भवतीति ज्ञातव्यं । लब्धिर्नामश्रुतज्ञानावरणक्षयोपशमः अर्थग्रहणशक्तिर्वा, लब्ध्या अक्षरं अविनश्वरं लब्ध्यक्षरं तावतः क्षयोपशमस्य सदा विद्यमानत्वात् ॥३२२॥ अथ पर्यायसमासप्रकरणं दशभिर्गाथासूत्रैः प्ररूपयति—

मं० प्र०—सूक्ष्मनिगोदलब्ध्यपर्याप्तकस्य जातस्य प्रथमसमये सर्वजघन्यस्पर्शनेंद्रियमतिज्ञानपूर्वकं लब्ध्यक्षरापरनामधेयं सर्वजघन्यं पर्यायश्रुतज्ञानं पूर्वोक्तविशेषणविशिष्टं भवतीति ज्ञातव्यं । लब्धिः—श्रुतज्ञानावरणक्षयोपशमः, अर्थग्रहणशक्तिर्वा, लब्ध्या अक्षरं—अविनश्वरं लब्ध्यक्षरं, तावतः क्षयोपशमस्य सर्वदा विद्यमानत्वात् ॥ ३२२ ॥ अथ दशभिर्गाथाभिः पर्यायसमासप्रकरणं प्ररूपयति—

स० चं०—सूक्ष्म निगोद लब्धि अपर्याप्तक जीवकैं उपजनेका पहिला समयविषैं सर्वतैं जघन्य स्पर्शन इंद्रिय संबंधी मतिज्ञानपूर्वक लब्धि अक्षर है दूसरा नाम जाका ऐसा पर्याय ज्ञान हो है। लब्धि कहिए श्रुतज्ञानावरणका क्षयोपशम वा जानन शक्ति ताकरि अक्षरं कहिए अविनाशी सो ऐसा पर्यायज्ञान ही है जातैं इतना क्षयोपशम सदाकाल विद्यमान रहै हैं ॥ ३२२ ॥ आगैं दश गाथानिकरि पर्यायसमास ज्ञानकौं प्ररूपैं हैं—

अवरुवरिम्मि अणंतमसंखं संखं च भागवड्ढीए ।
संखमसंखमणंतं गुणवड्ढी होंति हु कमेण ॥ ३२३ ॥

अवरोपरि अनंतमसंख्यं संख्यं च भागवृद्धयः ।
संख्यमसंख्यमनंतं गुणवृद्धयो भवंति हि क्रमेण ॥ ३२३ ॥

जी० प्र०—सर्वजघन्यपर्यायज्ञानस्य उपरि क्रमेण वक्ष्यमाणपरिपाट्या अनंतभागवृद्धिः असंख्यातभागवृद्धिः संख्यातभागवृद्धिः संख्यातगुणवृद्धिः असंख्यातगुणवृद्धिः अनंतगुणवृद्धिश्चेति षट्स्थानपतिता वृद्धयो भवंति खलु । द्विरूपवर्गधारायां अनंतानंतानि वर्गस्थानानि अतीत्यातीत्य उत्पन्नानां जीवपुद्गलकालाकाशश्रेणीनां उपर्यपि अनंतानंतवर्गस्थानानि अतीत्य सूक्ष्मनिगोदलब्ध्यपर्याप्तकस्य जघन्यज्ञानाविभागप्रतिच्छेदानामुत्पत्तिकथनात् तज्जघन्यज्ञानस्यानंतात्मकभागहारः सुघटन् न विरुध्यते ॥ ३२३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं० प्र०—सर्वजघन्यस्य पर्यायज्ञानस्योपरि क्रमेण-वक्ष्यमाणपरिपाट्या, अनंतभागवृद्धिः असंख्यातभागवृद्धिः संख्यातभागवृद्धिः संख्यातगुणवृद्धिः असंख्यातगुणवृद्धिः अनंतगुणवृद्धिश्चेति षट्स्थानपतिता वृद्धयो भवंति खलु, द्विरूपवर्गधारायां अनंतानंतानि वर्गस्थानानि गत्वा सूक्ष्मनिगोदलब्ध्यपर्याप्तकजघन्यज्ञानस्य अविभागप्रतिच्छेदानामुत्पत्तिकथनात् जघन्यज्ञानस्य अनंतभागहारो घटते ॥ ३२३ ॥

स० चं०—सर्वतैं जघन्य पर्याय नामा ज्ञान ताके ऊपरि आगैं अनुक्रमतैं आगैं कहिए है तिस परिपाटीकरि अनंतभाग वृद्धि १ असंख्यात भाग वृद्धि २ संख्यात भागवृद्धि ३ संख्यात गुणवृद्धि ४ असंख्यात गुणवृद्धि ५ अनंतगुणवृद्धि ६ ए षट्स्थान पतित वृद्धि हो हैं। इहां कोऊ कहै कि--सर्वजघन्य ज्ञानकौं अनंतका भाग कैसैं संभवै ? ताका समाधान--जो द्विरूपवर्गधाराविषैं अनंतानंत वर्गस्थान भए पीछैं क्रमतैं जीवराशि पुद्गल राशि काल समयराशि श्रेणी आकाशराशि हो है तिनिके ऊपरि अनंतानंत वर्गस्थान भएं सूक्ष्मनिगोद लब्धि अपर्याप्तक संबंधी जघन्य ज्ञानके अविभाग प्रतिच्छेदनिका प्रमाण हो है। जाका भाग न होइ ऐसे ज्ञान शक्तिके अंश तिनिका ऐसा परिमाण है तातैं तिनिकी अपेक्षा अनंतका भागहार संभवै है ॥ ३२३ ॥

जीवाणं च य रासी असंखलोगा वरं खु संखेज्जं ।
भागगुणम्हि य कमसो अवट्ठिदा होंति छट्ठाणे ॥ ३२४ ॥

जीवानां च च राशिः असंख्यलोका वरं खलु संख्यातं ।
भागगुणयोश्च क्रमशः अवस्थिता भवंति षट्स्थाने ॥ ३२४ ॥

जी० प्र०—अत्र अनंतभागादिषु षट्सु स्थानेषु क्रमेण एताः षट् संदृष्टयः अवस्थिताः प्रतिनियता भवंति। तद्यथा—अनंतभागवृद्धौ गुणवृद्धौ च भागहारो गुणकारश्च प्रतिनियतः सर्वजीवराशिरेव १६। असंख्यातभागवृद्धौ गुणवृद्धौ च भागहारो गुणकारश्च प्रतिनियतः असंख्यातलोक एव ≡ a। संख्यातभागवृद्धौ गुणवृद्धौ च भागहारो गुणकारश्च प्रतिनियतः उत्कृष्टसंख्यात एव १५ ॥ ३२४ ॥

मं० प्र०—अनंतभागादिषु षट्सु स्थानेषु क्रमेण एताः षट् संदृष्टयः अवस्थिताः—प्रतिनियता भवंति, तद्यथा—अनंतस्य संदृष्टिः जीवानां राशिः, सर्वजीवराशिरित्यर्थः १६। असंख्यातस्य संदृष्टिः असंख्यातलोकः ≡ a। संख्यातस्य संदृष्टिः वरं—उत्कृष्टं संख्येयं संख्यातोत्कृष्टमित्यर्थः १५। एवं भागे तिस्रः संदृष्टयः। एता एव गुणकारेऽपि संदृष्टयो भवंति ॥ ३२४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०—इहां अनंतभाग आदिक छह स्थानकनिविषै ए छह संदृष्टि अवस्थित कहिए नियमरूप जाननी। अनंतविषैं तौ जीवराशिके सर्व जीवनिका परिमाण जानना। असंख्यातविषैं असंख्यातलोक जो असंख्यातगुणा लोकाकाशके प्रदेशनिका परिमाण सो जानना। संख्यातविषैं उत्कृष्टसंख्यात जो उत्कृष्टसंख्यातका परिमाण सो जानना। सोई तीनो प्रमाण भाग वृद्धिविषैं जानना। येही गुणवृद्धिविषै जानना। भागवृद्धिविषैं इनि प्रमाणनिका भाग पूर्वस्थानकौं दीएं जो परिमाण आवै तितने पूर्वस्थानविषै मिलाएं उत्तर स्थान होइ। गुणवृद्धिविषैं इनि प्रमाणनिकरि पूर्वस्थानकौं गुणैं उत्तरस्थान हो हैं॥ ३२४॥

उव्वंकं चउरंकं पणछस्सत्तंक अट्ठअंकं च।
छव्वड्ढीणं सण्णा कमसो संदिट्ठिकरणट्ठं॥ ३२५॥

उर्वंकश्चतुरंकः पंचषट्सप्तांकः अष्टांकश्च।
षड्वृद्धीनां संज्ञा क्रमशः संदृष्टिकरणार्थं॥ ३२५॥

जी० प्र०—पूर्वोक्तानंतभागाद्यर्थसंदृष्टीनां पुनः लघुसंदृष्टिनिमित्तं षड्विधवृद्धीनां यथासंख्यं अपरसंज्ञाः संदृष्टयः कथ्यंते। अनंतभागस्य उर्वंकः उ। असंख्यातभागस्य चतुरंकः ४। संख्यातभागस्य पंचांकः ५। संख्यातगुणस्य षडंकः ६। असंख्यातगुणस्य सप्तांकः ७, अनंतगुणस्य अष्टांकः ८॥ ३२५॥

मं० प्र०—पुनरपि लघुसंदृष्टिकरणार्थं उक्तानां षड्वृद्धीनां अन्यानि नामानि संदृष्टयश्च नियमात् कथ्यंते। तद्यथा—अनंतभागस्य उर्वंकः, असंख्यातभागस्य चतुरंकः ४, संख्यातभागस्य पंचांकः ५, संख्यातगुणस्य षडंकः ६, असंख्यातगुणस्य सप्तांकः ७, अनंतगुणस्य अष्टांकः ८॥ ३२५॥

स० चं०—बहुरि लघुसंदृष्टि करनेके निमित्त अनंतभागवृद्धि आदि छह वृद्धिनिकी अन्यसंज्ञा संदृष्टि सो कहे हैं—तहां अनंतभाग वृद्धिकी उर्वंक कहिए उकार उ, असंख्यात भाग वृद्धिकी च्यारिका अंक ४, संख्या- ६८५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तभाग वृद्धिकी पांचका अंक ५, संख्यातगुणवृद्धिकी छहका अंक ६, असंख्यात गुणवृद्धिकी सातका अंक ७, अनंतगुण वृद्धिकी आठका अंक ८, ऐसैं ए सहनानी जाननी ॥ ३२५ ॥

अंगुलअसंखभागे पुव्वगवड्ढीगदे दु परवड्ढी।
एक्कं वारं होदि हु पुणो पुणो चरिम उड्ढित्ती ॥ ३२६ ॥

अंगुलासंख्यातभागे पूर्वगवृद्धिगते तु परवृद्धिः।
एकं वारं भवति हि पुनः पुनः चरमवृद्धिरिति ॥ ३२६ ॥

मं० प्र०—एकस्मिन् षट्स्थाने एक एवाष्टांकः तस्यावृत्तेरभावात् । पूर्ववृद्धौ सूच्यंगुलासंख्यातभागमात्रवारान् गतायां परवृद्धिरेकवारं भवतीति वचनात् अनंतगुणवृद्धेः परतो वृद्ध्यंतराभावात् अस्याः पूर्वत्वासिद्धेश्च । सप्तांकः संख्यातगुणवृद्धिः कांडकं—अगुलासंख्यातभागमात्रवारः तस्य अष्टांकात् पूर्वत्वात् । ततः सप्तांकस्याधः षडंकपंचांकचतुरंकोर्वंकाः संख्यातगुणसंख्यातभागासंख्यातभागानंतभागवृद्धयः रूपाधिककांडकेन गुणितक्रमाः । यावदूर्वंक इत्यनेन ऊर्वंकस्य सीमत्वं सूचयन् तमप्यभिव्यप्नोति तन्न्यासोयं—उ

१ १ १ १	१ १ १	१ १	१		
२ २ २ २ २ ।	४ २ २ २ २ ।	५ २ २ २ ।	६ २ २ ।	७ २ ।	८ । १
a a a a a	a a a a	a a a	a a	a	

तत्र रूपाधिकत्वकारणं पूर्वोक्तविधानेन अधिकवारांगुलासंख्यातभागमात्रप्रदर्शनयुक्त्या अभ्यूहनीयं । यद्यपि द्वितीयवारषट्स्थाने आदिभूतादष्टांकात् परमुर्वंको भवति तथापि 'एकं खलु अट्ठंकं' इति नियमवचनेन अष्टांकस्य अंगुलासंख्यातभागमात्रवाराभाव एव खलुशब्दस्य नियमार्थत्वात् ॥ ३२९ ॥

स० चं०—एकबार जो षट्स्थान होइ तीहि विषैं अष्टांक कहिए अनंत गुण वृद्धि सो एकबार ही हो है जातैं 'अंगुल असंख भागं' इत्यादि सूत्र अनुसार अष्टांकके परैं कोई वृद्धि नाहीं । तातैं याके पूर्वपनाका अभावतैं बार बार पलटनेका अभाव है । बहुरि सप्तांक कहिए असंख्यात गुणवृद्धि सो कांडकं कहिए सूच्यंगुलका असंख्यातवां भागमात्र हो है । बहुरि ताके नीचैं षडंकं कहिए संख्यात गुणवृद्धि पंचंकं कहिए संख्यात भाग वृद्धि चतुरंकं कहिए असंख्यात भागवृद्धि ऊर्वंकं कहिए अनंतभागवृद्धि ए च्यार्यो एक अधिक सूच्यंगुलका असंख्यातवां भाग करि गुणित अनुक्रमतैं जाननीं । इहां यावत् ऊर्वंकं इस वचनकरि उर्वंक पर्यंत अनुक्रमकी मर्यादा कही है सोई कहिए है—असंख्यात गुणवृद्धिका प्रमाण सूच्यंगुलका असंख्यातवां भागप्रमाण कह्या है ताकौं एक अधिक सूच्यंगुलका असंख्यातवां भागकरि गुणैं जो परिमाण होइ तितनीबार संख्यात गुणवृद्धि हो है । बहुरि याकौं भी एक अधिक सूच्यंगुलका असंख्यातवां भाग करि गुणैं जो परिमाण होइ तितनीबार संख्यात भागवृद्धि हो है । बहुरि याकौं भी एक अधिक सूच्यंगुलका असंख्यातवां भाग करि गुणैं जो परिमाण होइ तितनीबार असंख्यात भागवृद्धि हो है । बहुरि याकौं भी एक अधिक सूच्यंगुलका असंख्यातवां भाग करि गुणैं जो परिमाण होइ तितनीबार अनंतभाग वृद्धि हो है ऐसैं एकबार षट्स्थान पतित वृद्धि होने विषै पूर्वोक्त प-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

माण लीएं एक एक वृद्धि हो है। दूसरीबार आदिविषैं पहिलैं अष्टांक हो है ताके आगे ऊर्वंक हो है तातैं एकही अष्टांक है ऐसा कह्या है ॥ ३२९ ॥

सव्वसमासो णियमा रूवाहियकंडयस्य वग्गस्स ।
विंदस्स य संवग्गो होदित्ति जिणेहिं णिद्दिट्ठं ॥ ३३० ॥

सर्वसमासो नियमात् रूपाधिककांडकस्य वर्गस्य ।
वृंदस्य च संवर्गो भवतीति जिनैर्निर्दिष्टं ॥ ३३० ॥

जी० प्र०—सर्वासां अष्टांकादिषड्वृद्धीनां संयोगः रूपधिककांडकस्य वर्गस्य वृंदस्य च संवर्गमात्रो भवति इति जिनैरर्हदादिभिर्निर्दिष्टं कथितं। अत्र तद्युतिः क्रियते तद्यथा—

अष्टांकस्य आत्मप्रमाणैकरूपे सप्तांकस्य सूच्यंगुलासंख्यातभागे युते सति रूपाधिककांडकं भवति तस्मिन् पुनः आत्मप्रमाणैकरूपे षडंक संख्यायां कांडकगुणितरूपाधिककांडकमात्र्यां युते सति रूपाधिककांडकवर्गो भवति । तदात्मप्रमाणैकरूपे पंचांकसंख्यायां कांडकगुणितरूपाधिककांडकवर्गप्रमितायां युते सति रूपाधिककांडकघनो भवति । तदात्मप्रमाणैकरूपे चतुरंकसंख्यायां कांडकगुणितरूपाधिककांडकघनप्रमितायां युते सति रूपाधिककांडकवर्गस्य वर्गो भवति । तदात्मप्रमाणैकरूपे उर्वंकसंख्यायां कांडकगुणितरूपाधिकं कांडकवर्गस्य वर्गप्रमितायां रूपाधिककांडकचतुष्टयेन रूपाधिककांडकचतुष्टयं समं प्रदर्श्य आत्मप्रमाणैकरूपे शेषकांडके युते सति रूपाधिककांडकवर्गस्य घनस्य च संवर्गस्य घनस्य च संवर्गप्रमाणं भवति । इदमित्थमेव प्रतिपत्तव्यं । कुतः ? जिनैर्निर्दिष्टमिति कारणात् इंद्रियज्ञानगोचरत्वाभावात् तेषु गुणकारेषु गुणितेषु लब्धं घनांगुलासंख्यातभागमात्रं वा ६ घनांगुलसंख्यातभागमात्रं वा ६ घनांगुलमात्रं वा । ६ । संख्यातघनांगुलमात्रं वा ६ १ असंख्यातघनांगुलमात्रं वा ६ a इत्यस्माभिर्न ज्ञायते ॥ ३३० ॥

(a under the first ६; १ under the second ६)

मं० प्र०—सर्वासामष्टांकादीनां षण्णां वृद्धीनां समासः संयोगः रूपाधिककांडकस्य वर्गस्य घनस्य च संवर्गमात्रो भवति तद्वर्गेण द्विसमवधेन तद्घने त्रिसमवधे गुणिते सति यावान् राशिरुत्पद्यते तावत्यः षड्वृद्धयः एकस्मिन् षट्स्थानवारे भवंतीत्यर्थः । तत्संयोगक्रमो दर्श्यते तद्यथा-अष्टांकस्य एकरूपं सप्तां-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कस्यांगुलासंख्यातभागमात्रवारे प्रक्षिप्ते रूपाधिककांडकं भवति १ तस्यात्मप्रमाणे एकरूपे षडंकस्य अंगुलासंख्यातभागमात्रवारे गुण्यं समं प्रदर्श्य प्रक्षिप्ते सति रूपा-
२
a

धिककांडकस्य वर्गो भवति १ १ तस्यात्मप्रमाणे एवरूपे पंचांकस्यांगुलासंख्यातभागमात्रवारे गुण्यं समं प्रदर्श्य प्रक्षिप्ते सति रूपाधिककांडकस्य घनो भवति-

१ १ १ २ २

२ २ २ a a

a a a तदात्मप्रमाणैकरूपे चतुरंकस्यांगुलासंख्यातभागमात्रवारे गुण्यं समं प्रदर्श्य प्रक्षिप्ते सति रूपाधिककांडकस्य घनः रूपाधिककांडकेन गुणितमात्रो भ-

१ १ १ १

२ २ २ २

वति a a a a तदात्मप्रमाणैकरूपे उर्वंकस्यांगुलासंख्यातभागमात्रवारे गुण्यं समं प्रदर्श्य प्रक्षिप्ते सति रूपाधिककांडकस्य घनः रूपाधिककांडकवर्गेण

१ १ १ १ १

२ २ २ २ २

गुणितमात्रो भवति a a a a a इति जिनैर्निर्दिष्टं। अपवर्तिते सति लब्धप्रमाणमपि जिनैरेव निश्चयेन दृष्टं। असंख्यातघनांगुलमात्रं वा ६ a। संख्यातघनांगुलमात्रं वा ६ १ घनांगुलमात्रं वा ६ घनांगुलसंख्येयभागमात्रं वा ६ घनांगुलासंख्येयभागमात्रं वा ६ अस्माभिर्न ज्ञायते ॥ ३२० ॥
१ a

स० चं०—पूर्वे जो छहों वृद्धिनिका परिमाण कह्या तीहिं सर्वका जोड दीएं रूपाधिक कांडक कहिये एक अधिक सूच्यंगुलका असंख्यातवां भाग ताका वर्ग अर घन ताका संवर्ग कीएं संतै जो प्रमाण होइ तितनां हो है ऐसा जिन देवनिकरि कह्या है। भावार्थ—एक अधिक सूच्यंगुलका असंख्यातवां भागकौं दोय जायगा मांडि परस्पर गुणन कीये जो परिमाण होय सो तौ रूपाधिक कांडकका वर्ग कहिए। बहुरि एक अधिक सूच्यंगुलका असंख्यातवां भागकौं तीन जायगा मांडि परस्पर गुणन कीएं जो परिमाण होइ ताकौं रूपाधिक कांडकका घन कहिए बहुरि इस वर्गकौं अर घनकौं परस्पर गुणन कीएं जो परिमाण होइ अथवा एक अधिक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सूच्यंगुलका असंख्यातवां भागकौं पांच जायगा मांडि परस्पर गुणन कीएं जो परिमाण होइ तितनीबार एक षट् स्थानपतित वृद्धिविषै अनंत भागादिक वृद्धि हो है। जैसें अंक संदृष्टि करि पूर्वै यंत्रविषैं आठका अंक एक बार लिख्या अर सातका अंक दोयबार लिख्या मिलि तीन भए। बहुरि छहका अंक छहबार लिख्या मिलि तीनका वर्ग नव भया। बहुरि पंचका अंक अठारहबार लिख्या मिलि तीनका घन सत्ताईस भया बहुरि च्यारि का अंक चौवन बार लिख्या मिलि तीन करि गुणित तीनका घन इक्यासी भया। बहुरि ऊर्वंक एकसौ बासठि बार लिख्या मिलिकरि तीनका वर्गकरि गुणित तीनका घन दोयसै तियालीस हूवा। तैसें ही अनंतगुण वृद्धि एकबार विषै कांडकमात्र असंख्यात गुणवृद्धि जोडें एक अधिक ही कांडक हो है। बहुरि तीहि अपने प्रमाण एक रूपके अर संख्यात गुण वृद्धिका कांडक प्रमाणके समान गुण्यपणौं देखि जोडें रूपाधिक कांडकका वर्ग हो है बहुरि तिहिं अपने प्रमाण एककै अर संख्यात भाग वृद्धिका कांडक प्रमाणकै समान गुण्यपणौं देखि जोडें रूपाधिक कांडकका घन हो है। बहुरि तिहिं अपने प्रमाण एककैं अर असंख्यात भागवृद्धिका कांडक प्रमाणकैं समान गुण्यपनौं देखि जोडै रूपाधिक कांडकका वर्गकरि गुणित रूपाधिक कांडकका घन हो हैं। बहुरि तीहि अपने प्रमाण एककैं अर अनंतभाग वृद्धिका प्रमाणकैं समान गुण्य पनौं देखि जोडै रूपाधिक कांडकका वर्गकरि गुणित रूपाधिक कांडकका घन प्रमाण हो है। इहां अंक संदृष्टिविषैं कांडकका प्रमाण दोय जानना। यथार्थविषैं सूच्यंगुलका असंख्यातवां भागमात्र जानना। बहुरि अंक संदृष्टिविषैं जैसे अष्टांक सप्तांक मिलि तीन भए। बहुरि इस प्रमाण लीएं एक तौ यहु अर कांडकमात्र दोय षडंक मिलि तीन भए। ए तीनतौ गुणकार अर पूर्वोक्त तीन गुण्य सो गुणकार करि गुण्यकौं गुणैं तीनका वर्ग भया तैसैंही अनंतगुणवृद्धि असंख्यात गुणवृद्धि कौं मिल्या हूवा अपना प्रमाण रूपाधिक कांडक तिहि मात्र एक तौ यहु अर कांडकमात्र संख्यात गुणवृद्धि सो मिलि रूपाधिक कांडकमात्र गुणकार हूवा। याकरि पूर्वोक्त रूपाधिक कांडकमात्र गुण्यकौं गुणैं रूपाधिक कांडक का वर्ग हो है ऐसैं ही अन्यविषैं भी जानि लेना। ऐसैं जो यहु सूच्यंगुलका असंख्यातवां भागका वर्गकरि वा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हीका घनकौं गुणैं जो प्रमाण हो है सो असंख्यात घनांगुलमात्र हो है वा संख्यात घनांगुलमात्र हो है वा घनांगुलमात्र हो है वा घनांगुलके संख्यातवे भाग मात्र हो है वा घनांगुलके असंख्यातवे भागमात्र हो है सो हम जान्या नाहीं सर्वज्ञदेव यथार्थ जान्या है सो प्रमाण है ॥ ३३० ॥

उक्कस्ससंखमेत्तं तत्ति चउत्थेक्कदालछप्पण्णं ।
सत्तदसमं च भागं गंतूणय लद्धिअक्खरं दुगुणं ॥३३१॥

उत्कृष्टसंख्यातमात्रं तत्त्रिचतुर्थैकचत्वारिंशत्षट्पंचाशं ।
सप्तदशमं च भागं गत्वा लब्ध्यक्षरं द्विगुणं ॥ ३३१ ॥

जी० प्र०—रूपाधिककांडकगुणितांगुलासंख्यातभागमात्रवारान् अनंतभागवृद्धिस्थानेषु अंगुलासंख्यातभागमात्रवारान् असंख्येयभागवृद्धिस्थानेषु च गतेषु तदुभयवृद्धियुक्तजघन्यस्य एकवारं संख्यातभागवृद्धिस्थानमुत्पद्यते ज १५ (। १– / १५) अग्रे पुनः प्रागुक्तक्रमवृद्धिद्वयसहचरितेषु संख्यातभागवृद्धियुक्तस्थानेषु उत्कृष्टसंख्यातमात्रेषु गतेषु तत्र प्रक्षेपकवृद्धिषु युतासु लब्ध्यक्षरं सर्वजघन्यपर्यायाख्यं श्रुतज्ञानं साधिकद्विगुणं भवति । कुतः ? प्रक्षेपकस्य उत्कृष्टसंख्यातभाज्यभागहारानपवर्त्य युते तस्य द्विगुणत्वसंभवात् तत्त्रिचतुर्थं पूर्वोक्तसंख्यातभागवृद्धियुक्तोत्कृष्टसंख्यातमात्रस्थानानां त्रिचतुर्थभागस्थानानि नीत्वा तत्र प्रक्षेपकः प्रक्षेपकप्रक्षेपकश्चेति वृद्धिद्वये जघन्यस्योपरि युते लब्ध्यक्षरं द्विगुणं भवति । तद्यथा—

प्रक्षेपकप्रक्षेपकस्य रूपोनगच्छस्य एकवारसंकलनधनप्रमितस्य ज (। १८ / १५ १५) (३ / ४) (। १५ / २) (३ / ४) (१ / —) ऋणं पृथक्कृत्य ज (। ० / १५) (३ / ३२) शेषमपवर्त्य ज (। ९ / ३२) एकरूपं पृथग्न्यस्य ज (। १ / ३२) शेषे ज (। ८ / ३२) अपवर्त्य ज (। १ / ४) प्रक्षेपकवृद्धौ ज (। ३ / ४) युते सति साधिकजघन्यं भवति ज (।) अस्मिन् पुनः उपरितनसाधिकजघन्ये युते

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सति लब्ध्यक्षरं द्विगुणं भवति ज २ प्रक्षेपकप्रक्षेपकागतऋणं धनतः संख्यातगुणहीनमिति किंचिदूनं कृत्वा शेषं ज १– द्विगुणजघन्ये संयोज्य
३२

साधिकं कुर्यात्। एकदालछप्पयणं भागुक्तसंख्यातभागवृद्धियुक्तस्थानानां उत्कृष्टसंख्यातममितेषु एकचत्वारिंशत्षट्पंचाशद्भागमात्रस्थानानि नीत्वा प्रक्षेपकप्रक्षेपकद्वययोगे साधिकजघन्यं द्विगुणं भवति तत्र प्रक्षेपकोऽयं—

ज १५ ४१ प्रक्षेपकप्रक्षेपकस्तु रूपोनगच्छस्य एकवारसंकलितधनमात्रः। ज १५ ४१ १५ ४१ अत्रतनं ऋणं
१५ ५६   १५ १५ ५६ २ ५६ १

अपनीय पृथक् संस्थाप्य ज १ ४१। शेषं अपवर्त्य ज १६ ८१। एकरूपं धनं पृथग्धृत्य ज १ शेषं ज १६ ८०
१५ ११२ ५६   ११२ ५६   ११२ ५६   ११२ ५६

अपवर्त्य ज १५ प्रक्षेपके निक्षिप्य ज ५६ अपवर्तिते जघन्यं भवति। ज। अस्मिन् पुनः उपरितनजघन्ये युते सति लब्ध्यक्षरं द्विगुणं
५६   ५६

भवति। ज २। इदमेव पृथक्स्थापितधनेन ज १ इतः संख्यातगुणहीनऋणेन ज १ ४१ किंचिदूनीकृतेन ज १—
११२ ५६   १५ ११२ ५६   ११२ ५६

साधिकं कुर्यात् ज २। 'सत्तदसमं च भागं' वा अथवा संख्यातभागवृद्धिस्थानानां उत्कृष्टसंख्यातमात्रेषु मध्ये सप्तदशभागमात्रेषु गतेषु प्रक्षेपक–प्रक्षेपकप्रक्षेपक–पिशुलिसंज्ञवृद्धित्रये मक्षिप्ते साधिकजघन्यं द्विगुणं भवति। तद्यथा प्रक्षेपकः ज १५ ७। प्रक्षेपकप्रक्षेपको रूपोनगच्छस्य एकवार-
१५ १०

संकलितधनमात्रः ज १५ ७ १५ ७। पिशुलिः द्विरूपोनगच्छस्य द्विकवारसंकलितधनमात्रः ज १५ ७। १५ ७। १५ ७ ७१६
१५ १५ १० २ १०। १   १५ १५ १५ १०। ३। १०। २। १०। १

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तद्वृद्धित्रयमध्ये पिशुले: प्रथमऋणं पृथक् संस्थाप्यं ज | ० २ / १५ । १५ । ६ । १० । १० । १० । १ ⌒ १५ ७ । ७ । शेषधनमपवर्त्य ज । १ ⌒ १५ ७ । ४९ / १५ १० ६०० ।

अत्रस्थमृणं ज | ० १ ४९ / १५ ६००० पृथक्संस्थाप्य शेषमपवर्त्य ज | ३४३ / ६००० । इतस्त्रयोदशरूपाण्यपनीय पृथक्संस्थाप्य ज | १३ / ६००० । शेषं ज | ३३० / ६००० । अपवर्त्य

ज | ११ / २० १० एकत्र संस्थाप्य अस्य भाक् पृथक्धृतघने ज | १३ / ६००० प्रथमद्वितीयऋणं संख्यातगुणहीनमिति किंचिदूनं कृत्वा ज | १३– / ६००० । एकत्र संस्थाप्य पुनः

प्रक्षेपकप्रक्षेपके ज | १ ⌒ १५ ७ । ७ । / १५ २ १० । १० । ऋणं ज | ० १ ७ / १५ २०० । पृथक् संस्थाप्य शेषं ज | १५ ७ ७ / १५ २०० । अपवर्त्य ज | ४९ / २०० । प्राक्तनपिशुलिधनैकादशरूपाणि

मेलयित्वा ज | ६० / २०० । अपवर्त्य इदं ज | ३ / १० । प्रक्षेपके ज | ७ / १० । संयोज्य ज | १० / १० । अपवर्त्येदं ज प्राक्पृथग्धृतकिंचिदूनत्रयोदशरूपैः संख्या-

तगुणहीनप्रक्षेपकप्रक्षेपकऋणेन पुनः किंचिदूनितैः ज | १३= / ६००० । साधिकं कृत्वा उपरितनजघन्ये युते सति लब्ध्यक्षरं द्विगुणं भवति । ज | २ । अथ-

मतः उत्कृष्टसंख्यातगुणितसंख्यातभागस्य सप्तदशमभागमात्रेषु ज | १५ । ७ / १५ । १० संख्यातभागवृद्धियुक्तस्थानेषु पिशुलिपर्यंतेषु गतेषु लब्ध्यक्षरं द्विगुणं

---

१ संदृष्टेरयमप्याकारः—ज | ० । १ ⌒ २ १५ । ७ । ७ / १५ १५ ६०० । १० । १

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवति ज २ । पुनस्तस्यैव एकचत्वारिंशत्षट्पंचाशद्भागस्य प्रक्षेपकावसानेषु गतेषु लब्ध्यक्षरं द्विगुणं भवति । ज २ अग्रेपि संख्यातभागवृद्धिप्रथमस्थानमादिं कृत्वा उत्कृष्टसंख्यातस्य त्रिचतुर्थभागमात्रेषु ज १५ ३ । प्रक्षेपकप्रक्षेपकावसानेषु गतेषु लब्ध्यक्षरं द्विगुणं भवति ज २ । पुनस्तथा संख्यातभागवृद्धिस्थानेषु प्रथमस्थानमादिं कृत्वा उत्कृष्टसंख्यातमात्रेषु प्रक्षेपकावसानेषु गतेषु ज १५ लब्ध्यक्षरं द्विगुणं भवति । ननु साधिकजघन्यं द्विगुणं तदा पर्यायसमासमध्यमविकल्पगतं श्रुतज्ञानं उपचारेण लब्ध्यक्षरं कथमुक्तं ? इति चेत् पर्यायज्ञानस्य मुख्यलब्ध्यक्षरस्य समीपवर्तित्वात् । चशब्दः गत्वागत्वेतिवीप्सार्थं ज्ञापयति ॥ ३३१ ॥

१५ ४   १५

मं० प्र०—रूपाधिककांडकगुणितांगुलासंख्यातभागमात्रवारानंतभागवृद्धिस्थानेषु अंगुलासंख्यातभागमात्रवारानसंख्येयभागवृद्धिस्थानेषु च गतेषु तदुभयवृद्धियुक्तस्य जघन्यस्य एकवारं संख्यातभागवृद्धिस्थानमुत्पन्नं तेषु प्रत्येकपूर्वोक्तक्रमवृद्धिद्वयसहचरितेषु उत्कृष्टसंख्यातमात्रेषु गतेषु लब्ध्यक्षरं सर्वजघन्यं पर्यायाख्यं श्रुतज्ञानं साधिकं द्विगुणं भवति । उत्कृष्टसंख्यातभागमात्रौ गुणकारभागहारावपवर्त्य एतस्मिन् प्रक्षेपकरूपे जघन्ये पूर्वानंतरोर्वकवृद्धियुक्ते जघन्ये प्रक्षिप्ते सति तद् द्विगुणत्वसंभवात् 'तत्ति चउत्थ' तेषां संख्यातभागवृद्धिस्थानानामुत्कृष्टसंख्यातमात्राणां मध्ये त्रिचतुर्भागेषु गतेषु प्रक्षेपकप्रक्षेपकप्रक्षेपकयोर्जघन्ये प्रक्षिप्तयोर्लब्ध्यक्षरं द्विगुणं भवति । तद्यथा—प्रक्षेपकप्रक्षेपकस्य रूपोनगच्छैकवारसंकलितधनमात्रस्य ज १५ । ३ । १५ । ३ गुणकारभागहारावपवर्त्य लब्धं चतुर्थांशमात्रं ज १ प्रक्षेपके त्रिचतुर्भागमात्रे प्रक्षिप्य अपवर्तिते साधिकजघन्यं भवति । तस्मिन्नुपरितने साधिकजघन्ये प्रक्षिप्ते लब्ध्यक्षरं द्विगुणं भवति । अत्र प्रक्षेपकप्रक्षेपके ऋणमिदं ज १ । ३ धनमिदं ज १ । धनस्य संख्येयभागमात्रत्वादृणं धने किंचिदूनं कृत्वा अवशिष्टं ज १— द्विगुणजघन्ये प्रक्षिपेत् 'एक्कदालछप्पण्णं' उत्कृष्टसंख्यातमात्रसंख्यातभागवृद्धिस्थानानां मध्ये एकचत्वारिंशत् षट्पंचाशद्भागेषु गतेषु प्रक्षेपकप्रक्षेपकप्रक्षेपकयोर्वृद्धयो-

१ ० (ऊपर) — १५।१५।४।२ । ४ । १   ४   १५ । ४ । ४ । २   ३२   ३२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योगे साधिकं जघन्यं द्विगुणं भवति । तद्यथा-प्रक्षेपकप्रक्षेपकस्य रूपोनगच्छैकवारसंकलितधने अपवर्तितशेषे पंचदशषट्पंचाशद्भागमात्रे ज १५/५६ अपवर्तितप्रक्षेपके एकचत्वारिंशत् षट्पंचाशद्भागमात्रे प्रक्षिप्ते सति साधिकजघन्यं द्विगुणं भवति ज २ । अत्र ऋणं ज । १ । ४ । १ /१५।११२।५६ अस्य धनस्य ज १/११२।५६ संख्येयभागत्वात् किंचिदूनं कृत्वा अवशिष्टं ज १–/११२।५६ साधिकद्विगुणजघन्ये प्रक्षिपेत् । सप्तदशमं च भागं । वा—अथ वा उत्कृष्टसंख्यातमात्राणां संख्यातभागवृद्धिस्थानानां मध्ये सप्तदशभागेषु गतेषु प्रक्षेपकप्रक्षेपकप्रक्षेपकपिशुलीनां तिसृणां वृद्धीनां योगे साधिकजघन्यं द्विगुणं भवति । तद्यथा-द्विरूपोनगच्छस्य द्विकवारसंकलितमात्रं पिशुलिधनं ज ११/२०।१० अधिकधनं ज १३/६००।१० ऋणं ज २ । १५ । ७ । ७ /१५।१५।३।१०।१०।१०।२ । ऋणस्य ऋणं ज २ । ७ । /१५ । १५ । ६ । १० । १० । १० । एतावत्प्रक्षिप्य प्राक्तने ऋणे अपवर्तिते एवं ज ४९/१५।२००।१० द्वितीयं ऋणं ज ७ । ७/१५।६।१०।१०।१० एतावदस्मिन् संकलितधने ज ७।१५।७/१५।१०।३।१०।२।१०।१ ७ प्रक्षिप्य द्विरूपोनगच्छद्विकवारसंकलितमात्रे पिशुलिधने ज ७ । १५ । ७ । ७ । /१५ । १० । ३ । १० । २ । १० । १ अपवर्त्य गुणिते ज ३४३/६०० । १० अत्र गुणकारे त्रयोदशरूपाण्यपनीय पृथक् स्थापितानि ज १३/६०० । १० पुनरवशिष्टे अपवर्तिते एवं ज ११/२०।१० इदमेकत्र संस्थाप्य पुनः प्रक्षेपकस्य रूपोनगच्छैकवारसंकलितमात्रस्य धने ज १५ । ७ । १५ । ७ /१५।१५।१०।२ । १० । १ अस्मिन् एतावद्धनं निक्षिप्य ज ७/१५ । १० । २ । १० । पुनरपवर्तिते एवं ज ४९/२०।१० अस्मिन् प्राक्संस्थापितैकादशरूपाणि प्रक्षिप्य अपवर्तिते त्रिदशमभागमात्रं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवति ज ३ | इदं प्रक्षेपके सप्तदशमे भागमात्रे ज १५ | ७ | प्रक्षिप्य ज १५ | १० | अपवर्तिते अवशिष्टं साधिकजघन्यमात्रे वृद्धिधनं भवति। ज | एतस्मिन्
१० १५ | १० | १५ | १०

स्वस्मिन् साधिकजघन्यमात्रे प्रक्षिप्ते लब्ध्यक्षरं द्विगुणं भवति। ज २ | प्राक्संस्थापितत्रयोदशरूपमात्रे अधिकधने तत्संख्येयभागमात्रं ऋणत्रयमपनीय शेषं ज १३ | द्विगुणलब्ध्यक्षरे साधिकं कुर्यात्। प्रथमत उत्कृष्टसंख्यातस्य सप्तदशमभागमात्रेषु संख्यातभागवृद्धिस्थानेषु पिशुलिपर्यंतेषु गतेषु लब्ध्यक्षरं द्विगुणं
६०००

भवति। ततः पुनस्तस्यैव एकचत्वारिंशत्षट्पंचाशद्भागमात्रेषु स्थानेषु प्रक्षेपकप्रक्षेपकपर्यंतेषु गतेषु लब्ध्यक्षरं द्विगुणं भवति। ततः पुनस्तस्यैव त्रिचतुर्थभागमात्रेषु प्रक्षेपकप्रक्षेपकपर्यंतेषु गतेषु लब्ध्यक्षरं द्विगुणं भवति। ततः पुनरुत्कृष्टसंख्यातमात्रेषु प्रक्षेपकेषु गतेषु लब्ध्यक्षरं द्विगुणं भवति। साधिकं द्विगुणितमपि पर्यायसमासमध्यमविकल्पगतं श्रुतज्ञानं उपचारेण लब्ध्यक्षरमित्युक्तं पर्यायज्ञानस्य मुख्यलब्ध्यक्षरस्य समीपवर्तित्वात 'गंतूणय' गत्वा चेति चशब्देन सप्तदशमभागादिषु स्थानेषु गत्वा द्विगुणं द्विगुणं भवतीति वीप्सालक्षणः समुच्चयो ज्ञाप्यते ॥ ३३१ ॥

स० चं०—एक अधिक सूच्यंगुलका असंख्यातभागकरि गुण्या हूवा अंगुलका असंख्यातवां भाग प्रमाण तौ अनंतभाग वृद्धि स्थान होइ अर अंगुलका असंख्यातवां भाग प्रमाण असंख्यात भाग वृद्धि स्थान होइ तब एकवार संख्यात भागवृद्धि हो है। तहां पूर्ववृद्धि होतैं जो साधिक जघन्यज्ञान भया ताकौं एक अधिक उत्कृष्ट संख्यात करि गुणिये अर उत्कृष्ट संख्यातका भाग दीजिये तितने मात्र भया। बहुरि आगैं पूर्वोक्त अनुक्रम लीयें अनंत असंख्यात भाग वृद्धि सहित संख्यात भागवृद्धिके स्थान उत्कृष्ट संख्यात मात्र होइ तहां प्रक्षेपक संबंधी वृद्धिका प्रमाण जोडैं लब्ध्यक्षर जो सर्वतैं जघन्य पर्याय नामा ज्ञान सो साधिक द्विगुणा हो है। कैसे? सो कहिये है—पूर्ववृद्धि भयें जो साधिक जघन्यज्ञान भया सो मूल स्थाप्या। बहुरि इहां संख्यात भागवृद्धिकी विवक्षा है तातैं याकौं उत्कृष्ट संख्यातका भाग दीयें प्रक्षेपक हो है। बहुरि गच्छमात्र प्रक्षेपक वृद्धि होइ सो इहां उत्कृष्ट संख्यातमात्र संख्यातवृद्धिके स्थान भये हैं तातैं उत्कृष्ट संख्यातमात्र प्रक्षेपक बधावने। तहां मूल साधिक जघन्य ज्ञान तो जुदा राखना अर तिस साधिक जघन्य ज्ञानकौं उत्कृष्ट संख्यातका भाग दीयें प्रक्षेपक हो है अर इहां उत्कृष्ट

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संख्यातमात्र प्रक्षेपक है तातैं उत्कृष्ट संख्यात हीका गुणकार भया सो गुणकार भागहारका अपवर्तन कीयें साधिक जघन्य रह्या याकौं जुदा राख्या हूवा साधिक जघन्यविषैं जोडैं जघन्यज्ञान साधिक दूणां हो है। बहुरि 'तत्ति चउत्थ' कहिये पूर्वोक्त संख्यातभाग वृद्धि संयुक्त उत्कृष्टसंख्यात मात्र स्थान तिनिकौं च्यारिका भाग देइ तिनविषैं तीनभाग प्रमाण स्थान भये तहां प्रक्षेपक अर प्रक्षेपक प्रक्षेपक इनि दोऊ वृद्धिनिकौं साधिक जघन्यविषैं जोडैं लब्ध्यक्षर ज्ञान साधिक दूणां हो है। कैसैं सो कहिये है—इहां पूर्ववृद्धि भयें जो साधिक जघन्य ज्ञान भया ताकौं दोयवार उत्कृष्ट संख्यातका भाग दीयें प्रक्षेपक प्रक्षेक हो है सो एक घाटि गच्छका एकवार संकलन धनमात्र प्रक्षेपक प्रक्षेपकनिकी वृद्धि इहां करनी। तहां पूर्वोक्त केशववर्णीकरि कह्या करण सूत्रके अनुसार तिस प्रक्षेपक प्रक्षेपक कौं एकघाटि उत्कृष्ट संख्यातका तीन चौथा भागकरि अर उत्कृष्ट संख्यातका तीन चौथा भागकरि गुणन करना अर दोयका एकका भाग देना। साधिक जघन्यकी सहनानी ऐसी है। जं। ऐसैं कीएं साधिक जघन्यकौं एक घाटि तीन गुणां उत्कृष्ट संख्यातका अर तीन गुणा उत्कृष्ट संख्यातका गुणकार भया। अर दोयबार उत्कृष्ट संख्यातका अर च्यारि दोय च्यारि एकका भाग हार भया तहां एक घाटि संबंधी ऋणराशि साधिक जघन्य कौं तीनका गुणकार अर उत्कृष्ट संख्यातका अर बत्तीसका भागहार कीएं हो है ताकौं जुदा राखि अवशेषका अपवर्तन कीएं साधिक जघन्यकौं नवका गुणकार बत्तीसका भागहार मात्र प्रमाण भया। इहां दोयबार उत्कृष्ट संख्यातका गुणकार अर भागहारका अपवर्तन कीया। गुणकार तीन तीन परस्परगुणैं नवका गुणकार भया च्यारि दोय च्यारि एक भागहारनिकौं परस्पर गुणैं बत्तीसका भागहार भया जातैं दोय तीन आदि राशि गुणकार भागहार विषैं होय तहां परस्पर गुणैं जेता प्रमाण होइ तितना गुणकार वा भागहार तहां जानना ऐसैं ही अन्यत्र भी समझना। बहुरि यामैं एक गुणकार साधिक जघन्यका बत्तीसवां भागमात्र है। ताकौं जुदां स्थापि अवशेष साधिक जघन्यकौं आठका गुणकार बत्तीसका भागहार रह्या ताका अपवर्तन कीएं साधिक जघन्यका चौथा भाग भया। बहुरि प्रक्षेपक गच्छप्रमाण है सो साधिक जघन्यकौं एकवार उत्कृष्टसंख्यातका भा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ग दीएं प्रक्षेपक होइ ताकौं उत्कृष्ट संख्यातका तीन चौथा भागकरि गुणना तहां उत्कृष्टसंख्यात गुणकार भागहारका अपवर्तन कीएं साधिक जघन्यका तीन चौथा भागमात्र प्रमाण भया। यामैं पूर्वोक्त एक चौथा भाग जोडें साधिक जघन्यमात्र वृद्धिका प्रमाण भया। यामैं मूल साधिक जघन्य जोडें लब्ध्यक्षर दूणा हो है। इहां प्रक्षेपक प्रक्षेपकसंबंधी ऋणराशि धनराशितैं संख्यातगुणा घाटि है तातैं साधिक जघन्यका बत्तीसवां भागमात्र धनराशिविषैं ऋणराशि घटावनेकौं किंचित् ऊनकरि अवशेष पूर्वोक्तविषैं जोडें साधिक दूणां हो है। बहुरि 'एकदालछप्पण्णं' कहिये पूर्वोक्त संख्यातभागवृद्धिसंयुक्त उत्कृष्टसंख्यातमात्र स्थाननिकौं छप्पनका भाग देइ तिनिविषैं इकतालीस भागमात्रस्थान भये तहां प्रक्षेपक अर प्रक्षेपकप्रक्षेपक संबंधी वृद्धि जोडें लब्ध्यक्षर दूणा हो है। कैसैं? सो कहिये है—साधिक जघन्यकौं उत्कृष्टसंख्यातका भाग दीएं प्रक्षेपक होइ सो प्रक्षेपक गच्छमात्र है तातैं याकौं उत्कृष्टसंख्यात इकतालीस छप्पनवां भागकरि गुणैं उत्कृष्टसंख्यातका अपवर्तन कीएं साधिक जघन्यकौं इकतालीसका गुणकार छप्पन भागहार हो है। बहुरि प्रक्षेपक प्रक्षेपक एक घाटि गच्छका एकवार संकलन धनमात्र है। सो पूर्वोक्त सूत्रके अनुसारि साधिकजघन्यकौं दोयवार उत्कृष्ट संख्यातका भाग दीए प्रक्षेपक प्रक्षेपक होइ ताकौं एकघाटि इकतालीसगुणां उत्कृष्ट संख्यात अर इकतालीस गुणा उत्कृष्ट संख्यातका गुणकार अर छप्पन दोय छप्पन एकका भागहार भया। इहां एक घाटि संबंधी ऋण साधिक जघन्यकौं इकतालीसका गुणकार अर उत्कृष्ट संख्यात एकसौ बारा छप्पनका भागहार मात्र जुदा स्थापि अवशेषविषैं दोयवार उत्कृष्ट संख्यातका अपवर्तन कीएं साधिक जघन्यकौं सोलासै इक्यासीका गुणकार अर एकसौ बारा गुणा छप्पनका भागहार हो है। इहां गुणकारविषैं इकतालीस इकतालीस परस्पर गुणैं सोलहसै इक्यासी भये हैं। बहुरि भागहारविषैं छप्पनकौं दोयकरि गुणैं एकसौ बारह भये। अगले छप्पनकौं एककरि गुणैं छप्पन भये जानने। बहुरि इहां गुणकारमैं एक जुदा स्थापिये ताका साधिक जघन्यकौं एकसौ बारह गुणा छप्पनका भागहार मात्र धन जानना। अवशेष साधिक जघन्यकौं सोलहसै अस्सीका गुणकार अर एकसौ बारा गुणां छप्पनका भागहार रह्या। तहां एकसौ बारहकरि अपवर्तन कीयें सा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धिक जघन्यकौं पंद्रहका गुणकार छप्पनका भागहार भया। यामैं प्रक्षेपक संबंधी प्रमाण जघन्यकौं इकतालीसका गुणकार अर छप्पनका भागहार मात्र मिलाएं अपवर्तन कीए साधिक जघन्य मात्र वृद्धिका प्रमाण भया। यामैं मूल साधिक जघन्य जोडैं लब्ध्यक्षर ज्ञान दूणां हो है इहां प्रक्षेपक प्रक्षेपक संबंधी पूर्वोक्त धनतैं ऋण संख्यात गुणा घाटि है तातैं किंचित ऊन कीया जो धन राशि ताकौं अधिक कीए साधिक दूणा हो है। बहुरि 'सत्त दशमं च भागं' वा कहिए अथवा संख्यात भागवृद्धि संयुक्त उत्कृष्ट संख्यात मात्र स्थानकनिकौं दशका भाग दीजिये तहां सात भाग मात्र स्थान भए। तहां प्रक्षेपक अर प्रक्षेपक प्रक्षेपक अर पिशुलि नामा तीन वृद्धि जोडैं साधिक जघन्य ज्ञान दूणा हो है। कैसैं? सो कहिए है—साधिक जघन्यकौं एकवार उत्कृष्ट संख्यातका भागदीये प्रक्षेपक हो है सो गच्छ मात्र है तातैं याकौं उत्कृष्ट संख्यातका सात दशवां भागकरि गुणैं उत्कृष्ट संख्यातका भाग दीएं साधिक जघन्यकौं सातका गुणकार अर दशका भागहार हो है। बहुरि प्रक्षेपक प्रक्षेपक एक घाटि गच्छका एकवार संकलनधनमात्र हो है सो साधिक जघन्यकौं दोयवार उत्कृष्ट संख्यातका भाग दीएं प्रक्षेपक प्रक्षेपक होइ ताकौं पूर्व सूत्रके अनुसारि एक घाटि सातगुणा उत्कृष्टसंख्यातका अर सातगुणा उत्कृष्टसंख्यातका तौ गुणकार अर दश दोय अर दश एकका भागहार भया। बहुरि पिशुलि दोय घाटि गच्छका दोयबार संकलनधनमात्र हो है। सो साधिक जघन्यकौं तीनवार उत्कृष्टसंख्यातका भाग दीएं पिशुलि हो है ताकौं पूर्व सूत्रके अनुसारि दोय घाटि सातगुणा उत्कृष्टसंख्यात अर एक घाटि सातगुणा उत्कृष्टसंख्यात सातगुणां उत्कृष्टसंख्यात ताका तौ गुणकार अर दश तीन दश दोय दश एकका भागहार भया। इनिविषैं पिशुलिका गुणकारविषैं दोय घटाया था तींहिं संबंधी प्रथम ऋणका प्रमाण साधिक जघन्यकौं दोयका अर एक घाटि सातगुणा उत्कृष्टसंख्यातका अर सातगुणा उत्कृष्टसंख्यातका गुणकार बहुरि दोयवार उत्कृष्टसंख्यातका अर छहका अर तीनबार दशका भागहार कीएं हो है। ताकौं जुदा स्थापि अवशेषका अपवर्तन कीएं साधिक जघन्यकौं एक घाटि सातगुणा उत्कृष्टसंख्यातका अर गुणचासका तौ गुणकार भया बहुरि उत्कृष्टसंख्यात छह हजारका भागहार हो है। इहां गुणकारविषैं एक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

घाटि है तीहिं संबंधी द्वितीय ऋणका प्रमाण साधिक जघन्यकौं गुणचासका गुणकार बहुरि उत्कृष्टसंख्यात अर छह हजारका भागहार कीएं हो है। ताकौं जुदा स्थापि अवशेषका अपवर्तन कीएं साधिक जघन्यकौं तीनसैं तियालीसका गुणकार अर छह हजारका भागहार हो है। इहां गुणकारमैं तेरह घटाइ जुदा स्थापिए तहां साधिक जघन्यकौं तेरहका गुणकार अर छह हजारका भागहार जानना। अवशेष साधिक जघन्यकौं तीनसै तीसका गुणकार अर छह हजारका भागहार रह्या तहां तीसकरि अपवर्तन कीएं साधिक जघन्यकौं ग्यारहका गुणकार दश गुणा वीसका भागहार भया सो एक जायगा स्थापिए। बहुरि इहां तेरह गुणकारमैंस्यों काढि जुदे स्थापि तीहिं संबंधी प्रमाणतैं प्रथम द्वितीय ऋणसंबंधी प्रमाण संख्यात गुणाघाटि है तातैं किंचित् ऊनकरि साधिक जघन्य किंचिदून तेरह गुणाकौं छह हजारका भाग दीएं इतना धन अवशेष रह्या सो जुदा स्थापिए। बहुरि प्रक्षेपक प्रक्षेपक संबंधी गुणकारविषैं एक घटाया था तिहिंसंबंधी ऋणका प्रमाण साधिक जघन्यकौं सातका गुणकार बहुरि उत्कृष्टसंख्यात अर दोयसैका भागहार किएं हो है। ताकौं जुदा स्थापि अवशेष पूर्वोक्त प्रमाण साधिक जघन्यकौं उत्कृष्टसंख्यातका गुणकार अर दोयवार सातका गुणकार अर उत्कृष्टसंख्यात दश दोय दश एकका भागहार ताका अपवतेन वा परस्पर गुणन कीएं साधिक जघन्यकौं गुणचासका गुणकार दोयसैका भागहार भया। यामैं पूर्वोक्त पिशुलि संबंधी ग्यारह गुणकार मिलाएं साधिक जघन्यकौं साठिका गुणकार दोयसैका भागहार भया। इहां वीसकरि अपवर्तन कीएं साधिक जघन्यकौं तीनका गुणकार दशका भाग हार भया। यामैं प्रक्षेपक संबंधी प्रमाण साधिक जघन्यकौं सातका गुणकार दशका भाग हार जोडैं दशकरि अपवर्तन कीएं वृद्धिका प्रमाण साधिक जघन्य हो है। यामैं मूल साधिक जघन्य जोडैं लब्ध्यक्षर दूणा हो है। बहुरि पूर्वैं पिशुलि संबंधी ऋण रहित धनविषैं किंचिदून तेरहका गुणकार था तिसविषैं प्रक्षेपक प्रक्षेपक संबंधी ऋण संख्यात गुणा घाटि है ताकौं घटावनेके अर्थि बहुरि किंचित् ऊन कीएं जो साधिक जघन्यकौं दोयवार किंचिदून तेरहका गुणकार अर छह हजारका भागहार भया सो इतना प्रमाण पूर्वोक्त दूणां लब्ध्यक्षरविषैं जोडैं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साधिक दूणां हो है। ऐसैं प्रथम तौ संख्यात भागवृद्धि युक्त जे स्थान तिनिविषैं उत्कृष्ट संख्यात मात्र स्थाननिका सात दशवां भाग प्रमाण स्थान पिछुलि वृद्धि पर्यंत भए लब्ध्यक्षर ज्ञान दूणां हो है। बहुरि तिसहीका इकतालीस छप्पनवां भाग प्रमाण स्थान प्रक्षेपक प्रक्षेपक वृद्धि पर्यंत भएं लब्ध्यक्षर ज्ञान दूणा हो है। बहुरि आगैं भी संख्यात भागवृद्धिका पहिला स्थानतैं लगाइ उत्कृष्ट संख्यातमात्र स्थाननिका तीन चौथा भाग मात्र स्थान प्रक्षेपक प्रक्षेपक वृद्धि पर्यंत भएं लब्ध्यक्षरज्ञान दूणां हो है। बहुरि तैसैंही संख्यात वृद्धिका पहिला स्थानतैं लगाइ उत्कृष्ट संख्यातमात्र स्थान प्रक्षेपक वृद्धिपर्यंत भएं लब्ध्यक्षरज्ञान दूणा हो है। इहां प्रश्न-जो साधिक जघन्य ज्ञान दूणां भया सो साधिक जघन्य ज्ञानतौ पर्याय समास ज्ञानका मध्य भेद है इहां लब्ध्यक्षर ज्ञान दूणा कैसे कह्या है? ताका समाधान–जो उपचार करि पर्याय समास ज्ञानके भेदकौं भी लब्ध्यक्षर कहिए जातैं मुख्यपनैं लब्ध्यक्षर है नाम जाका ऐसा जो पर्यायज्ञान ताका समीपवर्ती है। भावार्थ इहां ऐसा–जो लब्ध्यक्षर नामतैं इहां पर्याय समासका यथासंभव मध्यभेदका ग्रहण करना। बहुरि चकार करि गत्वा कहिए ऐसैं स्थान प्रति प्राप्त होइ लब्ध्यक्षर ज्ञान दूणा हो है ऐसा अर्थ जानना॥ ३३१॥

एवं असंखलोगा अणक्खरप्पे हवंति छट्ठाणा।
ते पज्जायसमासा अक्खरगं उवरि वोच्छामि॥ ३३२॥

एवमसंख्यलोकाः अनक्षरात्मके भवंति षट्स्थानानि।
ते पर्यायसमासा अक्षरगमुपरि वक्ष्यामि॥ ३३२॥

जी० प्र०–एवमुक्तप्रकारेण अनक्षरात्मके पर्यायसमासज्ञानविकल्पसमूहे षट्स्थानवारा असंख्यातलोकमात्रा भवंति तद्यथा–यद्येतावतामनक्षरात्मकज्ञानविकल्पानां एकं षट्स्थानं लभ्यते तदा एतावतामनक्षरात्मकश्रुतज्ञानविकल्पानामसंख्यातलोकमात्राणां कति षट्स्थानवारा लभ्यंते। इति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१– १– १– १– १–
त्रैराशिकं कृत्वा प्र २ २ २ २ २ फ १ । इ ≡ a प्रमाणराशिना इच्छाराशौ भक्ते यल्लब्धं तावंतः षट्स्थानवारा भवंति
a a a a a

≡ a
१– १– १– १– १–
२ २ २ २ २
a a a a a

एवमनेन प्रकारेण असंख्यातलोकवारषट्स्थानवृद्धिसंवृद्धा अनंतभागवृद्धियुक्तजघन्यज्ञानविकल्पमादिं कृत्वा सर्वचरमोर्वंकवृद्धियुक्तसर्वोत्कृष्टज्ञानावसाना असंख्यातलोकमात्रा ज्ञानविकल्पा यावंतस्तावंतः पर्यायसमासज्ञानविकल्पा भवंति इत्यर्थः । इत उपरि अक्षरगतं श्रुतज्ञानं वक्ष्यामि ॥ ३३२ ॥ अथाक्षरगतं श्रुतज्ञानं प्ररूपयति—

मं० प्र०—एवमुक्तप्रकारेण अनक्षरात्मके पर्यायसमासज्ञानविकल्पसमूहे षट्स्थानवाराः असंख्यातलोकमात्रा भवंति । तद्यथा—एतावत्सु ज्ञानविकल्पेषु

१ १ १ १ १
प्र २ २ २ २ २ यद्येकः षट्स्थानवारो लभ्यते । फ १ । तदा एतावत्सु असंख्यातलोकमात्रेषु अनक्षरात्मकज्ञानविकल्पेषु । इ ≡ a । कियंतः ष-
a a a a a

ट्स्थानवारा लभ्यंते इति त्रैराशिकेन लब्धाः षट्स्थानवाराः अप्यसंख्यातलोकमात्रा एव ≡ a रूपाधिकांगुलासंख्यातभागानां घनवर्गयोर्गुण-
१ १ १ १ १
२ २ २ २ २
a a a a a

कारमात्रेण भागहारेण लोकस्य गुणकारे असंख्याते अपवर्तितेऽपि तद्बहुत्वमाहात्म्येन असंख्यातलोकत्वस्य संभवात् । एवमुक्तप्रकारेण असंख्यातलोकमात्रवारषट्स्थानवृद्धिभिः संवृद्धा अनंतभागवृद्धियुक्तजघन्यज्ञानविकल्पादारभ्य सर्वचरमोर्वंकवृद्धियुक्तसर्वोत्कृष्टज्ञानपर्यंताः असंख्यातलोकमात्रास्ते पर्यायसमासाः-पर्यायसमासज्ञानविकल्पा इत्यर्थः । उपरि—इतः परं, अक्षरगतं श्रुतज्ञानं वक्ष्यामि ॥ ३३२ ॥ अथाक्षरश्रुतज्ञानं प्ररूपयति—

स० चं०—याप्रकार अनक्षरात्मक जो पर्यायसमास ज्ञानके भेद तिनिविषैं षट्स्थानपातितवृद्धि असंख्यातलोकमात्र विरियां हो है । सो ही कहिए है जो एक अधिक सूच्यंगुलके असंख्यातवां भागका वर्गकरि तिसहीके घनकौं गुणैं जो प्रमाण होइ तितने भेदनिविषैं एकवार षट्स्थान होइ तौ असंख्यातलोकप्रमाण पर्यायसमासज्ञा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नके भेदनिविषैं केतीवार षट्स्थान होइ ऐसैं त्रैराशिक करना। तहां प्रमाणराशि एक अधिक सूच्यंगुलके असंख्यातवां भागका वर्गकरि गुणित ताहीका घनप्रमाण अर फलराशि एक इच्छाराशि असंख्यातलोक पर्याय समासके स्थानमात्र तहां फलकरि इच्छाकौं गुणि प्रमाणका भाग दीएं जेता लब्धराशिका प्रमाण आवै तितनीवार सर्व भेदनिविषैं षट्स्थानपतित वृद्धि हो है सो भी असंख्यातलोकमात्र हो है जातैं असंख्यातके भेद घने हैं तातैं हीनाधिक होतैं भी असंख्यातलोक ही कहिए। याप्रकार असंख्यातलोकमात्र षट्स्थान वृद्धिकरि वर्धमान जघन्य ज्ञानतैं अनंतभागवृद्धि लीएं प्रथमस्थानतैं लगाइ अंतका षट्स्थानविषैं अंतका अनंत भागवृद्धि लीएं स्थानपर्यंत जेते ज्ञानके भेद ते सर्व पर्याय समासज्ञानके भेद जानने ॥ ३३२ ॥ अब इहांतैं आगैं अक्षरात्मक श्रुतज्ञानकौं कहै हैं—

चरिमुव्वंकेणवहिदअत्थक्खरगुणिदचरिममुव्वंकं ।
अत्थक्खरं तु णाणं होदित्ति जिणेहि णिद्दिट्ठं॥ ३३३ ॥

चरमोर्वंकेणावहितार्थाक्षरगुणितचरमोर्वंकं ।
अर्थाक्षरं तु ज्ञानं भवतीति जिनैर्निर्दिष्टं ॥ ३३३ ॥

जी० प्र०—पर्यायसमासज्ञानविकल्पसंबंधिषु असंख्यातलोकमात्रवारषट्स्थानेषु भागवृद्धिगुणवृद्धियुक्तेषु तद्वृद्धिनिमित्तसंख्यातासंख्यातानंता अवस्थिताः प्रतिनियतप्रमाणा भवंति इति चरमषट्स्थानस्य चरमोर्वंकतोऽग्रेतनमष्टांकवृद्धियुक्तस्थानं अर्थाक्षरश्रुतज्ञानं भवति इति तत्पूर्वकप्रतिनियताष्टांकप्रमाणं अत्रतनाष्टांकविलक्षणमिति कथयति—

असंख्यातलोकमात्रवारषट्स्थानेषु यच्चरमं षट्स्थानं तस्य चरमोर्वंकरूपवृद्धियुक्तसर्वोत्कृष्टपर्यायसमासज्ञानं अष्टांकेन एकवारं गुणिते समुत्पन्नं अर्थाक्षरज्ञानं अष्टांकवृद्धियुक्तस्थानमित्यर्थः तत् कियद्? रूपोनैकट्ठमात्राऽपुनरुक्ताक्षरसंदर्भरूपद्वादशांगश्रुतस्कंधजनितार्थज्ञानं श्रुतकेवलमित्युच्यते। के। इदं श्रुतकेवलज्ञानं रूपोनैकट्ठमात्रापुनरुक्ताक्षरप्रमाणेन भक्तं सत् अर्थाक्षररूपमेकाक्षरप्रमाणं भवति के इदमर्थाक्षरं सर्वोत्कृष्टपर्यायसमा-

१ॅ
१८=

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सज्ञानरूपोर्वंकेन भक्तं सच्चरमोर्वंकगुणिताष्टांकप्रमाणं भवति ततः कारणादिदानीं तदर्थाक्षरश्रुतज्ञानोत्पत्तिनिमित्तं चरमोर्वंकापहृताक्षररूपाष्टांकेन गुणय-रूपे चरमोर्वंके गुणिते तु-पुनः अर्थाक्षरज्ञानं युक्तियुक्तं भवति इति जिनैर्निर्दिष्टं । इदमंत्यदीपकं इति सर्वाण्यपि चतुरंकाद्यष्टांकावसानानि षट्स्थानानां भागवृद्धियुक्तस्थानानि गुणवृद्धियुक्तस्थानानि च स्वस्वपूर्वानंतरोर्वंकवृद्धियुक्तस्थानेन भक्त्वा पुनस्तेनैव गुणयित्वा यथासंख्यं चतुरंकपंचांकषं-डंकसप्तांकाष्टांकवृद्धियुक्तस्थानानि उत्पद्यंते, न च केवलं पर्यायजघन्यज्ञानमेव भक्त्वा गुणयित्वा उत्पद्यत इति निश्चेतव्यं, इदमर्थाक्षरज्ञानं के उ अपव-

१ ^
१८ = उ

र्तितं सत् श्रुतकेवलज्ञानसंख्यातभागमात्रं अर्थाक्षरज्ञानप्रमाणं भवति के अक्षराज्जातं ज्ञानं अक्षरज्ञानं अर्थविषयमर्थग्राहकं अर्थाक्षरज्ञानं अथवा

१ ^
१८ =

अर्यते गम्यते ज्ञायते इत्यर्थः, न क्षरति इत्यक्षरं द्रव्यरूपतया विनाशाभावात् । अर्थश्चासावक्षरं च तदर्थाक्षरं । अथवा अर्यते गम्यते श्रुतकेवलस्य संख्येयभागत्वेन निश्चीयते इत्यर्थः, अर्थश्चासावक्षरं च तदर्थाक्षरं तस्माज्जातं ज्ञानमर्थाक्षरज्ञानं । अथवा त्रिविधमक्षरं लब्ध्यक्षरं निर्वृत्त्यक्षरं स्थाप-नाक्षरं चेति । तत्र पर्यायज्ञानावरणप्रभृतिश्रुतकेवलज्ञानावरणपर्यंतक्षयोपशमादुद्भूतात्मनोऽर्थग्रहणशक्तिर्लब्धिः भावेंद्रियं, तद्रूपमक्षरं लब्ध्यक्षरं, अ-क्षरज्ञानोत्पत्तिहेतुत्वात् कंठोष्ठताल्वादिस्थानस्पष्टतादिकरणप्रयत्ननिर्वर्त्यमानस्वरूपं अकारादिककारादिस्वरव्यंजनरूपं मूलवर्णतत्संयोगादिसंस्थानं निर्वृत्त्यक्षरं । पुस्तकेषु तत्तद्देशानुरूपतया लिखितसंस्थानं स्थापनाक्षरं । एवंविधैकाक्षरश्रवणसंजातार्थज्ञानमेकाक्षरश्रुतज्ञानमिति जिनैः कथितत्वात् किंचित् प्रतिपादितं ॥ ३३३ ॥ अथ श्रुतनिबद्धं श्रुतविषयं च प्ररूपयति—

मं० प्र०—असंख्यातलोकमात्रवारषट्स्थानानां यच्चरमं षट्स्थानं तस्य चरमोर्वंकवृद्धियुक्तसर्वोत्कृष्टपर्यायसमासज्ञानादनंतगुणमर्थाक्षरज्ञानं भवति । तत्किं-विशिष्टं ? रूपोनैकट्ठमात्रापुनरुक्ताक्षरसंदर्भरूपद्वादशांगश्रुतस्कंधजनितार्थज्ञानं श्रुतकेवलमित्युच्यते । के । तस्मिन् रूपोनैकट्ठमात्राक्षरप्रमाणेन संख्येयेन

भक्ते यल्लब्धं तदर्थाक्षरज्ञानं के इदमेव चरमोर्वंकेण भक्तं उत्कृष्टपर्यायसमासज्ञानस्य चरमोर्वंकनाम्नः अनंतात्मको गुणकारो भवति के = अनेन च-

१ ^
१८ =

१ ^
१८ = उ

रमोर्वंके गुणिते ईदृशं भवति के उ इदमपवर्तितं श्रुतकेवलस्य संख्येयभागमात्रमर्थाक्षरज्ञानमित्युच्यते अक्षराज्जातं ज्ञानं अक्षरज्ञानं अर्थविषयं अर्थस्व-

१ ^
१८ = ठ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ग्राहकं अर्थाक्षरज्ञानं । अर्यते गम्यते ज्ञायते इत्यर्थः, न क्षरतीत्यक्षरं द्रव्यरूपतया विनाशाभावात् । एतावतामक्षराणां प्र १८= यदि श्रुतकेवलज्ञानं भवति । फ । के । तदा एकस्याक्षरस्य कीदृशं ज्ञानं भवेत् । इ १ । इति त्रैराशिकेन लब्धमर्थाक्षरज्ञानं के, अथवा अर्यते—गम्यते श्रुतकेवलस्य संख्येयभागत्वेन निश्चीयते इ-

१ ०
१८=

त्यर्थः, अर्थश्चासौ अक्षरं च तदर्थाक्षरं, तस्माज्जातं अर्थाक्षरज्ञानं । अथवा त्रिविधमक्षरं लब्ध्यक्षरं निर्वृत्त्यक्षरं स्थापनाक्षरं चेति । तत्र पर्यायज्ञानावरणादिश्रुतकेवलज्ञानावरणपर्यंतक्षयोपशमोद्भूता आत्मनोऽर्थग्रहणशक्तिर्लब्धिः भावेंद्रियं । तद्रूपमक्षरं लब्ध्यक्षरं अक्षरज्ञानोत्पत्तिहेतुत्वात् कंठोष्ठताल्वादिस्थानस्पृष्टतादिकरणप्रयत्ननिर्वर्त्यमानस्वरूपं अकारादिककारादिस्वरव्यंजनरूपं मूलवर्णतत्संयोगादिरूस्थानं निर्वृत्त्यक्षरं । पुस्तकेषु तत्तद्देशानुरूपतया लिखितसंस्थानं स्थापनाक्षरं । एवंविधैकाक्षरश्रवणसंजातमर्थज्ञानं अक्षरश्रुतज्ञानमिति । जिनैरर्हदादिभिर्निर्दिष्टं मया तदनुसारेण किंचित्प्रदर्शितमिति सैद्धांतचक्रवर्त्यभिप्रायः ॥३३३॥ अथ श्रीमाधवचंद्रत्रैविद्यदेवाः श्रुतानिबद्धविषयप्रमाणं प्ररूपयंति—

स० चं०—पर्यायसमासज्ञानविषैं असंख्यातलोकमात्र षट्स्थान कहे तिनिविषैं वृद्धिकौं कारण संख्यात असंख्यात अनंत ते अवस्थित हैं-नियमरूप प्रमाण धरे हैं । संख्यातका प्रमाण उत्कृष्टसंख्यातमात्र, असंख्यातका असंख्यातलोकमात्र, अनंतका प्रमाण जीवराशिमात्र जानना । बहुरि अंत का षट्स्थानविषैं अंतका उर्वंक जो अनंतभागवृद्धि ताकौं लीएं पर्यायसमासज्ञानका सर्वोत्कृष्ट भेद तातैं आगैं अष्टांक कहिए अनंतगुणवृद्धिसंयुक्त जो ज्ञानका स्थान सो अर्थाक्षर श्रुतज्ञान है । पूर्वैं अष्टांकका प्रमाण नियमरूप जीवराशिमात्र गुणा था इहां अष्टांकका प्रमाण सो न जानना अन्य जानना । सोई कहिए है—असंख्यातलोकमात्र षट्स्थाननिविषैं जो अंतका षट्स्थान ताका अंतका ऊर्वंक वृद्धिलीएं जो सर्वोत्कृष्ट पर्यायसमासज्ञान ताकौं एकवार अष्टांककरि गुणैं अर्थाक्षर ज्ञान हो है । तातैं याकौं अष्टांक वृद्धि युक्त स्थान कहिए सो अष्टांक कितने प्रमाण लीएं हो है सो कहिए है श्रुतकेवलज्ञान एक घाटि एकट्ठी प्रमाण अपुनरुक्त अक्षरानिका समूह रूप है ताकौं एक घाटि एकट्ठीका भाग दीएं एक अक्षरका प्रमाण आवै है । तहां जेता ज्ञानके अविभाग प्रतिच्छेदनिका प्रमाण है ताकौं सर्वोत्कृष्ट पर्याय समास ज्ञानका भेदरूप ऊर्वंकके अविभाग प्रतिच्छेदनिके प्रमाणका भाग दीएं जेता प्रमाण आवै सोई इहां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अष्टांकका प्रमाण जानना तातैं अब तिस अर्थाक्षर ज्ञानकी उत्पत्तिकौं कारण जो अंतका ऊर्वंक ताकरि भाजित जो अर्थाक्षर तीहि प्रमाण अष्टांककरि गुण्य जो अंतका ऊर्वंक ताकौं गुणें अर्थाक्षर ज्ञान हो है। इह कथन युक्त है। ऐसा जिनदेव कह्या है। बहुरि यह कथन अंतविषैं धर्‍या हूवा दीपक समान जानना तातैं ऐसैं ही पूर्वैं भी चतुरंक आदि अष्टांक पर्यंत षट् स्थाननिके भागवृद्धियुक्त वा गुणवृद्धियुक्त जे स्थान हैं ते सर्व अपना अपना पूर्व ऊर्वंक युक्त स्थानका भाग दीएं जेता प्रमाण आवै तितने प्रमाणकरि तिस पूर्वस्थानतैं गुणित जानने। ऐसैं श्रुतकेवलज्ञानका संख्यातवां भागमात्र अर्थाक्षर श्रुतज्ञान जानना। अर्थका ग्राहक अक्षरतैं उत्पन्न भया जो ज्ञान सो अर्थाक्षर ज्ञान कहिए। अथवा अर्यंते कहिए जानिए सो अर्थ अर द्रव्यकरि न विनशै सो अक्षर जो अर्थ सोई अक्षर ताका जो ज्ञान सो अर्थाक्षरज्ञान कहिये। अथवा अर्यंते कहिये श्रुतकेवलज्ञानका संख्यातवां भागकरि जाका निश्चय कीजिये ऐसा एक अक्षर ताका ज्ञान सो अर्थाक्षरज्ञान कहिये। अथवा अक्षर तीनप्रकार है लब्धि अक्षर १ निर्वृत्ति अक्षर २ स्थापना अक्षर ३। तहां पर्यायज्ञानावरण श्रुतकेवलज्ञानावरणपर्यंतके क्षयोपशमतैं उत्पन्न भई जो पदार्थ जाननेकी शक्ति सो लब्धिरूप भाव इंद्रिय तीहिं स्वरूप जो अक्षर कहियें अविनाश सो लब्धि अक्षर कहिये जातैं अक्षरज्ञान उपजनेकौं कारण है। बहुरि कंठ होठ तालवा आदि अक्षर बुलावनेके स्थान अर होठनिका परस्पर मिलना सो स्पृष्टता ताकौं आदि देकरि प्रयत्न तीहिंकरि उत्पन्न भया शब्दरूप अकारादि स्वर अर ककारादिक व्यंजन अर संयोगी अक्षर सो निर्वृत्ति अक्षर कहिये। बहुरि पुस्तकादिविषैं निज देशकी प्रवृत्तिके अनुसारि अकारादिकनिका आकारकरि लिखिए सो स्थापना अक्षर कहिये। इसप्रकार जो एक अक्षर ताके सुननेतैं भया जो अर्थका ज्ञान सो अक्षर श्रुतज्ञान है ऐसा जिनदेवने कह्या है उनहीके अनुसारि मैं भी कुछ कह्या है ॥ ३३३ ॥ आगैं श्रीमाधवचंद्र त्रैविद्यदेव शास्त्रके विषयका प्रमाण कहैं हैं—

पण्णवणिज्जा भावा अणंतभागो दु अणभिलप्पाणं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पण्णवणिज्जाणं पुण अणंतभागो सुदणिबद्धो ॥ ३३४ ॥

प्रज्ञापनीया भावा अनंतभागस्तु अनभिलाप्यानां ।
प्रज्ञापनीयानां पुनः अनंतभागः श्रुतनिबद्धः ॥ ३३४ ॥

जी० प्र०—अनभिलाप्यानां अवाग्विषयाणां केवलं केवलज्ञानगोचराणां भावानां जीवाद्यर्थानां अनंतैकभागमात्राः भावाः--जीवाद्यर्थाः, प्रज्ञापनीयाः तीर्थकरसातिशयदिव्यध्वनिप्रतिपाद्याः भवंति । पुनः प्रज्ञापनीयानां भावानां जीवाद्यर्थानां अनंतैकभागः श्रुतनिबद्धः द्वादशांगश्रुतस्कंधस्य निबद्धः विषयतया नियमितः श्रुतकेवलिनामपि अगोचरार्थप्रतिपादनशक्तिर्दिव्यध्वनेरस्ति तद्दिव्यध्वनेरपि अगोचरजीवाद्यर्थग्रहणशक्तिः केवलज्ञानेऽस्तीत्यर्थः ।

अवाच्यानामनंतांशो भावाः प्रज्ञाप्यनामकाः । प्रज्ञाप्यमानभावानां अनंतांशः श्रुतोदितः ॥ १ ॥

॥ ३३४ ॥ अथ गाथाद्वयेन शास्त्रकारः अक्षरसमासं कथयति—

मं० प्र०—अनभिलाप्यानां–अवाग्गोचराणां केवलज्ञानविषयाणां, भावानां जीवाद्यर्थानां अनंतैकभागमात्राः भावाः प्रज्ञापनीयाः–तीर्थकरसातिशयदिव्यध्वनिप्रतिपाद्या भवंति । पुनः प्रज्ञापनीयानां–सातिशयदिव्यध्वनिप्रतिपाद्यानां अनंतैकभागः श्रुतस्य–द्वादशांगश्रुतस्कंधस्य, निबद्धः-विषयतया नियमतो भवति । श्रुतकेवलिनामप्यगोचरार्थप्रतिपादनशक्तिर्दिव्यध्वनेरस्तीत्यर्थः । तुशब्दो विशेषार्थः ॥ ३३४ ॥ अथ गाथाद्वयेन शास्त्रकारः अक्षरसमासं प्ररूपयति—

स० चं०—अनभिलाप्यानां कहिए वचन गोचर नाहीं केवलज्ञानहीके गोचर जे भाव कहिए जीवादिक पदार्थ तिनके अनंतवे भागमात्र जीवादिक अर्थ ते प्रज्ञापनीया कहिए तीर्थंकरकी सातिशय दिव्यध्वनिकरि कहनेमें आवैं ऐसे हैं । बहुरि तीर्थंकरकी दिव्यध्वनिकरि पदार्थ कहनेमें आवै हैं तिनके अनंतवे भागमात्र द्वादशांग श्रुतविषैं व्याख्यान कीजिये है । जो श्रुतकेवलीकौं भी गोचर नाहीं ऐसा पदार्थ कहनेकी शक्ति दिव्यध्वनिविषैं पाइए है । बहुरि जो दिव्यध्वनिकरि भी न कह्या जाय तिस अर्थकौं जाननेकी शक्ति केवलज्ञानविषैं पाइए है ऐसा जानना ॥ ३३४ ॥ आगैं दोयगाथानिकरि अक्षरसमासकौं प्ररूपैं हैं–

एयक्खरादु उवरिं एगेगेणक्खरेण वड्ढंतो ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संखेज्जे खलु उड्ढे पदणामं होदि सुदणाणं ॥ ३३५ ॥

एकाक्षरात्तूपरि एकैकेनाक्षरेण वर्धमानाः ।
संख्येये खलु वृद्धे पदनाम भवति श्रुतज्ञानं ॥ ३३५ ॥

जी० प्र०—एकाक्षरजनितार्थज्ञानस्योपरि तु-पुनः पूर्वोक्तषट्स्थानवृद्धिक्रमरहिततया एकैकाक्षरेणैव वर्धमानाः द्व्यक्षरत्र्यक्षरादिरूपोनैकपदाक्षरमात्रपर्यंताक्षरसमुदायश्रवणसंजनिताक्षरसमासज्ञानविकल्पाः संख्येयाः द्विरूपोनैकपदाक्षरप्रमितागताः तदा अनंतरस्योपरि एकाक्षरवृद्धौ सत्यां पदनाम श्रुतज्ञानं भवति ॥ ३३५ ॥

मं० प्र०—एकाक्षरस्य—एकाक्षरजनितार्थज्ञानस्योपरि तु—पुनः पूर्ववत् षट्स्थानवृद्धिं विना एकैकेनाक्षरेण वर्धमानेषु द्व्यक्षरत्र्यक्षरादिरूपोनैकपदाक्षरमात्रपर्यंत समुदायश्रवणजनिताक्षरसमासज्ञानविकल्पेषु संख्येयेषु द्विरूपोनैकपदाक्षरप्रमितेषु । १६३४८३०७८८८ गतेषु तदनंतरं उत्कृष्टाक्षरसमासविकल्पस्योपरि एकस्मिन्नक्षरे वृद्धे सति पदनाम—पदसंज्ञकं श्रुतज्ञानं भवति ॥ ३३५ ॥

स० चं०——एक अक्षरतैं उपज्या जो ज्ञान ताके ऊपरि पूर्वोक्त षट्स्थानपतित वृद्धिका अनुक्रम विना एक एक अक्षर बंधता सो दोय अक्षर तीन अक्षर च्यारि अक्षर इत्यादिक एक घाटि पदका अक्षरपर्यंत अक्षरसमुदायका सुननेकरि उपजैं ऐसे अक्षरसमासके भेद संख्यात जानने। ते दोय घाटि पदके अक्षर जेते होंइ तितने हैं। बहुरि इसके अनंतरि उत्कृष्ट अक्षरसमासकेविषैं एक अक्षरबधतैं पदनामा श्रुतज्ञान हो है ॥ ३३५ ॥

सोलससयचउतीसा कोडी तियसीदिलक्खयं चेव ।
सत्तसहस्साट्ठसया अट्ठासीदी य पदवण्णा ॥ ३३६ ॥

षोडशशतचतुस्त्रिंशत्कोट्यः त्र्यशीतिलक्षकं चैव ।
सप्तसहस्राण्यष्टशतानि अष्टाशीतिश्च पदवर्णाः ॥ ३३६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी० प्र०—अत्र अर्थपदं प्रमाणपदं मध्यमपदं चेति पदं त्रिविधं तत्र यावताक्षरसमूहेन विवक्षितार्थो ज्ञायते तदर्थपदं दंडेन शालिभ्यो गां निवारय, त्वमग्निमानय इत्यादयः। अष्टाक्षरादिसंख्यया निष्पन्नोऽक्षरसमूहः प्रमाणपदं 'नमः श्रीवर्धमानाय' इत्यादि। षोडशशतचतुस्त्रिंशत्कोट्यः त्र्यशीतिलक्षाणि सप्तसहस्राणि अष्टशतानि अष्टाशीतिश्च पदवर्णाः इत्येतद्गाथोक्तप्रमाणैकपदाऽपुनरुक्ताक्षरसमूहो मध्यमपदं १६३४८३०७८८८। हीनाधिकयोः प्रमाणपदार्थपदयोर्मध्ये एतदुक्तसंख्यापरिमिताक्षरसमूहे वर्तमानत्वात् मध्यमपदं इत्यन्वर्थतया परमागमे तदेव परिगृहीतं, प्रमाणपदार्थे तु लोकव्यवहारे परिगृहीते। अत एव लोकोत्तरे परमागमे मध्यमपदमेव पदमिति व्यवह्रियते ॥ ३३६ ॥ अथ संघातश्रुतज्ञानं प्ररूपयति—

मं० प्र०—त्रिविधं पदं-अर्थपदं प्रमाणपदं मध्यमपदमिति, तत्र यावता अक्षरसमूहेन विवक्षितार्थो ज्ञायते तदर्थपदं 'गामभ्याज शुक्लां दंडेन, अग्निमानय' इत्यादि। प्रमाणेन अष्टाक्षरादिसंख्यया निष्पन्नः अक्षरसमूहः प्रमाणपदं नमः श्रीवर्धमानाय इत्यादि। षोडशशतचतुस्त्रिंशत्कोट्यः त्र्यशीतिर्लक्षाणि सप्तसहस्राणि अष्टशतानि अष्टाशीतिश्च एकस्य पदस्य वर्णाः अपुनरुक्ताक्षराणीति गाथोक्तप्रमाणाक्षरसमूहो मध्यमपदं। १६३४८३०७८८८। प्रमाणपदार्थपदयोर्हीनाधिकमानयोर्मध्ये उक्तसंख्याक्षरपरिमितसमूहे वर्तमानत्वात् मध्यमपदं इत्यन्वर्थतया परमागमे तदेव परिगृहीतं। प्रमाणपदार्थपदे तु लोकव्यवहारे परिगृहीते, अत एव लोकोत्तरे परमागमे मध्यपदमेव 'पदं' इति व्यवह्रियते ॥ ३३६ ॥ अथ संघातश्रुतज्ञानं प्ररूपयति—

स० चं०—पद तीन प्रकार है अर्थपद १ प्रमाणपद २ मध्यमपद ३ तहां जिहिं अक्षर समूहकरि विवक्षित अर्थ जानिये सो तौ अर्थपद कहिये जैसें कह्या कि 'गामभ्याज शुक्लां दंडेन' इहां इस शब्दके च्यारि पद हैं—गां १ अभ्याज २ शुक्लां ३ दंडेन ४ ये च्यारि पद भए। अर्थ याका यहु जो—गायकौं घेरि सुफेदकौं दंड करि। ऐसें कह्या कि 'अग्निमानय' इहां दोय पद भए अग्निं १ आनय २। अर्थ यहु जो—अग्निको ल्याव। ऐसें विवक्षित अर्थके अर्थी एक दोय आदि अक्षरनिका समूह ताकौं अर्थपद कहिये। बहुरि प्रमाण जो संख्या तिहिंनैं लीएं जो पद कहिये अक्षर समूह ताकौं प्रमाण पद कहिये। जैसें अनुष्टुप छंदके च्यारि पद तहां एक पदके आठ अक्षर होंइ। 'नमः श्रीवर्द्धमानाय' यहु एक पद भया। याका अर्थ यहु जो श्रीवर्धमान स्वामीके अर्थि नमस्कार होहु ऐसें प्रमाणपद जानना। बहुरि सोलासै चौंतीस कोडि तियासी लाख सात हजार आठसै अठ्यासी। १६३४८३०७८८८। गाथाविषैं कहे अपुनरुक्त अक्षर तिनिका समूह सो मध्यमपद कहिये। इनिविषैं अर्थपद अर प्रमाण पद तौ हीन अधिक अक्षरनिका प्रमाणकौं लीएं लोकव्यवहारकरि ग्रहण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कीएं हैं तातैं लोकोत्तर परमागमविषैं गाथात्रिषैं कही जो संख्या तीहिंविषैं वर्तमान जो मध्यमपद ताहीका ग्रहण जानना ॥ ३३६ ॥ आगैं संघातनामा श्रुतज्ञानकौं प्ररूपैं हैं—

एयपदादो उवरिं एगेगेणक्खरेण वड्ढंतो।
संखेज्जसहस्सपदे उड्ढे संघादणाम सुदं ॥ ३३७ ॥

एकपदादुपरि एकैकेनाक्षरेण वर्धमानाः।
संख्यातसहस्रपदे वृद्धे संघातनाम श्रुतं ॥ ३३७ ॥

जी० प्र०—एकपदस्य उक्तप्रमाणाक्षरसमूहोपरि एकैकाक्षरवृद्ध्या एकपदाक्षरमात्रेषु पदसमासज्ञानविकल्पेषु गतेषु द्विगुणपदज्ञानं भवति। तस्योपरि पुनरपि एकपदाक्षरमात्रेषु पदसमासज्ञानविकल्पेषु गतेषु त्रिगुणपदज्ञानं भवति एवं प्रत्येकमेकपदाक्षरमात्रविकल्पसहचरितेषु चतुर्गुणपदादिषु संख्यातसहस्रगुणितपदमात्रेषु रूपोनेषु पदसमासज्ञानविकल्पेषु गतेषु—

१ २   १   २   १   २   १ ᳐
प। प प। ० ०। प २। प २। प २। ० ०। प ३। प ३। प ३ ० ० ० प १ ० ० ० ७ ऊ
१– १ ᳐
१ ६=   १ ६=   १ ६= १ ० ० ० ७

चरमस्य पदसमासज्ञानोत्कृष्टविकल्पस्य उपरि एकस्मिन्नक्षरे वृद्धे सति संघातश्रुतज्ञानं भवति १६=१०००७ तच्चतसृणां गतीनां मध्ये एकतमगतिस्वरूपनिरूपकमध्यमपदसमुदायरूपसंघातश्रवणजनितार्थज्ञानं ॥ ३३७ ॥ अथ प्रतिपत्तिकश्रुतज्ञानस्वरूपं निरूपयति—

मं० प्र०—एकपदस्य–उक्तप्रमाणाक्षरसमूहस्य, उपरि एकैकाक्षरवृद्ध्या एकपदाक्षरमात्रेषु पदसमासज्ञानविकल्पेषु गतेषु द्विगुणपदज्ञानं भवति। तस्योपरि पुनरपि एकपदाक्षरमात्रेषु पदसमासज्ञानविकल्पेषु गतेषु त्रिगुणपदज्ञानं भवति एवं प्रत्येकमेकपदाक्षरमात्रविकल्पसहचरितेषु चतुर्गुणपदादिषु संख्यातसहस्रगुणितपदमात्रेषु रूपोनेषु पदसमासज्ञानविकल्पेषु गतेषु—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१ २ १ २ १ १ १ ^
प। प। प० ०। प२। प२। प२।० ० पप३। प३। ० ० ० ० प१ ० ० ० ७। ३
१— १ ^
१६= १६= १६=१०००७

चरमस्य पदसमासज्ञानोत्कृष्टविकल्पस्योपरि एकस्मिन्नक्षरे वृद्धे सति संघातश्रुतज्ञानं भवति। १६=१०००७। तच्च चतसृणां गतीनां मध्ये एकतमगतिस्वरूपनिरूपकमध्यमपदसमुदायरूपसंघातश्रवणजनितार्थज्ञानं ॥ ३३७ ॥ अथ प्रतिपत्तिकश्रुतज्ञानस्वरूपं प्ररूपयति—

स० चं०—एक पदके ऊपरि एक एक अक्षर बंधतैं बंधतैं एक पदका अक्षर प्रमाण पदसमासके भेद भएं पदज्ञान दूणा भया। बहुरि इसतैं एक एक अक्षर बंधतैं बधतैं पदका अक्षर प्रमाण पदसमासके भेद भएं पदज्ञान तिगुणा भया। ऐसैं ही एक एक अक्षरकी बंधवारी लीएं पदका अक्षर प्रमाण पदसमासज्ञानके भेद होत संते चौगुणा पंचगुणा आदि संख्यात हजारकरि गुण्या हूवा पदका प्रमाणमें एक अक्षर घटाइये तहां पर्यंत पदसमासके भेद जानने। पदसमासज्ञानका उत्कृष्ट भेदविषैं सोई एक अक्षर मिलायें संघात नामा श्रुतज्ञान हो है सो च्यारि गतिविषैं एक गतिके स्वरूपका निरूपण हारे जो मध्यमपद तिनिका समूहरूप संघात नामा श्रुतज्ञानके सुननेतैं जो अर्थज्ञान भया ताकौं संघात श्रुतज्ञान कहिये ॥ ३३७ ॥ आगैं प्रतिपत्तिक श्रुतज्ञानके स्वरूपकौं कहै हैं—

एक्कदरगदिणिरूवयसंघादसुदादु उवरि पुव्वं वा।
वण्णे संखेज्जे संघादे उड्ढम्हि पडिवत्ती ॥ ३३८ ॥

एकतरगतिनिरूपकसंघातश्रुतादुपरि पूर्वं वा।
वर्णे संख्येये संघाते वृद्धे प्रतिपत्तिः ॥ ३३८ ॥

जी० प्र०—पूर्वोक्तप्रमाणस्य एकतमगतिनिरूपकसंघातश्रुतस्य उपरि पूर्वोक्तप्रकारेण एकैकवर्णवृद्धिसहचरितैकैकपदवृद्धिक्रमेण संख्यातसहस्रपदमात्रसंघातेषु संख्यातसहस्रेषु रूपोनेषु संघातसमासज्ञानविकल्पेषु गतेषु तच्चरमस्य संघातसमासोत्कृष्टविकल्पकस्य १६=१०००७। १०००७-१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एतस्योपरि एकस्मिन्नक्षरे वृद्धे सति प्रतिपत्तिकं नाम श्रुतज्ञानं भवति १६=१०००७। १०००७। तच्च नारकादिचतुर्गतिस्वरूपसविस्तरप्ररूपकप्रतिपत्तिकाख्यग्रंथश्रवणजनितार्थज्ञानमिति निश्चेतव्यं ॥ ३३८ ॥ अथानुयोगश्रुतज्ञानं प्ररूपयति—

मं० प्र०—पूर्वोक्तप्रमाणस्य एकतमगतिनिरूपकसंघातश्रुतस्योपरि पूर्वोक्तप्रकारेण एकैकवर्णवृद्धिसहचरितैकैकपदवृद्धिक्रमेण संख्यातसहस्रपदमात्रसंघातेषु संख्यातसहस्रेषु रूपोनेषु संघातसमासज्ञानविकल्पेषु गतेषु तच्चरमस्य संघातसमासोत्कृष्टविकल्पस्य। १६=१०००७। १०००७-१। एतस्योपरि एकस्मिन्नक्षरे वृद्धे सति प्रतिपत्तिकनाम श्रुतज्ञानं भवति १६=१०००७। १०००७। तच्च नारकादिचतुर्गतिस्वरूपसविस्तरप्ररूपकप्रतिपत्तिकाख्यग्रंथश्रवणजनितार्थज्ञानमिति निश्चेतव्यं ॥ ३३८ ॥ अथानुयोगश्रुतज्ञानं प्ररूपयति—

स०चं०—एक गतिका निरूपण करणहारा जो संघातनामा श्रुतज्ञान ताके ऊपरि पूर्वोक्त प्रकारकरि एक एक अक्षरकी बंधवारी लीयें एक एक पदकी वृद्धिकरि संख्यात हजार पदका समूहरूप संघात श्रुत होइ। बहुरि इस ही अनुक्रमतैं संख्यात हजार संघात श्रुत होइ तिहिंमैंस्यों एक अक्षर घटाइये तहां पर्यंत संघात समासके भेद जानना। बहुरि अंतका संघात समास श्रुतज्ञानका उत्कृष्ट भेदविषैं वह अक्षर मिलाइये तब प्रतिपत्तिक नामा श्रुतज्ञान हो है सो नारकादि च्यारि गतिका स्वरूप विस्तारपनैं निरूपण करनहारा जो प्रतिपत्तिक नामा ग्रंथ ताके सुननेतैं जो अर्थज्ञान भया ताकौं प्रतिपत्तिक श्रुतज्ञान कहिए॥३३८॥ आगैं अनुयोग श्रुतज्ञानकौं प्ररूपै हैं—

चउगइसरूवरूवयपडिवत्तीदो दु उवरि पुव्वं वा।
वण्णे संखेज्जे पडिवत्तीउड्ढम्हि अणियोगं॥ ३३९ ॥

चतुर्गतिस्वरूपप्ररूपकप्रतिपत्तितस्तु उपरि पूर्वं वा।
वर्णे संख्याते प्रतिपत्तिवृद्धे अनुयोगं॥ ३३९॥

जी० प्र०—चतुर्गतिस्वरूपनिरूपकप्रतिपत्तिकात् परं तस्योपरि प्रत्येकमेकैकवर्णवृद्धिक्रमेण संख्यातसहस्रेषु पदसंघातप्रतिपत्तिकेषु वृद्धेषु रूपोनतावन्मात्रेषु प्रतिपत्तिकसमासज्ञानविकल्पेषु गतेषु तच्चरमप्रतिपत्तिकसमासोत्कृष्टविकल्पस्योपरि एकस्मिन्नक्षरे वृद्धे सति अनुयोगाख्यं श्रुतज्ञानं भवति। तच्चतुर्दशमार्गणास्वरूपप्रतिपादकानुयोगसंज्ञशब्दसंदर्भश्रवणजनितार्थज्ञानमित्यर्थः ॥ ३३९ ॥ अथ प्राभृतकप्राभृतकस्य स्वरूपं गाथाद्वयेन प्ररूपयति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं० प्र०—चतुर्गतिस्वरूपप्ररूपकप्रतिपत्तिकात्परं तस्योपरि प्रत्येकमेकैकवर्णवृद्धिक्रमेण संख्यातसहस्रेषु पदसंघातप्रतिपत्तिकेषु वृद्धेषु रूपोनतावन्मात्रेषु प्रतिपत्तिकसमासज्ञानविकल्पेषु गतेषु तच्चरमस्य प्रतिपत्तिकसमासोत्कृष्टविकल्पस्योपरि एकस्मिन्नक्षरे वृद्धे सति अनुयोगाख्यं श्रुतज्ञानं भवति तच्च चतुर्दशमार्गणास्वरूपप्रतिपादकानुयोगसंज्ञशब्दसंदर्भश्रवणजनितार्थज्ञानमित्यर्थः ॥ ३३९ ॥ अथ प्राभृतप्राभृतकस्य गाथाद्वयेन स्वरूपं प्ररूपयति—

स० चं०—च्यारि गतिके स्वरूपका निरूपण करणहारा प्रतिपत्तिक श्रुतज्ञानके ऊपरि प्रत्येक एक अक्षरकी वृद्धि लीयें संख्यात हजार पदनिका समुदायरूप संख्यात हजार संघात अर संख्यात हजार संघातनिका समूह प्रतिपत्तिक सो असैं प्रतिपत्तिक संख्यात हजार होइ तिनिविषैं एक अक्षर घटाइये तहां पर्यंत प्रतिपत्तिक समास श्रुतज्ञानके भेद भए। बहुरि तिसका अंत भेदविषैं वह एक अक्षर मिलायें अनुयोग नामा श्रुतज्ञान भया सो चौदै मार्गणाके स्वरूपका प्रतिपादक अनुयोग नामा श्रुत ताके सुननेतैं जो अर्थज्ञान भया ताकौं अनुयोग नामा श्रुतज्ञान कहिए ॥ ३३९ ॥ आगे प्राभृतप्राभृतकौं दोय गाथानिकरि कहै हैं—

चोद्दसमग्गणसंजुदअणियोगादुवरि वड्ढिदे वण्णे।
चउरादीअणियोगे दुगवारं पाहुडं होदि ॥ ३४० ॥

चतुर्दशमार्गणासंयुतानुयोगादुपरि वर्धिते वर्णे।
चतुराद्यनुयोगे द्विकवारं प्राभृतं भवति ॥ ३४० ॥

जी० प्र०—चतुर्दशमार्गणासंयुतानुयोगात्परं तस्योपरि पूर्वोक्तक्रमेण प्रत्येकमेकैकवर्णवृद्धिसहचरितपदादिवृद्धिभिश्चतुराद्यनुयोगेषु संवृद्धेषु सत्सु रूपोनतावन्मात्रानुयोगसमासज्ञानविकल्पेषु गतेषु तच्चरमानुयोगसमासोत्कृष्टविकल्पस्योपरि एकाक्षरवृद्धौ सत्यां द्विकवारप्राभृतकं नाम श्रुतज्ञानं भवति ॥ ३४० ॥

मं० प्र०—चतुर्दशमार्गणासंयुतानुयोगात्परं तस्योपरि पूर्वोक्तक्रमेण प्रत्येकं—एकैकवर्णवृद्धिसहचरितपदादिवृद्ध्या चतुरादिषु अनुयोगेषु वृद्धेषु रूपोनतावन्मात्रेष्वनुयोगसमासज्ञानविकल्पेषु गतेषु तच्चरमस्य अनुयोगसमासोत्कृष्टविकल्पस्योपरि एकस्मिन्नक्षरे वृद्धे सति द्विकवारप्राभृतकं—प्राभृतकप्राभृतकं भवति।३४०।

स० चं०—चौदह मार्गणाकरि संयुक्त जो अनुयोग ताके ऊपरि प्रत्येक एक एक अक्षरकी वृद्धिकरि संयुक्त

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पद संघात प्रतिपत्तिक इनिकी पूर्वोक्त अनुक्रमतैं वृद्धि होतैं च्यारि आदि अनुयोगनिकी वृद्धिविषैं एक अक्षर घटाइये तहां पर्यंत अनुयोग समासके भेद भए। बहुरि तिनिका अंत भेदविषैं वह एक अक्षर मिलायें प्राभृत प्राभृतक नामा श्रुतज्ञान हो है ॥ ३४० ॥

अहियारो पाहुडयं एयट्ठो पाहुडस्स अहियारो।
पाहुडपाहुडणामं होदित्ति जिणेहिं णिद्दिट्ठं ॥ ३४१ ॥

अधिकारः प्राभृतमेकार्थः प्राभृतस्याधिकारः।
प्राभृतप्राभृतनामा भवति इति जिनैर्निर्दिष्टं ॥ ३४१ ॥

जी० प्र०—वस्तुनामश्रुतज्ञानस्य अधिकारः प्राभृतकं वेति द्वौ एकार्थौ। प्राभृतकस्य अधिकारोऽपि प्राभृतकप्राभृतकनामा भवति ततः कारणात् एकार्थः पर्यायशब्दः इति जिनैः—अर्हद्भट्टारकैः निर्दिष्टं न स्वरुचिविरचितमित्यर्थः ॥ ३४१ ॥ द्विकवारप्राभृतानंतरं प्राभृतकस्वरूपं प्ररूपयति—

मं० प्र०—वस्तुनः अधिकारः प्राभृतकं, प्राभृतकप्राभृतकस्याधिकारः प्राभृतकनामा भवतीति एकार्थः—पर्यायशब्दः इति जिनैर्निर्दिष्टं न स्वरुचिविरचितमित्यर्थः ॥ ३४१ ॥ अथ प्राभृतकस्वरूपं प्ररूपयति—

स० चं०—आगैं कहियेगा जो वस्तु नामा श्रुतज्ञान ताका जो एक अधिकार ताहीका नाम प्राभृत कहिये बहुरि जो उस प्राभृतकका एक अधिकार ताका नाम प्राभृतकप्राभृतक कहिये ऐसैं जिनदेवने कह्या है ॥३४१॥ आगैं प्राभृतकका स्वरूप कहैं हैं—

दुगवारपाहुडादो उवरिं वण्णे कमेण चउवीसे।
दुगवारपाहुडे संउड्ढे खलु होदि पाहुडयं ॥ ३४२ ॥

द्विकवारप्राभृतादुपरि वर्णे क्रमेण चतुर्विंशतौ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्विकवारप्राभृते संवृद्धे खलु भवति प्राभृतकं ॥ ३४२ ॥

जी० प्र०—द्विकवारप्राभृतकात्परं तस्योपरि पूर्वोक्तक्रमेण प्रत्येकमेकैकवर्णवृद्धिसहचरितपदादिवृद्धिभिः चतुर्विंशतिप्राभृतकप्राभृतकेषु वृद्धेषु रूपोनतावन्मात्रेषु प्राभृतकप्राभृतकज्ञानविकल्पेषु गतेषु तच्चरमसमासोत्कृष्टविकल्पकस्य उपरि एकाक्षरवृद्धौ सत्यां प्राभृतकं नाम श्रुतज्ञानं भवति॥३४२॥ अथ वस्तुनामश्रुतज्ञानस्वरूपमाह—

मं० प्र०—द्विकवारप्राभृतकात्परं तस्योपरि पूर्वोक्तप्रकारेण प्रत्येकमेकैकवर्णवृद्धिसहचरितपदादिवृद्धया चतुर्विंशतिप्राभृतकप्राभृतकेषु वृद्धेषु रूपोनतावन्मात्रेषु प्राभृतकप्राभृतकसमासज्ञानविकल्पेषु गतेषु तच्चरमस्य उत्कृष्टविकल्पस्योपरि एकस्मिन्नक्षरे वृद्धे सति प्राभृतकं नाम श्रुतज्ञानं भवति ॥ ३४२ ॥ अथ वस्तुस्वरूपं प्ररूपयति—

स० चं०—द्विकवार प्राभृतक जो प्राभृतक प्राभृतक ताके ऊपरि पूर्वोक्त अनुक्रमतैं एक एक अक्षरकी वृद्धि लीयें चौवीस प्राभृतक प्राभृतकनिकी वृद्धिविषैं एक अक्षर घटाइये तहां पर्यंत प्राभृतक प्राभृतक समासके भेद जानने। बहुरि ताका अंत भेदविषैं वह एक अक्षर मिलायें प्राभृतक नामा श्रुतज्ञान हो है। भावार्थ—एक एक प्राभृतक नामा अधिकारविषैं चौबीस चौबीस प्राभृतक प्राभृतक नामा अधिकार हो है ॥ ३४२ ॥ आगैं वस्तु नामा श्रुतज्ञानकौं प्ररूपै हैं—

वीसं वीसं पाहुडअहियारे एक्कवत्थुअहियारो।
एक्केक्कवण्णउड्ढी कमेण सव्वत्थ णायव्वा ॥ ३४३ ॥

विंशतौ विंशतौ प्राभृताधिकारे एको वस्त्वधिकारः।
एकैकवर्णवृद्धिः क्रमेण सर्वत्र ज्ञातव्या ॥ ३४३ ॥

जी० प्र०—पूर्वोक्तप्राभृतकस्याग्रे तदुपरि पूर्वोक्तक्रमेण एकैकवर्णवृद्धिसहचरितपदादिवृद्धिभिः विंशतिप्राभृतकनामाधिकारेषु संवृद्धेषु सत्सु रूपोनतावन्मात्रेषु प्राभृतकसमासज्ञानविकल्पेषु गतेषु तच्चरमप्राभृतकसमासोत्कृष्टविकल्पस्योपरि एकाक्षरे वृद्धौ सत्यां एकं वस्तुनामाधिकारश्रुतज्ञानं भवति। वीसं वीसमिति उत्पादादिपूर्वाश्रितवस्तुवस्तुसमूहवीप्सायां द्विर्वचनमुक्तं। सर्वत्राक्षरसमासप्रथमविकल्पात् प्रभृति पूर्वसमासोत्कृष्टविक-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ल्पपर्यंतेषु क्रमेण पर्यायाक्षरपदसंघातेत्यादिपरिपाट्या एकैकवर्णवृद्धिः इदमुपलक्षणं, तेन एकैकवर्णपदसंघातादिवृद्धयो ज्ञातव्याः। एतत्सूत्रानुसारेण वृत्तौ तथा लिखितं ॥३४३॥ अथ गाथात्रयेण पूर्वनामश्रुतज्ञानस्वरूपं प्ररूपयंस्तदवयवभूतोत्पादपूर्वादिचतुर्दशपूर्वाणामुत्पत्तिक्रमं दर्शयति—

मं० प्र०—तस्मात्प्राभृतकात्परं प्राभृतकस्योपरि पूर्वोक्तक्रमेण एकैकवर्णवृद्धिसहचारितपदादिवृद्धया विंशतौ प्राभृतकनामाधिकारेषु वृद्धेषु प्राभृतकसमासज्ञानविकल्पेषु रूपोनतावन्मात्रेषु गतेषु तच्चरमस्य प्राभृतकसमासोत्कृष्टविकल्पस्योपरि एकस्मिन्नक्षरे वृद्धे सति एको वस्तुनामाधिकारो भवति। वीसं वीसंमिति उत्पादादिपूर्वाश्रितवस्तुसमूहवीप्सायां द्विर्वचनमुक्तं। सर्वत्राक्षरसमासप्रथमविकल्पात्प्रभृति पूर्वसमासोत्कृष्टविकल्पपर्यंतेषु क्रमेण पर्यायाक्षरपदसंघातेत्यादिपरिपाट्या एकैकवर्णवृद्धिः। इदमुपलक्षणं, तेन एकैकवर्णपदसंघातादिवृद्धिर्ज्ञातव्या। एतत्सूत्रानुसारेण वृत्तावपि तथैव लिखितं ॥३४३॥ अथ गाथात्रयेण पूर्वस्वरूपं प्ररूपयति—

स० चं०—तिहिं प्राभृतकके ऊपर पूर्वोक्त अनुक्रमतैं एक एक अक्षरकी वृद्धिनै लीएं पदादिककी वृद्धिकरि संयुक्त बीस प्राभृतककी वृद्धि होतैं संतै वामैं एक अक्षर घटाइये तहां पर्यंत प्राभृतक समासके भेद जानने। बहुरि ताका अंत भेदविषैं वह एक अक्षर मिलायें वस्तु नामा अधिकार हो है। भावार्थ—पूर्वसंबंधी एक एक वस्तु नामा अधिकारविषैं बीस बीस प्राभृतक पाइये है। बहुरि सर्वत्र अक्षर समासका प्रथम भेदतैं लगाइ पूर्वसमासका उत्कृष्ट भेदपर्यंत अनुक्रमतैं एक एक अक्षर वधावना। बहुरि पदका बधावना बहुरि समासका वधावना इत्यादिक परिपाटीकरि यथासंभव वृद्धि सबनिविषैं जानना सो सूत्रके अनुसारि व्याख्यान टीकाविषैं करते ही आये हैं ॥ ३४३ ॥ आगैं तीन गाथानिकरि पूर्वनामा श्रुतज्ञानकौं कहैं हैं—

दसचोदसट्ठ अट्ठारसयं वारं च वार सोलं च।
वीसं तीसं पण्णारसं च दस चदुसु वत्थूणं ॥ ३४४ ॥

दश चतुर्दशाष्ट अष्टादशकं द्वादश च द्वादश षोडश च।
विंशतिः त्रिंशत् पंचदश च दश चतुर्षु वस्तूनां ॥ ३४४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी॰ प्र॰—पूर्वोक्तवस्तुश्रुतज्ञानस्य उपरि प्रत्येकमेकैकवर्णवृद्धिसहचरितपदादिवृद्धिभिः वक्ष्यमाणोत्पादादिचतुर्दशपूर्वाधिकारेषु यथासंख्यं दशचतुर्दशाष्टाष्टादशद्वादशद्वादशषोडशविंशतित्रिंशत्पंचदशदशदशदशवस्तुषु वृद्धेषु सत्सु– ॥ ३४४ ॥

मं॰ प्र॰—तस्माद्वस्तुनः परं वस्तुन उपरि प्रत्येकमेकैकवर्णवृद्धिसहचरितपदादिवृद्धया वक्ष्यमाणोत्पादादिचतुर्दशपूर्वाधिकारेषु यथासंख्यं दशचतुर्दशाष्टाष्टादशद्वादशद्वादशषोडशविंशतित्रिंशत्पंचदशदशदशदशवस्तुषु वृद्धेषु रूपोनतावन्मात्रवस्तुसमासज्ञानविकल्पेषु गतेषु तत्तच्चरमाणां वस्तुसमासोत्कृष्टविकल्पानां चतुर्दशानामुपरि प्रत्येकमेकैकस्मिन्नक्षरे वृद्धे सति—॥३४४॥

स॰ चं॰–तिहि वस्तु श्रुतके ऊपरि एक एक अक्षरकी वृद्धि लीएं अनुक्रमतैं पदादिककी वृद्धिकरि संयुक्त क्रमतैं दश आदि वस्तुनिकी वृद्धि होतसंतै उनमैंसौं एक एक अक्षर घटावने पर्यंत वस्तु समासके भेद जानने। बहुरि तिनके अंत भेदनिविषैं अनुक्रमतैं एक एक अक्षर मिलाएं चौदह पूर्वनामा श्रुतज्ञान होइ तहां आगैं कहिए है उत्पाद नामा पूर्व आदि चौदह पूर्व तिनिविषैं अनुक्रमतैं दश १० चौदह १४ आठ ८ अठारह १८ बारह १२ बारह १२ सोलह १६ बीस २० तीस ३० पंद्रह १५ दश १० दश १० दश १० दश १० वस्तु नामा अधिकार पाइए है ॥ ३४४ ॥

उप्पायपुव्वगाणियविरियपवादत्थिणत्थियपवादे ।
णाणासच्चपवादे आदाकम्मप्पवादे य ॥ ३४५ ॥
पच्चाक्खाणे विज्जाणुवादकल्लाणपाणवादे य ।
किरियाविसालपुव्वे कमसोथ तिलोयाविंदुसारे य ॥३४६॥

उत्पादपूर्वाग्रायणीयवीर्यप्रवादास्तिनास्तिकप्रवादानि ।
ज्ञानसत्यप्रवादे आत्मकर्मप्रवादे च ॥ ३४५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रत्याख्यानं वीर्यानुवादकल्याणप्राणवादानि च ।
क्रियाविशालपूर्वं क्रमशः अथ त्रिलोकविंदुसारं च ॥ ३४६ ॥

जी० प्र०—यथाक्रमं उत्पादपूर्वं आग्रायणीयपूर्वं वीर्यप्रवादपूर्वं अस्तिनास्तिप्रवादपूर्वं ज्ञानप्रवादपूर्वं सत्यप्रवादपूर्वं आत्मप्रवादपूर्वं कर्मप्रवादपूर्वं प्रत्याख्यानपूर्वं विद्यानुवादपूर्वं कल्याणवादपूर्वं प्राणावादपूर्वं क्रियाविशालपूर्वं त्रिलोकविंदुसारपूर्वं चेति चतुर्दशपूर्वाणि भवंति । एतेषु पूर्वोक्तवस्तुश्रुतज्ञानस्य उपरि—अग्रे प्रत्येकमेकैकवर्णवृद्धिसहचरितपदादिवृद्ध्या दशवस्तुप्रमितवस्तुसमासज्ञानविकल्पेषु गतेषु रूपोनैतावन्मात्रवस्तुश्रुतसमासज्ञानविकल्पेषु चरमवस्तुसमासोत्कृष्टविकल्पस्योपरि एकाक्षरवृद्धौ सत्यां उत्पादपूर्वश्रुतज्ञानं भवति । ततः उत्पादपूर्वश्रुतज्ञानस्य उपरि प्रत्येकमेकैकाक्षरवृद्धिसहचरितपदादिवृद्ध्या चतुर्दशवस्तुषु वृद्धेषु रूपोनतावन्मात्रोत्पादपूर्वसमासज्ञानविकल्पेषु गतेषु तच्चरमोत्कृष्टोत्पादपूर्वसमासज्ञानविकल्पस्य उपरि एकाक्षरवृद्धौ सत्यां अग्रायणीयपूर्वश्रुतज्ञानं भवति । एवमग्रेऽग्रेऽष्टाष्टादशद्वादशद्वादशषोडशविंशतित्रिंशत्पंचदशदशदशदशदशवस्तुषु क्रमेण वृद्धेषु रूपोनतावन्मात्रतावन्मात्रतत्तत्पूर्वसमासज्ञानविकल्पेषु गतेषु तत्तत्पूर्वसमासोत्कृष्टज्ञानविकल्पस्योपरि एकैकाक्षरे वृद्धे सति तत्तद्वीर्यप्रवादपूर्वास्तिनास्तिप्रवादपूर्वज्ञानप्रवादपूर्वसत्यप्रवादपूर्वात्मप्रवादपूर्वकर्मप्रवादपूर्वप्रत्याख्यानपूर्वविद्यानुवादपूर्वकल्याणवादपूर्वप्राणवादपूर्वक्रियाविशालपूर्वत्रिलोकविंदुसारपूर्वनामश्रुतज्ञानान्युत्पद्यंते । अत्र त्रिलोकविंदुसारस्य तु समासो नास्ति उत्तरज्ञानविकल्पाभावात् ॥ ३४५ ॥ ३४६ ॥ अथ चतुर्दशपूर्वगतवस्तुप्राभृतकसंख्यां कथयति—

मं० प्र०—यथाक्रमं उत्पादाग्रायणीयवीर्यप्रवादास्तिनास्तिप्रवादज्ञानप्रवादसत्यप्रवादात्मप्रवादकर्मप्रवादप्रत्याख्यानविद्यानुवादकल्याणप्राणावायक्रियाविशालत्रिलोकविंदुसारनामानि चतुर्दशपूर्वाणि भवंति । चशब्दाः समच्चयार्थाः । तस्मात् पूर्वात्परं प्रत्येकमेकैकवर्णवृद्धिसहचरितपदादिवृद्ध्या चतुर्दशसु पूर्वेषु मिलितेषु तावन्मात्राः पूर्वसमासज्ञानविकल्पा भवंति ॥ ३४५–३४६ ॥ अथ चतुर्दशपूर्वसर्ववस्तुप्राभृतकसंख्यां प्ररूपयति——

स० चं०—चौदह पूर्वनिके नाम अनुक्रमतैं ऐसैं जानने । उत्पाद १ आग्रायणीय १ वीर्यप्रवाद १ अस्ति नास्ति प्रवाद १ ज्ञानप्रवाद १ सत्यप्रवाद १ आत्मप्रवाद १ कर्मप्रवाद १ प्रत्याख्यानप्रवाद १ विद्यानुवाद १ कल्याणवाद १ प्राणवाद १ क्रियाविशाल १ त्रिलोकविंदुसार १ ये चौदह पूर्वनिके नाम जानने । इनिके लक्षण आगैं कहैंगे— इहां ऐसैं जानना पूर्वोक्त वस्तुश्रुतज्ञानके ऊपरि क्रमतैं एक एक अक्षरकी वृद्धि लीएं पदादिककी वृद्धि होतैं दश वस्तु प्रमाणमेंस्यों एक अक्षर घटाइए तहां पर्यंत वस्तु समासज्ञानके भेद हैं । ताके अंत भेदविषैं वह एक अक्षर मिलाएं उत्पाद पूर्वनामा श्रुतज्ञान हो है । बहुरि उत्पादपूर्व श्रुतज्ञानके ऊपरि एक एक अक्षर-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अक्षरकी वृद्धि लीयें पदादिकी वृद्धिसंयुक्त चौदहवस्तु होंहि। तामैं एक अक्षर घटाइये तहां पर्यंत उत्पादपूर्व समासके भेद जानने ताके अंतभेदविषैं वह एक अक्षरबंधे अग्रायणीय पूर्वनामा श्रुतज्ञान होहैं ऐसैंही क्रमतैं आगैं आगैं आठ आदि वस्तुकी वृद्धि होतैं तहां एक अक्षर घटावने पर्यंत तिस तिसपूर्व समासके भेद जानने। तिस तिसका अंत भेदविषैं सो सो एक अक्षर मिलाएं वीर्यप्रवाद आदि पूर्वनामा श्रुतज्ञान हो है। अंतका त्रिलोक विंदुसार नामा पूर्व आगैं ताकी समासके भेद नाहीं है जातैं याके आगैं श्रुतज्ञानके भेदका अभाव है।३४५। ३४६॥ आगैं चौदह पूर्वनिविषै वस्तुनाम अधिकारनिकी वा प्राभृतनामा अधिकारनिकी संख्या कहै हैं—

पणणउदिसया वत्थू पाहुड्या तियसहस्सणवयसया।
एदेसु चोद्दसेसु वि पुव्वेसु हवंति मिलिदाणि॥ ३४७॥

पंचनवतिशतानि वस्तूनि प्राभृतकानि त्रिसहस्रनवशतानि।
एतेषु चतुर्दशस्वपि पूर्वेषु भवंति मिलितानि॥ ३४७॥

जी० प्र०—उत्पादपूर्वमादिं कृत्वा त्रिलोकविंदुसारावसानेषु चतुर्दशपूर्वेषु वस्तूनि सर्वाणि मिलित्वा पंचनवत्युत्तरशतप्रमितानि १९५ भवंति प्राभृतकानि तु सर्वाणि मिलित्वा नवशतोत्तरत्रिसहस्रप्रमितानि भवंति ३९०० । वस्तुसंख्यायां विंशत्या गुणितायां तत्संख्यासंभवात् ॥ ३४७॥ अथ पूर्वोक्तविंशतिविधश्रुतज्ञानविकल्पोपसंहारं गाथाद्वयेनाह—

मं० प्र०—एतेषु उत्पादपूर्वादिषु त्रिलोकविंदुसारपर्यंतेषु चतुर्दशसु पूर्वेषु वस्तूनि सर्वाणि मिलितानि पंचनवत्युत्तरशतसंख्यानि १९५। प्राभृतकानि तु सर्वाणि मिलितानि नवशतोत्तरत्रिसहस्रसंख्यानि भवंति ३९०० वस्तुसंख्यायां विंशत्या गुणितायां प्राभृतकसंख्यासंभवात् ॥ ३४७ ॥ अथ पूर्वोक्तविंशतिविधश्रुतज्ञानविकल्पोपसंहारं गाथाद्वयेन प्ररूपयति—

स० चं०—जो उत्पाद आदि त्रिलोकविंदुसार पर्यंत चौदह पूर्व तिनिविषैं मिलाए हुवे दश आदि वस्तु नामा अधिकार सर्व एकसौ पिच्याणवै १९५ हो हैं। बहुरि एक एक वस्तुविषैं वीस वीस प्राभृत कहे ते सर्व प्राभृतक ७४३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नामा अधिकार तीन हजार नवसै ३९०० जानने ॥ ३४७ ॥ आगैं पूर्व कहे जे श्रुतज्ञानके वीस भेद तिनिका उपसंहार दोय गाथानिकरि कहै हैं—

अत्थक्खरं च पदसंघातं पडिवत्तियाणिजोगं च ।
दुगवारपाहुडं च य पाहुडयं वत्थु पुव्वं च ॥ ३४८ ॥
कमवण्णुत्तरवड्ढिय ताण समासा य अक्खरगदाणि ।
णाणवियप्पे वीसं गंथे बारस य चोद्दसयं ॥ ३४९ ॥

अर्थाक्षरं च पदसंघातं प्रतिपत्तिकानुयोगं च ।
द्विकवारप्राभृतं च च प्राभृतकं वस्तु पूर्वं च ॥ ३४८ ॥
क्रमवर्णोत्तरवर्धिते तेषां समासाश्च अक्षरगताः ।
ज्ञानविकल्पे विंशतिः ग्रंथे द्वादश च चतुर्दशकं ॥ ३४९ ॥

जी॰ प्र॰—अर्थाक्षरं रूपोनैकट्टविभक्तश्रुतकेवलमात्रमेकाक्षरज्ञानं के $\frac{\text{१८}}{}$= तच्च तथा पदं च संघातं प्रतिपत्तिकं अनुयोगं द्विकवारप्राभृतकं प्राभृतकं वस्तु, पूर्वं चेति नव पुनः एषामेव नवानां क्रमवर्णोत्तरवर्धिताः समासाश्च नव एवमष्टादशभेदा अक्षरगतद्रव्यश्रुतविकल्पा भवंति। तद्द्रव्यश्रुतश्रवण-संजनितश्रुतज्ञानमेव पुनः अनक्षरात्मकपर्यायपर्यायसमासज्ञानद्वययुतं सत् विंशतिविधं श्रुतज्ञानं भवति। ग्रंथे शास्त्रसंदर्भे विवक्षिते सति आचारांगादिद्वादशांगविकल्पं उत्पादपूर्वादिचतुर्दशपूर्वभेदं च द्रव्यश्रुतं तच्छ्रवणसंजनितज्ञानस्वरूपं भावश्रुतं। चशब्दात् अंगबाह्यसामायिकादिचतुर्दशप्रकीर्णकभेदद्रव्यभावात्मकश्रुतं पुद्गलद्रव्यरूपं वर्णपदवाक्यात्मकं द्रव्यश्रुतं, तच्छ्रवणसमुत्पन्नश्रुतज्ञानपर्यायरूपं भावश्रुतं च समुच्चीयते इति आचार्यस्य अभिप्रायः। पर्यायादिशब्दानां निरुक्तिः प्रदर्श्यते। तद्यथा—परीयंते व्याप्यंते सर्वे जीवा अनेनेति पर्यायः-सर्वजघन्यज्ञानं, ईदृशज्ञानरहितस्य जीवस्याभावात्। केवलज्ञानवत्स्वपि तत्संभवात् महासंख्यायां कोट्यादौ एकाद्यल्पसंख्यावत्। अक्षाय-श्रोत्रेंद्रियाय राति ददाति स्वमर्पयंतीत्यक्षरं। पद्यते गच्छति जानात्यर्थमात्मा ७४४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनेनेति पदं। सं-संक्षेपेण एकदेशेन हन्यते गम्यते ज्ञायते एका गतिः अनेनेति संघातः। प्रतिपद्यंते सामस्त्येन ज्ञायंते चतस्रो गतयः अनयेति प्रतिपत्तिः, संज्ञायां कप्रत्ययविधानात् प्रतिपत्तिकः, अनु गुणस्थानानुसारेण गत्यादिषु मार्गणासु युज्यंते संबध्यंते जीवा अस्मिन्ननेनेति चानुयोगः। प्रकर्षेण—नामस्थापनाद्रव्यभावनिर्देशस्वामित्वसाधनाधिकरणस्थितिविधान-सत्संख्याक्षेत्रस्पर्शनकालांतरभावाल्पबहुत्वादिविशेषेण वस्त्वधिकारार्थैराभृतं परिपूर्णं प्राभृतं-वस्तुनोऽधिकारः, प्राभृतमिति संज्ञा अस्यास्तीति प्राभृतकं, प्राभृतकस्याधिकारः प्राभृतकप्राभृतकं वसंति पूर्वमहार्णवस्य अर्थाः एकदेशेन संत्यस्मिन्निति वस्तु। पूर्वाधिकारः पूरयति श्रुतार्थान् संविभर्त्तीति पूर्वं। सं-संगृह्य पर्यायादीनि पूर्वपर्यंतानि स्वीकृत्य अस्यंते क्षिप्यंते विकल्प्यंते इति समासाः। पर्यायज्ञानादुत्तरविकल्पाः पर्यायसमासाः। अक्षरज्ञानादुत्तरविकल्पा अक्षरसमासाः। एवमग्रेऽपि सर्वत्र पदसमासादयो योज्याः। अत्र पूर्वाणि १४; वस्तूनि १९५, प्राभृतकानि ३९००, द्विकवारप्रभृतकानि ९३६००, अनुयोगाः ३७४४००, प्रतिपत्तिकसंघातपदानि संख्यातसहस्रगुणितक्रमाणि एकपदाक्षराणि १६३४८३०७८८८, समस्ताक्षराणि रूपोनैकट्ठप्रमितानि १८४४६७४४०-७३७०९५५०६१५। एतेष्वक्षरेषु एकपदाक्षरैः प्रमाणितेषु यल्लब्धं तद्द्वादशांगपदप्रमाणं शेषमंगवाह्याक्षराणि ॥ ३४८-३४९ ॥ तत्र प्रथमं तत्पदप्रमाणमाह—

मं० प्र०— अर्थाक्षरं रूपोनैकट्ठविभक्तश्रुतकेवलमात्रमेकमक्षरं अर्थाक्षरं। अर्थाक्षरं च पदं च संघातश्च प्रतिपत्तिकश्च अनुयोगश्च प्राभृतकप्राभृतकं च प्राभृतकं च वस्तु च पूर्वं च तेषामक्षरादीनां नवानां क्रमवर्णोत्तरवर्धितसमासाश्च नवेत्यष्टादशभेदा अक्षरगता द्रव्यश्रुतविकल्पा भवंति। ज्ञाने—तद्द्रव्यश्रुतश्रवणसंजनितश्रुतज्ञाने विवक्षिते अनक्षरात्मकपर्यायपर्यायसमासज्ञानद्वयेन सह विंशतिविकल्पं श्रुतज्ञानं भवति। ग्रंथे शास्त्रसंदर्भे विवक्षिते द्वादशविकल्पं आचारांगादिद्वादशांगभेदं, उत्पादपूर्वादिचतुर्दशपूर्वकं च द्रव्यश्रुतं तच्छ्रवणजनितज्ञानस्वरूपं भावश्रुतं च। चशब्देन अंगबाह्यं सामायिकादिचतुर्दशप्रकीर्णकभेदमपि द्रव्यभावश्रुतं समुच्चीयते। पुद्गलद्रव्यरूपं वर्णपदवाक्यात्मकं द्रव्यश्रुतं तच्छ्रवणसमुत्पन्नश्रुतज्ञानपर्यायरूपं भावश्रुतमित्याचार्यस्य तात्पर्यं। पर्यायादिशब्दानां निरुक्तिः प्रदर्श्यते। तद्यथा—परीयंते—व्याप्यंते सर्वे जीवा अनेनेति पर्यायः-सर्वजघन्यं ज्ञानं। ईदृशज्ञानरहितस्य जीवस्यैवाभावात्। केवलज्ञानवत्सर्वापि जीवेषु तत्संभवत्येव महासंख्यायां कोट्यादौ एकाद्यल्पसंख्यावत्। अक्षाय श्रोत्रेंद्रियाय, राति ददाति, स्वमर्पयतीत्यक्षरं,। पद्यते—गच्छति जानात्यर्थमात्मा अनेनेति पदं। सं-संक्षेपेण—एकदेशेन हन्यते—गम्यते ज्ञायते एका गतिरनेनेति संघातः। प्रतिपद्यंते सामस्त्येन ज्ञायंते चतस्रो गतयः अनयेति प्रतिपत्तिः। संज्ञायां कप्रत्ययविधानात्प्रतिपत्तिकः। अनु—गुणस्थानानुसारेण गत्यादिषु मार्गणासु, युज्यंते संबंध्यंते जीवाः अस्मिन्ननेनेति वा अनुयोगः। प्रकर्षेण नामस्थापनाद्रव्यभावनिर्देशस्वामित्वसाधनाधिकरणस्थितिविधानसत्संख्याक्षेत्रस्पर्शनकालांतरभावाल्पबहुत्वादिविशेषेण वस्त्वधिकारार्थैराभृतं परिपूर्णं प्राभृतं वस्तुनोऽधिकारः। प्राभृतमिति संज्ञास्यातीति प्राभृतकं। प्राभृतकस्य अधिकारः प्राभृतकप्राभृतकं। वसंति पूर्वमहार्णवस्य अर्थाः एकदेशेन संत्यस्मिन्निति वस्तु। पूर्वाधिकारः—पूरयति श्रुतार्थान् संभिनत्तीति पूर्वं। सं संगृह्य पर्यायादीनि पूर्वपर्यंतानि स्वीकृत्य अस्यंते क्षिप्यंते विकल्प्यंते इति समासाः। पर्यायज्ञानादुत्तरविकल्पाः पर्यायसमासाः अक्षरज्ञानादुत्तरविकल्पा अक्षरसमासाः एवमुत्तरत्रापि पदसमासादयो योज्याः ॥३४८-३४९॥ अथ द्वादशांगपदसंख्यां प्ररूपयति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स० चं०----अर्थाक्षर १ पद २ संघात ३ प्रतिपत्तिक ४ अनुयोग ५ प्राभृतकप्राभृतक ६ प्राभृतक ७ वस्तु ८ पूर्व ९ ए नव भेद बहुरि एक एक अक्षरकी वृद्धि आदि यथा संभव वृद्धि लीएं इनही अक्षरादिकनिके समास तिनिकरि नवभेद ऐसैं सर्व मिलिकरि अठारह भेद अक्षरात्मक द्रव्यश्रुतके हैं अर ज्ञानकी अपेक्षा इनही द्रव्यश्रुतानिके सुननेतैं जो ज्ञानभया सो उस ज्ञानके भी अठारह भेद कहिए। बहुरि अनक्षरात्मक श्रुतज्ञानके पर्याय १ अर पर्यायसमास २ ए दोय भेद मिलाएं सर्व श्रुतज्ञानके वीस भेद भए। बहुरि ग्रंथ जो शास्त्र ताकी विवक्षा करिए तौ आचारांग आदि द्वादश अंग अर उत्पाद पूर्व आदि चौदह पूर्व अर चकारतैं सामायिकादि चौदह प्रकीर्णक तिनिस्वरूप द्रव्यश्रुत ज्ञान जानना ताके सुननेतैं जो ज्ञान भया सो भावश्रुतज्ञान जानना। पुद्गल द्रव्यस्वरूप अक्षर पदादिकमय तौ द्रव्यश्रुत है ताके सुननेतैं जो श्रुतज्ञानका पर्यायरूप ज्ञान भया सो भावश्रुत है। अब जो पर्याय आदि भेद कहे तिनि शब्दनिकी निरुक्ति व्याकरण अनुसारि कहिए हैं परीयंते कहिए सर्व जीव जाकरि व्याप्त हैं सो पर्याय कहिए पर्यायज्ञान बिना कोऊ जीव नाहीं। केवल ज्ञानीनिके भी पर्यायज्ञान संभवै है। जैसैं किसीकैं कोटि धन पाइए है तो वाकै एक धनतौ सहज ही वामैं आया तैसैं महाज्ञानविषैं स्तोकज्ञान गर्भित भया जानना। बहुरि अक्ष कहिए कर्ण इंद्रिय ताकौं अपना स्वरूपकौं राति कहिए ज्ञान द्वारकरि दे है तातैं अक्षर कहिए। बहुरि पद्यते कहिए जाकरि आत्मा अर्थकौं प्राप्त होइ ताकौं पद कहिए। बहुरि सं कहिए संक्षेपतैं हन्यते गम्यते कहिए जानिए एक गतिका स्वरूप जिहिकरि सो संघात कहिए। बहुरि प्रतिपद्यते कहिए विस्तारतैं जानिए हैं च्यारि गति जाकरि सो प्रतिपत्ति कहिए नामसंज्ञाविषैं कप्रत्ययतै प्रतिपत्तिक कहिए। बहुरि अनु कहिए गुणस्थाननिके अनुसारि युज्यंते कहिए संबंधरूप जीव जा विषैं कहिए है सो अनुयोग कहिए। बहुरि प्रकर्षेण कहिए नाम १ स्थापना १ द्रव्य १ भाव १ अथवा निर्देश १ स्वामित्व १ साधन १ अधिकरण १ स्थिति १ विधान १ अथवा सत् १ संख्या १ क्षेत्र १ स्पर्शन १ काल १ अंतर १ भाव१ अल्पबहुत्व इत्यादि विशेषकरि प्राभृत कहिए परिपूर्ण होइ ऐसा जो वस्तुका अधिकार सो प्राभृत कहिए। अर जाकी प्रा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्राभृत संज्ञा होइ सो प्राभृतक कहिए। बहुरि प्राभृतकका जो अधिकार सो प्राभृतकप्राभृतक कहिए बहुरि वसंति कहिए पूर्वरूपी समुद्रका अर्थ जिस विषैं एकोदेशपनै पाइए सो पूर्वका अधिकार वस्तु कहिए। बहुरि पूरयति कहिए शास्त्रके अर्थकौं पोषै सो पूर्व कहिए। ऐसैं दश भेदनिकी निरुक्ति कही। बहुरि सं कहिए संग्रह करि पर्याय आदि पूर्वपर्यंत भेदनिकौं अंगीकार करि अस्यंते कहिए प्राप्त करिए भेद करिए त समास कहिए, पर्याय ज्ञानतैं जे पीछैं भेद तिनिकौं पर्यायसमास कहिए। अक्षर ज्ञानतैं जे पीछैं भेद तिनकौं अक्षरसमास कहिए ऐसैं ही दश भेद जानने। ऐसैं पूर्व चौदह अर वस्तु एकसौ पिच्याणवैं अर प्राभृतक तीन हजार नवसै अर प्राभृतक प्राभृतक तिराणवै हजार छसै अर अनुयोग तीन लाख चौहत्तरि हजार च्यारिसै अर प्रतिपत्तिक अर संघात अर पद क्रमतैं संख्यात हजार गुणे अर एक पदके अक्षर सोलहसौ चौंतीस कोडि तियासी लाख सात हजार आठसै अठ्यासी अर समस्त श्रुतके अक्षर एकघाटि एकट्ठी प्रमाण इनिकौं पदके अक्षरनिका भाग दीएं जो लब्धराशि होइ सो द्वादशांगके पदोंका प्रमाण जानना। अब शेष अक्षर हैं ते अंगवाह्य श्रुतके जानने। ३४८ ३४९। तहां प्रथम द्वादशांगके पदनिकी संख्या कहैं हैं—

बारुत्तरसयकोडी तेसीदी तहय होंति लक्खाणं।
अट्ठावण्णसहस्सा पंचेव पदाणि अंगाणं॥ ३५०॥

द्वादशोत्तरशतकोट्यः त्र्यशीतिस्तथा च भवति लक्षाणां।
अष्टापंचाशत्सहस्राणि पंचैव पदानि अंगानां॥ ३५०॥

जी० प्र०—द्वादशोत्तरशतकोट्यः त्र्यशीतिलक्षाणि अष्टपंचाशत्सहस्राणि पंच च द्वादशांगानां मध्यमसर्वपदप्रमाणं भवति ११२,८३,५८,००५। अंग्यते मध्यमपदैर्लक्ष्यते इत्यंगं। अथवा आचारादिद्वादशशास्त्रसमूहरूपश्रुतस्कंधस्य अंगं अवयवः एकदेशः आचाराद्येकैकशास्त्रमित्यर्थः॥ ३५०॥ ७४७
अथांगवाह्याक्षरसंख्यां कथयति—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मं० प्र०—द्वादशोत्तरशतं कोट्यः त्र्यशीतिलक्षाणि अष्टापंचशत्सहस्राणि पंच द्वादशानामंगानां पदानि यथा प्रत्येकं वक्ष्यंते तथैव मिलितानि सर्वाण्यपि भवंति । ११२८३५८००५ । अंग्यते मध्यमपदैर्लक्ष्यते इत्यंगं । अथवा आचारादिद्वादशशास्त्रसमूहस्य श्रुतस्कंधस्य अंग-अवयवः-एकदेशः, आचाराद्यैकैकशास्त्रमित्यर्थः ॥ ३५० ॥ अथांगवाह्यस्य अक्षरसंख्यां प्ररूपयति——

स० चं०-एकसौ बारह कोडि तियासी लाख अठावन हजार पांच पद ११२८३५८००५ सर्व द्वादशांगके जानने । अंग्यते कहिए मध्यम पदनिकरि जो लखिये सो अंग कहिए अथवा सर्व श्रुतका जो एक एक आचारांगादिक रूप अवयव सो अंग कहिए । ऐसैं अंग शब्दकी निरुक्ति है ॥ ३५० ॥ आगैं जो अंगवाह्य प्रकीर्णक तिनिके अक्षरनिकी संख्या कहै हैं—

अडकोडिएयलक्खा अट्ठसहस्सा य एयसदिगं च ।
पण्णत्तरि वण्णाओ पइण्णयाणं पमाणं तु ॥ ३५१ ॥

अष्टकोट्येकलक्षाणि अष्टसहस्राणि च एकशतकं च ।
पंचसप्ततिः वर्णाः प्रकीर्णकानां प्रमाणं तु ॥ ३५१ ॥

जी० प्र०—अष्टकोट्येकलक्षाष्टसहस्रैकशतपंचसप्ततिप्रमाणाः प्रकीर्णकानां अंगवाह्यानां सामायिकादीनां च चतुर्दशानां वर्णा भवंति ८०१०८१७५ तुशब्दः पूर्वसूत्रे द्वादशांगपदसंख्योक्ता, अस्मिन् सूत्रे च अंगवाह्याक्षरसंख्योक्तेति विशेषं ज्ञायति ॥ ३५१ ॥ अथामुमेवार्थं गाथाद्वयेनाह—

मं० प्र०—अष्टकोट्येकलक्षाष्टसहस्रपंचसप्तत्युत्तरैकशतप्रमाणाः प्रकीर्णकानामंगवाह्यानां सामायिकादीनां चतुर्दशानां वर्णा भवंति । ८०१०८१७५ । तुशब्दो विशेषार्थः । पूर्वसूत्रे द्वादशांगानां पदसंख्या उक्ता । अस्मिन् सूत्रे अंगवाह्यानामक्षरसंख्या उक्ता इत्ययं विशेषः । द्विरूपवर्गधारायां रूपोने षष्ठवर्गे एकट्ठिमात्रे मध्यमपदवर्णैर्भक्ते सति लब्धं द्वादशांगपदप्रमाणं । अवशिष्टमंगवाह्याक्षरप्रमाणं भवति॥३५१॥अथैतदर्थनिर्णयार्थं गाथाचतुष्टयेन प्रक्रियां प्ररूपयति—

स० चं०—बहुरि सामायिकादिक प्रकीर्णकनिके अक्षर आठ कोडि एक लाख आठ हजार एकसौ पिचहत्तरि ८०१०८१७५ जानने । ३५१ । आगैं इस अर्थके निर्णय करनेके अर्थि च्यारि गाथानिकरि अक्षरनिकी प्रक्रिया कहै हैं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेत्तीस वेंजिणाइं सत्तावीसा सरा तहा भणिया ।
चत्तारि य जोगवहा चउसट्ठी मूलवण्णाओ ॥ ३५२ ॥

त्रयस्त्रिंशत् व्यंजनानि सप्तविंशतिः स्वरास्तथा भणिताः ।
चत्वारश्च योगवहाः चतुःषष्टिः मूलवर्णाः ॥ ३५२ ॥

अो—अहो भव्य ! व्यंजनानि अर्धमात्राणि क् ख् ग् घ् ङ् । च् छ् ज् झ् ञ् । ट् ठ् ड् ढ् ण् । त् थ् द् ध् न् । प् फ् ब् भ् म् । य् र् ल् व् श् ष् स् ह् । इत्येतानि त्रयस्त्रिंशत् ३३ । स्वराः एकद्वित्रिमात्राः । अ इ उ ऋ ऌ ए ऐ ओ औ इत्येते नव, प्रत्येकं ह्रस्वदीर्घप्लुतभेदैस्त्रिभिर्गुणिताः अ आ आ ३, इ ई ई ३, उ ऊ ऊ ३, ऋ ॠ ॠ ३, ऌ ॡ ॡ ३, ए १ ए २ ए ३, ऐ १ ऐ २ ऐ ३, ओ १ ओ २ ओ ३, औ १ औ २ औ ३ इत्येते सप्तविंशतिः २७ । योगवाहाः अं अः ≍क ≍प इत्येते चत्वारः ४, एवं मिलित्वा मूलवर्णाश्चतुःषष्टिः ६४ । यथानादिधने परमागमे प्रसिद्धास्तथैवात्र भणिताः संजानीहि । व्यज्यते स्फुटीक्रियते अर्थो यैस्तानि व्यंजनानि । स्वरंति—अर्थं कथयंतीति स्वराः । योगं—अन्याक्षरसंयोगं वहंतीति योगवाहाः । मूलानि संयुक्तोत्तरवर्णोत्पत्तिकारणानि वर्णाः, मूलवर्णाः इति समासार्थवलेन असंयुक्ता एव चतुःषष्टिरिति लभ्यंते । ऌवर्णः संस्कृते दीर्घो नास्ति तथापि अनुकरणे देशांतरभाषायां चास्ति । ए ऐ ओ औ इति चत्वारोऽपि संस्कृते ह्रस्वा न संति तथापि प्राकृते देशांतरभाषायां च संति ॥ ३५२ ॥

मं० प्र०—व्यंजनानि अर्धमात्राणि क् ख् ग् घ् ङ् । च् छ् ज् झ् ञ् । ट् ठ् ड् ढ् ण् । त् थ् द् ध् न् । प् फ् ब् भ् म् । य् र् ल् व् श् ष् स् ह् इत्येतानि त्रयस्त्रिंशत् ३३ । स्वराः एकद्वित्रिमात्राः अ इ उ ऋ ऌ ए ऐ ओ औ इत्येते नव प्रत्येकं ह्रस्वदीर्घप्लुतभेदैस्त्रिभिर्गुणिताः अ आ आ ३ । इ ई ई ३ । उ ऊ ऊ ३ । ऋ ॠ ॠ ३ । ऌ ॡ ॡ ३ । ए १ ए २ ए ३ । ऐ १ ऐ २ ऐ ३ । ओ १ ओ २ ओ ३ । औ १ औ २ औ ३ । इत्येते सप्तविंशतिः २७ । योगवाहाः अं अः ≍क ≍प इत्येते चत्वारः । ४ । सर्वे मिलिताः, मूलवर्णाः असंयुक्तवर्णाः चतुष्षष्टिः । ६४ । यथा अनादिनिधने परमागमे प्रसिद्धाः तथात्र भणिताः-कथिताः । चशब्दः समुच्चयार्थः । व्यज्यते स्फुटीक्रियते अर्थो यैस्तानि व्यंजनानि । स्वरंति-अर्थं कथयंतीति स्वराः । योगमन्याक्षरसंयोगं वहंतीति योगवाहाः । मूलानि-संयुक्तोत्तरवर्णोत्पत्तिकारणानि मूताः वर्णा मूलवर्णाः इति समासार्थवलेन असंयुक्ता एव एते चतुःषष्टिवर्णा ग्राह्याः । ऌकारस्य दीर्घस्य संस्कृते अभावेपि अनुकरणे देशभाषांतरेषु च सद्भावः । ए ऐ ओ औ इत्येतेषां चतुर्णां संस्कृते ह्रस्वस्याभावेऽपि प्राकृते देशभाषासु च सद्भावोस्ति ॥ ३५२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स.चं.–ओ कहिये हो भव्य ! तेतीस ३३ तौ व्यंजन अक्षर हैं आधी मात्रा जाके बोलनेके कालविषैं होइ ताकौं व्यंजन कहिये क् ख् ग् घ् ङ् । च् छ् ज् झ् ञ् । ट् ठ् ड् ढ् ण् । त् थ् द् ध् न् । प् फ् ब् भ् म् । य् र् ल् व् । श् ष् स् ह् ए तेतीस व्यंजन अक्षर हैं। बहुरि सत्ताईस स्वर अक्षर हैं अ १ इ १ उ १ ऋ १ लृ १ ए १ ऐ १ ओ १ औ १ ए नव अक्षर, इनिके एक एकके ह्रस्व दीर्घ प्लुत तीन भेदनिकरि गुणैं सत्ताईस भेद हो हैं। अ आ आ ३ । इ ई ई ३ । उ ऊ ऊ ३ । ऋ ॠ ॠ ३ । लृ लॄ लॄ ३ । ए ए ए ३ । ऐ ऐ ऐ ३ । ओ ओ ओ ३ । औ औ औ ३ । ए सत्ताईस स्वर हैं। जाकी एक मात्रा होय ताकौ ह्रस्व कहिये । जाकी दोय मात्रा होंइ ताकौं दीर्घ कहिए। जाकी तीन मात्रा होंइ ताकौं प्लुत कहिए। बहुरि च्यारि योगवाह अक्षर हैं अनुस्वार १ विसर्ग १ जिह्वामूलीय १ उपध्मानीय १ तहां अं ऐसा अक्षर अनुस्वार है। अः ऐसा अक्षर विसर्ग है। कः ᳵ ऐसा अक्षर जिह्वामूलीय है पः ᳵ ऐसा अक्षर उपध्मानीय है। ए चौसठि मूल अक्षर अनादिनिधन परमागमविषै प्रसिद्ध हैं। सिद्धो वर्णः समाम्नायः' इति वचनात् । व्यज्यते कहिए अर्थ जिनिकरि प्रकट करिए ते व्यंजन कहिए। स्वरंति कहिए अर्थकौं कहैं ते स्वर कहिए। योग कहिए अक्षरके संयोगको वहंति कहिए प्राप्त होंइ ते योगवह कहिए। मूल कहिए और अक्षरके संयोगरहित चौंसठि संयोगी अक्षर उपजनेकौं कारण ये चौसठि मूलवर्ण हैं । इस अर्थ करि द्वितीयादि अक्षरके संयोगरहित चौसठि अक्षर हैं इनिविषै दोय आदि अक्षर मिलैं संयोगी हो है। जैसे क्कार व्यंजन अकार स्वर मिलिकरि क ऐसा अक्षर हो है। आकारके मिलनेतैं का ऐसा अक्षर हो है इत्यादि संयोगी अक्षर उपजनेकौं कारण चौसठि मूल अक्षर जानने । इहां प्रश्न–जो व्याकरणविषै ए ऐ ओ औ इनिकौं ह्रस्व न कहे है इहां ए भी ह्रस्व कैसें कहे ताका समाधान–जो संस्कृत भाषाविषैं ह्रस्वरूप ए ऐ ओ औ नाहीं हो है तातैं न कहे । प्राकृत भाषा विषैं वा देशांतरकी भाषाविषैं ए ऐ ओ औ ए अक्षर भी ह्रस्व हो हैं तातैं इहां कहे हैं। बहुरि एक दीर्घ लृकार संस्कृत भाषाविषैं नाहीं हैं तथापि अनुकरणविषैं देशांतरकी भाषाविषैं हो है तातैं इहां कह्या है ॥ ३५२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चउसट्ठिपदं विरलिय दुगं च दाऊण संगुणं किच्चा।
रूऊणं च कुए पुण सुदणाणस्सक्खरा होंति॥ ३५३॥

चतुःषष्टिपदं विरलयित्वा द्विकं च दत्त्वा संगुणं कृत्वा।
रूपोने च कृते पुनः श्रुतज्ञानस्याक्षराणि भवंति॥ ३५३॥

जी० प्र०—मूलवर्णप्रमाणं चःषष्टिपदं एकैकरूपेण विरलयित्वा रूपं रूपं प्रति द्विकं दत्त्वा परस्परं संगुणय तल्लब्धे रूपोने कृते सति श्रुतज्ञानस्य द्वादशांगप्रकीर्णकरूपश्रुतस्कंधस्य द्रव्यश्रुतस्य अपुनरुक्ताक्षराणि भवंति। वाक्यार्थप्रतीत्यर्थं गृहीतानां पुनरुक्ताक्षराणां संख्यानियमाभावात्॥३५३॥ तदपुनरुक्ताक्षरप्रमाणं कियदिति चेदाह—

मं० प्र०—चतुःषष्टिपदं मूलवर्णप्रमाणचतुःषष्ट्यंकस्थानरूपाणि विरलयित्वा पंक्तिरूपेण तिर्यक्संस्थाप्य रूपं प्रति द्विकं दत्त्वा संगुणं--परस्परगुणनं कृत्वा लब्धे रूपोने कृते सति श्रुतज्ञानस्य—श्रुतकेवलस्य, द्वादशांगप्रकीर्णकश्रुतस्कंधरूपस्य द्रव्यश्रुतस्य अपुनरुक्ताक्षराणि तल्लब्धप्रमितानि भवंति वाक्यार्थप्रतीतिनिमित्तपुनरुक्ताक्षराणां संख्यानियमाभावात्। चशब्दौ क्रियासमुच्चयार्थौ। पुनःशब्दो रूपोनकरणे विशेषमाह। एकद्वित्र्यादिसंयोगाक्षराणां चतुःषष्टिसंयोगपर्यंतानां संकलने सति श्रुतस्कंधाक्षरप्रमाणोत्पत्तिर्भवति इत्ययं विशेषः॥ ३५३॥

स० चं०—मूल अक्षर प्रमाण चौसठि स्थान तिनिका विरलन करिये वरोवरि पंक्तिरूप एक एक जुदा चौसठि जायगा माडिए तहां एक २ के स्थान दोय दोयका अंक २ माडिये पाछै उनकौं परस्पर गुणन करिये दोय दून्यों च्यारि ४ च्यारि दून्यो आठ ८ आठ दून्यो सोलह १६ ऐसैं चौसठि पर्यंत गुणन कीये जो एकट्ठी प्रमाण आवै तामें एक घटाइये इतने अक्षर सर्व द्रव्यश्रुतके जानने ते ये अक्षर अपुनरुक्त जानने जातैं जो वाक्यका अर्थका प्रतीतिके निमित्त उनही कहे अक्षरनिकौं वारंवार कहे तौ उनका किछू संख्याका नियम है नाहीं॥३५३॥ तिनि अपुनरुक्त अक्षरनिका प्रमाण कितना है सो कहै हैं—

एकट्ठ च च य छस्सत्तयं च च य सुण्णसत्ततियसत्ता। ७५१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुण्ण णव पण पंच य एक्कं छक्केक्कगो य पणगं च ॥ ३५४ ॥

एकाष्ट च च च षट्सप्तकं च च च शून्यसप्तत्रिकसप्त ।
शून्यं नव पंच पंच च एकं षट्कैककश्च पंचकं च ॥ ३५४ ॥

जी० प्र०—एकाष्टचतुश्चतुःषट्सप्तकं चतुश्चतुःशून्यसप्तत्रिकसप्तशून्यं नवपंचपंचएकं षट्कैकश्च पंचकं च इत्येकांकादिपंचांकावसानविंशतिस्थानात्मकद्विरूपवर्गधारोत्पन्नरूपोनषष्ठवर्गप्रमाणाक्षराणि भवंति—१८४४६७४४०७३७०९५५१६१५। एतानि अक्षराणि एकद्वित्रिसंयोगादीनि चतुःषष्टिसंयोगपर्यंतानि संति तेषामुत्पत्तिक्रमो दर्श्यते तद्यथा—उक्तमूलवर्णा चतुःषष्टि तिर्यक्पंक्त्या लिखित्वा तत्र कवर्णे प्रत्येकभंगे एकः १। द्विसंयोगो नास्ति। खवर्णे प्रत्येकभंगः १ द्विसंयोगो भंगः १ एवं २। गवर्णे प्र १ द्वि २ त्रि १ एवं ४। घवर्णे प्र १ द्वि ३ त्रि ३ च १ एवं ८। ङ वर्णे प्र १ द्वि ४ त्रि ६ च ४ पं १ एवं १६। चवर्णे प्र १ द्वि ५ त्रि १० च १० पं ५ ष १ एवं ३२। छवर्णे प्र १ द्वि ६ त्रि १५ च २० पं १५ ष ६ सप्त १ एवं ६४। जवर्णे प्र १ द्वि ७ त्रि २१ च ३५ पं ३५ ष २१ सप्त ७ अष्ट १ एवं १२८। झवर्णे प्र १ द्वि ८ त्रि २८ च ५६ पं ७० ष ५६ सप्त २८ अष्ट ८ नव १ एवं २५६। ञवर्णे प्र १ द्वि ९ त्रि ३६ च ८४ पं १२६ ष १२६ सप्त ८४ अष्ट ३६ नव ९ दश १ एवं ५१२। अनेन क्रमेण चतुःषष्टिस्थानेषु गतेषु प्रत्येकादिभंगाः पूर्वपूर्वेभ्यः उत्तरोत्तरे द्विगुणा द्विगुणा भवंति। ३५४। तेषां संख्यासाधने करणसूत्रं श्रीमदभयचंद्रसूरिसैद्धांतचक्रवर्तिश्रीपादप्रसादेन केशववर्णिनः प्राहुः—

पत्तेयभंगमेगं वेसंजोगं विरूवपदमेत्तं। तियसंजोगादिपमा रूवाहियवारहीणपदसंकलिदं ॥

प्रत्येकभंगमेकं द्विसंयोगं रूपोनपदमात्रं। त्रिसंयोगादिप्रमाणं रूपाधिकवारहीनपदसंकलितं ॥

विवक्षितस्थानेषु सर्वत्र प्रत्येकभंगः एकैकः। द्विसंयोगभंगो रूपोनपदमात्रः। त्रिसंयोगादीनां प्रमाणं तु यथाक्रमं रूपाधिकवारहीनपदसंकलितं। एकवारादिसंकलितं तद्वारसंख्यया एकरूपाधिकया हीनस्य विवक्षितपदस्य यावत्तावद्भवति। यथा दशमे ञवर्णे। त्रिसंयोगाः द्विरूपोनपदस्य एकवारसंकलनमात्राः—१०—२ । १०—१
२ । १ अपवर्तिताः ३६ चतुःसंयोगाः त्रिरूपोनपदस्य द्विकवारसंकलनमात्राः—७ । ८ । ९
३ । २ । १ अपवर्तिताः ८४। पंचसंयोगाः चतूरूपोनपदस्य त्रिकवारसंकलनमात्राः ६ । ७ । ८ । ९
४ । ३ । २ । १ अपवर्तिताः १२६। षट् संयोगाः पंच रूपोनपदस्य चतुर्वारसंकलनमात्राः ५ । ६ । ७ । ८ । ९
५ । ४ । ३ । २ । १ अपवर्तिताः १२६। सप्तसंयोगाः षड्रूपोनपदस्य पंचवारसंकलनमात्राः ४ । ५ । ६ । ७ । ८ । ९
६ । ५ । ४ । ३ । २ । १

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वादशोत्तरपंचशतमेव द्विगुणा द्विगुणा भूत्वा चतुश्चरमत्रिचरमद्विचरमचरमेषु एकट्ठस्य षोडशांशाष्टांशचतुर्थांशार्धप्रमिता भवंति । १ । २ । ४ । ८ । १६ । ३२ । ६४ । १२८ । २५६ । ५१२ । ००० । ०० । ००० । १८= । १८= । १८= । १८= । एवं स्थिताक्षरसंख्या चउसट्ठिपदं विरलिय इत्या-
१६ । ८ । ४ । २
दिना वा 'अंतधणं गुणगुणियं' इत्यादिना वा संकलिता सती द्वादशांगप्रकीर्णकश्रुतस्कंधसमस्ताक्षरसंख्या रूपोनैकट्ठप्रमिता भवतीति तात्पर्यं ।३५४॥

मं० प्र०—एकाष्टचतुश्चतुःषट्सप्तचतुश्चतु शून्यसप्तत्रिकसप्तशून्यनवपंचपंचैकषडेकपंचप्रमितं श्रुतस्कंधापुनरुक्ताक्षरप्रमाणं । चतुःशब्दस्य आद्यक्षरश्चकारो गृहीतः । सत्तयं चेति चकारः समुच्चयार्थोऽव्ययः । पंच चेति अंत्यचकारोऽपि समुच्चयार्थोऽव्ययः । मध्ये मध्ये विभक्तिर्दृश्यते । तदनुसारेण एकाष्टचतुश्चतुःषट्सप्तकं च चतुश्चतुःशून्यसप्तत्रिकसप्तशून्यं नव पंच पंच च एकं षट्कं एकैकश्च पंच च इति छाया द्रष्टव्या । १८४४६७४४०७३७०९५५१६१५ । इदानीं द्विसंयोगाद्यक्षरभंगप्राक्रिया दर्श्यते । तद्यथा—अ आ आ ३ । इ ई ई ३ । इति षडक्षराणि लिखित्वा प्रत्येकाक्षराणि षट् । ६ । 'पढमक्खो अंतगदो' इत्यादिना अक्षसंचारेणोत्पन्नानि द्विसंयोगाक्षराणि पंचदश १५ । त्रिसंयोगाक्षराणि विंशतिः । २० । चतुःसंयोगाक्षराणि पंचदश १५ । पंचसंयोगाक्षराणि षट् ६ षट्संयोगाक्षरमेकं १ । एवं सर्वाणि मिलितानि त्रिषष्टिः ६३ । एवं सप्तसंयोगादिचतुःषष्टिसंयोगपर्यंताक्षराणि अव्यामोहेनाक्षसंचारपूर्वकमानेतव्यानि । एवमानीतानि सर्वाण्यक्षराणि द्विरूपषष्ठवर्गस्य रूपोनस्य यावंति रूपाणि तावंति भवंति ॥ ३५४ ॥

स० चं०—एक आठ च्यारि च्यारि छह सात च्यारि च्यारि विंदी सात तीन सात विंदी नव पांच पांच एक छह एक पंच इतने अंक क्रमतैं लिखैं जो प्रमाण होइ तितने अक्षर सर्व श्रुतके जानने १८४४६७४४०७३७०९५५१६१५ इतने अक्षर हैं। द्विरूप वर्गधाराका छठा वर्गस्थान एकट्ठी प्रमाण है तामैं एक घटायें असैं एक आदि पंच पर्यंत वीस अंक रूप प्रमाण हो है बहुरि इहां विशेष कहिये है-एक अक्षर एक संयोगी द्विसंयोगी त्रिसंयोगी आदि चौसठि संयोगी पर्यंत जानने। तिनकी उत्पत्तिका अनुक्रम दिखाइये है यहां कहे मूलवर्ण चौसठि तिनकौं वरोवरि पंक्तिकरि लिखिये। बहुरि तहां केवल कवर्णविषैं तौ एक प्रत्येक भंग ही है। द्विसंयोगी आदि नाहीं है। बहुरि ख वर्ण सहितविषैं प्रत्येक भंग एक द्विसंयोगी एक असैं दोय भंग है। बहुरि गवर्ण सहितविषैं प्रत्येक भंग एक द्विसंयोगी दोय त्रिसंयोगी एक असैं च्यारि भंग है। बहुरि घवर्णसहित विषैं प्रत्येक भंग एक द्विसंयोगी तीन त्रिसंयोगी तीन चतुः संयोगी एक असैं आठ भंग जानना। बहुरि ङ वर्ण सहितविषैं प्रत्येक भंग एक द्विसंयोगी च्यारि त्रिसंयोगी छह चतुः संयोगी च्यारि पंच संयोगी एक असैं सोलह भंग हैं। बहुरि चवर्ण सहितविषैं प्रत्येक भंग एक द्विसंयोगी त्रिसंयोगी चतुः संयोगी पंच संयोगी षट् संयोगी क्रमतैं पांच दश दश पांच एक असैं वत्तीस भंग हैं बहुरि छ वर्ण सहित विषैं प्रत्येक द्वि त्रि चतुः पंच षट् सप्त संयोगी भंग क्रमतैं एक छह पंद्रह ७५३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वीस पंद्रह छह एक ऐसैं चौसठि भंग है। बहुरि जवर्ण सहितविषैं प्रत्येक द्वि त्रि चतुः पंच षट् सप्त अष्ट संयोगी भंग क्रमतैं एक सात इकईस पैंतीस पैंतीस इकईस सात एक ऐसैं एकसौ अट्ठाईस भंग हैं। बहुरि झवर्ण सहित विषैं प्रत्येक द्वि त्रि चतुः पंच षट् सप्त अष्ट नव संयोगी भंग क्रमतैं एक आठ अट्ठाईस छप्पन सत्तरि छप्पन अठाईस आठ एक ऐसैं दोयसै छप्पन भंग हैं। बहुरि ञ वर्णसहितविषैं प्रत्येक द्वि त्रि चतुः पंच षट् सप्त अष्ट नव दश संयोगी भंग क्रमतैं एक नव छत्तीस चौरासी एकसौ छब्बीस एकसौ छब्बीस चौरासी छत्तीस नव एक ऐसैं पांचसै बारह भंग हैं इसही अनुक्रमकरि चौसठि स्थाननिविषैं प्रत्येक आदि भंग पूर्व पूर्व स्थानतैं उत्तर २ स्थानविषैं दूणे दूणे हो हैं ॥

क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	०० चौसठि ६४ पर्यंत
१	१	१	१	१	१	१	१	१	१	प्रत्येक
१	१	२	३	४	५	६	७	८	९	द्विसंयोगी
जोड	२	१	३	६	१०	१५	२१	२८	३६	त्रिसंयोगी
	जोड	४	१	४	१०	२०	३५	५६	८४	चतुःसंयोगी
		जोड	८	१	५	१५	३५	७०	१२६	पंचसंयोगी
			जोड	१६	१	६	२१	५६	१२६	षट्संयोगी
				जोड	३२	१	७	२८	८४	सप्तसंयोगी
					जोड	६४	१	८	३६	अष्टसंयोगी
						जोड	१२८	१	९	नवसंयोगी
							जोड	२५६	१	दशसंयोगी
								जोड	५१२	००

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इहां प्रत्येक आदि भंगनिका स्वरूप कहा? सो कहिये है—जुदे जुदे ग्रहणरूप प्रत्येक भंग हैं ते येकही प्रकार हैं। जैसें दशवां ञवर्णकी विवक्षाविषैं ञवर्णकौं जुदा ग्रहण करिये यहु येक ही प्रत्येक भंग का विधान जानना। बहुरि दोय तीन आदि अक्षरनिके संयोगतैं जे भंग होंइ तिनकौं द्विसंयोगी त्रिसंयोगी आदि कहिये ते अनेक प्रकार हो हैं जैसें दशवां ञ वर्णकी विवक्षाविषैं दोय अक्षरनिका संयोग—क् ञ्। ख ञ्। ग् ञ्। घ् ञ्। ङ् ञ्। च् ञ्। छ् ञ्। ज् ञ्। झ् ञ्। ऐसें नव प्रकार हो है। बहुरि तीनि अक्षरनिका संयोग क् ख् ञ्। क् ग् ञ्। क् घ् ञ्। क् ङ् ञ्। क् च् ञ्। क् छ् ञ्। क् ज् ञ्। क् झ् ञ्। ख् ग् ञ्। ख् घ् ञ्। ख् ङ् ञ्। ख् च् ञ्। ख् छ् ञ्। ख्-ज् ञ्। ख् झ् ञ्। ग् घ् ञ्। ग् ङ् ञ्। ग् च् ञ्। ग् छ् ञ्। ग् ज् ञ्। ग् झ् ञ्। घ् ङ् ञ्। घ् च् ञ्। घ् छ् ञ्। घ् ज् ञ्। घ् झ् ञ्। ङ् च् ञ्। ङ् छ् ञ्। ङ् ज् ञ्। ङ् झ् ञ्। च् छ् ञ्। च् ज् ञ्। च् झ् ञ्। छ् ज् ञ्। छ् झ् ञ्। ज् झ् ञ्। ऐसें छत्तीस प्रकार भंग हो है। ऐसें ही अन्य जानने। बहुरि जितनेकी विवक्षा होइ तितनां संयोगी भंग एक ही प्रकार हो है। जैसें दश अक्षरनिकी विवक्षा विषै दश अक्षरनिका संयोग रूप भंग एकही हो है ऐसें भंगनिका स्वरूप जानना। इहां श्रीअभयचन्द्रसूरि सिद्धान्तचक्रवर्तिके चरणनिका प्रसादकरि केशववर्णी संस्कृत टीकाकार सो तिन एक दोय संयोगी आदि भंगनिकी संख्याका साधनविषै करण सूत्र कहै हैं—

पत्तेयभंगमेगं वेसंजोगं विरूवपदमेत्तं।
तियसंजोगादिपमा रूवाहियवारहीणपदसंकलिदं॥

विवक्षित स्थान विषैं सर्वत्र प्रत्येक भंग एक एक ही है बहुरि द्विसंयोगी भंग एक घाटि गच्छ प्रमाण है इहां जेथवां स्थान विवक्षित होइ तीहिं प्रमाण गच्छ जानना। बहुरि त्रिसंयोगी आदि भंगनिका क्रमतैं एक अधिक वार हीन गच्छका संकलन धनमात्र प्रमाण है। भावार्थ यहु जो त्रिसंयोगी चतुःसंयोगी आदि विषैं एकवार दोयवार आदि संकलन करना। बहुरि जेतीवार संकलन होइ तातैं एक अधिक प्रमाणकों विवक्षित गच्छमें घटाएं अवशेष जेता प्रमाण रहै तितनेका संकलन करना। जैसें दशवां स्थानकी विवक्षा विषैं त्रिसंयोगी ७५५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भंग ल्यावनेकों एकवार संकलन अर एकवारका प्रमाण एक तातैं एक अधिक दोय सो गच्छ दशमें घटाएं आठ होइ ऐसैं आठका एकवार संकलन धनमात्र तहां त्रिसंयोगी भंग जानना । ऐसैं ही अन्यत्र जानना । बहुरि संकलन धन ल्यावनेकों पूर्वै केशववर्णी करि उक्त सूत्र कहे थे—

तत्तो रूवहियकमे गुणगारा होंति उड्ढगच्छोत्ति।
इगिरूवमादिरूउत्तरहारा होंति पभवोत्ति ॥

इन सूत्रनिके अनुसारि विवक्षित संकलन धन ल्यावना। अब ऐसैं करण सूत्रके अनुसार उदाहरण दिखाइए है-विवक्षित दशमा अवर्ण तहां प्रत्येक भंग एक द्विसंयोगी एक घाटि गच्छमात्र नव त्रिसंयोगी भंग दोय घाटि गच्छमात्र आठ ताका एकवार संकलन धनमात्र सो संकलन धनके साधन करण सूत्रके अनुसारि आठ नवकौं दोय एकका भाग दीएं छत्तीस हो हैं। जातैं आठ नवकौं परस्पर गुणैं बहत्तरि भाज्य दोय एककौं परस्पर गुणैं भागहार दोय भागहारका भाग भाज्यकौं दीएं छत्तीस भए। ऐसैं ही चतुःसंयोगी भंग तीन घाटि गच्छका दोयवार संकलन धनमात्र है तहां सात आठ नवकौं तीन दोय एकका भाग दीएं चौरासी हो हैं। बहुरि पंचसंयोगी च्यारि घाटि गच्छ का तीनवार संकलधनमात्र है तहां छह सात आठ नवकौं च्यारि तीन दोय एकका भाग दीएं एकसौ छब्बीस हो हैं। बहुरि छह संयोगी पांच घाटि गच्छका च्यारिवार संकलनधनमात्र हैं तहां पांच छह सात आठ नवकौं पांच च्यारि तीन दोय एकका भाग दीएं एकसौ छब्बीस हो हैं। बहुरि सप्तसंयोगी छह घाटि गच्छका पांचवार संकलन धनमात्र है। तहां च्यारि पांच छह सात आठ नवकौं पांच च्यारि तीन दोय येकका भाग दीएं चौरासी हो हैं। बहुरि आठ संयोगी सात घाटि गच्छका छहवार संकलन धनमात्र है तहां तीन च्यारि पांच छह सात आठ नवकौं सात छह पांच च्यारि तीन दोय येकका भाग दीएं छत्तीस हो है। बहुरि नव संयोगी आठ घाटि गच्छका सातवार संकलनधनमात्र है तहां दोय तीन च्यारि पांच छह सात आठ नवकौं आठ सात छह पांच च्यारि तीन दोय एकका भाग दीएं नव हो हैं। बहुरि दश संयोगी नव घाटि गच्छका आठवार संकल धनमात्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

है। इहां परमार्थतैं संकलन नाहीं जातैं एकका सर्ववार संकलन एक ही हो है तातैं एक है ऐसैं सबनिका जोड दीएं दशवां स्थानविषैं पांचसै बारह भंग भए॥ ऐसैं ही सर्व स्थाननि विषैं ल्यावना। तहां अंतका चौसठिवां स्थानविषैं प्रत्येक भंग एक बहुरि द्विसंयोगी भंग एक घाटि गच्छमात्र तरेसठि बहुरि त्रिसंयोगी भंग दोय घाटि गच्छका एकवार संकलन धनमात्र तहां बासठि तरेसठिकौं दोय एकका भाग दीएं उगणीससै तरेपन हो हैं। बहुरि चतुःसंयोगी तीन घाटि गच्छ दोयवार संकलनधनमात्र तहां इकसठि बासठि तरेसठिकौं तीन दोय एकका भाग दीएं गुणतालीस हजार सातसै ग्यारह भंग हो हैं बहुरि पंचसंयोगी च्यारि घाटि गच्छका तीनवार संकलन धनमात्र तहां साठि इकसठि बासठि तरेसठिकौं च्यारि तीन दोय एकका भाग दीएं पांचलाख पिच्याणवै हजार छसै पैसठि हो हैं ऐसैं ही षट् संयोगी आदि भंग पांच आदि एक एक बँधता घाटि गच्छका तीन आदि एक एक बंधतावार संकलनधनमात्र जानने। तहां पूर्वोक्ततैं गुणसठि अठावन आदि भाज्यविषैं अर पांच छह आदि भागहारनिविषैं अधिक अधिक माडि भाज्यकौं भागहारका भाग दीएं जेता जेता प्रमाण आवै तितना तितना तहां तहां षट्संयोगी आदि भंग जानने। तहां तरेसठि संयोगी भंग बासठि घाटि गच्छ दोय ताका एकसठिवार संकलन धनमात्र तहां दोय तीन आदि एक एक बंधता तरेसठि पर्यंतकौं बासठि इकसठि आदि एक एक घटता एकपर्यंतका भाग दीएं यथा संभव अपवर्तन कीएं तरेसठि भंग हो हैं। बहुरि चौसठि संयोगी भंग एकही है। ऐसैं चौसठिवां स्थानविषैं प्रत्येक आदि चौसठि संयोगी पर्यंत भंगनिकौं जोडैं एकट्ठीका आधा प्रमाणमात्र भंग होइ। ऐसैं एक आदि एक एक अधिक चौसठि पर्यन्त अक्षरनिके स्थाननिविषै 'पत्तेयभंगमेगं' इत्यादि करण सूत्रनिकरि भंग हो है। अथवा गुणस्थानाधिकारविषैं प्रमादनिका व्याख्यान करते अक्ष संचार विधान कह्या था तिस विधान करि भी ऐसैं ही भंग हो हैं ते भंग क्रमतैं एक दोय चारि आठ सोलह बत्तीस चौसठि एक सौ अठाईस दोयसै छप्पन पांचसै बारह एक हजार चौबीस दोय हजार अडतालिस च्यारि हजार छिनवै आठ हजार एकसौ बानवै सोलह हजार तीनसौ चौरासी बत्तीस हजार सातसै अडसठि पैंसठ हजार पांचसै ७५७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

छतीस एकलाख इकतीस हजार बहत्तरि दोय लाख बासठि हजार एकसौ चवालीस पांच लाख चौबीस हजार दोयसै अठासी दश लाख अडतालीस हजार पांचसै छिहत्तरि बीस लाख सित्याणवे हजार एकसौ बावन इकतालीस लाख चौराणवे हजार तीनसै दोय तियासी लाख अठासी हजार छसै चारि एक कोडि सडसाठिलाख तेहत्तरि हजार दोयसै आठ इत्यादि दूणें दूणे हो हैं अंत स्थान तैं चौथा तीसरा दूसरा अन्तस्थानविषैं एकट्ठीका सोलवां आठवां चौथा दूसरा भागमात्र भए तिन सबनिकौं जोडै 'चउसट्ठिपदं विरलिय' इत्यादि सूत्रोक्त एक घाटि एकट्ठी मात्र भंग हो है अथवा 'अन्तधणं गुणगुणियं 'आदि विहीणं रूउणुत्तरभजियं' इस करण सूत्र-करि अन्त धन एकट्ठीका आधा ताकौं गुणकार दोय करि गुणैं एकट्ठी तामैं एक घटाएं एक घाटि एकट्ठी एक घाटी गुणकार एक ताका भाग दिएं भी इतने ही सर्व भंग हो हैं ऐसैं सर्वश्रुत संबंधी समस्त अक्षरनिकी संख्या एक घाटि एकट्ठी प्रमाण जानना इहां जैसैं अ आ आ इ ई ई इनि छह अक्षरनिविषैं प्रत्येक भंग छह द्विसंयोगी पंद्रह त्रिसंयोगी वीस चतुःसंयोगी पंद्रह पंचसंयोगी छह छह संयोगी एक मिलि तरेसठि भंग होंइ। छह जायगा दूवा मांडि परस्पर गुणे येक घटाय तरेसठि हो हैं तैसैं चौसठि मूल अक्षरनिविषैं पूर्वै एक एक स्थानविषैं एक एक प्रत्येक भंग मिलि चौसठि भए। ऐसैं ही सर्व स्थानकनिके द्विसंयोगी त्रिसंयोगी आदि भंग मांडि जितने जितने होंइ तितने तितने द्विसंयोगी त्रिसंयोगी आदि भंग जानने। सबनिकौं जोडैं येक घाटि एकट्ठी प्रमाण हो हैं सोई चौसठि जायगा दोयका अंक मांडि परस्पर गुणैं तहां एक घटाएं एक घाटि एकट्ठी प्रमाण श्रुतज्ञानके अक्षर जानने ॥ ३५४ ॥

मज्झिमपदक्खरवहिदवण्णा ते अंगपुव्वगपदाणि।
सेसक्खरसंखा ओ पइण्णयाणं पमाणं तु ॥ ३५५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मध्यमपदाक्षरावहितवर्णास्ते अंगपूर्वगपदानि ।
शेषाक्षरसंख्या अहो प्रकीर्णकानां प्रमाणं तु ॥ ३५५ ॥

जी० प्र०—मध्यमपदस्य परमागमप्रसिद्धस्याक्षरैः षोडशशतचतुस्त्रिंशत्कोटित्र्यशीतिलक्षसप्तसहस्राष्टशताष्टाशीतिप्रमितैः तेषु सकलश्रुतस्कंधाक्षरेषु रूपोनैकट्ठमात्रेषु भक्तेषु यल्लब्धं तावंत्यंगपूर्वगतमध्यमपदानि भवंति। अवशिष्टाक्षरसंख्या अंगवाह्यप्रकीर्णकाक्षरप्रमाणं भवति। यद्येतावतामक्षराणां एकं मध्यमपदं तदा एतावदक्षराणां कियंति मध्यमपदानि भवंति ? इति त्रैराशिकं कृत्वा प्रमाणराशिना भक्ते यल्लब्धं तदंगपूर्वपदानि भवंति । ११-२८३५८००५ । अवशिष्टाक्षरराशि सामायिकाद्यंगवाह्यश्रुताक्षरराशि भवंति । ८०१०८१७५ । ओ ! अहो भव्य ! इत्यंगांगवाह्यश्रुतद्वयस्य यथासंभवं पदप्रमाणमक्षरप्रमाणं च त्वं जानीहि । प्राकृते ओ शब्दः अव्ययं संबोधनार्थः ॥३५५॥ अथांगपूर्वपदसंख्याविशेषं त्रयोदशगाथासूत्रैराख्याति—

मं०प्र०—मध्यमपदस्य परमागमप्रसिद्धस्य, अक्षरैः—षोडशशतचतुस्त्रिंशत्कोटित्र्यशीतिलक्षसप्तसहस्राष्टशताष्टाशीतिप्रमितैः, तेषु सकलश्रुतस्कंधाक्षरेषु अवहृतेषु—भक्तेषु, यल्लब्धं तावंति अंगपूर्वगतमध्यमपदानि भवंति । अवशिष्टाक्षरसंख्या अंगवाह्यप्रकीर्णकानां प्रमाणं भवति । यद्येतावद्भिरक्षरैः प्र १६३४८३०-७८८८ एकं मध्यमपदं लभ्यते । फ १ । तदा एतावद्भिरक्षरैः इ १८४४६७४४०७३७०९५५१६१५ कियंति मध्यमपदानि लभ्यंते इति त्रैराशिकेन लब्धान्यंगपूर्वपदानि । ११२८३५८००५ । अवशिष्टाक्षराणि ८०१०८१७५ । ओ इति प्राकृते संबोधनार्थमव्ययं । अहो भव्याः ! इत्थमंगप्रविष्टांगवाह्यश्रुतयोः पदाक्षरप्रमाणे भवद्भिर्ज्ञातव्ये इति । तुशब्दो विशेषार्थः पूर्ववत् ॥ ३५५ ॥ अथ श्रीमाधवचंद्रत्रैविद्यदेवा अंगपूर्वाणां पदसंख्याविशेषं त्रयोदशभिर्गाथाभिः प्ररूपयंति—

स.चं०—एक घाटि एकट्ठी प्रमाण समस्तश्रुतके अक्षर कहे तिनिकौं परमागमविषैं प्रसिद्ध जो मध्यम पद ताके अक्षरनिका प्रमाण सोलासै चौतीस कोडि तियासीलाख सातहजार आठसै अठ्यासी ताका भाग दीएं जो पदनिका प्रमाण आवै तितने तौ अंगपूर्व संबंधी मध्यम पद जानने। बहुरि अवशेष जे अक्षर रहे ते प्रकीर्णकौंके जानने सो एक सौ बारह कोडि तियासीलाख अठावन हजार पांच इतने तौ अंग प्रविष्ट श्रुतका पदनिका प्रमाण आया अवशेष आठ कोडि एक लाख आठ हजार एकसौ पिचहत्तरि अक्षर रहे ते अंगवाह्य प्रकीर्णकके जानने। ऐसैं अंगप्रविष्ट अंगवाह्य दोय प्रकार श्रुतके पदनिका वा अक्षरनिका प्रमाण हे भव्य ! तू जानि ॥ ३५५ ॥ आगै श्रीमाधवचन्द्र त्रैविद्यदेव तेरह गाथानि करि अंगपूर्वनिके पदनिकी संख्या प्ररूपै हैं—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आयारे सुद्दयडे ठाणे समवायणामगे अंगे ।
तत्तो विक्खापण्णत्तीए णाहस्स धम्मकहा ॥ ३५६ ॥

आचारे सूत्रकृते स्थाने समवायनामके अंगे ।
ततो व्याख्याप्रज्ञप्तौ नाथस्य धर्मकथायां ॥ ३५६ ॥

जी० प्र०—द्रव्यश्रुतमधिकृत्य निरुक्तिप्रतिपाद्यार्थपदसंख्याविशेषाणां तत्तदंगपूर्वेषु प्ररूपणा क्रियते भावश्रुते निरुक्त्याद्यसंभवात् । अत्र द्वादशांगेषु प्रथमाचारांगं कथितं । कुतः ? मोक्षहेतुभूतसंवरनिर्जराकारणपंचाचारादिसकलचारित्रप्रतिपादकत्वेन मुमुक्षुभिराद्रियमाणस्य मोक्षांगभूतस्य परमागमशास्त्रस्य प्रथमतोवक्तव्यत्वस्य युक्तिसिद्धत्वात् । चतुर्ज्ञानसप्तर्धिसंपन्नगणधरदेवैः तीर्थकरमुखसरोजसंभूतसर्वभाषात्मकदिव्यध्वनिश्रवणावधारितसमस्तशब्दार्थैः शिष्यप्रशिष्यानुग्रहार्थं विरचितश्रुतस्कंधद्वादशांगानां मध्ये प्रथममाचारांगं विरचितं । आचरंति समंततोऽनुतिष्ठंति मोक्षमार्गमाराधयंति अस्मिन्ननेनेति वा आचारः तस्मिन् आचारांगे—

जदं चरे जदं चिट्ठे जदं आसे जदं सये ।
जदं भुंजेज्जमासेज्ज एवं पावं ण वज्झई ॥ १ ॥

कथं चरेत् ? कथं तिष्ठेत ? कथमासीत् ? कथं शयीत ? कथं भाषेत ? कथं भुंजीत ? कथं पापं न बध्यते ? इति गणधरप्रश्नानुसारेण यतं चरेत् । यतं तिष्ठेत् । यतमासीत । यतं शयीत । यतं भाषेत । यतं भुंजीत । एवं पापं न बध्यते इत्याद्युत्तरवाक्यप्रतिपादिमुनिजनसमस्ताचरणं वर्ण्यते । सूत्रयति—संक्षेपेण अर्थं सूचयति इति सूत्रं परमागमः । तदर्थं कृतं करणं ज्ञानविनयादिनिर्विघ्नाध्ययनादिक्रिया, अथवा प्रज्ञापना, कल्प्याकल्प्यं, छेदोपस्थापना, व्यवहारधर्मक्रिया, स्वसमयपरसमयस्वरूपं च सूत्रैः कृतं करणं क्रियाविशेषो यस्मिन् वर्ण्यते तत् सूत्रकृतं नाम द्वितीयमंगं । तिष्ठंति अस्मिन् एकाद्येकोत्तराणि स्थानानीति स्थानं तस्मिन् संग्रहनयेन एक एवात्मा । व्यवहारनयेन संसारी मुक्तश्चेति द्विविकल्पः उत्पादव्ययध्रौव्ययुक्त इति त्रिलक्षणः । कर्मवशात् चतुर्गतिषु संक्रामतीति चतुःसंक्रमणयुक्तः औपशमिकक्षायिकक्षायोपशमिकौदयिकपारिणामिकभेदेन पंचविशिष्टधर्मप्रधानः पूर्वदक्षिणपश्चिमोत्तरोर्ध्वाधोगतिभेदेन संसारावस्थायां षट्कोपक्रमयुक्तः स्यादस्ति स्यान्नास्ति स्यादस्तिनास्ति स्यादवक्तव्यः स्यादस्त्यवक्तव्यः स्यान्नास्त्यवक्तव्यः स्यादस्तिनास्त्यवक्तव्यः इत्यादि सप्तभंगीसद्भावेष्युपयुक्तः अष्टविधकर्मास्रवयुक्तत्वादष्टास्रवः नव जीवाजीवास्रवबंधसंवरनिर्जरामोक्षपुण्यपापरूपा अर्थाः—पदार्थाः विषयाः यस्य स नवार्थः । पृथिव्यप्तेजोवायुप्रत्येकसाधारणद्वित्रिचतुःपंचेंद्रियभेदाद् दशस्थानकः इत्यादीनि जी-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वस्य, सामान्यार्पणादेकः पुद्गलः विशेषार्पणया अणुस्कंधभेदाद् द्वितयः, इत्यादि पुद्गलादीनां च एकाद्येकोत्तरस्थानानि वर्ण्यंते इति स्थानं नाम तृतीयमंगं। सं—संग्रहेण सादृश्यसामान्येन अवेयंते ज्ञायंते जीवादिपदार्था द्रव्यक्षेत्रकालभावानाश्रित्य अस्मिन्निति समवायांगं। तत्र द्रव्याश्रयेण धर्मास्तिकायेन अधर्मास्तिकायः सदृशः। संसारिजीवेन संसारिजीवः सदृशः। मुक्तजीवेन मुक्तजीवः सदृशः इत्यादिर्द्रव्यसमवायः। क्षेत्राश्रयेण सीमंतनरक-मनुष्यक्षेत्र--ऋत्विद्रक--सिद्धक्षेत्राणि प्रदेशतः सदृशानि। अवधिस्थान-नरक-जंबूद्वीप- सर्वार्थसिद्धिविमानानि सदृशानि इत्यादि क्षेत्रसमवायः। एकसमयः एकसमयेन सदृशः, आवलिः आवल्या सदृशी, प्रथमपृथ्वीनारकभावनव्यंतराणां जघन्यायूंषि सदृशानि। सप्तमपृथ्वीनरकसर्वार्थसिद्धिदेवानां उत्कृष्टायुषी सदृशे इत्यादिः कालसमवायः। केवलज्ञानं केवलदर्शनेन सदृशमित्यादिर्भावसमवायः इति समवायाख्यं चतुर्थमंगं। विशेषैः बहुप्रकारैराख्यातं किमस्ति जीवः? किं नास्ति जीवः? किमेको जीवः? किमनेको जीवः? किं नित्यो जीवः? किमनित्यो जीवः? किं वक्तव्यो जीवः? किमवक्तव्यो जीव इत्यादीनि षष्टिसहस्रसंख्यानि भगवदर्हत्तीर्थंकरसन्निधौ गणधरदेवप्रश्नवाक्यानि प्रज्ञाप्यंते कथ्यंते यस्यां सा व्याख्याप्रज्ञप्तिनाम पंचममंगं। नाथः-त्रिलोकेश्वराणांस्वामी तीर्थंकरपरमभट्टारकः तस्य धर्मकथा जीवादिवस्तुस्वभावकथनं, घातिकर्मक्षयानंतरकेवलज्ञानसहोत्पन्नतीर्थंकरत्वपुण्यातिशयविजृंभितमहिम्नः तीर्थंकरस्य पूर्वाह्णमध्याह्नापराह्णार्धरात्रेषु षट्षट्घटिकाकालपर्यंतं द्वादशगणसभामध्ये स्वभावतो दिव्यध्वनिरुद्गच्छति अन्यकालेऽपि गणधरशक्रचक्रधरप्रश्नानंतरं चोद्भवति एवं समुद्भूतो दिव्यध्वनिः समस्तासन्नश्रोतृगणानुद्दिश्य उत्तमक्षमादिलक्षणं रत्नत्रयात्मकं वा धर्मं कथयति। अथवा ज्ञातुर्गणधरदेवस्य जिज्ञासमानस्य प्रश्नानुसारेण तदुत्तरवाक्यरूपा धर्मकथा तत्पृष्टास्तित्वनास्तित्वादिस्वरूपकथनं, अथवा ज्ञातॄणां तीर्थंकरगणधरशक्रचक्रधरादीनां धर्मानुबंधिकथोपकथाकथनं नाथधर्मकथा ज्ञातृधर्मकथानाम वा षष्ठमंगं ॥ ३५६ ॥

मं० प्र०—द्रव्यश्रुतमधिकृत्य निरुक्तिप्रतिपाद्यार्थपदसंख्याविशेषाणां तत्तदंगपूर्वेषु प्ररूपणा क्रियते भावश्रुते निरुक्त्याद्यसंभवात्। द्वादशांगानां प्रथममाचारांगं मोक्षार्थस्य परमागमस्य मुमुक्षुभिराद्रियमाणत्वेन मोक्षहेतुसंवरनिर्जराकारणपंचाचारादिसकलचारित्रप्रतिपादकस्य शास्त्रस्य प्रथमतो वक्तव्यत्वं युक्तिसिद्धमिति चतुर्ज्ञानसप्तर्द्धिसंपन्नैर्गणधरदेवैस्तीर्थकरमुखारविंदसंभूतसर्वभाषात्मकदिव्यध्वनिश्रवणावधारितसमस्तशब्दार्थैः शिष्यप्रशिष्यानुग्रहार्थं विरचितस्य श्रुतस्कंधस्य द्वादशांगानां मध्ये आचारांगं प्रथमं विरचितं। आचरंति—समंततः अनुतिष्ठंति मोक्षमार्गमाराधयंत्यस्मिन्ननेनेति वा आचारः, तस्मिन्नाचारांगे कथं चरेत्? कथं तिष्ठेत्? कथमासीत? कथं शयीत? कथं भाषेत? कथं भुंजीत? कथं पापं न बध्यते? इत्यादि गणधरप्रश्नानुसारेण यतं चरेत्? यतं तिष्ठेत्? यतमासीत, यतं शयीत, यतं भाषेत, यतं भुंजीत, एवं पापं न बध्यते इत्याद्युत्तरवाक्यप्रतिपादितं मुनीनां समस्तमाचरणं वर्ण्यते। सूत्रयति—संक्षेपेणार्थं सूचयतीति सूत्रं परमागमः, तदर्थंकृतं—करणं ज्ञानविनयादिनिर्विघ्नाध्ययनादिक्रिया। अथवा प्रज्ञापना—कल्प्याकल्प्य—छेदोपस्थापना—व्यवहारधर्मक्रियाः स्वसमयपरसमयस्वरूपं च सूत्रैः कृतं—करणं क्रियाविशेषो यस्मिन्वर्ण्यते तत्सूत्रकृतं नाम द्वितीयमंगं। तिष्ठंत्यस्मिन्नेकाद्येकोत्तराणि स्थानानीति स्थानं तस्मिन् संग्रहनयेन एक एवात्मा, व्यवहारनयेन संसारी मुक्तश्चेति द्विविकल्पः। उत्पादव्ययध्रौव्ययुक्तः इति त्रिलक्षणः। कर्मवशाच्चतुर्गतिषु संक्रामतीति चतुःसंक्रमणयुक्तः। औपशमिकक्षायिकक्षायोपशमिकौदयिकपारणामिकभेदेन पंचविशिष्टधर्मप्रधानः। पूर्वदक्षिणपश्चिमोत्तरोर्ध्वाधोगतिभेदेन संसारावस्थायां षट्कोपक्रमयुक्तः। स्यादस्ति, ७६१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्यान्नास्ति, स्यादस्तिनास्ति, स्यादवक्तव्यःस्यादस्त्यवक्तव्यःस्यान्नास्त्यवक्तव्यःस्यादस्तिनास्त्यवक्तव्यः इत्यादि सप्तभंगीसद्भाव उपयुक्तः। अष्टविधकर्मास्रवण युक्तत्वादष्टास्रवः, नव-जीवाजीवास्रवबंधसंवरनिर्जरामोक्षपुण्यपापरूपा अर्थाः-पदार्थाः विषया यस्य स नवार्थः । पृथिव्यप्तेजोवायुप्रत्येकसाधारणाद्वित्रिचतुःपंचेंद्रियभेदाद्दशस्थानकः इत्यादीनि जीवस्य, सामान्यार्पणया एकः पुद्गलः, विशेषार्पणया अणुस्कंधभेदाद् द्वितयः इत्यादि पुद्गलादीनां च एकाद्येकोत्तरस्थानानि वर्ण्यंते इति स्थानं नाम तृतीयमंगं । सं-संग्रहेण-सादृश्यसामान्येन अवेयंते-ज्ञायंते जीवादिपदार्था द्रव्यक्षेत्रकालभावानाश्रित्य यस्मिन्निति समवायांगं। तत्र द्रव्याश्रयेण धर्मास्तिकायेन अधर्मास्तिकायः सदृशः, संसारिजीवेन संसारिजीवःसदृशः, मुक्तजीवेन मुक्तजीवः सदृशः, इत्यादिर्द्रव्यसमवायः, क्षेत्राश्रयेण सीमंतनरकमनुष्यक्षेत्रऋर्त्विद्रकाणि सदृशानि । अवधिस्थाननरकजंबूद्वीपसर्वार्थसिद्धिविमानानि सदृशानि इत्यादिः क्षेत्रसमवायः । एकसमयः एकसमयेन सदृशः, आवलिः आवल्या सदृशी, प्रथमपृथ्वीनारकभावनव्यंतराणां जघन्यायूंषि सदृशानि । सप्तमपृथ्वीनारकसर्वार्थसिद्धिदेवानामुत्कृष्टायुषी सदृशे इत्यादिः कालसमवायः। केवलज्ञानं केवलदर्शनेन सदृशमित्यादिर्भावसमवायः। इति समवायाख्यं चतुर्थमंगं । विशेषैः-बहुत्वप्रकारैः आख्या, किमस्ति जीवः, किं नास्ति जीवः, किमेको जीवः, किमनेको जीवः, किंनित्यो जीवः, किमनित्यो जीवः, किं वक्तव्यो जीवः, किमवक्तव्यो जीवः, इत्यादीनि षष्टिसहस्रसंख्यानि भगवदर्हत्तीर्थंकरसन्निधौ गणधरदेवप्रश्नवाक्यानि प्रज्ञाप्यंते- कथ्यंते यस्यां सा व्याख्याप्रज्ञप्तिनाम पंचममंगं। नाथः-त्रिलोकेश्वराणां स्वामी तीर्थंकरपरम-भट्टारकः तस्य धर्मकथा जीवादिवस्तुस्वभावकथनं घातिकर्मक्षयानंतरकेवलज्ञानसहोत्पन्नतीर्थंकरत्वपुण्यातिशयावजृंभितमहिम्नः तीर्थंकरस्य पूर्वाह्णमध्याह्नापराह्णार्धरात्रेषु षट्षट्घटिकाकालपर्यंतं द्वादशगणसभामध्ये स्वभावतो दिव्यध्वनिरुद्गच्छति, अन्यकालेऽपि गणधरशक्रचक्रधरप्रश्नानंतरं चोद्भवति एवं समुद्भूतो दिव्यध्वनिः समस्तासन्नश्रोतृगणानुत्तमक्षमादिलक्षणं वा धर्मं कथयति । अथवा ज्ञातुर्गणधरदेवस्य जिज्ञासमानस्य प्रश्नानुसारेण तदुत्तरवाक्यरूपा धर्मकथा तत्पृष्टास्तित्वनास्तित्वादिस्वरूपकथनं । अथ वा ज्ञातॄणां तीर्थंकरगणधरशक्रचक्रवर्त्यादीनां धर्मानुबंधिकथोपकथाकथनं नाथधर्मकथा ज्ञातृधर्मकथा नाम वा षष्ठमंगं ॥ ३५६ ॥

सं० चं०—द्रव्यश्रुतकी अपेक्षा सार्थक निरुक्ति लीएं अंगपूर्वके पदनिकी संख्या कहिए है जातैं भावश्रुत विषैं निरुक्त्यादिक संभवैही नाहीं तहां द्वादश अंगनिविषैं प्रथम ही आचारांग है जातैं परमागम जो है सो मोक्षके निमित्त है याहीतैं मोक्षाभिलाषी याकौं आदरं हैं तहां मोक्षका कारण सवरं निर्जरा तिनिका कारण पंचाचारादि सकल चारित्र है तातैं तिस चारित्रका प्रतिपादक शास्त्र पहिलैं कहना सिद्ध भया तीहि कारणतैं च्यारि ज्ञान सप्त ऋद्धिके धारक गणधर देवनिकरि तीर्थंकरके मुखकमलतैं उत्पन्न जो सर्व भाषामय दिव्यध्वनि ताकं सुननेतैं जो अर्थ अवधारण किया तिनिकरि शिष्य प्रतिशिष्यनिके अनुग्रहनिमित्त द्वादशांगरूप श्रुत रचना करी तीहिविषैं पहिलैं आचारांग कह्या सो आचरन्ति कहिए समस्तपनैं मोक्षकौं आराधै हैं जाकरि सो आचार, तिहिं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आचारांगविषैं ऐसा कथन है जो कैसैं चलिए ? कैसैं खडे रहिये ? कैसैं बैठिये ? कैसैं सोइए ? कैसैं बोलिए ? कैसैं खाइए ? कैसैं पाप कर्म न बंधैं ? इत्यादि गणधर प्रश्नके अनुसार यतनतैं चलिये यतनतैं खडे रहिये यतनतैं बैठिए यतनतैं सोइए यतनतैं बोलिए यतनतैं खाइये ऐसैं पापकर्म न बंधैं इत्यादि उत्तर वचन लीयें मुनीश्वरनिका समस्त आचरण इस आचारांगविषैं वर्णन कीजिये है। बहुरि सूत्रयति कहिए संक्षेपतैं अर्थकौं सूचै कहै ऐसा जो परमागम सो सूत्र ताके अर्थकृतं कहिए कारणभूत ज्ञानका विनय आदि निर्विघ्न अध्ययन आदि क्रिया विशेष सो जिसविषैं वर्णन कीजिये है। अथवा सूत्रकरि कीया धर्मक्रियारूप वा स्वमत परमतका स्वरूप क्रिया रूप विशेष सो जिस विषैं वर्णन कीजिये सो सूत्रकृत नामा दूसरा अंग हैं। बहुरि तिष्ठन्ति कहिए एक आदि एक एक बंधता स्थान जिस विषै पाइये सो स्थाननामा तीसरा अंग है तहां ऐसा व्याख्यान है संग्रह नयकरि आत्मा एक है व्यवहार नयकरि संसारी अर मुक्त दोय भेद संयुक्त है। बहुरि उत्पाद व्यय ध्रौव्य इनि तीन लक्षणनिकरि संयुक्त है। बहुरि कर्मके वशतैं च्यारि गतिविषैं भ्रमै है तातैं चतुःसंक्रमणयुक्त है। बहुरि औपशमिक क्षायिक क्षायोपशमिक औदयिक पारिणामिक भेद करि पंचस्वभाव करि प्रधान है। बहुरि पूर्व पश्चिम दक्षिण उत्तर ऊर्ध्व अध भेदकरि छह गमन करि संयुक्त है। संसारी जीव विग्रह गतिविषैं विदिशामें गमन न करै श्रेणीवद्ध छहों दिशाविषै गमन करै है। बहुरि स्यादस्ति स्यान्नास्ति स्यादस्ति नास्ति स्यादवक्तव्य स्यादस्ति अवक्तव्य स्यान्नास्ति अवक्तव्य स्यादास्तिनास्तिअवक्तव्य इत्यादि सप्तभंगी विषैं उपयुक्त है। बहुरि आठ प्रकार कर्मका आश्रय करि संयुक्त है। बहुरि जीव अजीव आस्रव बंध संवर निर्जरा मोक्ष पुण्य पाप ये नव पदार्थ हैं विषय जाके ऐसा नवार्थ है। बहुरि पृथ्वी अप् तेज वायु प्रत्येक वनस्पती साधारण वनस्पति द्वींद्रिय त्रींदिय चतुरिन्द्रिय पंचेन्द्रिय भेदतैं दश स्थान हैं। इत्यादि जीवकौं प्ररूपै है। बहुरि पुद्गल सामान्य अपेक्षा एक है विशेष करि अणुस्कन्धके भेदतैं दोय प्रकार है इत्यादि पुदलकौं प्ररूपै है। ऐसैं एकने आदि देकरि एक एक बंधता स्थान इस अंगविषैं वर्णिये है। बहुरि 'सं' कहिये समानता करि अवेयंते कहिये जीवादि पदार्थ जिसविषैं जानिये सो समवायांग चौथा जानना।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इसविषैं द्रव्य क्षेत्र काल भाव अपेक्षा समानता प्ररूपै हैं तहां द्रव्यकरि धर्मास्तिकाय अरअधर्मास्तिकाय समान है। संसारी जीवनिकरि संसारी जीव समान हैं। मुक्तजीवकरि मुक्तजीव समान हैं इत्यादिक द्रव्य समवाय है। बहुरि क्षेत्रकरि प्रथम नरकका प्रथम पाथडेका सीमंत नामा इंद्रकविला अर अढाई द्वीपरूप मनुष्यक्षेत्र प्रथम स्वर्गका प्रथम पटलका ऋजु नामा इंद्रक विमान अर सिद्धसिला सिद्धक्षेत्र ये समान हैं। बहुरि सातवां नरकका अवधि स्थान नामा इंद्रक विला अर जंबूद्वीप अर सर्वार्थसिद्धिविमान ये समान हैं इत्यादि क्षेत्र समवाय है। बहुरि कालकरि एक समय एक समय समान है। आवली आवली समान है। प्रथम पृथ्वीके नारकी भवनवासी व्यंतर इनिकी जघन्य आयु समान है बहुरि सातवीं पृथ्वीके नारकी सर्वार्थसिद्धिके देव इनिकी उत्कृष्ट आयु समान है इत्यादिक कालसमवाय है। बहुरि भावकरि केवलज्ञान केवलदर्शन समान हैं इत्यादि भावसमवाय है ऐसैं इत्यादि समानता इस अंगविषैं वर्णिये हैं। बहुरि 'वि' कहिये विशेषकरि बहुत प्रकार आख्या कहिये गणधरके कीये प्रश्न प्रज्ञाप्यंते कहिये जानिये जिसविषैं ऐसा व्याख्याप्रज्ञप्तिनामा पांचवा अंग जानना। इस विषैं ऐसा कथन है–कि जीवअस्ति है कि जीवनास्ति है कि जीव एक है कि जीव अनेक है कि जीव नित्य है कि जीव अनित्य है कि जीव वक्तव्य है कि जीव अवक्तव्य है इत्यादि साठि हजार प्रश्न गणधर देव तीर्थंकरके निकट कीये ताका वर्णन इस अंगविषैं है। बहुरि नाथ कहिये तीन लोकका स्वामी तीर्थंकर परम भट्टारक तिनके धर्मकी कथा जिस विषैं होइ ऐसा नाथधर्मकथा नाम छठा अंग है। इसविषैं जीवादि पदार्थनिका स्वभाव वर्णन करिए है। बहुरि घातियाकर्मके नाशतैं उत्पन्न भया केवल ज्ञान उसहीके साथि तीर्थंकर नामा पुण्य प्रकृतिके उदयतैं जाकैं महिमा प्रकट भया ऐसा तीर्थंकरकै पूर्वाह्न मध्याह्न अपराह्न अर्धरात्रि इनि च्यारि कालनिविषैं छह छह घडी पर्यन्त बारह सभाके मध्य सहज ही दिव्यध्वनि होय है बहुरि गणधर इंद्र चक्रवर्ति इनके प्रश्न करनेतैं और कालविषैं भी दिव्यध्वनि हो है ऐसा दिव्यध्वनि निकटवर्ती श्रोतृजननिकौं उत्तम क्षमा आदि दश प्रकार वा रत्नत्रय स्वरूप धर्म कहै है इत्यादि इस अंग विषैं कथन है। अथवा इसही छठा अंगका दूसरा नाम ज्ञातृधर्मकथा है सो याका

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थ यहु है-ज्ञाता जो गणधर देव जाननेकी है इच्छा जाकैं ताका प्रश्नके अनुसारि उत्तर रूप जो धर्मकथा ताकौं ज्ञातृधर्मकथा कहिए। जे अस्ति नास्ति इत्यादिकरूप प्रश्न गणधरदेव कीये तिनिका उत्तर इस अंगविषै वर्णन करिये है। अथवा ज्ञाता तीर्थंकर गणधर इंद्र चक्रवर्त्यादिक तिनिका धर्मसंबंधी कथा इसविषैं पाइये है तातैं भी ज्ञातृधर्मकथा ऐसा नामका धारी छठा अंग जानना ॥ ३५६ ॥

तो वासयअज्झयणे अंतयडे णुत्तरोववाददसे।
पण्हाणं वायरणे विवायसुत्ते य पदसंखा ॥ ३५७ ॥

तत उपासकाध्ययने अंतकृते अनुत्तरौपपाददशे।
प्रश्नानां व्याकरणे विपाकसूत्रे च पदसंख्या ॥ ३५७ ॥

जी० प्र०—ततः परं उपासते आहारादिदानैर्नित्यमहादिपूजाविधानैश्च संघमाराधयंतीति उपासकाः ते अधीयंते पठ्यंते दर्शनिकव्रतिकसामयिकप्रोषधोपवाससचित्तविरतरात्रिभक्तव्रतब्रह्मचर्यारंभपरिग्रहनिवृत्तानुमतोद्दिष्टविरतभेदैकादशनिलयसंबंधिव्रतगुणशीलाचारक्रियामंत्रादिविस्तरैर्वर्ण्यंते अस्मिन्निति उपासकाध्ययनं नाम सप्तममंगं। प्रति तीर्थं दश दश मुनीश्वराः तीव्रं चतुर्विधोपसर्गं सोढ्वा इन्द्रादिभिर्विरचितां पूजादिप्रातिहार्यसंभावनां लब्ध्वा कर्मक्षयानंतरं संसारस्यांतं अवसानं कृतवंतोऽन्तकृतः। श्रीवर्धमानतीर्थे नमि-मतंग-सोमिल-रामपुत्र-सुदर्शन-यमलीक-वलिक-किष्कंविल-पालंवष्ट-पुत्रा इति दश। एवं वृषभादितीर्थेष्वपि दशदशांतकृतो वर्ण्यंते यस्मिंस्तदंतकृद्दशनामाष्टममंगं। तथा उपपादः प्रयोजनमेषां ते इमे औपपादिकाः। अनुत्तरेषु विजयवैजयंतजयंतापराजितसर्वार्थसिद्धयाख्येषु औपपादिकाः अनुत्तरौपपादिकाः। प्रति तीर्थं दश दश मुनयो दारुणान् महोपसर्गान् सोढ्वा लब्धप्रातिहार्याः समाधिविधिना त्यक्तप्राणाः ये विजयाद्यनुत्तरविमानेषूपपन्नाः ते वर्ण्यंते यस्मिंस्तदनुत्तरौपपादिकदशं नाम नवममंगं। तत्र श्रीवर्धमानतीर्थे ऋजुदास-धन्य-सुनक्षत्र-कार्तिकेय-नंद-नंदन-शालिभद्र-अभय-वारिषेण-चिलातपुत्रा इत्येते दारुणमहोपसर्गान् विजित्य इंद्रादिकृतां पूजां लब्ध्वा अनुत्तरविमानेषूपपन्नाः एवं वृषभादितीर्थेष्वपि परमागमानुसारेण ज्ञातव्याः। प्रश्नस्य-दूतवाक्यनष्टमुष्टिचिंतादिरूपस्य अर्थः त्रिकालगोचरो धनधान्यादिलाभालाभसुखदुःखजीवितमरणजयपराजयादिरूपो व्याक्रियते व्याख्यायते यस्मिंस्तत्प्रश्नव्याकरणं। अथवा शिष्यप्रश्नानुरूपतया अवक्षेपणी विक्षेपणी संवेजनी निर्वेजनी चेति कथा चतुर्विधा। तत्र प्रथमानुयोगकरणानुयोगचरणानुयोगद्रव्यानुयोगरूपपरमागमपदार्थानां तीर्थंकरादिवृत्तांतलोकसंस्थानदेशसकलयतिधर्मपंचास्तिकायादीनां परमताशंकारहितं कथनमाक्षेपणी कथा। प्रमाणनयात्मकयुक्तियुक्तहेतुत्वादिबलेन सर्वथैकांतादि परसम-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यार्थनिराकरणरूपा विक्षेपणी कथा। रत्नत्रयात्मकधर्मानुष्ठानफलभूततीर्थकराद्यैश्वर्यप्रभावतेजोवीर्यज्ञानसुखादिवर्णनारूपा संवेजनी कथा। संसारश-रीरभोगरागजनितदुष्कर्मफलनारकादिदुःखदुष्कुलविरूपांगदारिद्र्यापमानदुःखादिवर्णनाद्वारेण वैराग्यकथनरूपा निर्वेजनी कथा एवंविधाः कथाः व्याक्रि-यंते व्याख्यायंते यस्मिंस्तत्प्रश्नव्याकरणं नाम दशममंगं। शुभाशुभकर्मणां तीव्रमंदमध्यमविकल्पशक्तिरूपानुभागस्य द्रव्यक्षेत्रकालभावाश्रयफलदानपरि-णातिरूप उदयः-विपाकः तं सूत्रयति वर्णयतीति विपाकसूत्रं नामैकादशमंगं। एतेष्वाचारादिषु विपाकसूत्रपर्यंतेषु एकादशसु अंगेषु प्रत्येकं मध्यम-पदानां संख्या यथाक्रमं वक्ष्यते इत्यर्थः ॥ ३५७ ॥

मं० प्र०--ततः उपासते आहारादिदानैर्नित्यमहादिपूजाविधानैश्च संघमाराधयंतीत्युपासकाः, ते अधीयंते--पठ्यंते दर्शनिकव्रतिकसामायिकप्रोषधोपवाससचि-त्तविरतरात्रिभक्तव्रतब्रह्मचर्यारंभपरिग्रहनिवृत्तानुमतोद्दिष्टविरतभेदैकादशनिलयसंबंधिव्रतगुणशीलाचारक्रियामंत्रादिविस्तरैर्वर्ण्यंते अस्मिन्नित्युपासकाध्ययनं नाम सप्त-ममंगं। प्रति तीर्थं दश दश मुनीश्वराः तीव्रं चतुर्विधोपसर्गं सोढ्वा इंद्रादिभिर्विरचितां पूजादिप्रातिहार्यसंभावनां लब्ध्वा कर्मक्षयानंतरं संसारस्यांतं कृतवंतोऽ-तकृतः। श्रीवर्धमानतीर्थे नमि--मतंग--सोमिल--रामपुत्र--सुदर्शन--यमलीक--वलिक--किस्कंविल--पालंबष्ट--पुत्रा इति दश। एवं वृषभादितीर्थेष्वपि दश दश अंतकृतो वर्ण्यंते यस्मिन् तदंतकृद्दशं नामाष्टममंगं। तथा उपपादः प्रयोजनं येषां ते इमे औपपादिकाः, अनुत्तरेषु विजय--वैजयंत--जयंत-अपराजित--सर्वार्थ-सिद्धयाख्येषु औपपादिकाः अनुत्तरौपपादिकाः। प्रति तीर्थं दश दश मुनयः दारुणान् महोपसर्गान् सोढ्वा लब्धप्रातिहार्याः समाधिविधिना त्यक्तप्राणाः ये विजयाद्यनुत्तरविमानेषूत्पन्नाः ते वर्ण्यंते यस्मिन् तदनुत्तरोपपादिकदशं नाम नवममंगं। तत्र श्रीवर्धमानतीर्थे ऋजुदास--धन्य--सुनक्षत्र--कार्तिकेय--नंद--नंदन--शालिभद्र--अभय--वारिषेण--चिलातपुत्रा इत्येते दारुणमहोपसर्गान् विजित्य इंद्रादिकृतां पूजां लब्ध्वा अनुत्तरविमानेषूपपन्नाः एवं वृषभादितीर्थेष्वपि परमाग-मानुसारेण ज्ञातव्याः। प्रश्नस्य--दूतवाक्यनष्टमुष्टिचिंतादिरूपस्य अर्थस्त्रिकालगोचरो धनधान्यादिलाभालाभसुखदुःखजीवितमरणजयपराजयादिरूपो व्याक्रियते यस्मिन् तत्प्रश्नव्याकरणं अथवा शिष्यप्रश्नानुरूपतया आक्षेपिणी विक्षेपिणी संवेजनी निर्वेजनी चेति कथा चतुर्विधा। तत्र प्रथमानुयोगकरणानुयोगचरणानुयोगद्र-व्यानुयोगरूपपरमागमपदार्थानां तीर्थकरादिवृत्तांतलोकसंस्थानदेशसर्वयतिधर्मपंचास्तिकायादीनां परमताशंकारहितकथनं--आक्षेपणी कथा। प्रमाणनयात्मकयु-क्तियुक्तहेतुवादबलेन सर्वथैकांतादिपरसमयार्थनिराकरणरूपा विक्षेपणी कथा। रत्नत्रयात्मकधर्मानुष्ठानफलभूततीर्थकराद्यैश्वर्यप्रभावतेजोवीर्यज्ञानसुखादिवर्णनारूपं संवेजनी कथा। संसारशरीरभोगरागजनितदुष्कर्मफलनारकादिदुष्कुलविरूपांगदारिद्र्यापमानदुःखादिवर्णनाद्वारेण वैराग्यकथनरूपा निर्वेजनी कथा, एवंविधाः कथा व्याक्रियंते व्याख्यायंते यस्मिन् तत्प्रश्नव्याकरणं नाम दशममंगं। शुभाशुभकर्मणां तीव्रमंदमध्यमविकल्पशक्तिरूपानुभागस्य द्रव्यक्षेत्रकालभावाश्रयः फलदानपरिणतिरूप उदयो विपाकः तं सूत्रयति वर्णयतीति विपाकसूत्रं नामैकादशमंगं, एतेषु आचारादिषु विपाकसूत्रपर्यंतेष्वेकादशसु अंगेषु प्रत्येकं मध्यम-पदानां संख्या यथाक्रमं वक्ष्यते इत्यर्थः ॥ २५७ ॥

स० च०--बहुरि तहां पीछैं उपासते कहिये आहारादि दानकरि वा पूजनादिकरि संघकौं सेवैं ऐसे जे श्रावक तिनिकौं उपासक कहिये, ते 'अधीयंते' कहिये पढैं सो उपासकाध्ययन नामा सातवां अंग है। इसविषैं दर्श-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निक १ व्रतिक २ सामायिक ३ प्रोषधोपवास ४ सचित्तविरति ५ रात्रिभक्तविरति ६ ब्रह्मचर्य ७ आरंभनिवृत्त ८ परिग्रहनिवृत्त ९ अनुमतिविरत १० उद्दिष्टविरत ११ ये गृहस्थकी ग्यारह प्रतिमा वा व्रत शील आचार क्रिया मंत्रादिक इनिका विस्तारकरि प्ररूपण है। बहुरि एक एक तीर्थंकरका तीर्थकालविषैं दश दश मुनीश्वर तीव्र चारि प्रकारका उपसर्ग सहि इंद्रादिक करि करी हुई पूजा आदि प्रातिहार्यरूप प्रभावना पाइ पापकर्मका नाशकरि संसारका जो अंत ताहि करते भये तिनिकौं अंतकृत् कहिये। तिनिका कथन जिस अंगमें होइ ताकौं अंतकृद्दशांग आठवां अंग कहिये। तहां वर्धमान स्वामीके वारैं नमि १ मतंग २ सोमिल ३ रामपुत्र ४ सुदर्शन ५ यमलीक ६ वलिक ७ किष्कंवल ८ पालंवष्ठ ९ पुत्र १० ये दशभये। ऐसैंही वृषभादिक एक एक तीर्थंकरके वारै दश दश अंतकृत् केवली हो हैं तिनिका कथन इस अंगविषैं है। बहुरि उपपाद है प्रयोजन जिनिका ऐसे औपपादिक कहिये। बहुरि अनुत्तर कहिये विजय १ वैजयंत २ जयंत ३ अपराजित ४ सर्वार्थसिद्धि ५ इनि विमाननिविषैं औपपादिक होंहिं उपजैं तिनिकौं अनुत्तरौपपादिक कहिये सो एक एक तीर्थंकरके वारैं दश दश महामुनि दारुण उपसर्ग सहि करि बड़ी पूजा पाइ समाधिकरि प्राण छोड़ि विजयादिक अनुत्तर विमाननिविषै उपजैं तिनिकी कथा जिस अंगविषैं होइ सो अनुत्तरौपपादिक दशांगनामा नवमा अंग जानना। तहां श्रीवर्धमान स्वामीके वारै—ऋजुदास १ धन्य २ सुनक्षत्र ३ कार्तिकेय ४ नंद ५ नंदन ६ सालिभद्र ७ अभय ८ वारिषेण ९ चिलातीपुत्र १० ये दश भये। ऐसैं ही दश दश अन्य तीर्थंकरके समय भी भये हैं। तिनि सवनिका कथन इस अंग विषैं है। बहुरि प्रश्न कहिये बूझनहारा पुरुष जो बूझै सो व्याक्रियंते कहिये जिसविषैं वर्णन करिये सो प्रश्न व्याकरण नामा दशवां अंग जानना। इसविषैं जो कोई बूझनेवाला गई वस्तुकौं वा मूठीकी वस्तुकौं वा चिंता वा धन धान्य लाभ अलाभ सुख दुःख जीवना मरणा जीति हारि इत्यादिक प्रश्न बूझै अतीत अनागत वर्तमानकाल संबंधी ताकौं यथार्थ कहनेका उपायरूप व्याख्यान इस अंगविषैं है। अथवा शिष्यकौं प्रश्नके अनुसार आक्षेपिणी १ विक्षेपिणी २ संवेजिनी ३ निर्वेजिनी ४ ये

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

च्यारि कथा भी प्रश्नव्याकरण अंगविषैं प्रकट कीजिये है। तहां तीर्थंकरादिकका चारित्ररूप प्रथमानुयोग, लोकका वर्णन रूप करणानुयोग, श्रावक मुनिधर्मका कथनरूप चरणानुयोग, पंचास्तिकायादिकका कथनरूप द्रव्यानुयोग इनिका कथन अर परमतकी शंका दूरि करिए सो आक्षेपिणी कथा बहुरि प्रमाण नय रूप युक्ति तीहिं करि न्यायके बलतैं सर्वथा एकांतवादी आदि परमतनिकरि कह्या अर्थ ताका खंडन करना सो विक्षेपिणीकथा बहुरि रत्नत्रयरूपधर्म अर तीर्थंकरादिपदकी ईश्वरता वा ज्ञान सुख वीर्यादिकरूप धर्मका फल ताके अनुरागकौं कारण सो संवेजिनी कथा बहुरि संसार देह भोगके रागतैं जीव नारकादिविषै दरिद्र अपमान पीडा दुःख भोगवै है इत्यादिक विराग होनेकौं कारणरूप जो कथा सो निर्वेजिनी कथा कहिये सो ऐसी भी कथा प्रश्नव्याकरण अंग विषैं पाइए है। बहुरि विपाक जो कर्मका उदय ताकौं सूत्रयति कहिये कहै सो विपाक सूत्रनामा ग्यारमां अंग जानना इसविषै कर्मनिका फलदेने रूप जो परिणमन सोई उदय कहिये ताका तीव्र मंद मध्यम अनुमान करि द्रव्य क्षेत्र काल भाव अपेक्षा वर्णन पाइए है ऐसैं आचारनैं आदि देकरि विपाक सूत्र पर्यंत ग्यारह अंग तिनिके पदनिकी संख्या कहिए है ॥ ३५७ ॥

अट्ठारस छत्तीसं बादालं अडकडी अडविछप्पण्णं ।
सत्तरि अट्ठावीसं चोद्दालं सोलससहस्सा ॥ ३५८ ॥
इगिदुगपंचेयारं तिवीसदुतिणउदिलक्ख तुरियादी ।
चुलसीदिणक्खमेया कोडी य विबागसूत्तम्हि ॥ ३५९ ॥

अष्टादश षट्त्रिंशत् द्वाचत्वारिंशत् अष्टकृतिः अष्टद्विपद्पंचाशत् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सप्ततिः अष्टाविंशतिः चतुश्चत्वारिंशत् षोडश सहस्राणि ॥ ३५८ ॥
एकद्विपंचैकादशत्रयोविंशतिद्वित्रिनवतिलक्षं चतुर्थादिषु।
चतुरशीतिलक्षमेका कोटिश्च विपाकसूत्रे ॥ ३५९ ॥

जी० प्र०—सहस्रशब्दः सर्वत्र संबध्यते । आचारांगे अष्टादशसहस्राणि पदानि १८००० । सूत्रकृतांगे षट्त्रिंशत्सहस्राणि पदानि ३६००० । स्थानांगे द्वाचत्वारिंशत्सहस्राणि पदानि ४२००० । चतुर्थादिषु समवायादिषु प्रश्नव्याकरणपर्यंतेषु सप्तस्वंगेषु एकलक्षादियोगः क्रियते । तद्यथा—समवायांगे एकलक्षचतुःषष्टिसहस्राणि पदानि १६४००० । व्याख्याप्रज्ञप्त्यंगे द्विलक्षाष्टाविंशतिसहस्राणि पदानि २२८००० । ज्ञातृकथांगे पंचलक्षषट्पंचाशत्सहस्राणि पदानि ५५६००० । उपासकाध्ययनांगे एकादशलक्षसप्ततिसहस्राणि पदानि ११७०००० । अंतकृद्दशांगे त्रयोविंशतिलक्षाष्टाविंशतिसहस्राणि पदानि २३२८००० । अनुत्तरौपपादिकदशांगे द्विनवतिलक्षचतुश्चत्वारिंशत्सहस्राणि पदानि ९२४४००० । प्रश्नव्याकरणांगे त्रिनवतिलक्षषोडशसहस्राणि पदानि ९३१६००० । विपाकसूत्रांगे एककोटिचतुरशीतिलक्षाणि पदानि १८४०००० ॥ ३५८–३५९ ॥

मं० प्र०—सोलससहस्सा इति सहस्रशब्दः प्रत्येकमभिसंबध्यते आचारांगे अष्टादशसहस्राणि पदानि १८००० । सूत्रकृतांगे षट्त्रिंशत्सहस्राणि पदानि ३६००० । स्थानांगे द्वाचत्वारिंशत्सहस्राणि पदानि ४२००० । तुरियादी–चतुर्थादिषु समवायादिषु प्रश्नव्याकरणपर्यंतेषु सप्तस्वंगेषु एकलक्षादियोगः कर्तव्यः । तद्यथा—समवायांगे एकलक्षचतुःषष्टिसहस्राणि पदानि १६४००० । व्याख्याप्रज्ञप्त्यंगे द्विलक्षाष्टाविंशतिसहस्राणि पदानि २२८००० । ज्ञातृकथांगे पंचलक्षषट्पंचाशत्सहस्राणि पदानि ५५६००० । उपासकाध्ययनांगे एकादशलक्षसप्ततिसहस्राणि पदानि ११७०००० । अंतकृद्दशांगे त्रयोविंशतिलक्षाष्टाविंशतिसहस्राणि पदानि २३२८००० । अनुत्तरौपपादिकदशांगे द्विनवतिलक्षचतुश्चत्वारिंशत्सहस्राणि पदानि ९२४४००० । प्रश्नव्याकरणांगे त्रिनवतिलक्षषोडशसहस्राणि पदानि ९३१६००० । विपाकसूत्रांगे एककोटिचतुरशीतिलक्षाणि पदानि १८४०००० ॥ ३५९ ॥

स० चं०—प्रथम गाथा विषैं अठारह आदि हजार कहे । बहुरि दूसरी गाथाविषैं चौथा अंग आदि अंगनिविषै एकादिक लाख सहित हजार कहे अर विपाकसूत्रका जुदा वर्णन कीया अब इनि गाथानिकै अनुसारि एकादश अंगनिकी पदनिकी संख्या कहिये है—आचारांगविषैं पद अठारह हजार १८००० सूत्रकृतांगविषैं पद छत्तीस हजार ३६००० स्थानांगविषैं बियालीस हजार ४२००० समवायांगविषैं एक लाख अर आठकी कृति चौंसठि हजार १६४००० व्याख्याप्रज्ञप्तिविषैं दोय लाख अट्ठाईस हजार २२८००० ज्ञातृकथा अंगविषैं पांचलाख छप्पन हजार ५५६००० उपासकाध्ययन अंगविषैं ग्यारह लाख सत्तरि हजार ११७०००० अंतकृतदशांगविषैं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेईस लाख अट्ठाईस हजार२३२८००० अनुत्तरौपपादक दशांगविषैं वाणवै लाख चवालीस हजार९२४४०००प्रश्न व्याकरण अंगविषैं तिराणवै लाख सोलह हजार ९३१६००० विपाकसूत्र अंगविषैं एक कोडि चौरासी लाख १८४००००० ऐसैं एकादश अंगनिविषैं पदनिकी संख्या जाननी ॥ ३५८–३५९ ॥

वापणनरनोनानं एयारंगे जुदा हु वादम्हि ।
कनजतजमताननमं जनकनजयसीम वाहिरे वण्णा ॥३६०॥

वापणनरनोनानं एकदशांगे युतिर्हि वादे !
कनजतजमताननमं जनकनजयमीम वाह्ये वर्णाः ॥ ३६० ॥

जी० प्र०–पूर्वोक्तैकादशांगपदसंख्यायुतिः अक्षरसंख्यया वापणनरनोनानं चतुःकोटिपंचदशलक्षद्विसहस्रप्रमिता भवति [४१५०२००० खलु स्फुटं दृष्टिवादांगे कनजतजमताननमं अष्टोत्तरशतकोट्यष्टाषष्टिलक्षषट्पंचाशत्सहस्रपंचपदानि भवंति १०८६८५६००५ । जनकनजयसीम अष्टकोट्येकलक्षाष्टसहस्रैकशतपंचसप्तत्यक्षराणि सामायिकादिचतुर्दशभेदेऽगबाह्यश्रुते भवंति ८०१०८१७५ । दृष्टीनां त्रिषष्ट्युत्तरत्रिशतसंख्यानां मिथ्यादर्शनानां वादः अनुवादः तन्निराकरणं च यस्मिन् क्रियते तद दृष्टिवादं नाम द्वादशमंगं । तद्यथा कौत्कल-कंठेविद्धि-कौशिक-हरिश्मश्रु-मांधपिक-रोमश–हारीत-मुंड-आश्वलायनादयः क्रियावाददृष्टयः अशीत्युत्तरशतं १८० । मरीचि-कपिल-उलूक-गार्ग्य-व्याघ्रभूति-वाड्वलिः–माठर- मौद्गलायनादयः अक्रियावाददृष्टयश्चतुरशीतिः ८४ । शाकल्य-वाल्कल-कुथुमि-सात्यमुग्रि-नारायण-कठ-माध्यंदिन-मौद—पैप्पलाद-वादरायण-स्विष्ठिक्य-दैत्यकायन-वसु-जैमिन्यादयः अज्ञानकुदृष्टयः सप्तषष्टिः ६७ । वशिष्ठ-पाराशर-जतुकर्ण-वाल्मिकि-रोमहर्षणि-सत्यदत्त-व्यास-एलापुत्र (तु) औपमन्यव-ऐंद्रदत्त-आगस्त्यादयो वैनयिकदृष्टयो द्वात्रिंशत् ३२ । मिलित्वा मिथ्यावादाः त्रिषष्ट्यग्रत्रिशती भवंति ॥ ३६० ॥

मं० प्र०–युक्तानां एकादशांगानां पदसंख्यायुतिः अक्षरसंज्ञया वा–प–ण–नर–नो–नानं चतुःकोटिपंचदशलक्षद्विसहस्रप्रमिता ४१५०२००० । वादे—दृष्टिवादनाम्नि, द्वादश अंगे कनजतजमताननमं अष्टोत्तरशतकोट्यष्टाषष्टिलक्षषट्पंचाशत्सहस्राणि पंचाग्राणि पदानि १०८, ६८, ५६००५, दृष्टीनां त्रिषष्ट्युत्तरत्रिशतसंख्यानां मिथ्यादर्शनानां वादः–अनुवादः, तन्निराकरणं च यस्मिन् क्रियते तद् दृष्टिवादं नाम द्वादशमंगं । तद्यथा—कौत्कल–कांठेविद्धि–कौशिक–हरिश्मश्रु–मांधपिक–रोमश–हारीत–मुंड–आश्वलायनादीनां क्रियावाददृष्टीनामशीतिशतं १८० । मरीचि–कपिल–उलूक–गार्ग्य व्याघ्रभूति–वाद्बलि–माठर–मौद्गलादीनां अक्रियावाददृष्टीनां चतुरशीतिः ८४ । शाकल्य–वल्कल–कुथुमि–सात्यमुग्रि–नारायण–कठ–माध्यंदिन–मौद–पैप्पलाद–वादरायण–स्वि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ष्ठिक्य–दैतिकायन–वसु–जैमिन्यादीनां अज्ञानां अज्ञानकुदृष्टीनां सप्तषष्टिः ६७। वसिष्ठ–पराशर–जतुकर्ण–वाल्मीकि–रोमहर्षणि–सत्यदत्त–व्यास–एलापुत्र–औपमन्यव–ऐंद्रदत्त–अगस्त्यादीनां वैनयिकदृष्टीनां द्वात्रिंशत् ३२ इति मिलित्वा त्रिषष्ट्युत्तरा त्रिशती ३६३। अंगबाह्ये–सामायिकादिचतुर्दशभेदे जनकन जयसीम अष्टकोटयेकलक्षाष्टसहस्रपंचसप्तत्युत्तरशतप्रमिताः अपुनरुक्ता वर्णाः ८०१०८१७५ ॥ ३६० ॥

स०चं०-इहां वा आगें अक्षर संज्ञाकरि अंकनिकौं कहैं हैं सो याका सूत्र पूर्वैं गतिमार्गणाका वर्णनविषैं पर्याप्त मनुष्यनिकी संख्या कही है तहां कह्या है 'कटपयपुरस्थवर्णैः' इत्यादि सूत्र कह्या है तिसहीतैं अक्षरसंज्ञाकरि अंक जानना। ककारादिक नव अक्षरनिकरि एक दोय आदि क्रमतैं नव अंक जानने। टकारादि नव अक्षरनिकरि नव अंक जानने। पकारादि पंच अक्षरनिकरि पंच अंक जानने। यकरादि आठ अक्षरनिकरि आठ अंक जानने। ञकार नकार इनिकरि विंदी जानिये ऐसा कहि आए हैं सो इहां 'वापणनरनोनानं इनि अक्षरनिकरि चारि एक पांच विंदी दोय विंदी विंदी विंदी ए अंक जानना। ताके चारि कोडि पंद्रह लाख दोय हजार ४१५०२००० पद सर्व एकादश अंगनिका जोड दीयें भये। बहुरि दृष्टिवाद नाम बारहवां अंग ताविषैं 'कनजतजमताननमं' कहिये एक विंदी आठ छह आठ पांच छह विंदी विंदी पांच इनि अंकनिकरि एकसौ आठ कोडि अडसठि लाख छप्पन हजार पांच पद हैं १०८६८५६००५, सो दृष्टि कहिये मिथ्यादर्शन तिनिका है अनुवाद कहिये निराकरण जिसविषैं ऐसा दृष्टिवाद नामा अंग बारहवां जानना। तहां मिथ्यादर्शनसंबंधी कुवादी तीनसै तरेसठि हैं तिनिविषैं कौत्कल कांठेविद्धि कौशिक हरिश्मश्रु मांधपिक रोमश हारीत मुंड आश्वलायन इत्यादि क्रियावादी हैं सो इनिके एकसौ अस्सी १८० कुवाद हैं। बहुरि मारीचि कपिल उलूक गार्ग्य व्याघ्रभूति वाद्वलि माठर मौद्गलायन इत्यादि अक्रियावादी हैं तिनिके चौरासी ८४ कुवाद हैं। बहुरि साकल्य वाल्कलि कुथुमि सात्यमुग्री नारायण कठ माध्यंदिन मौद पैप्पलाद वादरायण स्विष्ठिक्य दैत्यकायन वसु जैमिन्य इत्यादि ए अज्ञानवादी हैं। इनिके सडसठि ६७ कुवाद हैं बहुरि वशिष्ठ पाराशर जतुकर्ण वाल्मिकि रोमहर्षिणि सत्यदत्त व्यास एलापुत्र उपमन्यु ऐंद्रदत्त अगस्ति इत्यादिक ए विनयवादी हैं इनिके कुवाद वत्तीस ३२ हैं। सब मिलाएं तीनसै

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तरेसठि कुवाद भये इनिका वर्णन भावाधिकारविषैं कहैंगे इहां प्रवृत्तिविषैं इनि कुवादनिके जे जे अधिकारी तिनिके नाम कहे हैं। बहुरि अंग बाह्य जो सामायिकादिक तिनिंविषैं 'जनकनजयसीम' कहिये आठ बिंदी एक बिंदी आठ एक सात पांच अंक तिनिके आठ कोडि एक लाख आठ हजार एकसौ पिचत्तरि ८०१०८१७५ अक्षर जानने ॥ ३६० ॥

चंदरविजंबुदीवयदीवसमुद्दयवियाहपण्णत्ती ।
परियम्मं पंचविहं सुत्तं पढमाणि जोगमदो ॥ ३६१ ॥
पुव्वं जलथलमायाआगासयरूवगयमिमा पंच ।
भेदा हु चूलियाए तेसु पमाणं इणं कमसो ॥ ३६२ ॥

चंद्ररविजंबूद्वीपकद्वीपसमुद्रकव्याख्याप्रज्ञप्तयः ।
परिकर्म पंचविधं सूत्रं प्रथमानुयोगमतः ॥ ३६१ ॥
पूर्वं जलस्थलमायाकाशकरूपगता इमे पंच ।
भेदा हि चूलिकायाः तेषु प्रमाणमिदं क्रमशः ॥ ३६२ ॥

जी० प्र०—दृष्टिवादांगे अधिकाराः पंच। ते के? परिकर्म सूत्रं प्रथमानुयोगः पूर्वगतं चूलिका चेति। तत्र परितः सर्वतः कर्माणि गणितकरणसूत्राणि यस्मिन् तत्परिकर्म, तच्च पंचविधं चंद्रप्रज्ञप्तिः सूर्यप्रज्ञप्तिः जंबूद्वीपप्रज्ञप्तिः द्वीपसागरप्रज्ञप्तिः व्याख्याप्रज्ञप्तिश्चेति। तत्र चंद्रप्रज्ञप्तिः चंद्रस्य विमानायुःपरिवारऋद्धिगमनहानिवृद्धिसकलार्धचतुर्थांशग्रहणादीन् वर्णयति। सूर्यप्रज्ञप्तिः सूर्यस्यायुर्मंडलपरिवारऋद्धिगमनप्रमाणग्रहणादीन्वर्णयति। जंबूद्वीपप्रज्ञप्तिः जंबूद्वीपगतमेरुकुलशैलह्रदवर्षकुंडवेदिकावनखंडव्यंतरावासमहानद्यादीन् वर्णयति। द्वीपसागरप्रज्ञप्तिः असंख्यातद्वीपसागराणां स्वरूपं तत्रस्थितज्योतिर्वानभावनावासेषु विद्यमानाकृत्रिमजिनभवनादीन् वर्णयति। व्याख्याप्रज्ञप्तिः रूप्यरूपिजीवाजीवद्रव्याणां भव्याभव्यभेदप्रमाणलक्षणानां अ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नंतरसिद्धपरंपरासिद्धानां अन्यवस्तूनां च वर्णनं करोति। सूत्रयति–सूचयति कुदृष्टिदर्शनानीति सूत्रं। जीवः अबंधकः अकर्ता निर्गुणः अभोक्ता स्वप्रकाशकः परप्रकाशकः अस्त्येव जीवः नास्त्येव जीवः इत्यादि क्रियाक्रियाज्ञानविनयकुदृष्टीनां त्रिषष्ट्युत्तरत्रिशतमिथ्यादर्शनानि पूर्वपक्षतया कथयति। प्रथमानुयोगः प्रथमं मिथ्यादृष्टिमव्रतिकमव्युत्पन्नं वा प्रतिपाद्यमाश्रित्य प्रवृत्तोऽनुयोगोऽधिकारः प्रथमानुयोगः,। चतुर्विंशतितीर्थंकरद्वादशचक्रवर्तिनववलदेवनववासुदेवनवप्रतिवासुदेवरूपत्रिषष्टिशलाकापुरुषपुराणानि वर्णयति। पूर्वं चतुर्दशविधं विस्तरेण अग्रे वक्ष्यति। चूलिकापि पंचविधा जलगता स्थलगता मायागता आकाशगता रूपगता चेति। तत्र जलगता चूलिका जलस्तंभनजलगमनाग्निस्तंभाग्निभक्षणाग्न्यासनाग्निप्रवेशनादिकारणमंत्रतंत्रतपश्चरणादीन् वर्णयति। स्थलगता चूलिका मेरुकुलशैलभूम्यादिषु प्रवेशनशीघ्रगमनादिकारणमंत्रतंत्रतपश्चरणादीन् वर्णयति। मायागता चूलिका मायारूपेंद्रजालविक्रियाकारणमंत्रतंत्रतपश्चरणादीन् वर्णयति। रूपगता चूलिका सिंहकरितुरगरुरुनरतरुहरिणशशकवृषभव्याघ्रादिरूपपरावर्तनकारणमंत्रतंत्रतपश्चरणादीन् चित्रकाष्ठलेप्योत्खननादिलक्षणधातुवादरसवादखन्यावादादींश्च वर्णयति। आकाशगता चूलिका आकाशगमनकारणमंत्रतंत्रतपश्चरणादीन् वर्णयति। प्रागुक्तचंद्रप्रज्ञप्त्यादिषु क्रमशो यथाक्रमं पदप्रमाणं अनंतरमेव वक्ष्यमाणं जानीहि इति संबोधनमध्याहार्यं।३६१-३६२।

मं० प्र०--दृष्टिवादस्य अधिकाराः परिकर्म सूत्रं प्रथमानुयोगः पूर्वगतं चूलिका चेति पंच भवंति। ततः परितः--सर्वतः, कर्माणि–गणितकरणसूत्राणि यस्मिन् तत्परिकर्म। तच्च पंचविधं--चंद्रप्रज्ञप्तिः, सूर्यप्रज्ञप्तिः, जंबूद्वीपप्रज्ञप्तिः, द्वीपसागरप्रज्ञप्तिः, व्याख्याप्रज्ञप्तिरिति। तत्र चंद्रप्रज्ञप्तिः-चंद्रस्य विमानायुःपरिवारऋद्धिगमनवृद्धिहानिसकलार्धचतुर्भागग्रहणादीनि वर्णयति। सूर्यप्रज्ञप्तिः सूर्यस्यायुर्मंडलपरिवारऋद्धिगमनप्रमाणग्रहणादीनि वर्णयति, जंबूद्वीपप्रज्ञप्तिः जंबूद्वीपगतमेरुकुलशैलह्रदवर्षवेदिकावनखंडव्यंतरावासमहानद्यादीनां वर्णनं करोति। द्वीपसागरप्रज्ञप्तिः--असंख्यातद्वीपसागराणां स्वरूपस्य तत्रस्थितज्योतिर्वानभावनावासानां आवासं प्रति विद्यमानाकृत्रिमजिनभवनादीनां च वर्णनं करोति। व्याख्याप्रज्ञप्तिः–रूप्यरूपिजीवाजीवद्रव्याणां भव्याभव्यभेदप्रमाणलक्षणानां अनंतरपरंपरासिद्धानां अन्येषां च वस्तूनां वर्णनं करोति। सूत्रयति–सूचयति कुदृष्टिदर्शनानीति सूत्रं, जीवः अबंधकः, अकर्ता, निर्गुणः, अभोक्ता, स्वप्रकाशकः, परप्रकाशकः अस्त्येव जीवः, नास्त्येव जीवः इत्यादि क्रियाऽक्रियाज्ञानविनयकुदृष्टीनां त्रिषष्ट्युत्तरत्रिशतमिथ्यादर्शनानि पूर्वपक्षतया कथयति। प्रथमं मिथ्यादृष्टिमतिकमव्युत्पन्नं वा प्रतिपाद्यमाश्रित्य प्रवृत्तोऽनुयोगः--अधिकारः चतुर्विंशतितीर्थंकरद्वादशचक्रवर्तिनववलदेवनववासुदेवनवप्रातिवासुदेवानां त्रिषष्टिपुराणानि वर्णयति। अतःपरं पूर्वं चतुर्दशविधं तच्च अग्रेविस्तरेण वक्ष्यते। चूलिकाः जलगता स्थलगता मायागता आकाशगता रूपगता चेति इमे पंचभेदा भवंति। तत्र जलगता जलस्तंभनजलगमनाग्निस्तंभनभक्षणासनप्रवेशनादिकारणमंत्रतंत्रतपश्चरणादीनि वर्णयति। स्थलगता मेरुकुलशैलभूम्यादिषु प्रवेशनशीघ्रगमनादिकारणमंत्रतंत्रतपश्चरणादीनि वर्णयति। मायागता मायारूपेंद्रजालविक्रियाकारणमंत्रतंत्रतपश्चरणादीनि वर्णयति। रूपगता सिंहकरीतुरगरुरुनरतरुहरिणशशवृषभव्याघ्रादिरूपपरावर्तनकारणमंत्रतंत्रतपश्चरणादीनि चित्रकाष्ठलेप्योत्खननादिलक्षणं धातुवादरसवादखान्यवादादीनि च वर्णयति। आकाशगता आकाशगमनकारणमंत्रतंत्रतपश्चरणादीनि वर्णयति। तेषु चंद्रप्रज्ञप्त्यादिषु क्रमशः–यथाक्रमं पदमानं इदमनंतरमेव वक्ष्यमाणं जानीत हे भव्याः! इत्यध्याहारः॥ ३६१-३६१॥

सं० च०–दृष्टिवाद नामा वारह्वां अंगके पंच अधिकार हैं परिकर्म १ सूत्र २ प्रथमानुयोग ३ पूर्वगत ४ चू- ७७३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लिका ५ए पंच अधिकारहैं तिनिविषैं परित: कहिये सर्वांगतैं कर्माणि कहिये जिनतैं गुण कार भागहारादि रूप गणित होइ ऐसे कर्णसूत्र वे जिसविषैं पाइए सो परिकर्म कहिये सो परिकर्म पांच प्रकार है चंदप्रज्ञप्ति१ सूर्यप्रज्ञप्ति२ जंबूद्वीप प्रज्ञप्ति ३ द्वीपसागरप्रज्ञप्ति ४ व्याख्याप्रज्ञप्ति ५ । तहां चंद्रप्रज्ञप्ति चंद्रमाका विमान आयु परिवार ऋद्धि गमनाविशेष वृद्धि हानि सारा आधा चौथाई ग्रहण इत्यादि प्ररूपै है बहुरि सूर्यप्रज्ञप्ति सूर्यका आयु मंडल परिवार ऋद्धिगमनका प्रमाण ग्रहण इत्यादि प्ररूपै है । बहुरि जंबूद्वीप प्रज्ञप्ति जंबूद्वीपसंबंधी मेरुगिरि कुलाचल द्रह क्षेत्र वेदी वनखंड व्यंतरनिके मंदिर नदी इत्यादि प्ररूपै है। बहुरि द्वीपसागरप्रज्ञप्ति असंख्यात द्वीप समुद्रसंबंधी स्वरूप वा तहां तिष्ठते ज्योतिषी व्यंतर भवनवासीनिके आवास तहां अकृत्रिम जिनमंदिर तिनकौं प्ररूपै है । बहुरि व्याख्याप्रज्ञप्ति रूपी अरूपी जीव अजीव आदि पदार्थनिका वा भव्य अभव्य आदि प्रमाणकरि निरूपण करै है ऐसें परिकर्मके पंच भेद है । बहुरि सूत्रयंति कहिये मिथ्यादर्शनके भेदनिकौं सूचै बतावै ताकौं सूत्र कहिये तिसविषैं जीव अबंधकही है अकर्ता है निर्गुण है अभोक्ता है स्वप्रकाशक ही है परप्रकाशक ही है अस्तिरूप ही है नास्तिरूप ही है इत्यादि क्रियावाद अक्रियावाद अज्ञानवाद विनयवाद तिनके तीनसै तरेसठि भेद तिनिका पूर्व पक्षपने करि वर्णन करिये है। बहुरि प्रथम कहिये मिथ्यादृष्टी अव्रती विशेष ज्ञानरहित ताकौ उपदेश देने निमित्त जो प्रवृत्त भया अधिकार अनुयोग कहिए सो प्रथमानुयोग कहिए तींहिं विषैं चौवीस तीर्थंकर बारह चक्रवर्ति नव बलभद्र नव नारायण नव प्रतिनारायण इनि तरेसठि शलाका पुरुषनिका पुराण वर्णन कीया है । बहुरि पूवर्गत चौदह सो आगैं विस्तारनैं लीएं कहैंगे । बहुरि चूलिकाके पंच भेद जल गता १ स्थलगता २ मायागता ३ रूपगता ४ आकाशगता ५ ए पंच भेद तिनिविषैं जगलता चूलिका तौ जल का स्तंभन करना जलविषैं गमन करना अग्निका स्तंभन करना अग्निका भक्षण करना अग्निविषैं प्रवेश करना इत्यादि क्रियाके कारणभूत मंत्र तंत्र तपश्चरणादि प्ररूपै है । बहुरि स्थलगता चूलिका मेरुपर्वत भूमि इत्यादि विषै प्रवेश करना शीघ्र गमन करना इत्यादिक क्रियाके कारणभूत मंत्र तंत्र तपश्चरणादिक प्ररूपै है । बहुरि मायागता चूलिका मायामई इंद्रजाल विक्रि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

याके कारणभूत मंत्र तंत्र तपश्चरणादि प्ररूपै हैं। वहुरि रूपगता चूलिका सिंह हाथी घोड़ा वृषभ हरिण इत्यादि नाना प्रकार रूप पलटिकरि धरना ताके कारण मंत्र तंत्र तपश्चरणादि प्ररूपै है वा चित्राम काठ लेपादिकका लक्षण प्ररूपै है वा धातु रसायनकौं प्ररूपै है। वहुरि आकाशगता चूलिका आकाश विषैं गमन आदिकौं कारण भूत मंत्र तंत्रादि प्ररूपै है ऐसैं चूलिकाके पांच भेद जानने। ए चंद्रप्रज्ञप्ति आदि देकरि भेद कहे तिनिके पदनिका प्रमाण आगे कहिए है सो हे भव्य तू जानि। ३६१। ३६२॥

गतनम मनगं गोरम मरगत जवगात नोननं जजलक्खा।
मननन धममननोननन नामं रनधजधरानन जलादी॥ ३६३॥
याजकनामेनाननमेदाणि पदाणि होंति परिकम्मे।
कानवधिवाचनानानमेसो पुण चूलियाजोगो॥ ३६४॥

गतनम मनगं गोरम मरगत जवगातनोननं जजलक्षाणि।
मननन धममननोनननामं रनधजधरानन जलादिषु॥ ३६३॥
याजकनामेनाननमेतानि पदानि भवंति परिकर्मणि।
कानवधिवाचनाननमेषः पुनः चूलिकायोगः॥ ३६४॥

जी० प्र०—अक्षरसंज्ञया चंद्रप्रज्ञप्तौ गतनमनोननं-षट्त्रिंशल्लक्षपंचसहस्राणि पदानि ३६०५००० । सूर्यप्रज्ञप्तौ मनगंनोननं-पंचलक्षत्रिसहस्राणि पदानि ५०३००० । जंबूद्वीपप्रज्ञप्तौ गोरमनोननं त्रिलक्षपंचविंशतिसहस्राणि पदानि । द्वीपसागरप्रज्ञप्तौ मरगतनोननं द्विपंचाशल्लक्षषट्त्रिंशत्सहस्राणि पदानि ५२३६००० । व्याख्याप्रज्ञप्तौ जवगातनोननं—चतुरशीतिलक्षषट्त्रिंशत्सहस्राणि पदानि ८४३६००० । सूत्रे जजलक्षा— अष्टाशीतिलक्षाणि पदानि ८८००००० । प्रथमानुयोगे मननन—पंचसहस्राणि पदानि ५००० । चतुर्दशपूर्वसमुच्चये धममननोनननामं—पंचनवतिकोटिपंचाश-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लक्षपंचपदानि ९५५०००००५ । जलादी जलगतादिपंचचूलिकास्थानेषु प्रत्येके रनघजधरानन-द्विकोटिनवलक्षनवाशीतिसहस्रद्विशतानि पदानि । २०९८९२०० । चंद्रप्रज्ञप्त्यादिपंचविधपरिकर्मयुतौ याजकनामेनाननं—एककोटयेकाशीतिलक्षपंचसहस्राणि पदानि १८१०५००० । जलगतादिपंचविधचूलिकायोगः पुनः कानवधिवाचनाननं—दशकोटयेकोनपंचाशल्लक्षषट्चत्वारिंशत्सहस्राणि पदानि १०४९४६००० ॥ ३६३–३६४ ॥

मं० प्र०—अक्षरसंज्ञया गतनमनोननं—षट्त्रिंशल्लक्षपंचसहस्राणि पदानि चंद्रप्रज्ञप्तौ ३६०५००० । मनगनोननं पंचलक्षत्रिसहस्राणि पदानि सूर्यप्रज्ञप्तौ ५०३००० । गोरमनोननं त्रिलक्षपंचविंशतिसहस्राणि पदानि जंबूद्वीपप्रज्ञप्तौ ३२५००० । मरगतनोननं द्विपंचाशल्लक्षषट्त्रिंशत्सहस्राणि पदानि द्वीपसागरप्रज्ञप्तौ ५२३६००० । जवगातनोननं चतुरशीतिलक्षषट्त्रिंशत्सहस्राणि पदानि व्याख्याप्रज्ञप्तौ ८४३६००० । जजलक्खा अष्टाशीतिलक्षाः पदानि सूत्रं ८८००००० । मननन पंचसहस्राणि पदानि प्रथमानुयोगे ५००० । धममननोनननामं पंचनवतिकोटिपंचाशल्लक्षाणि पंचोत्तराणि पदानि पूर्वगते चतुर्दशपूर्वसमुच्चये ९५५०००००५ । रनघजधरानन द्विकोटिनवलक्षनवाशीतिसहस्राणि द्विशतोत्तरपदानि प्रत्येके जलगतादिषु पंचसु चूलिकासु समानसंख्यानि-जलगता २०९८९२०० । स्थलगता २०९८९२०० । मायागता २०९८९२०० । आकाशगता २०९८९२०० । रूपगता २०९८९२०० । याजकनामेनाननं एककोटयेकाशीतिलक्षपंचसहस्राणि पदानि चंद्रप्रज्ञप्त्यादिपंचविधेऽपि परिकर्मणि मिलितान्येतावंति भवंति १८१०५००० । कानवधिवाचनाननं दशकोटयेकोनपंचाशल्लक्षषट्चत्वारिंशत्सहस्राणि पदानि जलगतादीनां पंचानां चूलिकानां एष योगः पदसंख्यासंयोगः १०,४९,४६००० ॥ ३६३–३६४ ॥

स० चं०—इहां 'कटपयपुरस्थवर्णैः' इत्यादि सूत्रोक्त विधानतैं अक्षर संज्ञाकरि अंक कहैं हैं सो अंकनिकरि जो प्रमाण भया सोई इहां कहिए है एक एक अक्षरतैं एक एक अंक जानि लेना सो 'गतनमनोननं' कहिये छत्तीस लाख पांच हजार ३६०५००० पद चंद्रप्रज्ञप्ति विषैं हैं। बहुरि 'मनगनोननं' कहिये पांच लाख तीन हजार ५०३००० पद सूर्यप्रज्ञप्तिविषै हैं । बहुरि गोरमनोननं कहिये तीनलाख पचीस हजार ३२५००० पद जंबूद्वीप प्रज्ञप्तिविषैं हैं । बहुरि मरगतनोननं कहिये बावन लाख छत्तीस हजार ५२३६००० पद द्वीपसागर प्रज्ञप्तिविषैं है। बहुरि 'जवगातनोननं' कहिये चौरासीलाख छत्तीस हजार ८४३६००० पद व्याख्याप्रज्ञप्ति अंगके हैं। बहुरि 'जजलक्खा कहिये अठ्यासी लाख ८८००००० पद सूत्र नामा भेदविषै हैं बहुरि मननन कहिये पांच हजार ५००० पद प्रथमानुयोगविषैं हैं । बहुरि धममननोनननामं कहिये पिच्याणवै कोडि पचासलाख पांच ९५५०००००५ पद पूर्वगतविषैं हैं। चौदह पूर्वनिके इतने पद हैं। बहुरि रनधजधरानन कहिये दोय कोडि नवलाख निवासी हजार दोयसै २०९८९२०० पद जलगत आदि चूलिका तिनविषैं एक एकके इतने इतने

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पद जानने। जलगता पद २०९८९२०० स्थलगता २०९८९२०० मायागता २०९८९२०० आकाशगा २०९८९२०० रूपगता २०९८९२०० ऐसैं पद जानने। बहुरि 'याजकनामेनोननं' कहिये एक कोडिइक्यासी लाख पांच हजार १८१०५००० पद चंद्रप्रज्ञप्ति आदि पांच प्रकार परिकर्मका जोड़ दीये हो हैं। बहुरि 'कानवधिवाचनाननं' कहिये दश कोडि गुणचासलाख छियालीस हजार '१०४९४६०००' पद पांचप्रकार चूलिकाका जोड़ दीयें हो हैं। इहां गकारतैं तीनका अंक तकारतैं छहका अंक मकारतैं पांचका अंक रकारतैं दोका अंक नकारतैं बिंदी इत्यादि अक्षर संज्ञाकरि अंक कहे हैं। ककारतैं लेय गकार तीसरा अक्षर है तातैं तीनका अंक कह्या। बहुरि टकारतैं तकार छठा अक्षर है तातैं छहका अंक कह्या पकारतैं मकार पांचवां अक्षर है तातैं पांचका अंक कह्या यकारतैं रकार दूसरा अक्षर है तातैं दोयका अंक कह्या है नकारतैं बिंदी कही है। इत्यादि अक्षर संज्ञातैं अंक जानने॥ ३६३॥ ३६४॥

पण्णट्ठदाल पणतीस तीस पण्णास पण्ण तेरसदं।
णउदी दुदाल पुव्वे पणवण्णा तेरससयाइं॥ ३६५॥
छस्सय पण्णासाइं चउसयपण्णास छसयपणुवीसा।
विहि लक्खेहि दु गुणिया पंचम रूऊण छज्जुदा छट्ठे॥ ३६६॥

पंचाशदष्टचत्वारिंशत् पंचत्रिंशत् त्रिंशत् पंचाशत् पंचाशत् त्रयोदशशतं।
नवतिः द्वाचत्वारिंशत् पूर्वे पंचपंचाशत् त्रयोदशशतानि॥ ३६५॥
षट्छतपंचाशानि चतुःशतपंचाशत् षट्छतपंचविंशतिः।
द्वाभ्यां लक्षाभ्यां तु गुणितानि पंचमं रूपोनं षड्युतानि षष्ठे॥ ३६६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी० प्र०—उत्पादादिचतुर्दशपूर्वेषु यथाक्रमं पदसंख्योच्यते--वस्तुनः-द्रव्यस्य उत्पादव्ययध्रौव्याद्यनेकधर्मपूरकमुत्पादपूर्वं तच्च जीवादिद्रव्याणां नानानयविषयक्रमयौगपद्यसंभावितोत्पादव्ययध्रौव्याणि त्रिकालगोचराणि नवधर्मा भवंति। तत्परिणतं द्रव्यमपि नवविधं। उत्पन्नं उत्पद्यमानं उत्पत्स्यमानं। नष्टं नश्यत् नंक्ष्यत्। स्थितं तिष्ठत् स्थास्यदिति नवप्रकारा भवंति। उत्पन्नादीनां प्रत्येकं नवविधत्वसंभवादेकाशीतिविकल्पधर्मपरिणतद्रव्यवर्णनं करोति। तत्र द्विलक्षगुणितपंचाशत्पदानि एकाकोटिरित्यर्थः १०००००००। अग्रस्य द्वादशांगेषु प्रधानभूतस्य वस्तुनः अयनं ज्ञानं अग्रायणं। तत्प्रयोजनमग्रायणीयं, द्वितीयं पूर्वं। तच्च सप्तशतसुनयदुर्णयपंचास्तिकायषड्द्रव्यसप्ततत्त्वनवपदार्थादीन् वर्णयति। तत्र द्विलक्षगुणिताष्टाचत्वारिंशत्पदानि षण्णवतिलक्षाणि इत्यर्थः। ९६०००००। वीर्यस्य-जीवादिवस्तुसामर्थ्यस्य अनुप्रवादः-अनुवर्णनं अस्मिन्निति वीर्यानुप्रवादं नाम तृतीयं पूर्वं। तच्च आत्मवीर्यपरवीर्योभयवीर्यक्षेत्रवीर्यकालवीर्यभाववीर्यतपोवीर्यादिसमस्तद्रव्यगुणपर्यायवीर्याणि वर्णयति। तत्र द्विलक्षगुणितपंचत्रिंशत्पदानि सप्ततिलक्षाणीत्यर्थः ७००००००। अस्ति नास्तीत्यादिधर्माणां प्रवादः-प्ररूपणमस्मिन्निति अस्तिनास्तिप्रवादं चतुर्थं पूर्वं। तच्च जीवादिवस्तु स्यादस्ति स्वद्रव्यक्षेत्रकालभावानाश्रित्य, स्यान्नास्ति परद्रव्यक्षेत्रकालभावानाश्रित्य। स्यादस्ति नास्ति च क्रमेण स्वपरद्रव्यक्षेत्रकालभावद्वयं संयुक्तमाश्रित्य। स्यादवक्तव्यं युगपत्स्वपरद्रव्यक्षेत्रकालभावद्वयमाश्रित्य तथा वक्तुमशक्यत्वात्। स्यादस्ति चावक्तव्यं च स्वद्रव्यक्षेत्रकालभावान् युगपत् स्वपरद्रव्यक्षेत्रकालभावद्वयं च संयुक्तमाश्रित्य। स्यान्नास्ति चावक्तव्यं च परद्रव्यक्षेत्रकालभावान् युगपत्स्वपरद्रव्यक्षेत्रकालभावद्वयं च संयुक्तमाश्रित्य। स्यादस्ति च नास्ति चावक्तव्यं च क्रमेण स्वपरद्रव्यक्षेत्रकालभावद्वयं युगपत्स्वपरद्रव्यक्षेत्रकालभावद्वयं च संयुक्तमाश्रित्य। इत्येकानेकनित्यानित्याद्यनंतधर्माणां विधिनिषेधावक्तव्यभंगानां प्रत्येकद्विसंयोगत्रिसंयोगजानां त्रित्र्येकसंख्यानां मेलनं सप्तभंगी प्रश्नवशादेकस्मिन्नेव वस्तुनि अविरोधेन संभवंती नानानयमुख्यगौणभावेन प्ररूपयति। तत्र द्विलक्षगुणितत्रिंशत्पदानि षष्टिर्लक्षाणि इत्यर्थः। ६००००००। ज्ञानानां प्रवादः प्ररूपणमस्मिन्निति ज्ञानप्रवादं पंचमं पूर्वं, तच्च मतिश्रुतावधिमनःपर्ययकेवलानि पंच सम्यग्ज्ञानानि, कुमतिकुश्रुतविभंगाख्यानि त्रीण्यज्ञानानि स्वरूपसंख्याविषयफलानि आश्रित्य तेषां प्रामाण्याप्रामाण्यविभागं च वर्णयति। तत्र द्विलक्षगुणितपंचाशत्पदानि किंतु पंचमरूऊणमिति कथनादेकरूपोना कोटिरित्यर्थः ९९९९९९९। सत्यस्य प्रवादः प्ररूपणमस्मिन्निति सत्यप्रवादं षष्ठं पूर्वं, तच्च वाग्गुप्तिं वाक्संस्कारकारणानि वाक्प्रयोगं द्वादश भाषाः वक्तृभेदान् बहुविधं मृषाभिधानं दशविधं सत्यं च प्ररूपयति। तद्यथा-असत्यनिवृत्तिर्मौनं वा वाग्गुप्तिः। उरःकंठशिरोजिह्वामूलदंतनासिकाताल्वोष्ठाख्यानि अष्टौ स्थानानि। स्पृष्टतेषत्स्पृष्टताविवृततेषद्विवृततासंवृतारूपाः पंच प्रयत्नाश्च वाक्संस्कारकारणानि। शिष्टदुष्टरूपः प्रयोगः वाक्प्रयोगः तल्लक्षणशास्त्रं संस्कृतादिव्याकरणं वा। इदमनेन कृतमित्यनिष्टकनरूपमभ्याख्यानं। परस्परविरोधकारणं कलहवचनं। परदोषसूचनं पैशून्यवचनं। धर्मार्थकाममोक्षासंबद्धवचनरूपः अबद्धप्रलापः। इंद्रियविषयेषु रत्युत्पादिका वाक् रतिवाक्। तेषु अरत्यादिका वाक् अरतिवाक्। परिग्रहार्जनसंरक्षणाद्यासक्तिहेतुर्वाक् उपधिवाक्। व्यवहारवंचनाहेतुर्वाक् निकृतिवाक्। तपोज्ञानादिषु अविनयहेतुर्वाक् अप्रणतिवाक्। स्तेयहेतुर्वाग् मोषवाक्। सन्मार्गोपदेशवाक् सम्यग्दर्शनवाक्। मिथ्यामार्गोपदेशवाक् मिथ्यादर्शनवाक् एवं द्वादशभाषाः। द्वींद्रियादिपंचेंद्रियपर्यंता जीवा व्यक्ताव्यक्तवक्तृत्वपर्यायाः वक्तारः। द्रव्यक्षेत्रकालभावाश्रितं बहुविधमसत्यवचः मृषावाक्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जनपदसत्यादिदशप्रकारसत्यं तत्प्रागुक्तलक्षणमिति। तत्र सत्यप्रवादे द्विलक्षगुणितपंचाशत्पदानि षड्भिरधिकानि। छञ्जुदा छट्टे इति वचनात् षडुत्तरकोटिरित्यर्थः। १०००००० ६। आत्मनः प्रवादः प्ररूपणमस्मिन्निति आत्मप्रवादं सप्तमं पूर्वं। तच्च आत्मनः 'जीवो कत्ता य वत्ता य पाणी भोत्ता य पुग्गलो वेदी विराहू सयंभू य सरीरी तह माणवो सत्ता जंतू य माणी य मायी जोगी य संकुडो असंकुडो य खेत्तराहू अंतरप्पा तहेव य' इत्यादिस्वरूपं वर्णयति। तद्यथा-जीवति व्यवहारनयेन दशप्राणान् निश्चयनयेन केवलज्ञानदर्शनसम्यक्त्वरूपचित्प्राणांश्च धारयति। जीविष्यति जीवितपूर्वश्चेति जीवः। व्यवहारनयेन शुभाशुभं कर्म निश्चयनयेन चित्पर्यायांश्च करोतीति कर्ता। व्यवहारनयेन सत्यमसत्यं च वक्तीति वक्ता निश्चयेनावक्ता। नयद्वयोक्तप्राणाः संति अस्येति प्राणी। व्यवहारेण शुभाशुभकर्मफलं निश्चयेन स्वस्वरूपं च भुंक्ते अनुभवतीति भोक्ता। व्यवहारेण कर्मनोकर्मपुद्गलान् पूरयति गालयति चेति पुद्गलः निश्चयेनापुद्गलः। नयद्वयेन लोकालोकगतं त्रिकालगोचरं सर्वं वेत्ति जानातीति वेदः। व्यवहारेण स्वोपात्तदेहं समुद्घाते सर्वलोकं निश्चयेन ज्ञानेन सर्वं वेवेष्टि व्याप्नोतीति विष्णुः। यद्यपि व्यवहारेण कर्मवशाद्भवे भवे भवति परिणमति तथापि निश्चयेन स्वयं स्वस्मिन्नेव ज्ञानदर्शनस्वरूपेणैव भवति परिणमति इति स्वयंभूः। व्यवहारेण औदारिकादिशरीरमस्यास्तीति शरीरी निश्चयेनाशरीरः। व्यवहारेण मानवादिपर्यायपरिणतो मानवः, उपलक्षणान्नारकः तिर्यङ् देवश्च। निश्चयेन मनौ ज्ञाने भवः मानवः। व्यवहारेण स्वजनमित्रादिपरिग्रहेषु सजतीति सक्ता। निश्चयेनासक्ता। व्यवहारेण चतुर्गतिसंसारे नानायोनिषु जायत इति जंतुः संसारी इत्यर्थः। निश्चयेनाजंतुः। व्यवहारेण मानः अहंकारः अस्यास्तीति मानी, निश्चयेनामानी। व्यवहारेण माया वंचना अस्यास्तीति मायी निश्चयेनामायी। व्यवहारेण योगः कायवाङ्मनःकर्मास्यास्तीति योगी, निश्चयेनायोगी। व्यवहारेण सूक्ष्मनिगोदलब्ध्यपर्याप्तकसर्वजघन्यशरीरप्रमाणेन संकुटति संकुचितप्रदेशो भवतीति संकुटः, समुद्घाते सर्वलोकं व्याप्नोतीत्यसंकुटः। निश्चयेन प्रदेशसंहारविसर्पणाभावादनुभयः किंचिदूनचरमशरीरप्रमाण इत्यर्थः। नयद्वयेन क्षेत्रं लोकालोकं स्वस्वरूपं च जानातीति क्षेत्रज्ञः। व्यवहारेण अष्टकर्माभ्यंतरवर्तिस्वभावत्वात्, निश्चयेन चैतन्याभ्यंतरवर्तिस्वभावत्वाच्च अंतरात्मा। इति—च शब्दौ उक्तानुक्तसमुच्चयार्थौ। ततः कारणाद् व्यवहाराश्रयेण कर्मनोकर्मरूपमूर्तद्रव्यादिसंबंधेन मूर्तः निश्चयनयाश्रयेणामूर्तः इत्यादय आत्मधर्माः समुच्चीयंते। तस्मिन्नात्मप्रवादे द्विलक्षगुणितत्रयोदशशतपदानि षड्विंशतिकोट्य इत्यर्थः २६०००००००। कर्मणः प्रवादः प्ररूपणमस्मिन्निति कर्मप्रवादमष्टमं पूर्वं तच्च मूलोत्तरोत्तरप्रकृतिभेदभिन्नं बहुविकल्पबंधोदयोदीरणसत्त्वाद्यवस्थं ज्ञानावरणादिकर्मस्वरूपं समवधानेर्यापथतपस्याधाकर्मादि वर्णयति। तत्र द्विलक्षगुणितनवतिपदानि एककोट्यशीतिलक्षाणीत्यर्थः १८०००००० । प्रत्याख्यायते निषिध्यते सावद्यमस्मिन्ननेनेति वा प्रत्याख्यानं नवमं पूर्वं। तच्च नामस्थापनाद्रव्यक्षेत्रकालभावानाश्रित्य पुरुषसंहननबलाद्यनुसारेण परिमितकालं अपरिमितकालं वा प्रत्याख्यानं सावद्यवस्तुनिवृत्तिं उपवासविधिं तद्भावनांगं पंचसमितित्रिगुप्त्यादिकं च वर्णयति। तत्र द्विलक्षगुणितद्वाचत्वारिंशत्पदानि चतुरशीतिलक्षाणीत्यर्थः। ८४ ल.। विद्यानां अनुवादः अनुक्रमेण वर्णनं यस्मिन् तद्विद्यानुवादं दशमं पूर्वं, तच्च सप्तशतानि अंगुष्ठप्रसेनाद्यल्पविद्याः रोहिण्यादिपंचशतमहाविद्याः तत्स्वरूपसामर्थ्यसाधनमंत्रतंत्रपूजाविधानानि सिद्धविद्यानां फलविशेषान् अष्टमहानिमित्तानि, (तानि कानि?) अंतरीक्षभौमांगस्वरस्वप्नलक्षणव्यंजनच्छिन्ननामानि च वर्णयति। तत्र द्विलक्षगुणितपंचपंचाश-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

त्पदानि एककोटिदशलक्षाणीत्यर्थः। ११० ल. ।कल्याणानां वादः प्ररूपणमस्मिन्निति कल्याणवादमेकादशं पूर्वं, तच्च तीर्थकरचक्रधरबलदेववासुदेवप्रतिवासुदेवादीनां गर्भावतरणकल्याणादिमहोत्सवान् तत्कारणतीर्थकरत्वादिपुण्यविशेषहेतुषोडशभावनातपोविशेषाद्यनुष्ठानानि चंद्रसूर्यग्रहनक्षत्रचारग्रहणशकुनादिफलादि च वर्णयति । तत्र द्विलक्षगुणितत्रयोदशशतपदानि षड्विंशतिकोट्य इत्यर्थः २६ को०।प्राणानां आवादः प्ररूपणमस्मिन्निति प्राणावादं द्वादशं पूर्वं, तच्च कायचिकित्साद्यष्टांगमायुर्वेदं भूतिकर्मजांगुलिकप्रक्रमं इलापिंगलासुषुम्नादिबहुप्रकारप्राणापानविभागं दशप्राणानां उपकारकापकारकद्रव्याणि गत्याद्यनुसारेण वर्णयति । तत्र द्विलक्षगुणितपंचाशदुत्तरषट्छतानि पदानि त्रयोदशकोट्य इत्यर्थः १३ को. । क्रियादिभिः-नृत्यादिभिः, विशालं विस्तीर्णं शोभमानं वा क्रियाविशालं त्रयोदशं पूर्वं । तच्च संगीतशास्त्र छंदोलंकारादिद्वासप्ततिकलाः चतुःषष्टिस्त्रीगुणान शिल्पादिविज्ञानानि चतुरशीतिगर्भाधानादिकाः अष्टोत्तरशतं सम्यग्दर्शनादिकाः पंचविंशति देववंदनादिकाः नित्यनैमित्तिकाः क्रियाश्च वर्णयति । तत्र द्विलक्षगुणितपंचाशदधिकचतुःशतपदानि नवकोट्य इत्यर्थः । ९ को.। त्रिलोकानां विंदवः अवयवाः सारं च वर्ण्यंते अस्मिन्निति त्रिलोकविंदुसारं चतुर्दशं पूर्वं तच्च त्रिलोकस्वरूपं षट्त्रिंशत्परिकर्माणि अष्टौ व्यवहारान् चत्वारि बीजानि मोक्षस्वरूपं तद्गमनकारणक्रियाः मोक्षसुखस्वरूपं च वर्णयति । तत्र द्विलक्षगुणितपंचविंशत्यधिकषट्छतानि पदानि द्वादशकोटिपंचाशल्लक्षाणीत्यर्थः १२ को. ५० ल ॥ ३६५-३६६ ॥

मं० प्र०—पूर्वे उत्पादपूर्वादौ चतुर्दशविधे प्रत्येकं यथाक्रमं पदसंख्या इयमुच्यते तद्यथा—वस्तुनः उत्पादव्ययध्रौव्याद्यनेकधर्मपूरकं उत्पादपूर्वं तत् जीवादिद्रव्याणां नानानयविषयक्रमयौगपद्यसंभावितोत्पादव्ययध्रौव्याणि त्रिकालगोचराणि नव धर्मा भवंति । तत्परिणतं द्रव्यमपि नवधा उत्पन्नं,उत्पद्यमानं,उत्पत्स्यमानं, नष्टं, नश्यत्, नंक्ष्यत्, स्थितं, तिष्ठत्, स्थास्यदिति नवानां तद्धर्माणामुत्पन्नत्वादीनां प्रत्येकं नवविधत्वसंभवादेकाशीतिविकल्पधर्मपरिणतद्रव्यवर्णनं करोति । तत्र द्वाभ्यां लक्षाभ्यां गुणिता पंचाशत् एककोटिपदानि भवंति १०००००००। अग्रस्य द्वादशांगेषु प्रधानभूतस्य वस्तुनः अयनं—ज्ञानं, अग्रायणं तत्प्रयोजनं अग्रायणीयं द्वितीयं पूर्वं । तत्सप्तशतसुनयदुर्णयपंचास्तिकायषड्द्रव्यसप्ततत्त्वनवपदार्थादीन्वर्णयति । तत्र द्विलक्षगुणिताष्टाचत्वारिंशत्पदानि षण्णवतिलक्षाणीत्यर्थः ९६००००० । वीर्यस्य जीवादिवस्तुसामर्थ्यस्य, अनुप्रवादः—अनुवर्णनमस्मिन्निति वीर्यानुवादं तृतीयपूर्वं । तत् आत्मवीर्यं परवीर्यं उभयवीर्यं क्षेत्रवीर्यं कालवीर्यं भाववीर्यं तपोवीर्यमित्यादीनि समस्तगुणपर्यायवीर्याणि वर्णयति । तत्र द्विलक्षगुणितपंचत्रिंशत्पदानि सप्ततिलक्षाणीत्यर्थः । ७०००००० । अस्ति नास्तीत्यादिधर्माणां प्रवादः—प्ररूपणं, अस्मिन्नित्यास्तिनास्तिप्रवादं चतुर्थं पूर्वं । तत् जीवादिवस्तु स्यादस्ति स्वद्रव्यक्षेत्रकालभावानाश्रित्य, स्यान्नास्ति परद्रव्यक्षेत्रकालभावानाश्रित्य, स्यादस्ति नास्ति च क्रमेण स्वपरद्रव्यक्षेत्रकालभावद्वयं संयुक्तमाश्रित्य, स्यादवक्तव्यं युगपत्स्वपरद्रव्यक्षेत्रकालभावद्वयमाश्रित्य तथा वक्तुमशक्यत्वात्, स्यादस्ति चावक्तव्यं च स्वद्रव्यक्षेत्रकालभावान् युगपत्स्वपरद्रव्यक्षेत्रकालभावद्वयं च संयुक्तमाश्रित्य, स्यान्नास्तिचावक्तव्यं च परद्रव्यक्षेत्रकालभावान् युगपत्स्वपरद्रव्यक्षेत्रकालभावद्वयं च संयुक्तमाश्रित्य । स्यादस्ति च नास्ति चावक्तव्यं च क्रमेण स्वपरद्रव्यक्षेत्रकालभावद्वयं युगपत्स्वपरद्रव्यक्षेत्रकालभावद्वयं च संयुक्तमाश्रित्य । एवमेकानेकनित्यानित्याद्यनंतधर्माणां विधिनिषेधावक्तव्यभंगानां प्रत्येकद्विसंयोगत्रिसंयोगजानां त्रिद्व्येकसंख्यानां मेलनं सप्तभंगी प्रश्नवशादेकस्मिन्नेव वस्तुनि अविरोधेन संभवंती नानानयमुख्यगौणभावेन प्ररूपयति । तत्र द्विलक्षगुणितत्रिंशत्पदानि षष्टिलक्षाणीत्यर्थः ६०००००० । ज्ञा-

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नानां प्रवादः—प्ररूपणं, अस्मिन्निति ज्ञानप्रवादं पंचमं पूर्वं । तत् मतिश्रुतावधिमनःपर्ययकेवलानि पंचज्ञानानि, कुमतिकुश्रुतिविभंगाख्यानि त्रीण्यज्ञानानि स्वरूपसंख्याविषयफलान्याश्रित्य तेषां प्रामाण्याप्रामाण्यविभागं च वर्णयति । तत्र द्विलक्षगुणितपंचाशद्रूपोनपदानि रूपोनकोटिरित्यर्थः । ९९९९९९९ । पंचमरूऊणेत्यनेन पंचमे पूर्वे द्विलक्षगुणितंपचाशल्लक्षकोटिपदसंख्याया रूपोनत्ववचनात् । सत्यस्य प्रवादः—प्ररूपणं, अस्मिन्निति सत्यप्रवादं षष्ठं पूर्वं । तद्वाग्गुप्तिं वाक्संस्कारकारणानि वाक्प्रयोगं द्वादशभाषाः वक्तृभेदान् बहुविधं मृषाभिधानं दशविधं सत्यं च प्ररूपयति तद्यथा—असत्यनिवृत्तिः—मौनं वा वाग्गुप्तिः । उरःकंठशिरोजिह्वामूलदंतनासिकाताल्वोष्ठाख्यान्यष्टौ स्थानानि । स्पृष्टतेषत्स्पृष्टताविवृततेषद्विवृततासंवृततारूपाः पंचप्रयत्नाश्च वाक्संस्कारकारणानि शिष्टदुष्टरूपो वाक्प्रयोगः । तल्लक्षणशास्त्रं संस्कृतादिव्याकरणं । इदमनेन कृतमित्यनिष्टकथनमभ्याख्यानं । परस्परविघातहेतुः कलहवाक् । पृष्ठतो दोषसूचनं पैशून्यवाक् । धर्मार्थकाममोक्षासंबद्धवाक् अबद्धप्रलापः । इंद्रियविषयेषु रत्युत्पादिका वाक् रतिवाक् । तेष्वरत्युत्पादिका वाक् अरतिवाक् । परिग्रहार्जनसंरक्षणाद्यासक्तिहेतुर्वाक् उपधिवाक् । व्यवहारे वंचनाहेतुर्वाक् निकृतिवाक् । तपोज्ञानादिकेष्वविनयहेतुर्वाक् अप्रणतिवाक् । स्तेयहेतुर्वाक् मोषवाक् । सन्मार्गोपदेशवाक् सम्यग्दर्शनवाक् । मिथ्यामार्गोपदेशवाक् मिथ्यादर्शनवाक् इति द्वादशभाषाः । द्वींद्रियादयः संज्ञिपंचेंद्रियपर्यंताः व्यक्तवक्तृत्वपर्यायाः वक्तारः । द्रव्यक्षेत्रकालभावाश्रितं बहुविधं असत्यवचनं मृषाभिधानं । जनपदसत्यादिदशप्रकारं सत्यं प्राग्व्याख्यातं । तस्मिन् सत्यप्रवादे द्विलक्षगुणितंपचाशत्पदानि षडुत्तरकोटिरित्यर्थः । १००००००६ । 'छज्जुदा छट्ठे' इत्यनेन षष्ठे पूर्वे द्विलक्षगुणितपंचाशल्लक्षे कोटिप्रमितपदसंख्यायां षट्सु तत्त्वकथनात् । आत्मनः प्रवादः—प्ररूपणं, अस्मिन्निति आत्मप्रवादं सप्तमं पूर्वं । तत् आत्मनः—

"जीवो कत्ता य वेत्ता य पाणी भोत्ता य पोग्गलो वेदो विण्हू सयंभू य सरीरी तह माणवो-सत्ता जंतू य माणी य मायी जोगी य संकुडो असंकुडो य खेत्तण्हू अंतरप्पा तहेव य"

इत्यादिस्वरूपं वर्णयति । तद्यथा—जीवति व्यवहारनयेन दशप्राणान् निश्चयनयेन केवलज्ञानदर्शनसम्यक्त्वस्वरूपचित्प्राणान् धारयति जीविष्यति जीवितपूर्वश्चेति जीवः । व्यवहारनयेन शुभाशुभं कर्म निश्चयनयेन चित्पर्यायान् करोतीति कर्ता । व्यवहारेण सत्यमसत्यं च वक्तीति वक्ता निश्चयेन अवक्ता । नयद्वयोक्तप्राणाः संत्यस्येति प्राणी । व्यवहारेण शुभाशुभकर्मफलं निश्चयेन स्वस्वरूपं भुंक्ते—अनुभवतीति भोक्ता । व्यवहारेण कर्मनोकर्मपुद्गलान् पूरयति—गालयति चेति पुद्गलः निश्चयेनापुद्गलः । नयद्वयेन लोकालोकगतं त्रिकालगोचरं सर्वं वेत्ति—जानाति, इति वेदः । व्यवहारेण स्वोपात्तदेहं समुद्घाते सर्वलोकं निश्चयेन ज्ञानेन वेवेष्टीति-व्याप्नोतीति, विष्णुः । यद्यपि व्यवहारेण कर्मवशाद्भवे भवे भवति परिणमति तथापि निश्चयेन स्वयं स्वस्मिन्नेव ज्ञानदर्शनस्वरूपेणैव भवति परिणमतीति स्वयंभूः । व्यवहारेण औदारिकादिशरीरमस्यास्तीति शरीरी निश्चयेन अशरीरः । व्यवहारेण मानवादिपर्यायपरिणतो मानवः उपलक्षणात् नारकः तिर्यङ् देवश्चेति । निश्चयेन मनौ-ज्ञाने भवः मानवः । व्यवहारेण स्वजनमित्रादिपरिग्रहेषु सजतीति सक्ता निश्चयेनासक्ता । व्यवहारेण चतुर्गतिसंसारे नानायोनिषु जायत इति जंतुः संसारीत्यर्थः । निश्चयेन अजंतुः । व्यवहारेण मानः—अहंकारः, अस्यास्तीति मानी निश्चयेनामानी । व्यवहारेण माया-वंचना अस्यास्तीति मायी, निश्चयेनामायी । व्यवहारेण योगः-कायवाङ्मनस्कर्म, अस्यास्तीति योगी, निश्चयेन अयोगी । व्यवहारेण सूक्ष्मनिगोदालब्ध्यपर्याप्तकसर्वजघन्यशरीरप्रमाणेन संकुटति-संकुचितप्रदेशो भवति इति संकुटः । समुद्घाते सर्वलोकं व्याप्नोतीत्यसंकुटः । निश्चयेन प्रदेशसंहारविसर्पणाभावाद-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नुभयः किंचिदूनचरमशरीरप्रमाण इत्यर्थः । नयद्वयेन क्षेत्रं लोकालोकं स्वस्वरूपं च जानातीति क्षेत्रज्ञः । व्यवहारेण अष्टकर्माभ्यंतरवर्तिस्वभावत्वात् निश्चयेन चैतन्याभ्यंतरवर्तिस्वभावत्वाच्च अंतरात्मा, अत्र चशब्दाः उक्तानुक्तसमुच्चयार्थाः, तेन व्यवहारेण कर्मनोकर्मरूपमूर्तद्रव्यानादिसंबंधान्मूर्तः निश्चयेनामूर्तः इत्यादय आत्मधर्माः समुच्चीयंते तस्मिन्नात्मप्रवादे द्विलक्षगुणितत्रयोदशशतानि पदानि षड्विंशतिकोट्य इत्यर्थः । २६००००००० । कर्मणः प्रवादः प्ररूपणं, अस्मिन्निति कर्मप्रवादमष्टमं पूर्वं । तत् मूलोत्तरोत्तरोत्तरप्रकृतिभेदभिन्नं बहुविकल्पबंधोदयोदीरणसत्त्वाद्यवस्थं ज्ञानावरणादिकर्मस्वरूपं समवधानेर्यापथतपस्याधाकर्मादि च वर्णयति । तत्र द्विलक्षगुणितनवतिपदानि एककोट्यशीतिलक्षाणीत्यर्थः । १८०००००० । प्रत्याख्यायते—निषिध्यते सावद्यमस्मिन्ननेनेति वा प्रत्याख्यानं नवमं पूर्वं तत् नामस्थापनाद्रव्यक्षेत्रकालभावानाश्रित्य पुरुषसंहननबलाद्यनुसारेण परिमितकालं अपरिमितकालं वा प्रत्याख्यानं सावद्यवस्तुनिवृत्तिं, उपवासविधिं तद्भावनांगं पंचसमितित्रिगुप्त्यादिकं च वर्णयति, तत्र द्विलक्षगुणितद्वाचत्वारिंशत्पदानि चतुरशीतिलक्षाणीत्यर्थः ८४००००० । विद्यानां अनुवादः—अनुक्रमेण वर्णनं यस्मिन् तद्विद्यानुवादं दशमं पूर्वं । तत्सप्तशतान्यंगुष्ठप्रसेनाद्यल्पविद्याः पंचशतानि रोहिण्यादिमहाविद्याः । तत्स्वरूपसामर्थ्यसाधनमंत्रतंत्रपूजाविधानानि सिद्धानां तासां फलविशेषान् अष्टौ महानिमित्तानि अंतरिक्ष—भौम—अंग—स्वर—स्वप्न—लक्षण—व्यंजन—छिन्न—नामानि च वर्णयति । तत्र द्विलक्षगुणितपंचपंचाशत्पदानि एककोटिदशलक्षाणीत्यर्थः । ११०००००० । कल्याणानां वादः—प्ररूपणं, अस्मिन्निति कल्याणवादं—एकादशं पूर्वं । तत् तीर्थकरचक्रधरबलदेववासुदेवप्रतिवासुदेवानां गर्भावतरणादीनि कल्याणानि-महोत्सवान् तत्कारणतीर्थकरत्वादिपुण्यविशेषहेतुषोडशभावनातपोविशेषाद्यनुष्ठानानि चंद्रसूर्यग्रहनक्षत्रचारग्रहणशकुनादिफलादि च वर्णयति । तत्र द्विलक्षगुणितत्रयोदशशतानि पदानि षड्विंशतिकोट्य इत्यर्थः । २६००००००० । प्राणानां आवादः—प्ररूपणं, अस्मिन्निति प्राणावादं द्वादशं पूर्वं तत्कायचिकित्साद्यष्टांगमायुर्वेदं, भूतिकर्मजांगुलिकप्रक्रमं इलापिंगलसुषुम्नादिबहुप्रकारप्राणापानविभागं दशप्राणानामुपकारकापकारकद्रव्याणि च गत्याद्यनुसारेण वर्णयति । तत्र द्विलक्षगुणितपंचाशदुत्तरषट्शतानि पदानि त्रयोदशकोट्य इत्यर्थः १३००००००० । क्रियाभिः—नृत्यादिभिः, विशालं—विस्तीर्णं शोभमानं वा क्रियाविशालं त्रयोदशं पूर्वं तत् संगीतशास्त्रछंदोऽलंकारादिद्वासप्तति कलाः, चतुःषष्टिं स्त्रीगुणान् शिल्पादिविज्ञानानि चतुरशीतिं, गर्भाधानादिकाः अष्टोत्तरशतं, सम्यग्दर्शनादिकाः पंचविंशतिं देववंदनादिकाः नित्यनैमित्तिकक्रियाश्च वर्णयति । तत्र द्विलक्षगुणितपंचाशदधिकचतुःशतानि पदानि नवकोट्य इत्यर्थः ९०००००००० । त्रिलोकानां बिंदवः अवयवाः सारं च वर्ण्यंते अस्मिन्निति त्रिलोकबिंदुसारं चतुर्दशं पूर्वं । तत् त्रिलोकस्वरूपं, षट्त्रिंशत्परिकर्माणि, अष्टौ व्यवहारान्, चत्वारि बीजानि, मोक्षस्वरूपं, तद्गमनकारणक्रियाः, मोक्षसुखं च वर्णयति । तत्र द्विलक्षगुणितपंचविंशत्यधिकषट्शतानि पदानि द्वादश कोट्यः पंचाशल्लक्षाणि चेत्यर्थः १२५०००००० ॥ ३६५–३६६ ॥

स० च०—उत्पाद आदि चौदह पूर्वनिविषैं पदनिकी संख्या कहिये है तहां वस्तुका उत्पाद व्यय ध्रौव्य आदि अनेक धर्म तिसका पूरक सो उत्पादनामा प्रथम पूर्व है इसविषैं जीवादि वस्तुनिका नानाप्रकार नयविवक्षाकरि क्रमवर्ती युगपत् अनेक धर्मकरि भये जे उत्पाद व्यय ध्रौव्य ते तीनों तीन काल अपेक्षा नव धर्म भये सो उन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धर्मरूप परिणया वस्तु सो भी नव प्रकार हो है। उपज्या, उपजै है, उपजैगा। नष्ट भया, नष्ट हो है नष्ट होयगा। स्थिर भया, स्थिर है, स्थिर होयगा। ऐसैं नवप्रकार द्रव्य भया इन एक एकका उत्पन्नपना आदि नव नव धर्म जानने। ऐसैं इक्यासी भेद लीयें द्रव्यका वर्णन है। याके दोय लाखतैं पंचासकौं गुणिये ऐसा एक कोडि १०००००० पद जानने। बहुरि अग्र कहिये द्वादशांगविषैं प्रधानभूत जो वस्तु ताका अयन कहिये ज्ञान सो ही है प्रयोजन जाका ऐसा अग्रायणीय नामा दूसरा पूर्व है। इसविषैं सातसै सुनय अर दुर्नय तिनिका अर सप्त तत्त्व नव पदार्थ षट्द्रव्य इत्यादिका वर्णन है। याके दोय लाखतैं अड़तालीसकौं गुणिये ऐसैं छिनवै लाख ९६००००० पद हैं। बहुरि वीर्य कहिये जीवादिक वस्तुकी शक्ति–समर्थता ताका है अनुवाद कहिये वर्णन जिसविषैं ऐसा वीर्यानुवाद नामा तीसरा पूर्व है। इसविषैं आत्माका वीर्य परका वीर्य दोऊका वीर्य क्षेत्रवीर्य कालवीर्य भाववीर्य तपोवीर्य इत्यादिक द्रव्यगुण पर्यायनिका शक्तिरूप वीर्य तिसका व्याख्यान है। याकौं दोयलाखतैं पैंतीसकौं गुणिये ऐसैं सत्तरिलाख ७०००००० पद हैं। बहुरि अस्ति नास्ति आदि जे धर्म तिनिका है प्रवाद कहिये प्ररूपण इसविषै ऐसा अस्तिनास्ति प्रवाद नामा चौथा पूर्व है। इसविषैं जीवादि वस्तु अपने द्रव्य क्षेत्र काल भावकरि संयुक्त हैं तातैं स्यात् अस्ति है। बहुरि परके द्रव्य क्षेत्र काल भावविषैं यह नाही है तातैं स्यान्नास्ति है। बहुरि अनुक्रमतैं स्वपर द्रव्य क्षेत्र काल भावकी अपेक्षा स्यात् अस्ति नास्ति है। बहुरि युगपत् स्वपर द्रव्य क्षेत्र काल भावकी अपेक्षा द्रव्य कहनेमें न आवै तातैं स्यात् अवक्तव्य है। बहुरि स्वद्रव्य क्षेत्र काल भावकरि द्रव्य अस्तिरूप है बहुरि युगपत् स्वपर द्रव्य क्षेत्र काल भावकरि कहनेमें न आवै तातैं स्यात् अस्ति अवक्तव्य है। बहुरि पर द्रव्य क्षेत्र काल भावकरि द्रव्य नास्तिरूप है बहुरि युगपत् स्व पर द्रव्य क्षेत्र काल भावकरि द्रव्य कहनेमें न आवै तातैं स्यात्नास्तिअवक्तव्य है। बहुरि अनुक्रमतैं स्वपर द्रव्य क्षेत्र काल भाव अपेक्षा द्रव्य अस्ति नास्ति रूप है अर युगपत् स्वपर द्रव्य क्षेत्र काल भावकी अपेक्षा अवक्तव्य है तातैं स्यात् अस्ति नास्ति अवक्तव्य है ऐसैं जिस प्रकार अस्ति नास्ति अपेक्षा सप्तभेद कहे तैसैं एक अनेक धर्म अपेक्षा सप्त भंग हो हैं। अ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भेद अपेक्षा स्यात् एक है । भेद अपेक्षा स्यात् अनेक है । क्रमतैं भेद अभेद अपेक्षा स्यात् एक अनेक है । युगपत् भेद अभेद अपेक्षा स्यात् अवक्तव्य है । अभेद अपेक्षा वा युगपत् अभेद भेद अपेक्षा स्यात् एक अवक्तव्य है भेद अपेक्षा वा युगपत् भेद अभेद अपेक्षा स्यात् अनेक अवक्तव्य है । क्रमतैं अभेद भेद अपेक्षा वा युगपत् अभेद भेद अपेक्षा स्यात् एक अनेक अवक्तव्य है ।ऐसैं ही नित्य अनित्यनै आदि दे अनंत धर्मनिके सप्त भंग हैं । तहां प्रत्येक भंग तीन अस्ति १ नास्ति १ अवक्तव्य १ अर द्विसंयोगी भंग तीन अस्ति नास्ति, अस्ति अवक्तव्य, नास्ति अवक्तव्य,अर त्रिसंयोगी एक अस्ति नास्ति अवक्तव्य१ इनि सप्तभंगनिका समुदाय सो सप्तभंगी सो प्रश्नके वशतैं एक ही वस्तु विषैं अविरोधपनै संभवती नाना प्रकार नयनिकी मुख्यता गौणता करि प्ररूपण कीजिए है। इहां सर्वथा नियमरूप एकांतका अभाव लीए कथंचित् ऐसा है अर्थ जाका सो स्यात् शब्द जानना । इस अंगके दोय लाखतैं तीसकौं गुणिए सो साठि लाख ६०००००० पद हैं । बहुरि ज्ञाननिका है प्रवाद कहिए प्ररूपण जिसविषैं ऐसा ज्ञानप्रवाद नामां पांचवां पूर्व है । इसविषैं मति श्रुति अवधि मनःपर्यय केवल ए पांच सम्यग्ज्ञान अर कुमति कुश्रुति विभंग ए तीन कुज्ञान इनिका स्वरूप संख्या वा विषय वा फल इत्यादि अपेक्षा प्रमाण अप्रमाणता रूप भेद वर्णन कीजिए है याके दोय लाखतैं पचासकौं गुणैं एक कोटि होइ तिनमेंस्यों एक घटाइए ऐसैं एक घाटि कोडि ९९९९९९९ पद हैं । गाथाविषै 'पंचम रूऊण' ऐसा कह्या है तातैं पांचवां अंगमें एक घटाया अन्य संख्या गाथा अनुसारि कहिए ही है । बहुरि सत्यका है प्रवाद कहिए प्ररूपण इसविषैं ऐसा सत्यप्रवाद नामा छठा पूर्व है । इसविषैं वचन गुप्ति बहुरि वचन संस्कारके कारण बहुरि बचनके प्रयोग बहुरि बारह प्रकार भाषा बहुरि बोलणेवाले जीवोंके भेद बहुरि बहुतप्रकार मृषा वचन इत्यादि वर्णन है । तहां असत्य न बोलना वा मौन धरना सो सत्य वचनगुप्ति कहिए । बहुरि वचन संस्कारके कारण दोय एक तौ स्थान, एक प्रयत्न तहां जिनि स्थानकनितैं अक्षर बोलैं जांहि ते स्थान आठ हैं । हृदय १ कंठ २ मस्तक ३ जिह्वाका मूल ४ दंत ५ नासिका ६ होठ ७ तालवा ८ जैसैं अकार कवर्ग हकार विसर्ग इनिका कंठ स्थान है ऐसैं अक्षरनिके स्थान जानने

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बहुरि जिस प्रकार अक्षर कहे जांहि ते प्रयत्न पांच हैं। स्पृष्टता १ ईषत् स्पृष्टता २ विवृतता ३ ईषद्विवृतता ४ संवृतता ५। तहां अंगका अंगतैं स्पर्श भए अक्षर वोलिए सो स्पृष्टता। किछू थोरा स्पर्श भए वोलिए सो ईषत्स्पृष्टता अंगकौं उघाडि बोलिए सो विवृतता किछू थोरा उघाड़ि बोलिए सो ईषद्विवृतता, अंगतैं अंगकौ ढांकि बोलिए सो संवृतता जैसैं पकारादिक होठसे होठका स्पर्श भएंही उच्चारण होंइ ऐसैं प्रयत्न जानने। बहुरि वचन प्रयोग दोय प्रकार शिष्टरूप भला वचन, दुष्टरूप बुरा वचन। बहुरि भाषा बारह प्रकार, तहां इसने ऐसा कीया है ऐसा अनिष्ट वचन कहना सो अभ्याख्यान कहिए १ बहुरि जातैं परस्पर विरोध होइ सो कलह वचन २ बहुरि परका दोष प्रकट करना सो पैशून्य वचन ३ बहुरि धर्म अर्थ काम मोक्षका संबंधरहित वचन सो असंबद्ध प्रलाप रूप वचन ४ बहुरि इंद्रिय विषयनिविषैं रतिका उपजावन हारा वचन सो रतिवचन ५ बहुरि विषयनिविषै अरतिका उपजावन हारा वचन सो अरतिवचन ६ बहुरि तहां परिग्रहका उपजाने राखनेकी आसक्तताका कारण वचन सो उपधिवचन ७ बहुरि व्यवहारविषै ठिगनेरूप वचन सो निकृति वचन ८ बहुरि तप ज्ञानादिक विषै अविनयका कारण वचन सो अप्रणतिवचन ९ बहुरि चोरीका कारणरूप वचन सो मोषवचन १०बहुरि भले मार्गका उपदेशरूप वचन सो सम्यग्दर्शन वचन११बहुरि मिथ्या मार्गका उपदेशरूप वचन सो मिथ्यादर्शन वचन १२ ऐसैं बारह भाषा हैं। बहुरि बेइंद्रिय आदि सैनी पंचेद्रिय पर्यंत बचन बोलने वाले वक्तानिके भेद हैं बहुरि द्रव्य क्षेत्र काल भावादिककरि मृषा जो असत्य वचन सो बहुत प्रकार है। बहुरि जनपदादि दश प्रकार सत्य वचन पूर्वे योग मार्गणा विषै कहि आए हैं ऐसा कथन इस पूर्वविषैं है। याके दोय लाखतैं पचासकौं गुणिए अर 'छज्जुदा छट्ठ' इस वचनकरि छह मिलाइए ऐसे एक कोटि छह१००००००६ पद हैं। बहुरि आत्माका प्रवाद कहिए प्ररूपण है इसविषैं ऐसा आत्मप्रवाद नामा सातमा पूर्व है इसविषै—जीवो कत्ता य वेत्ता य पाणी भोत्ता य पुग्गलो वेदी विण्हू सयंभू य सरीरी तह माणवो सत्ता जंतू य माणी य मायी जोगी य संकुडो असंकुडो य खेत्तण्हू अंतरप्पा तहेव य। इत्यादि आत्मस्वरूपका कथन है इसका अर्थ लिखिए है—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जीवति कहिए जीवै है व्यवहार करि दश प्राणनिकौं निश्चयकरि ज्ञान दर्शन सम्यक्त्वरूप चैतन्य प्राणनिकौं धारै है अर पूर्वै जीया आगैं जीवेगा तातैं आत्माको जीव कहिए। बहुरि व्यवहार करि शुभाशुभ कर्मकौं अर निश्चयकरि चैतन्य प्राणनिकौं करै है तातैं कर्ता कहिए। बहुरि व्यवहारकरि सत्य असत्य वचन बोलै है तातैं वक्ता है निश्चय करि वक्ता नहीं है। बहुरि दोऊ नयनिकरि जे प्राण कहे ते याकैं पाइए है तातैं प्राणी कहिए। बहुरि व्यवहार करि शुभ अशुभ कर्मके फलकौं अर निश्चय करि निज स्वरूपकौं भोगवै है तातैं भोक्ता कहिए। बहुरि व्यवहार करि कर्म नोकर्मरूप पुद्गलनिकौं पूरै है अर गालै है तातैं पुद्गल कहिए निश्चय करि आत्मा पुद्गल है नाहीं। बहुरि दोऊ नयनिकरि लोकालोकसंबंधी त्रिकालवर्ती सर्व ज्ञेयनिकौं 'वेत्ति' कहिए जानै है तातैं वेदक कहिए। बहुरि व्यवहारकरि अपने देहकौं वा केवल समुद्घातकरि सर्व लोककौं अर निश्चयकरि ज्ञानतैं सर्व लोकालोककौं वेवेष्टि कहिए व्यापै है तातैं विष्णु कहिए। बहुरि यद्यपि व्यवहार करि कर्मके वशतैं संसारविषैं परिणवै है तथापि निश्चयकरि स्वयं आपही आपविषै ज्ञान दर्शन स्वरूप ही करि भवति कहिए परिणवै है तातैं स्वयंभू कहिए। बहुरि व्यवहारकरि औदारिक आदि का शरीर याकै है तातैं शरीरी कहिये, निश्चय करि शरीरी नाहीं है। बहुरि व्यवहारकरि मनुष्यादि पर्यायरूप परिणवै है तातैं मानव कहिए। उपलक्षणतैं नारकी वा तिर्यंच वा देव कहिए। निश्चयकरि मनु कहिए ज्ञान तीहि विषैं भवः कहिए सत्तारूप है तातैं मानव कहिए। बहुरि व्यवहारकरि कुंटुंब मित्रादि परिग्रहविषै सजति कहिये आसक्त होइ प्रवर्तै है तातैं सक्ता कहिए निश्चयकरि सक्ता नाहीं है। बहुरि व्यवहार करि संसारविषै नाना योनिविषै जायते कहिए उपजै है तातैं जंतु कहिये निश्चयकरि जंतु नाहीं है। बहुरि व्यवहारकरि मान कहिए अहंकार सो याकै है तातैं मानी कहिए निश्चयकरि मानी नाहीं। बहुरि व्यवहारकरि माया जो कपटाई सो याकै हैं तातैं मायावी कहिए, निश्चयकरि मायावी नाहीं। बहुरि व्यवहारकरि मन वचन काय क्रियारूप योग याकै है तातैं योगी कहिए निश्चयकरि योगी नाहीं है। बहुरि व्यवहारकरि सूक्ष्म निगोदिया लब्धि अपर्याप्तककी जघन्य अवगाहना करि प्रदेशनिकौं संकोचै है तातैं संकुट है। बहुरि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

केवलिसमुद्धातकरि सर्व लोकविषैं व्यापै है तातैं असंकुट है । निश्चयकरि प्रदेशनिका संकोच विस्ताररहित किंचित् ऊन चरमशरीर प्रमाण है तातैं संकुट असंकुट नाहीं है। बहुरि दोऊ नयकरि क्षेत्र जो लोकालोक ताहि जानाति कहिए जानै है तातैं क्षेत्रज्ञ कहिए बहुरि व्यवहार करि अष्ट कर्मनिके अभ्यंतर प्रवर्तै है अर निश्चयकरि चैतन्य स्वभावके अभ्यंतर प्रवर्तै है तातैं अंतरात्मा कहिए चकारतैं व्यवहारकरि कर्म नोकर्म रूप मूर्तीक द्रव्यके संबधतैं मूर्तीक है, निश्चयकरि अमूर्तीक है इत्यादिक आत्माके स्वभाव जानने । इनिका व्याख्यान इस पूर्व विषैं है। याके दोयलाखतैं तेरहसैकौं गुणिए ऐसे छब्बीस कोडि २६००००००० पद हैं। बहुरि कर्मका है प्रवाद कहिए प्ररूपण इसविषैं ऐसा कर्मप्रवाद नामा आठवां पूर्व है । बहुरि इसविषैं मूल प्रकृति उत्तर प्रकृति उत्तरोत्तर प्रकृतिरूप भेद लीए बंध उदय उदीरणा सत्ता रूप अवस्थाकौं धरै ज्ञानावरणादिक कर्म तिनिके स्वरूपकौं वा समवधान ईर्यापथ तपस्या आधाकर्म इत्यादिक क्रियारूप कर्मनिकौं प्ररूपिए है । याके दोय लाखतैं निवैकौं गुणिए ऐसे एक कोडि अस्सीलाख १८०००००० पद हैं। बहुरि प्रत्याख्यायतैं कहिए निषेधिए है पाप जाकरि ऐसा प्रत्याख्यान नामा नवमा पूर्व है इसविषैं नाम स्थापना द्रव्य क्षेत्र काल भाव अपेक्षा जीवनिका संहनन वा बल इत्यादिकके अनुसारकरि काल मर्यादा लीए वा यावज्जीव प्रत्याख्यान कहिए सकल पापसहित वस्तुका त्याग उपवासका विधि ताकी भावना पांच समिति तीन गुप्ति इत्यादि वर्णन कीजिए है । याके दोय लाखतैं बियालीसकौं गुणिए ऐसे चौरासी लाख ८४००००० पद हैं। बहुरि विद्यानिका है अनुवाद कहिए अनुक्रमतैं वर्णन इस विषैं ऐसा विद्यानुवाद नामा दशवां पूर्व है इसविषैं सातसै अंगुष्ठ प्रसेन आदि अल्पविद्या अर पांचसै रोहिणी आदि महाविद्या तिनका स्वरूप समर्थता साधनभूत मंत्र यंत्र पूजा विधान, सिद्धभये पीछे उन विद्यानिका फल बहुरि अंतरिक्ष १ भौम २ अंग ३ स्वर ४ स्वप्न ५ लक्षण ६ व्यंजन ७ छिन्न ८ ए आठ महानिमित्त इत्यादि प्ररूपिए सो याके दोय लाखतैं पचावनकौं गुणिए ऐसे एक कोड दशलाख ११०००००० पद हैं। बहुरि कल्याणनिका है वाद कहिए प्ररूपण जाविषैं ऐसा कल्याणवाद नामा ग्यारहवां पूर्व है इस विषैं तीर्थंकर चक्रवर्ति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बलभद्र नारायण प्रतिनारायण इनके गर्भ आदिक कल्याण कहिए महा उच्छव बहुरि तिनके कारणभूत षोडश भावना तपश्चरण आदिक क्रिया बहुरि चन्द्रमा सूर्य ग्रह नक्षत्र इनिका गमनविशेष ग्रहण शकुन फल इत्यादि विशेष वर्णन कीजिए हैं। याके दोय लाखतैं तेरहसैकौं गुणिए ऐसे छब्बीस कोडि २६०००००००पद हैं। बहुरि प्राणनिका है आवाद कहिए प्ररूपण इसविषैं ऐसा प्राणावाद नामा बारह्वां पूर्व है इसविषैं चिकित्सा आदि आठ प्रकार वैद्यक अर भूतादि व्याधि दूर करनेकौं कारण मंत्रादिक वा विष दूरि करण हारा जो जांगुलिक ताका कर्म वा इला १ पिंगला २ सुष्मणा ३ इत्यादि स्वरोदय रूप बहुत प्रकार कारणरूप सासोस्वासका भेद बहुरि दश प्राणनिकौं उपकारी वा अनुपकारी वस्तु गत्यादिकके अनुसारि वर्णन कीजिए है सो जाके दोय लाखतैं छहसै पचासकौं गुणिए ऐसे तेरह कोडि १३०००००००पद हैं। बहुरि क्रियाकारि विशाल कहिए विस्तीर्ण शोभायमान ऐसा क्रियाविशाल नामा तेरह्वां पूर्व है । इसविषैं संगीत शास्त्र छंद अलंकारादि शास्त्र बहत्तरि कला चौसठि स्त्रीका गुणशिल्प आदि चातुर्यता गर्भाधान आदि चौरासी क्रिया सम्यग्दर्शनादि एकसौ आठ क्रिया देववंदना आदि पचीस क्रिया और नित्य नैमित्तिक क्रिया इत्यादिक प्ररूपिए हैं याके दोय लाखतैं च्यारिसै पचासकौं गुणिए ऐसे नव कोडि ९००००००० पद हैं । बहुरि त्रिलोकनिका विंदु कहिए अवयव अर सार सो प्ररूपिए है याविषैं ऐसा त्रिलोकविंदुसार नामा चौदह्वां पूर्व है । इसविषैं तीन लोकका स्वरूप अर छब्बीस परिकर्म आठ व्यवहार च्यारि वीज इत्यादि गणित अर मोक्षका स्वरूप मोक्षका कारणभूत क्रिया मोक्षका सुख इत्यादि वर्णन कीजिए है याके दोय लाखतैं छह सै पचीसकौं गुणिए ऐसे बारह कोडि पचासलाख १२५०००००० पद हैं ऐसे चौदह पूर्वनिके पदनिकी सख्या हा है इहां दोय लाखका गुणकारका विधानकरि गाथाविषै संख्या कही थी तातैं टीकाविषैं भी तैसे ही कही है ॥ ३६६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सामाइय चउवीसत्थयं तदो वंदणा पडिक्कमणं ।
वेणइयं किदियम्मं दसवेयालं च उत्तरज्झयणं ॥ ३६७ ॥
कप्पववहारकप्पाकप्पियमहकप्पियं च पुंडरियं ।
महपुंडरीयणिसिहियमिदि चोद्दसमंगवाहिरयं ॥ ३६८ ॥

सामायिकं चतुर्विंशस्तवं ततो वंदना प्रतिक्रमणं ।
वैनयिकं कृतिकर्म दशवैकालिकं च उत्तराध्ययनं ॥ ३६७ ॥
कल्प्यव्यवहार–कल्प्याकल्प्य–महाकल्प्यं च पुंडरीकं ।
महापुंडरीकं निषिद्धिका इति चतुर्दशांगवाह्यं ॥ ३६८ ॥

जी०प्र०–सामायिकं चतुर्विंशतिस्तवः ततो वंदना प्रतिक्रमणं वैनयिकं कृतिकर्म दशवैकालिकं उत्तराध्ययनं कल्प्यव्यवहारं कल्प्याकल्प्यं महाकल्प्यं पुंडरीकं महापुंडरीकं निषिद्धिका च इत्यंगवाह्यश्रुतं चतुर्दशविधं भवति, तत्र समं एकत्वेन आत्मनि आयः आगमनं परद्रव्येभ्यो निवृत्य उपयोगस्य आत्मनि प्रवृत्तिः समायः, अयमहं ज्ञाता द्रष्टा चेति आत्मविषयोपयोग इत्यर्थः, आत्मनः एकस्यैव ज्ञेयज्ञायकत्वसंभवात् । अथवा सं समे रागद्वेषाभ्यामनुपहते मध्यस्थे आत्मनि आयः उपयोगस्य प्रवृत्तिः समायः स प्रयोजनमस्येति सामायिकं नित्यनैमित्तिकानुष्ठानं तत्प्रतिपादकं शास्त्रं वा सामायिकमित्यर्थः । तच्च नामस्थापनाद्रव्यक्षेत्रकालभावभेदात्षड्विधं । तत्र इष्टानिष्टनामसु रागद्वेषनिवृत्तिः सामायिकमित्यभिधानं वा नामसामायिकं । मनोज्ञामनोज्ञासु स्त्रीपुरुषाद्याकारासु काष्ठलेप्यचित्रादिप्रतिमासु रागद्वेषनिवृत्तिः । इदं सामायिकमिति स्थाप्यमानं यत् किंचिद्वस्तु वा स्थापनासामायिकं । इष्टानिष्टेषु चेतनाचेतनद्रव्येषु रागद्वेषनिवृत्तिः सामायिकशास्त्रानुपयुक्तज्ञायकः तच्छरीरादिर्वा द्रव्यसामायिकं । ग्रामनगरवनादिक्षेत्रेषु इष्टानिष्टेषु रागद्वेषनिवृत्तिः क्षेत्रसामायिकं । वसंतादिऋतुषु शुक्लकृष्णपक्षयोर्दिनवारनक्षत्रादिषु च इष्टानिष्टेषु कालविशेषेषु रागद्वेषनिवृत्तिः कालसामायिकं । भावस्य जीवादितत्त्वविषयोपयोगरूपस्य पर्यायस्य मिथ्यादर्शनकषायादिसंक्लेशनिवृत्तिः सामायिकशास्त्रोपयोगयुक्तज्ञायकः तत्पर्यायपरिणतसामायिकं वा भावसामायिकं । तत्तत्कालसंबंधिनां चतुर्विंशतितीर्थकराणां नामस्थापनाद्रव्यभावानाश्रित्य पंचमहाकल्याणचतुस्त्रिंशदतिशयाष्टमहाप्रातिहार्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परमौदारिकदिव्यदेहसमवसरणसभाधर्मोपदेशनादितीर्थंकरमहिमस्तुतिः चतुर्विंशतिस्तवः तस्य प्रतिपादकं शास्त्रं वा चतुर्विंशतिस्तव इत्युच्यते। तस्मात्परं एकतीर्थंकरालंबना चैत्यचैत्यालयादिस्तुतिः वंदना तत्प्रतिपादकं शास्त्रं वा वंदना इत्युच्यते। प्रतिक्रम्यते प्रमादकृतदैवसिकादिदोषो निराक्रियते अनेनेति प्रतिक्रमणं तच्च दैवसिकरात्रिकपाक्षिकचातुर्मासिकसांवत्सरिकैर्यापथिकौत्तमार्थिकभेदात्सप्तविधं, भरतादिक्षेत्रं दुःषमादिकालं षट्संहननसमन्वितस्थिरास्थिरादिपुरुषभेदांश्च आश्रित्य तत्प्रतिपादकं शास्त्रमपि प्रतिक्रमणं। विनयः प्रयोजनमस्येति वैनयिकं तच्च ज्ञानदर्शनचारित्रतपउपचारविषयं पंचविधविनयविधानं कथयति। कृतेः क्रियायाः कर्म विधानं अस्मिन् वर्ण्यते इति कृतिकर्म तच्च अर्हत्सिद्धाचार्यबहुश्रुतसाध्वादिनवदेवतावंदनानिमित्तमात्माधीनताप्रादक्षिण्यत्रिवारत्रिनवतिचतुःशिरोद्वादशावर्तादिलक्षणनित्यनैमित्तिकक्रियाविधानं च वर्णयति। विशिष्टाः काला विकालास्तेषु भवानि वैकालिकानि दश वैकालिकानि वर्ण्यंतेऽस्मिन्निति दशवैकालिकं तच्च मुनिजनानां आचरणगोचरविधिं पिंडशुद्धिलक्षणं च वर्णयति। उत्तराणि अधीयंते पठ्यंते अस्मिन्निति उत्तराध्ययनं तच्च चतुर्विधोपसर्गाणां द्वाविंशतिपरीषहाणां च सहनविधानं तत्फलं एवं प्रश्ने एवमुत्तरमित्युत्तरविधानं च वर्णयति। कल्प्यं योग्यं व्यवह्रियते अनुष्ठीयतेऽस्मिन्ननेनेति वा कल्प्यव्यवहारः, स च साधूनां योग्यानुष्ठानविधानं अयोग्यसेवायां प्रायश्चित्तं च वर्णयति। कल्प्यं चाकल्प्यं च कल्प्याकल्प्यं, तद्वर्ण्यते अस्मिन्निति कल्प्याकल्प्यं। तच्च द्रव्यक्षेत्रकालभावानाश्रित्य मुनीनामिदं कल्प्यं योग्यं इदमकल्प्यं अयोग्यमिति विभागं वर्णयति। महतां कल्प्यमस्मिन्निति महाकल्प्यं शास्त्रं तच्च जिनकल्पसाधूनां उत्कृष्टसंहननादिविशिष्टद्रव्यक्षेत्रकालभाववर्तिनां योग्यं त्रिकालयोगाद्यनुष्ठानं स्थविरकल्पानां दीक्षाशिक्षागणपोषणात्मसंस्कारसल्लेखनोत्तमार्थस्थानगतोत्कृष्टाराधनाविशेषं च वर्णयति। पुंडरीकं नाम शास्त्रं भावनव्यंतरज्योतिष्ककल्पवासिविमानेषु उत्पत्तिकारणदानपूजातपश्चरणाकामनिर्जरासम्यक्त्वसंयमादिविधानं तत्तदुपपादस्थानवैभवविशेषं च वर्णयति। महच्च तत्पुंडरीकं तत्महापुंडरीकं शास्त्रं तच्च महर्धिकेषु इंद्रप्रतींद्रादिषु उत्पत्तिकारणतपोविशेषाद्याचरणं वर्णयति। निषेधनं प्रमाददोषनिराकरणं निषिद्धिः संज्ञायां कप्रत्यये निषिद्धिका प्रायश्चित्तशास्त्रमित्यर्थः, तच्च प्रमाददोषविशुद्ध्यर्थं बहुप्रकारं प्रायश्चित्तं वर्णयति निसीतिका इति क्वचित्पाठो दृश्यते। एवं चतुर्दशविधं अंगबाह्यश्रुतं परिभावनीयं॥ ३६७–३६८॥ अथ शास्त्रकारः श्रुतज्ञानमाहात्म्यं वर्णयति—

सं० प्र०—अंगबाह्यस्य प्रकीर्णकनाम्नो द्रव्यश्रुतस्य सामायिकादयश्चतुर्दशभेदाः व्याख्यायंते तद्यथा—सं—एकत्वेन आत्मनि आयः—आगमनं परद्रव्येभ्यो निवृत्य उपयोगस्य आत्मनि प्रवृत्तिः समायः, अयमहं ज्ञाता द्रष्टा चेत्यात्मविषयोपयोगः इत्यर्थः, आत्मनः एकस्यैव ज्ञेयज्ञायकत्वसंभवात्। अथवा समे-रागद्वेषाभ्यामनुपहते मध्यस्थे आत्मनि आयः—उपयोगस्य प्रवृत्तिः समायः, स प्रयोजनमस्येति सामायिकं—नित्यनैमित्तिकानुष्ठानं तत्प्रतिपादकं शास्त्रमपि सामायिकं। तत् नाम—स्थापना—द्रव्य—क्षेत्र—काल—भावभेदात् षड्विधं सामायिकं प्रतिपादयति। तत्र इष्टानिष्टनामसु रागद्वेषनिवृत्तिः सामायिकमित्यभिधानं वा नामसामायिकं। मनोज्ञामनोज्ञासु स्त्रीपुरुषाद्याकारस्थापनासु काष्ठलेप्यचित्रादिप्रतिमासु रागद्वेषनिवृत्तिः इदं सामायिकमिति स्थाप्यमानं यत्किंचिद्वस्तु वा स्थापनासामायिकं। इष्टानिष्टेषु चेतनाचेतनद्रव्येषु रागद्वेषनिवृत्तिः सामायिकशास्त्रानुपयुक्तज्ञायकः तच्छरीरादि वा द्रव्यसामायिकं। ग्रामनगरवनादिक्षेत्रेषु इष्टानिष्टेषु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रागद्वेषनिवृत्तिः क्षेत्रसामायिकं । वसंतादिषु ऋतुषु शुक्लकृष्णयोः पक्षयोः दिनवारनक्षत्रादिषु च इष्टानिष्टेषु कालविशेषेषु रागद्वेषनिवृत्तिः कालसामायिकं । भावस्य—जीवादितत्त्वविषयोपयोगरूपस्य पर्यायस्य मिथ्यादर्शनकषायादिसंक्लेशनिवृत्तिः सामायिकशास्त्रोपयुक्तज्ञायकः तत्पर्यायपरिणतं सामायिकं वा भावसामायिकं । तत्तत्कालसंबंधिनां चतुर्विंशतेस्तीर्थकराणां नामस्थापनाद्रव्यभावानाश्रित्य पंचमहाकल्याणचतुस्त्रिंशदतिशयाष्टमहाप्रातिहार्यपरमौदारिकदिव्यदेहसमवसरणसभाधर्मोपदेशनादितीर्थकरत्वमहिमस्तुतिश्चतुर्विंशतिस्तवः तत्प्रतिपादकं शास्त्रमपि चतुर्विंशतिस्तव इत्युच्यते । ततः—तस्मात्परं, एकतीर्थकरालंबना चैत्यचैत्यालयादिस्तुतिः वंदना तत्प्रतिपादकं शास्त्रमपि वंदनेत्युच्यते । प्रतिक्रम्यते—प्रमादकृतदैवसिकादिदोषो निराक्रियतेऽनेनेति प्रतिक्रमणं तच्च दैवसिक—रात्रिक—पाक्षिक—चातुर्मासिक-सांवत्सरिक—ऐर्यापथिकौत्तमार्थभेदात् सप्तविधं भरतादिक्षेत्रं दुष्षमादिकालं षट्संहननसमन्वितस्थिरास्थिरादिपुरुषभेदांश्चाश्रित्य । तत्प्रतिपादकं शास्त्रमपि प्रतिक्रमणं । विनयः प्रयोजनमस्येति वैनयिकं तत् ज्ञानदर्शनचारित्रतपउपचारविषयं पंचविधं विनयविधानं प्ररूपयति । कृतेः—क्रियायाः कर्म—विधानं अस्मिन्वर्ण्यत इति कृतिकर्म तत् अर्हत्सिद्धाचार्यबहुश्रुतसाध्वादीनां नवदेवतानां वंदनानिमित्तं आत्माधीनता—प्रादक्षिण्यत्रिवार—त्र्यवनति-चतुःशिरोद्वादशावर्तादिलक्षणनित्यनैमित्तिकक्रियाविधानं वर्णयति । विशिष्टाः कालाः विकालास्तेषु भवानि वैकालिकानि दशवैकालिकानि वर्ण्यंते अस्मिन्निति दशवैकालिकं तत्साधूनामाचारगोचरविधिं पिंडशुद्धिलक्षणं च वर्णयति । उत्तराण्यधीयंते—पठ्यंते अस्मिन्नित्युत्तराध्ययनं तत् चतुर्विधोपसर्गाणां द्वाविंशतिपरीषहाणां च सहनविधानं तत्फलं एवं प्रश्ने एवमुत्तरमित्युत्तरविधानं च वर्णयति । कल्प्यं—योग्यं, व्यवह्रियते—अनुष्ठीयते अस्मिन्ननेनेति वा कल्प्यव्यवहारः शास्त्रं तत् ऋषीणां योग्यानुष्ठानविधानं अयोग्यसेवायां प्रायश्चित्तं च वर्णयति । कल्प्यं चाकल्प्यं च कल्प्याकल्प्यं वर्ण्यते अस्मिन्निति कल्प्याकल्प्यं तत् द्रव्यक्षेत्रकालभावानाश्रित्य साधूनामिदं कल्प्यं—योग्यं, इदमकल्प्यं—अयोग्यमिति विभागं वर्णयति । महतां कल्प्यमस्मिन्निति महाकल्प्यं तत् महासाधूनां जिनकल्पानां, उत्कृष्टसंहननादिविशिष्टद्रव्यक्षेत्रकालभाववर्तिनां योग्यं त्रिकालयोगाद्यनुष्ठानं स्थविरकल्पानां शिक्षादीक्षागणपोषणात्मसंस्कारसल्लेखनोत्तमार्थस्थानगतोत्कृष्टाराधनाविशेषं च वर्णयति । पुंडरीकं नामशास्त्रं भावनव्यंतरज्योतिष्ककल्पवासिविमानेषु उत्पत्तिकारणदानपूजातपश्चरणाकामनिर्जरासम्यक्त्वसंयमादिविधानं तत्तदुपपादस्थानवैभवविशेषं च वर्णयति, महच्च तत् पुंडरीकं च तत् महापुंडरीकं तत् महर्धिकेषु इंद्रप्रतींद्रादिषु उत्पत्तिकारणतपोविशेषाद्याचरणं वर्णयति । निषेधनं—प्रमाददोषनिराकरणं निषिद्धिः संज्ञायां कप्रत्यये निषिद्धिका प्रायश्चित्तशास्त्रं तत् प्रमाददोषविशुद्ध्यर्थं बहुप्रकारं प्रायश्चित्तं वर्णयति । निसीतिकेति नामांतरं केषांचित्पाठे दृश्यते । इति एवं अंगबाह्यश्रुतचतुर्दशविधं ज्ञातव्यं । चशब्दाः समुच्चयार्थाः । अथ शास्त्रकारः श्रुतज्ञानस्य माहात्म्यं प्ररूपयति ॥ ३६७।३६८ ॥

स० चं०—बहुरि प्रकीर्णक नामा अंगबाह्य द्रव्यश्रुत सो चौदह प्रकार है। सामायिक १ चतुर्विंशतिस्तव २ वंदना ३ प्रतिक्रमण ४ वैनयिक ५ कृतिकर्म ६ दशवैकालिक ७ उत्तराध्ययन ८ कल्प्यव्यवहार ९ कल्प्याकल्प्य १० महाकल्प्य ११ पुंडरीक १२ महापुंडरीक १३ निषिद्धिका १४। तहां सं कहिए एकत्वपनैकरि आय कहिए आगमन पर द्रव्यनितैं निवृति होइ उपयोगकी आत्माविषैं प्रवृत्ति 'यहु मैं ज्ञाता द्रष्टा हौं' ऐसैं आत्माविषैं उपयोग सो सा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मायिक कहिए जातैं एकही आत्मा सो जाननें योग्य है तातैं ज्ञेय हैं अर जानने हारा है तातैं ज्ञायक है तातैं आपकौं ज्ञाता द्रष्टा अनुभवै है अथवा सम कहिए राग द्वेषरहित मध्यस्थ आत्मा तिस विषै आयः कहिए उपयोगकी प्रवृत्ति सो समाय कहिए, समाय है प्रयोजन जाका सो सामायिक कहिए। नित्य नैमित्तिक क्रिया विशेष तिस सामायिकका प्रतिपादक शास्त्र सो भी सामायिक कहिए सो नाम स्थापना द्रव्य क्षेत्र काल भाव भेद करि सामायिक छह प्रकार है। तहां इष्ट अनिष्ट नामविषैं राग द्वेष न करना। अथवा किसी वस्तुका सामायिक ऐसा नाम धरना सो नाम सामायिक है। बहुरि मनोहर वा अमनोहर स्त्री पुरुषादिकका आकार लीए काठ लेप चित्रामादि रूप स्थापना तिन विषैं राग द्वेष न करना। अथवा किसी वस्तुविषैं यहु सामायिक है ऐसा स्थापना करि स्थाप्यो हूवा वस्तु सो स्थापनासामायिक है। बहुरि इष्ट अनिष्ट चेतन अचेतन द्रव्यविषै राग द्वेष न करना अथवा जो सामायिक शास्त्रकौं जानै हैं अर वाका उपयोग सामायिकविषैं नाही सो जीव वा उस सामायिक शास्त्रके जाननेवालेका शरीरादिक सो द्रव्य सामायिक है। बहुरि ग्राम नगर वनादिक इष्ट अनिष्ट क्षेत्र तिन विषैं राग द्वेष न करना सो क्षेत्र सामायिक है। बहुरि वसंत आदि ऋतु अर शुक्लपक्ष कृष्ण पक्ष दिन वार नक्षत्र इत्यादि इष्ट अनिष्ट कालके विशेष तिनिविषैं राग द्वेष न करना सो काल सामायिक है। बहुरि भाव जो जीवादिक तत्त्वविषैं उपयोगरूप पर्याय ताके मिथ्यात्वकषायरूप संक्लेशपनाकी निवृत्ति अथवा सामायिक शास्त्रकौं जानै है अर उसही विषैं उपयोग जाका है सो जीव अथवा सामायिक पर्यायरूप परिणमन सो भावसामायिक है। ऐसैं सामायिक नामा प्रकीर्णक कह्या है। बहुरि जिसकाल विषैं जिनका प्रवर्तन होइ तिसकालविषैं तिनही चौवीस तीर्थंकरनिका नाम स्थापना द्रव्य भावका आश्रय करि पंच कल्याणक चौंतीस अतिशय आठ प्रातिहार्य परम औदारिक दिव्य शरीर समवसरणसभा धर्मोपदेश देना इत्यादि तीर्थंकरपने की महिमाका स्तवन सो चतुर्विंशति स्तव कहिए। ताका प्रतिपादक शास्त्र सो चतुर्विंशतिस्तव नामा प्रकीर्णक है। बहुरि एक तीर्थंकरका अवलंबनकरि प्रतिमा चैत्यालय इत्यादिककी स्तुति सो वंदना कहिए

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

याका प्रतिपादक शास्त्र सो वंदना प्रकीर्णक कहिए। बहुरि प्रतिक्रम्यते कहिए प्रमादकरि कीया है दैवसिक आदि दोष तिनिका निराकरण जाकरि कीजिए सो प्रतिक्रमण प्रकीर्णक कहिए। सो प्रतिक्रमण प्रकीर्णक सात प्रकार है–दैवसिक १ रात्रिक २ पाक्षिक ३ चातुर्मासिक ४ सांवत्सरिक ५ ऐर्यापथिक ६ उत्तमार्थ ७ तहां संध्यासमय दिनविषैं कीया दोष जाकरि निवारिए सो दैवसिक है। बहुरि प्रभातसमय रात्रिविषैं कीया दोष जाकरि निवारिए सो रात्रिक है। बहुरि पंद्रह्वे दिन पक्षविषैं कीया दोष जाकरि निवारिए सो पाक्षिक कहिए। बहुरि चौथे महीने च्यारिमासविषैं कीए दोष जाकरि निवारिए सो चातुर्मासिक कहिए। बहुरि वर्षवैं दिन एकवर्षविषै कीए दोष जाकरि निवारिए सो सांवत्सरिक कहिए। वहुरि गमन करतैं निपज्या दोष जाकरि निवारिए सो ऐर्यापथिक कहिए। वहुरि सर्वपर्याय संबंधी दोष जाकरि निवारिए सो उत्तमार्थ है ऐसैं सातप्रकार प्रतिक्रमण जानना। सो भरतादि क्षेत्र अर दुःषमादिकाल छह संहनन करि संयुक्त स्थिर वा अस्थिर पुरुषनिके भेद तिनकी अपेक्षा प्रतिक्रमणका प्रतिपादक शास्त्र सो प्रतिक्रमण नामा प्रकीर्णक कहिए। वहुरि विनय है प्रयोजन जाका सो वैनायिक नामा प्रकीर्णक कहिए। इसविषैं ज्ञान दर्शन चारित्र तप उपचार संबंधी पंच प्रकार विनयके विधानका प्ररूपण है। वहुरि कृति कहिये क्रिया ताका कर्म कहिए विधान इसविषैं प्ररूपिए है सो कृतिकर्म नामा प्रकीर्णक कहिए इसविषैं अर्हंत सिद्ध आचार्य उपाध्याय साधु आदि नव देवतानिकी वंदनाके निमित्त आप आधीन होना सो आत्माधीनता अर गिरद भ्रमणरूप तीन प्रदक्षिणा अर पृथ्वीतैं अंग लगाइ दोय नमस्कार अर शिर नवाइ च्यारि नमस्कार अर हाथ जोड़ि फेरनरूप वारह आवर्त इत्यादि नित्य नैमित्तिक क्रियाका विधान निरूपिए है। वहुरि विशेष रूप जे काल ते विकाल कहिए तिनिकौं होतैं जो होय सो वैकालिक सो दश वैकालिक इसविषैं प्ररूपिए है ऐसा दशवैकालिक नामा प्रकीर्णक है। इसविषैं मुनिका आचार अर आहारकी शुद्धता अर लक्षण प्ररूपिए है। बहुरि उत्तर जिसविषैं अधीयंते कहिए पढिए सो उत्तराध्ययन नामा प्रकीर्णक है इसविषैं च्यारि प्रकार उपसर्ग वाईस परिषह इनिके सहनेका विधान वा तिनिका फल अर इस प्रश्नका यहु उत्तर ऐसैं उत्तर

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विधान प्ररूपिए है । वहुरि कल्प्य कहिए योग्य आचरण सो व्यवह्रियते अस्मिन कहिए प्रवृत्तिरूप कीजिए जाविषैं ऐसा कल्प्यव्यवहार नामा प्रकीर्णक है इसविषैं मुनीश्वरनिके योग्य आचरणनिका विधान अर अयोग्यका सेवन होतैं प्रायश्चित्त प्ररूपिए है। वहुरि कल्प्य कहिए योग्य अर अकल्प्य कहिए अयोग्य प्ररूपिए हैं जाविषैं ऐसा कल्प्याकल्प्य नामा प्रकीर्णक है इसविषै द्रव्य क्षेत्र काल भाव अपेक्षा साधुनिकौं यहु योग्य है यहु अयोग्य है ऐसा भेद प्ररूपिए है। वहुरि महतां कहिए महान पुरुषनिकैं कल्प्य कहिए योग्य ऐसा आचरण जाविषैं प्ररूपिए है सो महाकल्प्य नामा प्रकीर्णक है । इसविषैं जिनकल्पी महामुनिनिके उत्कृष्ट संहनन योग्य द्रव्य क्षेत्र कालभाव विषैं प्रवर्तैं तिनकैं प्रतिमायोग वा आतापनयोग अभ्रावकाश वृक्षतल रूप त्रिकाल योग इत्यादि आचरण प्ररूपिए है अर स्थविरकल्पीनिकी दीक्षा शिक्षा संघका पोषण यथायोग्य शरीरका समाधान सो आत्मसंस्कार सल्लेखना उत्तम अर्थ स्थानकौं प्राप्त उत्तम आराधना इनिका विशेष प्ररूपिए है वहुरि पुंडरीक नामा प्रकीर्णक भवनवासी व्यंतर ज्योतिषी कल्पवासी इनिविषैं उपजनेकौं कारण ऐसा दान पूजा तपश्चरण अकामनिर्जरा सम्यक्त्व संयम इत्यादि विधान प्ररूपिये है। वा तहां उपजनेतैं जो विभवादि पाइए सो प्ररूपिये है। वहुरि महान जो पुंडरीक सो महापुंडरीक नामा प्रकीर्णक है सो महर्धिक जे इंद्र प्रतींद्र अहमिंद्रादिक तिनविषैं उपजनेकौं कारण ऐसे विशेष तपश्चरणादि तिनिकौं प्ररूपै है । वहुरि निषेधनं कहिए प्रमादकरि कीया दोषका निराकरण सो निषिद्धि कहिए संज्ञाविषैं कप्रत्ययकरि निषिद्धिका नाम भया सो ऐसा निषिद्धिका नाम प्रकीर्णक प्रायश्चित्त शास्त्र है इसविषैं प्रमादतैं कीया दोषका विशुद्धताके निमित्त अनेक प्रकार प्रायश्चित्त प्ररूपिए हैं। याका निसतिका ऐसा भी नाम है । ऐसैं अंगवाह्य श्रुतज्ञान चौदह प्रकार कह्या याके अक्षरनिका प्रमाण पूर्वैं कह्या ही है। ३६७।३६८

आगैं श्रुतज्ञानका महिमा कहै हैं—

सुदकेवलं च णाणं दोण्णिवि सरिसाणि होंति वोहादो ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुदणाणं तु परोक्खं पच्चक्खं केवलं णाणं ॥ ३६९ ॥

श्रुतकेवलं च ज्ञानं द्वे अपि सदृशे भवतो बोधात् ।
श्रुतज्ञानं तु परोक्षं प्रत्यक्षं केवलं ज्ञानं ॥ ३६९ ॥

जी० प्र०—श्रुतज्ञानं केवलज्ञानं चेति द्वे ज्ञाने बोधात् समस्तवस्तुद्रव्यगुणपर्यायपरिज्ञानात् सदृशे समाने भवतः तु-पुनः अयं विशेषः स कः ? परमोत्कर्षपर्यंतं प्राप्तमपि श्रुतकेवलज्ञानं सकलपदार्थेषु परोक्षं अविशदं अस्पष्टं अमूर्तेषु अर्थपर्यायेषु अन्येषु सूक्ष्मांशेषु विशदत्वेन प्रवृत्त्यभावात् । मूर्तेष्वपि व्यंजनपर्यायेषु स्थूलांशेषु स्वविषयेषु अवधिज्ञानादिव साक्षात्कारणाभावाच्च। सकलावरणवीर्यांतरायनिरवशेषक्षयोत्पन्नं केवलज्ञानं प्रत्यक्षं समस्तत्वेन विशदं स्पष्टं भवति । मूर्तामूर्तार्थव्यंजनपर्यायस्थूलसूक्ष्मांशेषु सर्वेष्वपि प्रवृत्तिसंभवात् साक्षात्कारणाच्च । अक्षं आत्मानमेव प्रतिनियतं परानपेक्षं प्रत्यक्षं, उपात्तानुपात्तपरप्रत्ययापेक्षं परोक्षमिति निरुक्तिसिद्धलक्षणभेदात्तयोः श्रुतज्ञानयोः सादृश्याभावात् । तथा चोक्तं समंतभद्रस्वामिभिः—

स्याद्वादकेवलज्ञाने सर्वतत्त्वप्रकाशने । भेदः साक्षादसाक्षाच्च ह्यवस्त्वन्यतमं भवेत् ॥

॥ ३६९ ॥ अथ शास्त्रकारः पंचषष्टिगाथासूत्रैः अवधिज्ञानप्ररूपणामुपक्रमते—

मं० प्र०—श्रुतज्ञानं केवलज्ञानं चेति द्वे ज्ञाने अपि बोधात् समस्तवस्तुद्रव्यगुणपर्यायपरिज्ञानात् सदृशे–समाने भवतः । तु–पुनः, अयं विशेषोऽस्ति स–यथा–परमोत्कर्षपर्यंतमाप्तमपि श्रुतज्ञानं–श्रुतकेवलज्ञानं, सकलपदार्थेषु परोक्षं–अविशदमस्पष्टं अमूर्तेषु–अर्थपर्यायेषु अन्येषु च सूक्ष्मांशेषु वैशद्येन प्रवृत्त्यभावात्, मूर्तेषु व्यंजनपर्यायेषु स्थूलांशेषु च स्वविषयेषु अवधिज्ञानादिवत्साक्षात्करणाभावाच्च सकलावरणवीर्यांतरायनिरवशेषक्षयोत्पन्नं केवलज्ञानं प्रत्यक्षं सामस्त्येन विशदं–स्पष्टं मूर्तामूर्तार्थव्यंजनपर्यायस्थूलसूक्ष्मांशेषु सर्वेष्वपि प्रवृत्तिसंभवात् साक्षात्करणाच्च । अक्षं–आत्मानमेव प्रतिनियतं परानपेक्षं प्रत्यक्षं । उपात्तानुपात्तपरप्रत्ययापेक्षं परोक्षमिति निरुक्तिसिद्धलक्षणभेदात्तयोः श्रुतज्ञानकेवलज्ञानयोः सादृश्याभावश्च । तथा चोक्तं समंतभद्रस्वामिभिः—

स्याद्वादकेवलज्ञाने सर्वतत्त्वप्रकाशने । भेदः साक्षादसाक्षाच्च ह्यवस्त्वन्यतमं भवेत् । इति ।

३६९ ॥ अथ शास्त्रकारः पंचषष्टिगाथाभिरवधिज्ञानप्ररूपणां प्रक्रमते ॥ ३६५ ॥

स॰चं॰श्रुतज्ञान अर केवल ज्ञान दोऊ समस्त वस्तुनिके द्रव्यगुण पर्याय जाननेकी अपेक्षा समान हैं। इतना विशेष श्रुतज्ञान परोक्ष है केवल ज्ञान प्रत्यक्ष है । भावार्थ–जैसें केवल ज्ञानका अपरिमित विषय है तैसें श्रुतज्ञानका अपरिमित विषय है । शास्त्रतैं सबैंनिका जाननेकी शक्ति है परि श्रुतज्ञान सर्वोत्कृष्ट होइ तौभी सर्व पदार्थनिविषैं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परोक्ष कहिए अविशद अस्पष्ट ही है जातैं अमूर्तिक पदार्थनिविषैं वा सूक्ष्म अर्थपर्यायनिविषैं वा अन्य सूक्ष्म अंशनिविषैं विशदता करि प्रवृत्ति श्रुतज्ञानकी न हो है। वहुरि जे मूर्तिक व्यंजन पर्याय वा अन्य स्थूल अंश इस ज्ञानके विषय हैं तिनिविषैं भी अवधि ज्ञानादिकी नाईं प्रत्यक्ष रूप न प्रवर्तैं है। तातैं श्रुतज्ञान परोक्ष है। वहुरि केवल ज्ञान प्रत्यक्ष कहिए विशद अर स्पष्टरूप मूर्तीक अमूर्तीक पदार्थ स्थूल सूक्ष्म पर्याय तिनिविषै प्रवर्तै है जातैं समस्त आवरण अर वीर्यांतरायके क्षयतैं प्रकट हो है तातैं प्रत्यक्ष है। अक्ष कहिए आत्मा तिहि प्रति निश्चत होइ कोई पर द्रव्यकी अपेक्षा न चाहे सो प्रत्यक्ष कहिए। प्रत्यक्षका लक्षण विशद वा स्पष्ट है। जहां अपने विषयके जाननेमें कसर न होइ ताकौं विशद वा स्पष्ट कहिए। वहुरि उपात्त वा अनुपात्तरूप पर द्रव्यकी सापेक्षाकौं लीए जो होइ सो परोक्ष कहिए। याका लक्षण अविशद अस्पष्ट जानना। मन नेत्र अनुपात्त है अन्य चारि इंद्री उपात्त हैं। ऐसैं श्रुतज्ञान केवल ज्ञान विषैं प्रत्यक्ष परोक्ष लक्षण भेदतैं भेद है। वहुरि विषय अपेक्षा समानता है। सोई समंतभद्राचार्य देवागम स्तोत्र विषैं कह्या है—

स्याद्वादकेवलज्ञाने सर्वतत्त्वप्रकाशके।
भेदः साक्षादसाक्षाच्च ह्यवस्त्वन्यतमं भवेत्॥

याका अर्थ—स्याद्वाद तौ श्रुतज्ञान अर केवल ज्ञान ए दोऊ सर्व तत्त्वके प्रकाशी हैं परंतु प्रत्यक्ष परोक्ष भेदतैं भेद पाइए है इनि दोऊ प्रमाणनिविषैं अन्यतम जो एक सो अवस्तु है एकका अभाव मानैं दोऊनिका अभाव-विनाश जानना॥ ३६९॥ आगैं शास्त्रकर्ता पैसठि गाथानिकरि अवधिज्ञानकौं प्ररूपै हैं—

अवहीयदित्ति ओही सीमाणाणेत्ति वण्णियं समये।
भवगुणपच्चयविहियं जमोहिणाणोत्ति णं बेंति॥ ३७०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अवधीयत इत्यवधिः सीमाज्ञानमिति वर्णितं समये ।
भवगुणप्रत्ययविधिकं यदवधिज्ञानमिति ब्रुवंति ॥ ३७० ॥

जी० प्र०—अवधीयते-द्रव्यक्षेत्रकालभावैः परिमीयते इत्यवधिर्मतिश्रुतकेवलवद्द्रव्यादिभिरपरिमितविषयत्वाभावात् । यत्तृतीयं सीमाविषयं ज्ञानं समये परमागमे वर्णितं कथितं तदिदमवधिज्ञानमित्यर्हदादयो ब्रुवंति । तत्कतिविधं भवगुणप्रत्ययविहितं—भवः नरकादिपर्यायः, गुणः-सम्यग्दर्शनविशुद्ध्यादिः, भवगुणौ प्रत्ययौ कारणे ताभ्यां विहितमुक्तं भवगुणप्रत्ययविहितं भवप्रत्ययत्वेन गुणप्रत्ययत्वेन अवधिज्ञानं द्विविधं कथितमित्यर्थः ।

मं० प्र०—अवधीयंते—द्रव्यक्षेत्रकालभावैः परिमीयते इत्यवधिः इति मतिश्रुतकेवलज्ञानवत् द्रव्यादिभिरपरिमितविषयत्वाभावात् यत्तृतीयं सीमाविषयं ज्ञानं, समये—परमागमे, वर्णितं—प्ररूपितं तदिदमवधिज्ञानमित्यर्हदादयो ब्रुवंति । तत् कतिविधं ? भवगुणप्रत्ययविधिकं । भवः—नारकादिपर्यायः, गुणःसम्यग्दर्शनविशुद्ध्यादिः । भवगुणौ प्रत्ययौ—कारणे ययोस्तौ भवगुणप्रत्ययौ तौ विधी—प्रकारौ—भेदौ यस्य तद्भवगुणप्रत्ययविधिकं भवप्रत्ययं गुणप्रत्ययं चेति द्विविधमवधिज्ञानमित्यर्थः ॥ ३७० ॥

स०चं०अवधीयते कहिए द्रव्य क्षेत्र काल भाव करि परिमाण जाका कीजिए सो अवधिज्ञान जानना । जैसे मति श्रुत केवल ज्ञानका विषय द्रव्य क्षेत्रादि करि अपरिमित है । तैसैं अवधि ज्ञानका विषय अपरमित नाहीं । श्रुतज्ञान करि भी शास्त्रके वलतैं अलोक वा अनंतकाल आदि जानैं । अवधिज्ञान करि जेता द्रव्य क्षेत्र काल भाव प्रमाण आगैं कहैंगे तितना ही प्रत्यक्ष जानै । तातैं सीमा जो द्रव्य क्षेत्रादिकी मर्यादा ताकौं लीए है विषय जाका ऐसा जो ज्ञान सो अवधिज्ञान है ऐसैं सर्वज्ञदेव सिद्धांतविषैं कहे हैं । सो अवधिज्ञान दोय प्रकार कह्या है येक भव प्रत्यय १ एक गुणप्रत्यय १ तहां भव जो नारकादिक पर्याय ताके निमित्ततैं होइ सो भव प्रत्यय कहिये जो नारकादि पर्याय धारै ताके अवधि ज्ञान होइ ही होइ तातैं इस अवधिज्ञानको भव प्रत्यय कहिए । वहुरि गुण कहिए सम्यग्दर्शनादि रूप सो है निमित्त जाका सो गुण प्रत्यय कहिये । मनुष्य तिर्यंच सर्वहीकैं अवधि ज्ञान नाहीं जाकैं सम्यग्दर्शनादिककी विशुद्धता होइ ताकैं अवधिज्ञान होइ तातैं इस अवधि ज्ञानकौं गुण प्रत्यय कहिये ॥ ३७० ॥

भवपच्चइगो सुरणिरयाणं तित्थेवि सव्वअंगुत्थो ।

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गुणपच्चइगो णरतिरियाणं संखादिचिह्णभवो ॥ ३७१ ॥

भवप्रत्ययकं सुरनारकाणां तीर्थेऽपि सर्वांगोत्थं ।
गुणप्रत्ययकं नरतिरश्चां शंखादिचिह्नभवं ॥ ३७१ ॥

जी० प्र०—तत्र भवप्रत्ययावधिज्ञानं सुराणां नारकाणां चरमभवतीर्थकराणां च संभवति । तच्च तेषां सर्वांगोत्थं भवति । सर्वात्मप्रदेशस्थावधिज्ञानावरणवीर्यांतरायकर्मद्वयक्षयोपशमोत्थं भवतीत्यर्थः । गुणप्रत्ययं अवधिज्ञानं नराणां पर्याप्तमनुष्याणां तिरश्चां च संज्ञिपंचेंद्रियपर्याप्ततिरश्चां संभवति । तच्च तेषां शंखादिचिह्नभवं भवति, नाभेरुपरि शंखपद्मवज्रस्वस्तिकझषकलशादिशुभचिह्नलक्षितात्मप्रदेशस्थावधिज्ञानावरणवीर्यांतरायकर्मद्वयक्षयोपशमोत्पन्नमित्यर्थः । भवप्रत्यये अवधिज्ञाने दर्शनविशुद्ध्यादिगुणसद्भावेऽपि तदनपेक्षयैव भवप्रत्ययत्वं ज्ञातव्यं । गुणप्रत्ययेऽवधिज्ञाने तिर्यग्मनुष्यसद्भावेऽपि तदनपेक्षयैव गुणप्रत्ययत्वं ज्ञातव्यं ॥ ३७१ ॥

मं० प्र०—तत्र भवप्रत्ययं अवधिज्ञानं सुराणां नारकाणां चरमभवतीर्थकरस्यापि संभवति तच्च सर्वांगोत्थं सर्वात्मप्रदेशस्थावधिज्ञानावरणवीर्यांतरायक्षयोपशमोत्पन्नमित्यर्थः । गुणप्रत्ययमवधिज्ञानं नराणां पर्याप्तमनुष्याणां तिरश्चां च संज्ञिपंचेंद्रियपर्याप्तानां संभवति तच्च शंखादिचिह्नभवं नाभेरुपरिशंखपद्मवज्रस्वस्तिकझषकलशादिशुभचिह्नलक्षितात्मप्रदेशस्थावधिज्ञानावरणवीर्यांतरायक्षयोपशमोत्पन्नमित्यर्थः । भवप्रत्यये दर्शनविशुद्ध्यादिगुणसद्भावेऽपि तदनपेक्षत्वाद्भवप्रत्ययत्वं । गुणप्रत्यये तिर्यग्मनुष्यभवसद्भावेऽपि तदनपेक्षत्वाद् गुणप्रत्ययत्वं ॥ ३७१ ॥

स०चं०—तहां भव प्रत्यय अवधि ज्ञान देवनिकै नारकीनिकैं अर चरम शरीरी तीर्थंकर देवनिकैं पाइये है सो यहु भव प्रत्यय अवधिज्ञान 'सर्वांगोत्थं' कहिये सर्व आत्माके प्रदेशनिविषै तिष्ठता अवधि ज्ञानावरण अर वीर्यांतराय कर्म ताके क्षयोपशमतैं उत्पन्न हो है बहुरि गुणप्रत्यय अवधिज्ञान है सो पर्याप्त मनुष्य अर सैनी पंचेंद्री पर्याप्त तिर्यंच इनिके संभवै है । सो यहु गुण प्रत्यय अवधिज्ञान 'शंखादिचिन्हभव' कहिये नाभिके ऊपरि शंख कमल वज्र सांथिया माछला कलस इत्यादिकका आकार रूप जहां शरीरविषैं भले लक्षण होंइ तहां संबंधी जे आत्माक प्रदेश तिनिविषैं तिष्टता जो अवधि ज्ञानावरण कर्म अर वीर्यांतराय कर्म तिनिके क्षयोपशमतैं उत्पन्न हो है भव प्रत्यय अवधिज्ञान विषै भी सम्यग्दर्शनादि गुणका सद्भाव है तथापि उन गुणोंकी अपेक्षा नाही करनेतैं भव प्रत्यय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कह्या अर गुण प्रत्ययविषै मनुष्य तिर्यंचका सद्भाव है तथापि उन पर्यायनिकी अपेक्षा नाहीं करनेतैं गुण प्रत्यय कह्या है ॥ ३७१ ॥

गुणपच्चइगो छद्धा अणुगावट्ठिदपवड्ढमाणिदरा ।
देसोही परमोही सव्वोहित्ति य तिधा ओही ॥ ३७२ ॥

गुणप्रत्ययकः षोढा अनुगावस्थितप्रवर्धमानेतरे ।
देशावधिः परमावधिः सर्वावधिरिति च त्रिधा अवधिः ॥ ३७२ ॥

जी० प्र०—यद्गुणप्रत्ययावधिज्ञानं तदनुगाम्यननुगाम्यवस्थितमनवस्थितं प्रवर्धमानं हीयमानं चेति षड्विधं । तत्र यदवधिज्ञानं स्वस्वामिनं जीवमनुगच्छति तदनुगामि तच्च क्षेत्रानुगामि भवानुगामि उभयानुगामीति त्रिविधं। यत् स्वोत्पत्तिक्षेत्रात् अन्यक्षेत्रे विहरंतं जीवमनुगच्छति भवांतरं नानुगच्छति तत्क्षेत्रानुगामि भवति। यत् उत्पत्तिभवादन्यभवे स्वस्वामिनं अनुगच्छति तद्भवानुगामि भवति। यत्स्वोत्पत्तिक्षेत्रभवाभ्यां अन्यत्रभरतैरावतविदेहादिक्षेत्रे देवमनुष्यादिभवे च वर्तमानं जीवमनुगच्छति तदुभयानुगामि भवति। यदवधिज्ञानं स्वस्वामिनं जीवं नानुगच्छति तदननुगामि। तदपि क्षेत्राननुगामि भवाननुगामि उभयाननुगामीति त्रिविधं। तत्र यत्क्षेत्रांतरं न गच्छति स्वोत्पत्तिक्षेत्रे एव विनश्यति भवांतरं गच्छतु वा मा गच्छतु तत् क्षेत्राननुगामि। यद्भवांतरं नानुगच्छति स्वोत्पत्तिभव एव विनश्यति, क्षेत्रांतरं गच्छतु वा मा वा गच्छतु तद्भवाननुगामि। यत् क्षेत्रांतरं भवांतरं च नानुगच्छति स्वोत्पन्नक्षेत्रभवयोरेव विनश्यति तत् क्षेत्रभवाननुगामि। यद्धानिवृद्धिभ्यां विना सूर्यमंडलवत् एकप्रकारमेव तिष्ठति तदवस्थितं। यत् कदाचिद्वर्धते कदाचिद्धीयते कदाचिदवतिष्ठते च तदनवस्थितं। यत् शुक्लपक्षस्य चंद्रमंडलवत् स्वोत्कृष्टपर्यंतं वर्धते तद्वर्धमानं। यत् कृष्णपक्षचंद्रमंडलवत् स्वक्षयपर्यंतं हीयते तद्धीयमानं देशावधिज्ञानं भवति। तथा सामान्येन अवधिज्ञानं देशावधिः परमावधिः सर्वावधिश्च इति त्रिधा त्रिप्रकारं भवति। एवं गुणप्रत्ययो देशावधिः षोढा न परमावधिसर्वावधी इत्यर्थः ॥ ३७२ ॥

मं० प्र०—यद्गुणप्रत्ययावधिज्ञानं तत् षोढा। अनुगामि अवस्थितं प्रवर्धमानमिति त्रीणि, इतराणि च अननुगामि अनवस्थितं हीयमानमिति त्रीणि। एवं षट्प्रकारं गुणप्रत्ययमवधिज्ञानं भवति। तद्यथा-यदवधिज्ञानं स्वस्वामिनं जीवमनुगच्छति तदनुगामि तच्च क्षेत्रानुगामि भवानुगामि-उभयानुगामि त्रिविधं। तत्र स्वोत्पन्नक्षेत्रादन्यस्मिन् क्षेत्रे विहरंतं जीवमनुगच्छति भवांतरं नानुगच्छति तत्क्षेत्रानुगामि। यत्स्वोत्पन्नभवादन्यस्मिन्भवेऽपि वर्तमानं जीवमनुगच्छति तद्भवानुगामि। यत्स्वोत्पन्नक्षेत्रभवाभ्यामन्यस्मिन् भरतैरावतविदेहादिक्षेत्रे देवमनुष्यादिभवे च वर्तमानं जीवमनुगच्छति तदुभयानुगामि। यत्स्वस्वामिनं जीवं ना-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

नुगच्छति तदननुगामि । तदपि त्रिविधं, तत्र यक्षेत्रांतरं न गच्छति स्वोत्पन्नक्षेत्रे एव विनश्यति भवांतरं गच्छतु मा वा तत्क्षेत्राननुगामि । यद्भवांतरं न गच्छति स्वोत्पन्नभवे एव विनश्यति क्षेत्रांतरं गच्छतु मा वा तत् भवाननुगामि । यत् क्षेत्रांतरं भवांतरं च न गच्छति स्वोत्पन्नक्षेत्रभवयोरेव विनश्यति तदुभयाननुगामि । यत् हानिवृद्धिभ्यां विना सूर्यमंडलवदेकप्रकारमेव अवतिष्ठते तदवस्थितं । यत् कदाचिद्वर्धते कदाचित् हीयते कदाचिदवतिष्ठते च तदनवस्थितं । यत् शुक्लपक्षचंद्रमंडलमिव स्वोत्कृष्टपर्यंतं वर्धते तद्वर्धमानं । यत्कृष्णपक्षचंद्रमंडलमिव स्वक्षयपर्यंतं हीयते तत् हीयमानं । पुनः सामान्येन अवधिज्ञानं देशावधिः सर्वावधिः परमावधिश्चेति त्रिप्रकारं भवति ॥ ३७२ ॥

स०चं०–जो गुण प्रत्यय अवधिज्ञान है सो छह प्रकार है अनुगामी १ अवस्थित २ वर्धमान ३ अर इतर कहिए अनुगामी ४ अनवस्थित ५ हीयमान ६ ऐसैं छह प्रकार है तहां जो अवधिज्ञान अपने स्वामी जीवके साथि ही गमन करै ताकौं अनुगामी कहिए ताके तीन भेद–क्षेत्रानुगामी १ भवानुगामी २ उभयानुगामी ३ तहां जो अवधिज्ञान जिस क्षेत्रविषैं उपज्या था तिस क्षेत्रको छोड़ि जीव और क्षेत्रविषै बिहार किया तहां भी वह अवधिज्ञान साथि ही रह्या विनष्ट न हुवा और पर्याय धरि विनष्ट होइ सो क्षेत्रानुगामी कहिए । वहुरि जो अवधिज्ञान जिस पर्याय विषैं उपज्या था तिस पर्यायकौं छोड़ि जीव और पर्यायकौं धर्‌या तहां भी वह अवधि ज्ञान साथि ही रह्या सो भवानुगामी कहिए । वहुरि जो अवधि ज्ञान जिस क्षेत्र वा पर्यायविषै उपज्या था तातैं जीव अन्य भरतादि क्षेत्रविषै गमन कीया वा अन्य देवादि पर्याय धर्‌या तहां साथि ही रहै सो उभयानुगामी कहिए । वहुरि जो अवधि ज्ञान अपने स्वामी जीवकी साथि गमन न करै सो अननुगामी कहिए याके तीन भेद क्षेत्राननुगामी १ भवाननुगामी २ उभयाननुगामी ३ तहां जो अवधिज्ञान तिस क्षेत्रविषै उपज्या होइ तिस क्षेत्रविषै तौ जीव और पर्याय धरौ वा मति धरौ वह अवधिज्ञान साथि ही रहै है अर उस क्षेत्रतैं जीव और कोई भरत ऐरावत विदेहादि क्षेत्रनिविषैं गमन करै तो वह ज्ञान अपने उपजनेका क्षेत्र ही विषै विनष्ट होइ सो क्षेत्राननुगामी कहिए । वहुरि जो अवधिज्ञान जिस पर्यायविषैं उपज्या होइ तिस पर्यायविषै तौ जीव और क्षेत्रविषै तौ गमन करौ वा मतिकरौ वह अवधिज्ञान साथि रहै अर उस पर्यायतैं अन्य कोई देव मनुष्य आदि पर्याय धरै तौ अपने उपजनेका पर्यायविषैं विनष्ट होइ सो भवाननुगामी कहिए । वहुरि जो अवधिज्ञान और क्षेत्रविषैं वा और पर्यायविषै

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जीवकौं प्राप्त होते साथि न रहै अपने उपजनेका क्षेत्र वा पर्यायविषैं ही विनष्ट होइ सो उभयाननुगामी कहिए । वहुरि जो अवधिज्ञान सूर्यमंडलकी ज्यों घटै वधै नाही एक प्रकारही रहै सो अवस्थित कहिए । वहुरि जो अवधिज्ञान कदाचित् वधै कदाचित् घटै कदाचित् अवस्थित रहै सो अनवस्थित कहिए । वहुरि जो अवधिज्ञान शुक्ल पक्षके चंद्रमंडलकी ज्यों बंधता बंधता अपने उत्कृष्ट पर्यंत बधै सो वर्धमान कहिए । वहुरि जो अवधिज्ञान कृष्ण पक्षके चंद्रमंडलकी ज्यौं घटता घटता अपने नाश पर्यंत घटै सो हीयमान कहिए ऐसैं गुण प्रत्यय अवधिज्ञानके छह भेद कहे । वहुरि तैसैं ही सामान्यपनैं अवधिज्ञान तीन प्रकार है देशावधि १ परमावधि २ सर्वावधि ३ ए तीन भेद हैं तहां गुणप्रत्यय देशावधि ही छह प्रकार जानना ॥ ३७२ ॥

भवपच्चइगो ओही देसोही होदि परमसव्वोही ।
गुणपच्चइगो णियमा देसोही वि य गुणे होदि ॥ ३७३ ॥

भवप्रत्ययकोवधिः देशावधिः भवति परमसर्वावधिः ।
गुणप्रत्ययको नियमात् देशावधिरपि च गुणे भवति ॥ ३७३ ॥

जी० प्र०--यः पूर्वोक्तो भवप्रत्ययोऽवधिः स नियमात्--अवश्यंभावात् देशावधिरेव भवति देवनारकयोर्गृहस्थतीर्थकरस्य च परमावधिसर्वावध्योरसंभवात् । परमावधिः सर्वावधिश्च द्वावपि नियमेन गुणप्रत्ययावेव भवतः । संयमलक्षणगुणाभावे तयोरभावात् । देशावधिरपि गुणे दर्शनविशुद्ध्यादिलक्षणे सति भवति । एवं गुणप्रत्ययाख्रयोऽप्यवधयः संभवंति । भवप्रत्ययस्तु देशावधिरेवेति निश्चितं जातं ॥ ३७३ ॥

मं०प्र०--यः पूर्वोक्तो भवप्रत्ययोऽवधिः स नियमात्--अवश्यंभावाद्देशावधिरेव देवनारकाणां गृहस्थतीर्थकरस्यापि परमसर्वावध्योरसंभवात् । परमावधिः सर्वावधिश्च नियमाद् गुणप्रत्ययावेव संयमविशेषलक्षणगुणाभावे तयोरभावात् । गुणे--दर्शनविशुद्ध्यादिलक्षणे सति देशावधिश्च । एवं गुणप्रत्ययास्त्रयोप्यवधयः संभवंति, भवप्रत्ययस्तु देशावधिरेवेति सुनिश्चितं ॥ ३७३ ॥

स०चं०--भव प्रत्यय अवधि तौ देशावधि ही है जातैं देव नारकी ग्रहस्थ तीर्थंकर इनके परमावधि सर्वावधि होइ नाहीं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वहुरि परमावधि अर सर्वावधि निश्चयसौं गुणप्रत्ययही हैं जातैं संयमरूप विशेष गुण विना न होंइ । वहुरि देशावधि भी सम्यग्दर्शनादि गुण होत संतैं हो है तातैं गुणप्रत्यय अवधि तौ तीन प्रकार हो है अर भवप्रत्ययअवधि एक देशावधि ही है ॥ ३७४ ॥

देसावहिस्स य अवरं णरतिरिये होदि संजदह्मि वरं ।
परमोही सव्वोही चरमसरीरस्स विरदस्स ॥ ३७४ ॥

देशावधेश्च अवरं नरतिरश्चि भवति संयते वरम् ।
परमावधिः सर्वावधिः चरमशरीरस्य विरतस्य ॥ ३७४ ॥

जी० प्र०—देशावधेर्ज्ञानस्य जघन्यं नरतिरश्चोरेव संयतासंयतयोः भवति, न देवनारकयोः । देशावधेः सर्वोत्कृष्टं तु नियमेन मनुष्यगतिसकलसंयते एव भवति नेतरगतित्रये तत्र महाव्रताभावात् । परमावधिसर्वावधी द्वावपि जघन्येनोत्कृष्टेन च मनुष्यगतावेव चरमांगस्य महाव्रतिन एव संभवतः । चरमं संसारांतवर्तितद्भवमोक्षकारणरत्नत्रयाराधकजीवसंबंधि शरीरं वज्रऋषभनाराचसंहननयुतं यस्यासौ चरमशरीरः ॥ ३७४ ॥

मं० प्र०—देशावधेर्जघन्यं नरे—मनुष्ये तिरश्चि च जीवे नियमात् संयते असंयते च भवति। न देवनारकयोः। देशावधेरुत्कृष्टं नियमात् संयते मनुष्यगतौ महाव्रतिन्येव, न इतरगतित्रये तत्र महाव्रतासंभवात् । परमावधिसर्वावधी जघन्यतः उत्कृष्टतश्च मनुष्यगतौ चरमशरीरस्य विरतस्य महाव्रतिन एव जीवस्य संभवतः । चरमं—संसारांतवर्तितद्भवमोक्षकारणरत्नत्रयाराधकजीवसंबंधिशरीरं वज्रवृषभनाराचसंहननयुक्तं यस्यासौ चरमशरीरः ॥ ३७४ ॥

स० चं०—देशावधिका जघन्यभेद संयमी वा असंयमी मनुष्य तिर्यंच विषैं ही हो है देव नारकी विषैं न हो है। वहुरि देशावधिका उत्कृष्टभेद संयमी महाव्रती मनुष्यविषैं ही हो है जातैं और तीन गतिविषैं महाव्रत संभवै नाहीं। वहुरि परमावधि अर सर्वावधि जघन्य उत्कृष्ट वा चरमशरीरी महाव्रती मनुष्यविषै संभवै है । चरम कहिए संसारका अंतविषै भया तिसही भवतैं मोक्ष होनेका कारण ऐसा वज्रवृषभ नाराच शरीर जिसका होइ सो चरम शरीरी कहिए ॥ ३७४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पडिवादी देसोही अप्पडिवादी हवंति सेसा ओ ।
मिच्छत्तं अविरमणं ण य पडिवज्जंति चरिमदुगे ॥३७५॥

प्रतिपाती देशावधिःअप्रतिपातिनौ भवतः शेषौ अहो ।
मिथ्यात्वमविरमणं न च प्रतिपद्यन्ते चरमद्विके ॥ ३७५ ॥

जी० प्र०—सम्यक्त्वचारित्राभ्यां प्रच्युत्य मिथ्यात्वासंयमयोः प्राप्तिः प्रतिपातः, तद्युतः प्रतिपाती स तु देशावधिरेव भवति । शेषौ परमावधि-सर्वावधी द्वावपि अप्रतिपातिनावेव भवतः, चरमद्विके—परमावधिसर्वावधिद्विके जीवाः नियमेन मिथ्यात्वं अविरमणं च न प्रतिपद्यंते ततः कारणात् तौ द्वावपि अप्रतिपातिनौ, देशावधिज्ञानं प्रतिपाति अप्रतिपाति च इति निश्चितं ॥ ३७५ ॥

मं० प्र०—प्रतिपातः—सम्यक्त्वचारित्राभ्यां प्रच्युत्य मिथ्यात्वासंयमयोः प्राप्तिः, तद्वानवधिः प्रतिपाती । स नियमाद्देशावधिरेव । शेषौ परमावधिसर्वावधी अप्रतिपातिनावेव भवतः । ओ इति प्राकृते संबोधनमव्ययं । यस्मात्कारणात् चरमद्विके—परमसर्वावधिद्विके, वर्तमाना जीवा नियमात् मिथ्यात्वं, अविरमणं च न प्रतिपद्यंते तस्मात्कारणात्तौ अप्रतिपातिनावेव, अनेन देशावधिः प्रतिपात्यप्रतिपाती च संभवतीति सुनिश्चितं ॥ ३७५ ॥

स० चं—देशावधि ही प्रतिपाती है शेष परमावधि सर्वावधि प्रतिपाती नाहीं । प्रतिपात कहिए सम्यक्त्व चारित्रसौं भ्रष्ट होइ मिथ्या असंयमकौं प्राप्त होना तीहि संयुक्त जो होइ सो प्रतिपाती कहिए । जो प्रतिपाती न होइ सो अप्रतिपाती कहिए । देशावधिवाला तौ कदाचित् सम्यक्त्व चारित्रसौं भ्रष्ट होइ मिथ्यात्व असंयमकौं प्राप्त हो है । अर चरमाद्विक कहिए अंतका परमावधि सर्वावधि दोय ज्ञानविषै वर्तमान जीव सो निश्चयसौं मिथ्यात्व अर अविरतिकौं प्राप्त न हो है । जातैं देशावधि तौ प्रतिपाती भी है अप्रतिपाती भी है, परमावधि सर्वावधि अप्रतिपाती ही है ॥ ३७५ ॥

दव्वं खेत्तं कालं भावं पडि रूवि जाणदे ओही ।
अवरादुक्कस्सोत्ति य वियप्परहिदो दु सव्वोही ॥३७६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्रव्यं क्षेत्रं कालं भावं प्रति रूपि जानीते अवधिः ।
अवरादुत्कृष्ट इति च विकल्परहितस्तु सर्वावधिः ॥ ३७६ ॥

जी० प्र०—अवरात् जघन्यविकल्पादारभ्य उत्कृष्टविकल्पपर्यंतं असंख्यातलोकमात्रविकल्पं अवधिज्ञानं द्रव्यं क्षेत्रं कालं भावं च प्रतीत्य—नियतसीमां कृत्वा रूपि पुद्गलद्रव्यं तत्संबंधि संसारिजीवद्रव्यं च जानीते प्रत्यक्षतया अवबुध्यते । तु—पुनः सर्वावधिज्ञानं जघन्यमध्यमोत्कृष्टविकल्परहितं अवस्थितं हानिवृद्धिरहितं परमोत्कर्षप्राप्तमित्यर्थः, अवधिज्ञानावरणक्षयोपशमसर्वोत्कृष्टस्य तत्रैव संभवात्, ततः कारणाद् देशावधिपरमावध्योर्जघन्यमध्यमोत्कृष्टविकल्पा संभवंतीति निश्चितं भवति ॥ ३७६ ॥

मं०प्र०—अवरात्—जघन्यविकल्पादारभ्य उत्कृष्टविकल्पपर्यंतमसंख्यातलोकमात्रविकल्पमवधिज्ञानं द्रव्यं क्षेत्रं कालं भावं च प्रति प्रतिनियतां सीमानं कृत्वा रूपि पुद्गलद्रव्यं तत्संबंधि संसारिजीवद्रव्यं च जानीते प्रत्यक्षमवबुध्यते । तु- पुनः सर्वावधिज्ञानं जघन्यमध्यमोत्कृष्टविकल्परहितं अवस्थितैकरूपं हानिवृद्धिभ्यां विना परमोत्कर्षप्राप्तं अवधिज्ञानावरणक्षयोपशमस्य सर्वोत्कृष्टस्य तत्रैव संभवात् । अनेन देशावधिपरमावध्योः जघन्यमध्यमोत्कृष्टविकल्पाः संतीति सुनिश्चितं ॥ ३७६ ॥

स०चं—अवधिज्ञान जघन्य भेदतैं लगाइ उत्कृष्ट भेदपर्यंत असंख्यात लोक प्रमाण भेद धरैं है सो सर्व द्रव्य क्षेत्र काल भाव प्रति मर्यादा लीए रूपी जो पुद्गल अर पुद्गल संबंधकौं धरै संसारी जीव तिनिकौं प्रत्यक्ष जानै है । बहुरि सर्वावधिज्ञान है सो जघन्य मध्यम उत्कृष्ट भेद रहित हानि वृद्धिरहित अवस्थित सर्वोत्कृष्टताकौं प्राप्त है जातैं अवधिज्ञानावरणका उत्कृष्ट क्षयोपशम तहां ही संभवै है तातैं देशावधि परमावधिके जघन्य मध्यम उत्कृष्ट भेद संभवै हैं ॥ ३७६ ॥

णोकम्मुरालसंचं मज्झिमजोगोज्जियं सविस्सचयं ।
लोयविभत्तं जाणदि अवरोही दव्वदो णियमा ॥३७७॥

नोकर्मौदारिकसंचयं मध्यमयोगार्जितं सविस्रसोपचयम् ।
लोकविभक्तं जानाति अवरावधिः द्रव्यतो नियमात् ॥ ३७७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जी० प्र०—देशावधिजघन्यज्ञानं द्रव्यतः मध्यमयोगार्जितं नोकर्मौदारिकसंचयं द्व्यर्धगुणहानिभमितसमयप्रबद्धसमूहरूपं स्वयोग्यविस्रसोपचयपरमाणुसंयुक्तं लोकेन विभक्तं नियमेन तावन्मात्रमेव जानाति—प्रत्यक्षतया अवबुध्यते न ततोल्पमित्यर्थः। जघन्ययोगार्जितस्य नोकर्मौदारिकसंचयस्य अल्पत्वं ततोऽस्य सूक्ष्मत्वसंभवात्। तद्ग्रहणे तज्ज्ञानस्य शक्त्यभावात्। उत्कृष्टयोगार्जितनोकर्मौदारिकसंचयस्य स्थूलत्वं भवति तद्ग्रहणे प्रतिषेधाभावात्।

१--

तेन नियमान्मध्यमयोगार्जितनोकर्मौदारिकसंचयो द्रव्यनियमः कथितः। स ३ १२—१६ खं ॥ ३७७ ॥

≡

म०प्र०—द्रव्यतः द्रव्यमाश्रित्य मध्यमयोगार्जितनोकर्मौदारिकसंचयं द्व्यर्धगुणहानिमात्रसमयप्रबद्धसमूहरूपं स्वयोग्यविस्रसोपचयपरमाणुसहितं लोकविभक्तं सर्वजघन्यदेशावधिज्ञानं, नियमात् एतावन्मात्रमेव जानाति नातोऽल्पमात्रमित्यर्थः। जघन्ययोगार्जितस्य समयप्रबद्धस्य अल्पत्वेन सूक्ष्मत्वात् तद्ग्रहणे तज्ज्ञानस्य शक्त्यभावात्। उत्कृष्टयोगार्जितस्य समयप्रबद्धस्य स्थूलस्य ग्रहणे, अप्रतिषेधाच्च, नियमेन मध्यमयोगार्जितस्यैव नोकर्मरूपौदारिकशरीरपरिणतियोग्यसंचयस्य औदारिकशरीरनामकर्मसंचयस्य अतिसूक्ष्मत्वात् तद्ग्रहणे तस्य नितरामशक्तेः। विस्रसोपचयरहितत्वे अल्पस्य ज्ञातुमशक्यत्वात् स हि तस्यैव घनलोकप्रदेशमात्राणि खंडानि कृत्वा तत्रैकखंडमतींद्रियं तादृशं पुद्गलद्रव्यस्कंधं सर्वजघन्यदेशावधिज्ञानं प्रत्यक्षं जानातीत्यनेन द्रव्यनियमः प्ररूपितः।

१–

स ३ १२–१६ ख ॥ ३७७ ॥

≡

